ISSN: 2320-740X

# शारदा

## वार्षिकपत्रिका

रजतमहोत्सवसञ्चिका
Silver Jubilee Issue




प्रधानसम्पादकः

आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकौ

डा. राघवेन्द्रभट्टः डा. वेङ्कटरमणभट्टः



राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितः

राजीवगान्धीपरिसरः

मेणसे, शृङ्गेरी – 577139

ISSN: 2320-740X

# शारदा

## वार्षिकपत्रिका

**प्रधानसम्पादकः**

**आचार्यः ए. पि. सच्चिदानन्दः**

**सम्पादकौ**

**डा. राघवेन्द्रभट्टः**

**डा. वेङ्कटरमणभट्टः**

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितः

## राजीवगान्धीपरिसरः

मेणसे, शृङ्गेरी – 577139

# शारदा

ISSN: 2320-740X

प्रधानसम्पादकः आचार्यः ए. पि. सच्चिदानन्दः

सम्पादनसमितिः

डा. राघवेन्द्रभट्टः
डा. वेङ्कटरमणभट्टः
डा. राजेशकुमारशुक्लः
डा. कविता एस्.
श्री विनयः एम्. एस्.
श्री रवीशः एन्.
आयुष्मती सरयूः पि.
आयुष्मती योगिता दि. छत्रे
आयुष्मान् प्रदीपभट्टः के.
आयुष्मती कौसल्या वि. भट्
आयुष्मती क्षमा कामत् के.

प्रकाशनवर्षम् : 2017

© राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577139
कर्णाटकराज्यम्

प्रतिः 550

प्रकाशकः

प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी –577139
कर्णाटकराज्यम्

पृष्ठविन्यासः – रवीशः एन्, सङ्गणकप्राध्यापकः

मुद्रणम्

श्री सिरि एण्टर्प्रैसस्, शृङ्गेरी

© All rights are reserved for Publisher,
Provided that contributors are responsible for their respective writing.

# श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्, दक्षिणाम्नायश्रीशारदापीठम्, शृङ्गेरी




श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्
दक्षिणाम्नायश्रीशारदापीठम्, शृङ्गेरी – ५७७१३९

**The Administrator**
**To His Holiness Sri Jagadguru -**
**Shankaracharya Dakshinamnaya -**
**Sri Sri Sharada Peetham,**
**Sringeri – 577139 (Karnataka).**


पवित्रक्षेत्रे शृङ्गगिरौ विद्यमानं श्रीराजीवगान्धीसंस्कृतविद्यापीठं संस्कृतप्रचारं विदधद् वरीवर्ति । विद्यापीठेऽस्मिन् परुदिव ऐषमोऽपि शारदानाम्नी पत्रिका प्रकाश्यत इति विदित्वा दक्षिणाम्नायशृङ्गगिरिशारदापीठाधीश्वराः जगद्गुरुश्रीभारतीतीर्थमहास्वामिचरणाः नितरां प्रमुदितस्वान्ता अभवन् ।

इयं च पत्रिका अत्रत्यानां छात्राणां प्रज्ञायाः प्रतिभायाश्च दर्पणायते । श्रीशारदाशशिकलावतंसयोरकम्पानुकम्पया पत्रिकेयं हृद्यैः लेखनैर्विभूषिता सहृदयानां चेतांसि रञ्जयतु , विद्यापीठमिदमुत्तरोत्तरमभिवर्धताम् । अत्रत्याः छात्राः सम्यग्विद्यामधीत्य श्रेयोभाजनानि भूयासुरिति श्रीचरणा आशासते ।

इति निवेदयिता

डा. वे. रा. गौरीशङ्करः

**प्रो. पि. एन्. शास्त्री**
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. P. N. Shastry**
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभाशंसनम्

"संस्कृतं नाम दैवीवाग् अन्वाख्याता महर्षिभिः" इति प्रसिद्धोक्तिः । तादृंशि नैकानि संस्कृतवचांसि प्रत्यहं वाचं वाचं श्रावं श्रावञ्च आत्मानं धन्यं मनुते सर्वोऽपि संस्कृतलोकः । परमपवित्रेयं भारतभूमिः यत्र दैवीवाग् आविरभूत् । सौभाग्यवन्तो भारतीयाः सुरभारतीसमुपासका वयम् । संस्कृताध्ययनाध्यापनाभ्यां सनातनसंस्कृतेः न्यायवेदान्तव्याकरणज्यौतिषमीमांसादिशास्त्राणाञ्च परिरक्षणं संस्कृतज्ञानामस्माकं महत् कर्तव्यमिति विद्मो वयम् ।

राष्ट्रियसंस्कृतसंस्थानस्य स्थापनेऽपि इदमेवोद्देश्यं वर्वर्ति । अस्यां दिशि शृङ्गगिरिस्थः राजीवगान्धी परिसरः विविधैः शास्त्रज्ञैरध्यापकैः प्रतिभावद्भिश्च छात्रैः बाभ्रजीति । परिसरोऽयं रजतमहोत्सवसन्दर्भे वाग्वर्धिनीपरिषत्पक्षतः शारदानाम्नी वार्षिकी पत्रिकां विशिष्टरीत्या प्रकाशयतीत्याकर्ण्य नितान्तमानन्दमनुभवामि । विदुषां परिसरप्राध्यापकानां छात्राणाञ्च लेखैः भूयिष्ठेयं शारदा पिपठिषून् निश्चप्रचं तोषयतीति विश्वसिमि । एतत्कर्मणि कृत्स्नं मार्गदर्शनं कृतवद्भ्यः परिसरप्राचार्येभ्यः, तत्सहकारिभ्यः वाग्वर्धिनीपरिषदध्वदर्शिभ्यः परिषत्सदस्येभ्यश्च साधुवादान्व्याहरामि । छात्राणां लेखनकौशलम् अभिवर्धतामिति जगदम्बां शारदां, प्रार्थयमानः श्रीमज्जगद्गुरुश्रीश्रीभारतीतीर्थमहास्वामिनां चरणनलिनयोः सभक्तिश्रद्धं प्रणामान् निवेदयामि ।

दुर्मुख-मार्गशीर्ष-पूर्णिमा
दिनाङ्कः - 13-12-2016

प. ना. शास्त्री
(परमेश्वरनारायण शास्त्री)
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi -110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव (प्र.)
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

Prof. S. Subrahmanya Sharma
The Registrar (I/c)
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभसन्देशः

"स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इति श्रुतिभणितदिशा अध्ययनमध्यापनञ्चेति गुरुशिष्यपरम्परायाः प्रधानं कर्म । विशिष्य शास्त्राध्ययनमध्यापनञ्च संस्कृतज्ञानां परमं कर्तव्यम् । तदिदं मनसि निधाय राष्ट्रियसंस्कृतसंस्थानं संस्कृताध्ययनाध्यापनव्यवस्थां प्रकल्पयति । तन्मार्गे नितान्तम् अन्वर्थं नाम परिदधानः श्रीराजीवगान्धीपरिसरोऽयं प्रतिवर्षमिव वर्षेऽस्मिन्नपि रजतमहोत्सवाचरणसन्दर्भे शारदाख्यां वार्षिकपत्रिकां प्रकाशयतीति महते सन्तोषाय कल्पते ।

सुरभारतीसमाराधनायाम् अवसरं कल्पितवतः अस्मत्कुलपतिवर्यान् आचार्यान् परमेश्वरनारायणशास्त्रिणः विदितवेदितव्यान् प्रणमामो वयम् । प्रसङ्गेऽस्मिन् शास्त्रपरम्परापरिपोषणाय दत्तचित्तान् परिसरप्राचार्यान् अस्मन्मित्रवरान् आचार्यान् ए. पि. सच्चिदानन्दान् नमामोऽभिनन्दामश्च । वाग्वर्धिनीपरिषदध्वदर्शिभ्यां राघवेन्द्रवेङ्कटरमणभट्टाभ्यां साधुवादेन सह "विराजतां शारदापत्रिकेति" शुभाशिषो वितरामः । श्रीशारदामातुः परमानुग्रहेण जगद्गुरुश्रीचरणानामसीमानुकम्पया च समेधतां परिसरपरिवार इत्याशास्महे ।

दुर्मुख -मार्गशीर्ष-पूर्णिमा

दिनाङ्कः – 13-12-2016

( आचार्यः एस्. सुब्रह्मण्य शर्मा )
कुलसचिवः ( प्र.)

56-57, Institutional Area, Janakapuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# प्राग्भणितिः

"योऽनूचानः स नो महान्" इति छान्दसं वचः बिभ्रद् बृहत्तम–विश्वविद्यालयाभिधानं राष्ट्रियसंस्कृतसंस्थानं समस्ते देशे शोशुभ्यते । शास्त्राध्ययनाध्यापनाभ्यां संस्थानमिदं लोकविश्रुतिं प्राप्नोदिति लोकास्सर्वे संविद्रते । राष्ट्रियसंस्कृतसंस्थानस्य द्वादशसु परिसरेषु श्रीशङ्करभगवत्पादाध्युषितायां तपोऽनुष्ठानभूमौ कर्णाटकदेशस्थायां शृङ्गेर्यां विराजमानः राजीवगान्धीपरिसरः विविधशास्त्रविचक्षणैरध्यापकैर्भूयिष्ठो जिज्ञासुभिः श्रद्धावद्भिश्छात्रैरलङ्कृतः सर्वाङ्गीणाभिवृद्धिसम्पादकनानाविधकलापैर्विशिष्टं स्थानमधितिष्ठति । वर्षेऽस्मिन्नत्र रजतोत्सवः महद्वैभवेन समाचर्यमाणः वर्वर्ति ।

"स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इत्यार्षं वचः सभक्तिश्रद्धम् अनुपालयद्भिराचार्यैः परिसरीयेषु कृत्स्नेष्वपि कर्मकलापेषु अहमहमिकया भागभाग्भिरन्तेवासिभिश्च अक्षरैर्विन्यस्तैः प्रज्ञाप्रसूतैर्लेखनैर्गुणवतीयं शारदाख्या पत्रिका प्रतिवर्षमिवास्मिन्नपि हायने प्राकाश्यन्नीयत इति अमन्दानन्दसन्दोहमनुबोभूयामहे । पत्रिकायामस्यां परिसरस्य वैचक्षण्यवतां प्राध्यापकानां विद्वत्पूर्णा नैकशास्त्रीया अन्तेवासिनामपि भावगभीरा सरसाश्च लेखा न्यबन्धिषत । अध्यापकाद्गृहीतस्य ज्ञानस्य अक्षरविन्यासरूपकर्मणि छात्राणां लेखनकौशलवृद्धिः स्वीयबुद्धिवैशद्यमन्येषां जिज्ञासूनामुपकारश्च भवतीत्याशयमभिलक्ष्य प्रवृत्तेयं शारदापत्रिका नूनं पठितॄणाम् अन्तरङ्गमाह्लादयतीति विश्वसिमः ।

एनां पत्रिकां समग्रं परिशील्य साध्वीं शुभाशंसां प्रेषितवद्भ्योऽनवरतं गीर्वाणवाणीसमुपासकतत्परेभ्यः परिसरस्य श्रेयोभिवृद्धये सन्ततं दत्तचित्तेभ्योऽस्मत्कुलपतिवर्येभ्य आचार्येभ्यः प. ना. शास्त्रिवर्येभ्यो हृदयेन कृतज्ञताः समर्प्यन्ते । अस्मत्संस्थानस्य कुलसचिवेभ्यो विकासे नः कृतसङ्कल्पेभ्यो नैकविद्याप्रवीणेभ्य आचार्येभ्यः एस्. सुब्रह्मण्यशर्मभ्यः नतिततीः समर्पयामः ।

रजतमहोत्सवविशेषाङ्कत्वेन मनोहारिणीं विद्वज्जनविनोदिनीं शारदापत्रिकां प्रकाशयितुं सङ्कल्पं विधाय सत्रारम्भात् परिश्रान्तवद्भ्यां वाग्वर्धिनीपरिषदोऽध्वदर्शिभ्यां डा. राघवेन्द्रभट्ट–डा. वेङ्कटरमणभट्टाभ्यां धन्यवादान् व्याहरामः । श्रमसाध्येऽस्मिन् कर्मणि सहकृतवद्भ्यः पत्रिकासम्पादनसमितिसदस्येभ्य आचार्येभ्यः अन्तेवासिभ्यश्च शुभं कामयामहे ।

परिसरस्यास्य सकलविधश्रेयसे साफल्याय च निदानं तुङ्गातटनिवासिन्या वागधिष्ठात्र्या जगदम्बायाः शारदामातुः असीमकृपाविशेषः तथैव विद्यातपोमूर्तीनां जगद्गुरूणाम् अनन्तश्रीविभूषितानां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्च सम्पूर्णानुग्रहविशेषश्चेति श्रीशारदाम्बां श्रीगुरुचरणांश्च सभक्तिश्रद्धं प्रणमामः ।

इत्थं

विद्वज्जनविधेयः

ए.पी.सच्चिदानन्दः

(आचार्यः ए. पि. सच्चिदानन्दः)



डा. राघवेन्द्रभट्टः



डा. वेङ्कटरमण एस्.भट्टः

# सम्पादकीयम्

समूलध्वान्तहन्तारं प्रदीपं तत्त्वदर्शकम् ।
श्रुतीनां परमं गुह्यमोङ्कारमक्षरं नुमः ॥

शास्त्राध्ययनेन विवेकलाभो भवति । विवेकलब्ध्या धर्माधर्मप्रवृत्तिनिवृत्ती ज्ञायेते । धर्मे प्रवृत्तिरधर्मान्निवृत्तिश्च परमार्थसाधनोपायेषु आद्योपायः । आयत्तोपाय एव पुरुषः पुरुषार्थाय प्रवर्तेत । तत इन्द्रियजयादिसाधनद्वारा तेन तत्त्वं जिज्ञासितव्यम् । तद्विदित्वा तदेव भवेदिति आत्यन्तिकं लक्ष्यम् । तस्य प्राप्तये तत्त्वजिज्ञासा, तस्या इन्द्रियनिग्रहः, तस्य च धर्माधर्मविवेकः, तस्य पुनः शास्त्राध्ययनमिति उत्तरोत्तरं प्रति पूर्वपूर्वकारणता वर्तते । तेन मनुष्यस्य आद्यं कर्तव्यं शास्त्राध्ययनमेव इत्यायाति । नानाविधप्रतिबन्धकपाशबद्धान् जनान् उद्दिधीर्षया महर्षयः शास्त्राणि प्रणिन्यिरे ।

विवेकिनो विरक्तस्य शमादिगुणशालिनः ।
मुमुक्षोरेव हि ब्रह्मजिज्ञासा योग्यता मता ॥

ब्रह्मजिज्ञासोराद्या योग्यता विवेकः। मनीषितामभीप्सोरपि स मुख्यः । सच्छास्त्रजन्मा स भवति । तस्मात् लोके शास्त्राणामाविर्भावो बभूव ।

महर्षयस्तानि शास्त्राणि तच्छिष्यान् उपदिदिशुः । ते पुनस्तच्छिष्यानिति शास्त्रोपदेशपरम्परा भारतभूमौ विशिष्यते । शास्त्रसंरक्षणसंवर्धनतत्परं सत् राष्ट्रिययसंस्कृतसंस्थानं तत्र मूर्धनि तिष्ठति । भारते नानाप्रदेशेषु स्थितेषु तदीयपरिसरेषु संस्कृतशास्त्रावनकार्यं प्रवर्तते ।

तत्र शृङ्गगिरौ विद्यमानः राजीवगान्धीपरिसरः अन्यतमः । शिक्षासाहित्यज्यौतिष-व्याकरणन्यायमीमांसावेदान्तशास्त्राणां विशिष्टतया अध्यापनमत्र प्रवर्तते । विद्यापीठस्यास्य शिष्याणां शास्त्रशिक्षायै व्यापारयतः वत्सराणां चतुर्विंशत्या पूर्णस्य एतर्हि रजतमहोत्सवकालः ।

परिसरेऽस्मिन् अध्यापनपद्धतिषु अन्तेवसद्भिरधीतानां शास्त्रीयविषयाणां स्थिरीकरणाय वक्तृत्वसम्पादनाय च प्रतिगुरुवासरं वाग्वर्धिनीपरिषद्द्वारा सभासञ्चालनं विशिष्यते । लेखननैपुणीसंवर्धनाय शारदा वार्षिकी पत्रिका प्रकाश्यते । हायनेऽस्मिन् पत्रिकेयं संस्कृत-हिन्दी-कन्नडाङ्ग्लभाषासु छात्राणामध्यापकानाञ्च बहुभिर्लेखैः सम्पन्नास्ते ।

अस्याः पत्रिकायाः प्रकाशनकर्मणेऽनुमतिं प्रदाय शुभसन्देशं च वितीर्य आवां समुदबोधयन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्याः परमेश्वरनारायणशास्त्रिवर्याः, कुलसचिवाः आचार्याः सुब्रह्मण्यशर्ममहाभागाः, परिसरप्राचार्याः आचार्याः ए. पि. सच्चिदानन्दमहोदयाश्च । तान् सप्रश्रयं प्रणवावः। लेखान् प्रदाय उपकृतवद्भ्यः परिसरस्य प्राध्यापकेभ्यः वन्दनानि, छात्रेभ्यः साधुवादांश्च वितन्वः । काले लेखानां सम्पादनकर्म कृतवद्भ्यः सम्पादकमण्डलीसदस्येभ्यः धन्यवादं निवेदयावः। टङ्कनादिर्मणि मार्गदर्शनं कृतवद्भ्यः सङ्गणकप्राध्यापकेभ्यः श्री के. वि. शशिधरवर्येभ्यः कृतज्ञतां निवेदयावः । पत्रिकायाः पृष्ठविन्यासादिकार्येषु बहुधा सहकृतवद्भ्यः सङ्गणकविभागस्य प्राध्यापकेभ्यः श्री एन्. रवीशवर्येभ्यः हार्दान् धन्यवादान् प्रकटयावः । लेखानां टङ्कनादिकार्येषु सहकृतवद्भ्यः योगिताछत्रे-क्षमाकामत्-सरयू-कौसल्या-प्रदीपभट्ट-गोपालकृष्णहङ्गारि-पद्मनाभ अडिग-गणेशप्रसाद प्रभृतिभ्यः परिसरच्छात्रेभ्यः साधुवादान् वितन्वहे । येषां दिव्यानुग्रहः सर्वात्मना परिसरमिमं संरक्षति, तेषां ज्ञानविरागतपोधनानां जगद्गुरूणां दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां श्रीश्रीभारतीतीर्थमहास्वामिनां तथा तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनां चरणाम्बुजयोः सभक्तिश्रद्धं प्रणतिसहस्रं समर्पयावः ।

सम्पादकौ

डा. राघवेन्द्रभट्टः

डा. वेङ्कटरमणभट्टः

# सम्पादनसमितिः


डा. राघवेन्द्रभट्टः


डा. वेङ्कटरमणभट्टः


डा. राजेशकुमारशुक्लः


डा. कविता एस्.


श्री विनयः एम्. एस्.


श्री रवीशः एन्.


कु. सरयूः पि.


कु. योगिता दि. छत्रे


कु. प्रदीपभट्टः के.


कु. कौसल्या वि. भट्


कु. क्षमा कामत् के.

## शारदाप्रशस्तिः

- सूर्यहेब्बार् ए., आचार्यद्वितीयवर्षम्

शारदानुग्रहं सन्ततं बिभ्रती
शारदस्यामृतांशोर्द्युतिं तन्वती ।
शारदासन्निधौ तोषयन्ती बुधान्
शारदा राजते वार्षिकी पत्रिका ॥१॥

पाठने लेखने टङ्कने चिन्तने
शोधने चित्रणे दोषसम्मार्जने ।
सर्वकार्येषु नः प्रेरयन्ती सदा
शारदा राजते वार्षिकी पत्रिका ॥२॥

लेखनैः शोभिता चित्रणैर्मण्डिता
चिन्तनैः पूरिता गीतकै राजिता ।
सुन्दरैर्भावचित्रैर्भृशं भूषिता
शारदा राजते वार्षिकी पत्रिका ॥३॥

संस्कृतं कुत्रचित् कन्नडं कुत्रचित्
राष्ट्रभाषां क्वचिच्चाङ्ग्लभाषां क्वचित् ।
दर्शयन्तीह सा भिन्नभाषामयी
शारदा राजते वार्षिकी पत्रिका ॥४॥

छात्रसंवर्धनं शास्त्रसंरक्षणं
काव्यसंपोषणं चिन्तने प्रेरणम् ।
लेखने तत्परत्वं च या कुर्वन्ती
शारदा राजते वार्षिकी पत्रिका॥५॥

या पुरा शारदा निर्मिता नैव सा
मे प्रिया शारदापत्रिकेयं प्रिया ।
स्यादिति ब्रह्मणश्चिन्तने हेतुका
शारदा राजते वार्षिकी पत्रिका ॥६॥

ज्ञानदा पुष्टिदा तुष्टिदा सौख्यदा
शान्तिदा तृप्तिदा शक्तिदा कीर्तिदा ।
कामधेनोः समा सर्वदा सर्वदा
शारदा राजते वार्षिकी पत्रिका ॥७॥

नूतनं चिन्तनं नूतनं चित्रणं
नूतनं लेखनं नूतना बिभ्रती ।
नूतने वत्सरे राजतेऽस्मिन्महे
शारदा राजते वार्षिकी पत्रिका ॥८॥

---

## वाग्वर्धिनीप्रशस्तिः

- योगिता दि. छत्रे, आचार्यप्रथमवर्षम्

हे वाग्वर्धिनि ! शिष्यलोकजननि ! प्रेष्ठं त्वदीयं सदा
वात्सल्यं निखिलान् प्रबुद्धतनुजान् पायाद्धि सर्वप्रदे ।
शास्त्रं सन्निधिमानय प्रकुरु तत्पुत्रेषु रागं चिरं
नित्यं त्वत्पदसेवने कृतधियः शास्त्रावनं कुर्महे ॥

दूरीकृत्य भयादिकष्टशतकं छात्रेषु पूर्णं नवं
विश्वासं ननु जागरय्य हृदये वक्तृत्वसम्पादिनी ।
क्रीडायां प्रगतिं तथा निपुणतां शास्त्रेषु विद्यार्थिनाम्
अस्माकं गुणवर्धनं विदधती वाग्वर्धिनी राजताम् ॥

## ज्यौतिषविभागः



प्रो. ए. पि. सच्चिदानन्दः
विभागाध्यक्षः



डा. रामकृष्णपेजत्तायः
संविदध्यापकः



डा. मुरलिकृष्णः टि.
संविदध्यापकः



डा. प्रसादभट्टः
अतिथ्यध्यापकः

## अद्वैतवेदान्तविभागः



प्रो. महाबलेश्वर पि. भट्टः
विभागाध्यक्षः



डा. गणेश ईश्वर भट्टः
सहायकाचार्यः



डा. श्रीकरः जि. एन्.
संविदध्यापकः



डा. गणपति वि. हेगडे
संविदध्यापकः

## मीमांसाविभागः



प्रो. सुब्राय वि. भट्टः
विभागाध्यक्षः



डा. सूर्यनारायणभट्टः
सहायकाचार्यः



डा. वेङ्कटेशताताचार्यः
सहायकाचार्यः

# साहित्यविभागः



**प्रो. इन्दिरा पि.**
विभागाध्यक्षा



**डा. राघवेन्द्रभट्टः**
सहायकाचार्यः



**डा. चन्द्रकला आर्. कोण्डि**
सहायकाचार्या



**डा. विनयकुमारकोम्पेल्लिः**
संविदध्यापकः



**डा. श्रीनिवासमूर्तिः**
अतिथ्यध्यापकः

# नव्यन्यायविभागः



**प्रो. का. इ. मधुसूदनः**
विभागाध्यक्षः



**डा. वि. नवीनहोळ्ळः**
सहायकाचार्यः



**विद्वान् श्यामसुन्दरः ए.**
संविदध्यापकः



**डा. आर्. नवीनः**
संविदध्यापकः

## नव्यव्याकरणविभागः



डा. सि. एस्. एस्. नरसिंहमूर्तिः
विभागाध्यक्षः



डा. चन्द्रशेखरभट्टः
सहायकाचार्यः



डा. कृष्णानन्तपद्मनाभम्
सहायकाचार्यः



डा. प्रमोदभट्टः
अतिथ्यध्यापकः



विदुषी सविता आर्या
अतिथ्यध्यापिका

## शिक्षाशास्त्रविभागः



डा. चन्द्रकान्तः
विभागाध्यक्षः



डा. रामचन्द्रुलबालाजि
सहायकाचार्यः



डा. हरिप्रसादः के.
सहायकाचार्यः



डा. गणेश ति. पण्डितः
सहायकाचार्यः

## शिक्षाशास्त्रविभागः


डा. वेङ्कटरमण एस्. भट्टः
सहायकाचार्यः


डा. नारायणवैद्यः
अतिथ्यध्यापकः


डा. अरविन्दकुमारः
अतिथ्यध्यापकः

## आधुनिकविषयविभागः


डा. राजेशकुमारशुक्लः
संविदध्यापकः (हिन्दीभाषा )


डा. कविता एस्
संविदध्यापिका (कन्नडभाषा)


डा. प्रभाकरः एम्. ए.
संविदध्यापकः (इतिहासः)


श्री. विनयः एम्. एस्.
संविदध्यापकः (आङ्ग्लभाषा)


श्री रामचन्द्रः एच्. डि.
अतिथ्यध्यापकः (क्रीडा)


श्री शशिधरः के. वि.
अतिथ्यध्यापकः (सङ्गणकम्)


श्री रवीशः एन्.
अतिथ्यध्यापकः (सङ्गणकम्)

## डिप्लोमोविभागः



डा. हिमांशुकुमारनन्दा
संविदध्यापकः (वास्तु)



श्री. रमानन्दभट्टः
संविदध्यापकः (ज्यौतिषम्)

## परियोजनासहायकौ



श्री विनायकभट्टः



श्री मञ्जुनाथभट्टः

## स्वाध्यायकेन्द्रम्



श्री. कु. वेङ्कटेशमूर्तिः
अध्वदर्शी



श्री पृथ्वीराजः के.
डि. ई. ओ.



श्री सन्दीपः
एम्. टि. एस्.

## ग्रन्थालयः



श्री बेनुधरमोहापात्रः
विश्रान्तसहायकग्रन्थपालः



श्री कुमारः
एम्. टि. एस्



श्रीमती सिद्दम्मा
एम्. टि. एस्



श्रीमती श्रुतिश्रीः
डी. ई. ओ



श्रीमती शुभा
एम्. टि. एस्

# वाग्वर्धिनीपरिषत्





**डा. राघवेन्द्रभट्टः**
अध्वदर्शी

**डा. वेङ्कटरमणभट्टः**
अध्वदर्शी

# परिषत्सदस्याः



**सूर्यहेब्बारः ए.**
कार्यदर्शी



**अहल्या ए. भट्**
कार्यदर्शिनी



**रविशङ्करभट्टः के. एस्**
स्पर्धिष्णुपरिषत्कार्यदर्शी



**महेश्वरी**
स्पर्धिष्णुपरिषत्कार्यदर्शिनी



**शरण्यः पि.**
स्पर्धिष्णुपरिषत्कार्यदर्शी



**गोपालकृष्णहङ्गारि**
सांस्कृतिककार्यदर्शी



**भवानी आर्.कुरन्द्वाड्**
सांस्कृतिककार्यदर्शिनी



**श्रीपतिभट्टः**
क्रीडाकार्यदर्शी



**सनातन ओराम्**
क्रीडाकार्यदर्शी



**विद्यावती वि. भट्**
क्रीडाकार्यदर्शिनी



**सरयूः पि.**
अन्तर्जालनिर्वाहिका



**योगिता दि. छत्रे**
अन्तर्जालनिर्वाहिका



**प्रदीपभट्टः के.**
पत्रिकाकार्यदर्शी



**कौसल्या वि. भट्**
पत्रिकाकार्यदर्शिनी



**क्षमा कामत् के.**
पत्रिकाकार्यदर्शिनी







| | | | | |
|---|---|---|---|---|
| **विन्ध्या एम्. आर्.** | **अभिषेकशाण्डिल्यः** | **कार्तिकेशः के.** | **नवीन हेगडे** | **श्रीशसमीरः के. एस्.** |
| पर्यावरणकार्यदर्शिनी | पर्यावरणकार्यदर्शी | शारदाप्रसादव्यवस्थापकः | शारदाप्रसादव्यवस्थापकः | शारदाप्रसादव्यवस्थापकः |

# कक्ष्याप्रतिनिधयः








| | | | | | |
|---|---|---|---|---|---|
| **जितमन्युः के. एम्.** | **अपर्णा होळ्ळा के. ए.** | **सुदर्शनः एम्. एस्** | **कोण्डि अमृता राममूर्तिः** | **चण्डीप्रसादः** | **कीर्तिनागराजहेगडे** |
| प्राक्शास्त्रिप्रथमवर्षम् | प्राक्शास्त्रिप्रथमवर्षम् | प्राक्शास्त्रिद्वितीयवर्षम् | प्राक्शास्त्रिद्वितीयवर्षम् | शास्त्रिप्रथमवर्षम् | शास्त्रिप्रथमवर्षम् |








| | | | | | |
|---|---|---|---|---|---|
| **महेशप्रकाशदेवते** | **देवीकृष्णा एन्.** | **नन्दीशः बि. एस्.** | **श्रीवल्ली बि.** | **राघवेन्द्रदानगेरि** | **मेघश्रीः एन्.** |
| शास्त्रिद्वितीयवर्षम् | शास्त्रिद्वितीयवर्षम् | शास्त्रितृतीयवर्षम् | शास्त्रितृतीयवर्षम् | शिक्षाशास्त्रिप्रथमवर्षम् | शिक्षाशास्त्रिप्रथमवर्षम् |








| | | | | | |
|---|---|---|---|---|---|
| **कन्हैयकुमारयादवः** | **पूर्णा डि. एस्.** | **प्रमोदः जि. के.** | **सौन्दर्यलक्ष्मीः** | **टि. पद्मनाभ अडिगः** | **वाणी एम्. हेगडे** |
| शिक्षाशास्त्रिद्वितीयवर्षम् | शिक्षाशास्त्रिद्वितीयवर्षम् | आचार्यप्रथमवर्षम् | आचार्यप्रथमवर्षम् | आचार्यद्वितीयवर्षम् | आचार्यद्वितीयवर्षम् |

# विविधपरिषदाम् अध्वदर्शिनः




## श्रीशारदाविशिष्टव्याख्यानमाला

**आचार्यः सुब्राय वि. भट्टः**

मीमांसाविभागाध्यक्षः

**डा. गणेश ति. पण्डितः**

सहायकाचार्यः, शिक्षाशास्त्रविभागः

## स्पर्धिष्णुपरिषत्

**आचार्या पी. इन्दिरा**

साहित्यविभागाध्यक्षा

**डा. कृष्णानन्तपद्मनाभम्**

सहायकाचार्यः, व्याकरणविभागः







## वाक्यार्थपरिषत्

**आचार्यः का. इ. मधुसूदनः**

न्यायविभागाध्यक्षः

**डा. चन्द्रकला आर्. कोण्डि**

सहायकाचार्या, साहित्यविभागः

## क्रीडासमितिः

**डा. चन्द्रकान्तः**

शिक्षाशास्त्रविभागाध्यक्षः

**श्री रामचन्द्रः एच्. डि.**

शारीरिकशिक्षणमार्गदर्शकः




## सांस्कृतिकसमितिः



प्रो. महाबलेश्वर पि. भट्टः
विभादगाध्यक्षः
वेदान्तविभागः



डा. रामकृष्णपेजत्तायः
संविदध्यापकः
जौतिषविभागः



डा. सूर्यनारायणभट्टः
सहायकाचार्यः
मीमांसाविभागः



डा. वेङ्कटरमण एस्. भट्टः
सहायकाचार्यः
शिक्षाशास्त्रविभागः

## कार्यालयीयाः सदस्याः



श्रीमती सीतालक्ष्मीः
अनुभागाधिकारिणी



श्री एस्. के. महापात्रः
कार्यालयसहायकः



श्री गुरुराजभट्टः
यू. डि. सि.



श्री एस्. आर्. चन्द्रशेखरः
एल्. डि. सि.



श्रीमती मञ्जुळा
एल्. डि. सि.



श्रीमती सौम्या
डि. ई. ओ.



श्री दिनेशः
एम्. टि. एस्.



श्री शिवण्णः
एम्. टि. एस्.



श्री एम्. रफीकः
एम्. टि. एस्.



श्रीमती जयम्मा
स्वच्छताकर्मचारिणी



**श्रीमती तिम्मम्मा**
स्वच्छताकर्मचारिणी



**श्रीमती सावित्री**
छात्रावासनिरीक्षिका



**श्री उमेशः**
छात्रावाससहायकः



**श्रीमती अन्नपूर्णा**
स्वच्छताकर्मचारिणी



**श्रीमती पार्वती**
स्वच्छताकर्मचारिणी



**श्रीमती पद्मा**
स्वच्छताकर्मचारिणी



**श्रीमती सुन्दरी**
स्वच्छताकर्मचारिणी



**श्री एम्. बि. शङ्कर्**
रक्षणकर्मचारी




**श्री वासुपूजारी**
रक्षणकर्मचारी




**श्री सदाशिवः**
रक्षणकर्मचारी



**श्री के. चन्द्रप्पः**
रक्षणकर्मचारी




**श्री एम्. के. राजुः**
रक्षणकर्मचारी



**श्री सि. रविः**
रक्षणकर्मचारी



केन्द्रीयविद्यालयीयसंस्कृतशिक्षकाणां सेवाकालिकप्रशिक्षणस्य उद्घाटनं विधाय भाषमाणः श्रीजनार्दनहेगडेवर्यः



अन्ताराष्ट्रियोगदिवसे योगस्य महत्त्वम् इति विषये भाषमाणः डा. जयकृष्णवर्यः


वाग्वर्धिनीप्रभृतीः विविधाः परिषदः समुद्घाट्य व्याख्यानं कुर्वन्तः आचार्याः एम्. एल्. नरसिंहमूर्तिवर्याः


स्वातन्त्र्यदिवसाङ्गतया प्रवृत्ता शोभायात्रा


शिक्षकदिवससमारोहे सम्मानितः शृङ्गेरी तालूकु क्षेत्रशिक्षणाधिकारी एन्. जी. राघवेन्द्रवर्यः


शिक्षकदिवससमारोहे सम्मानितः गुड्डेतोटभवः जि. एस्. गोपालकृष्णवर्यः


हिन्दीदिवससमारोहे सम्मानितः श्रीमान् ज्ञानचन्द्रमर्मज्ञः



विश्वविद्यालयानुदानायोगस्य पुनरीक्षणसमितेः सदस्याः




संस्कृतसप्ताहम् उद्घाटयन्तः अनन्तश्रीविभूषिताः
जगद्गुरुश्रीश्रीभारतीतीर्थमहास्वामिनः श्रीश्रीविधुशेखरभारतीमहास्वामिनः च ।



संस्कृतसप्ताहसमारोहावसरे इदमित्थम् इति वैश्विकजालम्
आविष्कुर्वती प्रो. शशिप्रभाकुमारवर्या




सर्दारवल्लभभाईपटेलजयन्तिमुपलक्ष्य आचरिते
सतर्कतासप्ताहे समागताः अभ्यागताः




कन्नडराज्योत्सवाङ्गतया प्रवृत्तः यक्षगानताळमद्दलेकार्यक्रमः



नवमे अन्तःपरिसरीययुवमहोत्सवे सर्वश्रेष्ठपुरस्कारभाक्
सूर्यहेब्बारः ए



नवमे अन्तःपरिसरीययुवमहोत्सवे
सर्वश्रेष्ठपुरस्कारभाक्योगिता दि. छत्रे




नवमे अन्तःपरिसरीययुवमहोत्सवे विजयवैजयन्तीं प्राप्ताः छात्राः

# श्री भारतीतीर्थस्वर्णपदकविजेतार:



अरुणभट्टः
आचार्यस्तरः (व्याकरणम्)



जिशा आर्.
आचार्यस्तरः (अद्वैतवेदान्तः)



टि. के. नरसिंहः
आचार्यस्तरः (नव्यन्यायः)



स्वर्णदत्तः
आचार्यस्तरः (साहित्यम्)



गणेशकृष्णभट्टः
आचार्यस्तरः (ज्यौतिषम्)



गोविन्द जि. हेगडे
आचार्यस्तरः (मीमांसा)



विद्यावती वि. भट्
शास्त्रिस्तरः (साहित्यम्)



सुब्राय एच्. जे.
शास्त्रिस्तरः (मीमांसा)



सरयूः पि.
शास्त्रिस्तरः (व्याकरणम्)



दिनेशकुमारः
शास्त्रिस्तरः (ज्यौतिषम्)



राघवेन्द्रदानगेरि
शास्त्रिस्तरः (अद्वैतवेदान्तः)



सुब्रायहेगडे
शास्त्रिस्तरः (नव्यन्यायः)



क्षमा कामत् के.
प्राक्–शास्त्रिस्तरः

# प्रातिभवैभवम्



## सूर्यहेब्बारः ए., आचार्यद्वितीयवर्षम्

राष्ट्रस्तरे साहित्यभाषणस्पर्धायां प्रथमः, समस्यापूर्तिस्पर्धायां द्वितीयः, अक्षरश्लोकिस्पर्धायां तृतीयः, शास्त्रीयस्फूर्तिस्पर्धायां तृतीयः ।
राज्यस्तरीयशास्त्रीयस्पर्धायां साहित्यभाषणे प्रथमः, शास्त्रीयस्फूर्तिस्पर्धायां प्रथमः, अक्षरश्लोकिस्पर्धायां प्रथमः, समस्यापूर्तिस्पर्धायां द्वितीयः ।
नवमे अन्तःपरिसरीययुवमहोत्सवे पद्यरचनायां प्रथमः, गद्यरचनायां प्रथमः, आशुभाषणे प्रथमः, वादविवादस्पर्धायां प्रथमः ।



## योगिता दि. छत्रे, आचार्यप्रथमवर्षम्

राष्ट्रस्तरे समस्यापूर्तिस्पर्धायां तृतीया ।
राज्यस्तरीयशास्त्रीयस्पर्धायां समस्यापूर्तिस्पर्धायां प्रथमा ।
नवमे अन्तःपरिसरीययुवमहोत्सवे सुभाषितकण्ठपाठस्पर्धायां प्रथमा, हिन्दी – संस्कृतम् अनुवादस्पर्धायां प्रथमा, आङ्ग्लम् – संस्कृतम् अनुवादस्पर्धायां प्रथमा, वार्तालेखनस्पर्धायां प्रथमा ।



## उमामहेश्वरः एन्, विद्यावारिधिः

राष्ट्रस्तरे शास्त्रार्थविचारे प्रथमः ।
राज्यस्तरीयशास्त्रीयस्पर्धायां
शास्त्रार्थविचारे प्रथमः ।
नवमे अन्तःपरिसरीययुवमहोत्सवे
वादविवादे प्रथमः ।



## अहल्या ए. भट्टः, आचार्यद्वितीवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां
अक्षरश्लोकिस्पर्धायां द्वितीया ।
नवमे अन्तःपरिसरीययुवमहोत्सवे
एकपात्राभिनये प्रथमा ।
सङ्घनृत्ये प्रथमा ।



## भवानी आर्. कुरन्द्वाड्, आचार्यप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
एककसंस्कृतगीतगायने प्रथमा ।
सङ्घनृत्ये प्रथमा ।



## शशाङ्कः सि.जि., प्राक्शास्त्रिप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
एककसंस्कृतगीतगायने प्रथमः ।
एककशास्त्रीयगायने प्रथमः ।



## क्षमा कामत् के., शास्त्रिप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
सङ्गणकीयसंस्कृतस्पर्धायां प्रथमा ।
एककशास्त्रीयगायने द्वितीया ।
उच्चकूर्दने द्वितीया ।
समूहगायने द्वितीया ।



## प्रशान्त आर् गाँव्करः, विद्यावारिधिः

राष्ट्रस्तरीयशास्त्रीयस्पर्धायां
शास्त्रीयस्फूर्तिस्पर्धायां तृतीयः ।
राज्यस्तरीयशास्त्रीयस्पर्धायां
शास्त्रार्थविचारे प्रथमः ।
नवमे अन्तःपरिसरीययुवमहोत्सवे
शास्त्रीयस्फूर्तिस्पर्धायां तृतीयः ।

# प्रातिभवैभवम्



**सीता जि. भागवत्,** आचार्यद्वितीयवर्षम्

राष्ट्रस्तरे साङ्ख्ययोगभाषणे प्रथमा ।
राज्यस्तरीयशास्त्रीयस्पर्धायां
साङ्ख्ययोगभाषणे प्रथमा ।



**महीपतिः एस्. जोयिस्,** आचार्यप्रथमवर्षम्

राष्ट्रस्तरे वेदान्तभाषणे द्वितीयः।
राज्यस्तरीयशास्त्रीयस्पर्धायां
वेदान्तभाषणे प्रथमः ।



**महेश्वरी एस्,** आचार्यप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
रङ्गवल्लीस्पर्धायां प्रथमा ।
राज्यस्तरीयशास्त्रीयस्पर्धायां
वेदान्तशलाकायां तृतीया ।



**गणेश ए. भट्टः,** शास्त्रितृतीयवर्षम्

स्वर्णवल्ल्यां प्रवृत्तायां
राज्यस्तरीयस्पर्धायां
न्यायभाषणे प्रथमः ।
पुराणव्याख्याने द्वितीयः ।



**ऐश्वर्या,** शास्त्रिद्वितीयवर्षम्

राष्ट्रस्तरीयशास्त्रीयस्पर्धायां
अष्टाध्यायीकण्ठपाठे द्वितीया ।
राज्यस्तरीयशास्त्रीयस्पर्धायां
अष्टाध्यायीकण्ठपाठे प्रथमा ।



**श्रीपतिभट्टः,** आचार्यद्वितीयवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
Badminton (Doubles) प्रथमः ।
Volley Ball द्वितीयः ।



**काव्या बि. एम्.,** शास्त्रिप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
सङ्घनृत्ये प्रथमा ।
समूहगायने द्वितीया ।



**त्रिदला इ. जि.,** शास्त्रिप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
सङ्घनृत्ये प्रथमा ।
समूहगायने द्वितीया ।



**ग्रीष्मा रै बि.,** शास्त्रिप्रथमवर्षम्

नवमे अन्तःपरिसरीययुवमहोत्सवे
सङ्घनृत्ये प्रथमा ।
समूहगायने द्वितीया ।



**अपर्णा के. ए. होळ्ळा ,** प्राक्शास्त्रिप्रथमवर्षम्

राष्ट्रस्तरीयशास्त्रीयस्पर्धायां
काव्यकण्ठपाठे विशिष्टश्रेणी ।
राज्यस्तरीयशास्त्रीयस्पर्धायां
काव्यकण्ठपाठे प्रथमा ।

# प्रातिभवैभवम्



## उषा एल्. हेगडे
आचार्यद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
सङ्घनृत्ये प्रथमा ।



## किशोरकुमारः
आचार्यद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Badminton (Doubles) प्रथमः ।



## आदर्श वि. भट्टः
शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
मीमांसाभाषणे प्रथमः ।



## चिन्मय वि. भट्टः
शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
वेदान्तभाषणे प्रथमः ।



## मयूरी जोशी
शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
साहित्यभाषणे प्रथमा ।



## श्रीप्रद एम्. जोशी
शास्त्रितृतीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
200 Mts धावने द्वितीयः ।
400 Mts धावने द्वितीयः ।



## सुब्राय एच्. जे.
आचार्यप्रथमवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
मीमांसाभाषणे तृतीयः ।



## नवनीतकृष्णः जे.
शास्त्रिद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
प्रचारपत्रनिर्माणे द्वितीयः ।
व्यङ्ग्यचित्रे तृतीयः ।



## श्रीगणेश वि. भट्टः
शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
समस्यापूर्तिस्पर्धायां द्वितीयः ।
पुराणव्याख्याने तृतीयः ।



## वाणी एम्. हेगडे
आचार्यद्वितीयवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
न्यायशलाकायां द्वितीया ।



## गोपालकृष्णहङ्गारि
आचार्यद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
शास्त्रीयवादने द्वितीयः ।



## राघवेन्द्रहेगडे
आचार्यद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।

# प्रातिभवैभवम्



**मञ्जुनाथरमेशभट्टः**
आचार्यद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।



**रविशङ्करभट्टः के. एस्.**
आचार्यद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
समूहगायने द्वितीयः ।



**सौन्दर्यलक्ष्मीः**
आचार्यप्रथमवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
साहित्यशलाकायां द्वितीया ।



**गुरुप्रसादभट्टः**
आचार्यप्रथमवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
व्याकरणभाषणे द्वितीयः ।



**रमेशः बि. सि.**
शिक्षाशास्त्रिप्रथमवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
कुन्तक्षेपणस्पर्धायां द्वितीयः ।



**विनयकुमारभाग्वत्**
शस्त्रितृतीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।



**के. एम्. निरञ्जनः**
शस्त्रितृतीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।



**नरेन्द्रभाग्वत्**
शस्त्रितृतीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।



**सुजना वाल्ताजे**
शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
साहित्यभाषणे द्वितीया ।



**वेङ्कटरमणहेब्बारः**
शास्त्रिद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।



**सतीशनागपतिभट्टः**
शास्त्रिप्रथमवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
Volley - Ball द्वितीयः ।



**रञ्जिता डि.आर्.**
शास्त्रिप्रथमवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
समूहगायने द्वितीया ।

# प्रातिभवैभवम्



**दुर्गा श्रीवत्सा**
प्राक्शास्त्रिद्वितीयवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
चतुरङ्गे द्वितीया ।



**श्वेता जि. एस्.**
आचार्यद्वितीयवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
अक्षरश्लोकिस्पर्धायां तृतीया ।



**सरयूः पि.**
आचार्यप्रथमवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
व्याकरणशलाकास्पर्धायां तृतीया ।



**प्रमोदः जि. के.**
आचार्यप्रथमवर्षम्
नवमे अन्तःपरिसरीययुवमहोत्सवे
रसप्रश्नस्पर्धायां तृतीयः ।



**मलयमाइति**
आचार्यप्रथमवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
व्याकरणभाषणे तृतीयः ।



**सुब्रायहेगडे**
शिक्षाशास्त्रिप्रथमवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
धातुकण्ठपाठे तृतीयः ।



**अभिषेकशाण्डिल्यः**
शास्त्रितृतीयवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां
ज्यौतिषभाषणे तृतीयः ।
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
ज्यौतिषभाषणे तृतीयः ।



**अङ्कुश वि. भट्टः**
आचार्यप्रथमवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
व्याकरणभाषणे तृतीयः ।



**शरण्यः पि.**
शास्त्रिद्वितीयवर्षम्
स्वर्णवल्ल्यां प्रवृत्तायां राज्यस्तरीयस्पर्धायां
साहित्यभाषणे तृतीयः ।



**रोहितकुमारः**
शास्त्रितृतीयवर्षम्
तरुणोदयराज्यस्तरीयस्पर्धायां
भाषणे प्रथमः ।



**वेङ्कटेशः जि.**
शिक्षाशास्त्रिप्रथमवर्षम्
तरुणोदयराज्यस्तरीयस्पर्धायां
भाषणे सान्त्वनपुरस्कारः ।



**घनश्यामदहालः**
शास्त्रितृतीयवर्षम्
तरुणोदयराज्यस्तरीयस्पर्धायां
भाषणे सान्त्वनपुरस्कारः ।

## संस्कृतविभागः


| | लेखः | लेखकः | पृ. सं |
|---|---|---|---|
| 1. | केनोपनिषत् | आचार्यः पि. महाबलेश्वरभट्टः | 03 |
| 2. | शब्दोऽयं नित्यः | आचार्याः सुब्राय वि. भट्टः | 05 |
| 3. | अलङ्कारशास्त्रे साधारणीकरणम् | प्रो. पि. इन्दिरा | 08 |
| 4. | बाधनिरूपणम् | आचार्यः का. इ. मधुसूदनः | 13 |
| 5. | शास्त्रीयत्वञ्च शास्त्रबोधितत्वम् | डा. सि. एस्. एस्. नरसिंहमूर्तिः | 16 |
| 6. | शिक्षायां चिन्तनविमर्शः | डा. चन्द्रकान्तः | 21 |
| 7. | वेदोऽखिलविज्ञानमूलम् | डा. रामचन्द्रुलबालाजिः | 23 |
| 8. | योगः कर्मसु कौशलम् | डा. नवीनहोळ्ळः | 29 |
| 9. | वीप्सा | डा. चन्द्रशेखरभट्टः | 37 |
| 10. | अज्ञानलक्षणानि | डा. गणेश ईश्वर भट्टः | 39 |
| 11. | नाट्यधर्मीदृष्ट्या रूपकयक्षगानयोः सम्बन्धः | डा.राघवेन्द्रभट्टः | 44 |
| 12. | सूक्ष्मशरीरम् | डा. हरिप्रसादः के. | 47 |
| 13. | वक्रोक्तिः अलङ्कारः उत न ? | डा. चन्द्रकला आर्. कोण्डि | 53 |
| 14. | अथाऽतो धर्मजिज्ञासा | डा. सूर्यनारायणभट्टः | 59 |
| 15. | विदुरनीतौ शैक्षिकविचाराः | डा. गणेश ति. पण्डितः | 63 |
| 16. | शृङ्गारकरुणरसौ | डा. वेङ्कटरमणभट्टः | 66 |
| 17. | अतिदेशः | डा. एस्. वेङ्कटेशताताचार्यः | 71 |
| 18. | रूपस्वरूपविमर्शः | श्रीमान् श्यामसुन्दरः ए. | 73 |
| 19. | न्यायकुसुमाञ्जलौ अन्विताभिधानवादः | डा. आर्. नवीनः | 78 |
| 20. | क्षीणप्राया क्षात्रप्रज्ञा | डा. रामकृष्णपेजत्तायः | 83 |
| 21. | शारीरकमीमांसाशास्त्रारम्भसमर्थनम् | डा. श्रीकरः जि. एन् | 88 |
| 22. | भख्यालीहस्तप्रतिः | डा. मुरळीकृष्णः टि. | 91 |
| 23. | भामहकाव्यलक्षणविवेचनम् | डा. कोम्पेल्लि विनयकुमारः | 92 |
| 24. | संन्यासः | डा. गणपति वि. हेगडे | 95 |
| 25. | मनोरमादिशा जरायाः जरसन्यतरस्याम् इति सूत्रार्थविचारः | डा. प्रमोदभट्टः | 98 |
| 26. | अधिगमस्य प्रकाराः | डा. नारायण वैद्यः | 102 |
| 27. | "सुट् कात् पूर्वः" एकान्तः अनेकान्तो वा | विदुषी एल्. सविता आर्या | 105 |
| 28. | षड्वर्गः मिहिरसम्मतः | डा. प्रसादभट्टः | 111 |
| 29. | वारप्रवृत्तिः | विद्वान् रमानन्दभट्टः एन्. | 113 |
| 30. | भाषाकौशलानि (परिचयः) | डा. अरविन्दकुमारसोमदत्तः | 119 |
| 31. | वास्तुशास्त्रस्य डिप्लोमाकार्यक्रमस्य परिशीलनम् | डा. सुधांशुकुमार नन्दा | 121 |

| | | | |
|---|---|---|---|
| 32. | चान्द्रयोगाः | श्रीविनायकभट्टः | 125 |
| 33. | अथातः शेषलक्षणम् | श्रीमञ्जुनाथभट्टः | 127 |
| 34. | देवप्रश्ने बृहज्ञातकस्य उपयोगः | श्रीश्रीपतिः | 129 |
| 35. | विशिष्टवाचकपदानां क्वचिद् विशेष्यमात्रपरतानियमस्य विमर्शः | श्रीनारायण बी. राय्कर् | 135 |
| 36. | विभागः | कु. सुनिता भट्टः | 139 |
| 37. | न्यायमतेन जीवस्यस्य शरीराद्यतिरिक्तत्व साधनम् | श्रीयुवराज घिमिरे | 143 |
| 38. | शरद्रात्रि बालमनोरमानुरोधेन “इको यणचि” इति सूत्रार्थविचारः | श्रीमती आर्. नागकौमुदी | 146 |
| 39. | एकशः एकैकशः इत्यत्र मतभेदविचारः | श्रीशशाङ्कतिम्मण्णभट्टः | 149 |
| 40. | श्रीमद्भगवद्गीतायां निरूपितः शारीरिकविकासः | कु. प्रियाङ्का चन्द्र | 152 |
| 41. | मीमांसाशास्त्रीयग्रन्थेषु विधिभूषणस्य | | |
| 42. | वैशिष्ट्यम् | श्रीप्रशान्तगाँव्करः | 154 |
| 43. | माध्यमिकविद्यालयीयानाम् अध्यापकानां कार्यभारः परिहारोपायाश्च | श्रीश्रीकरः वि. | 156 |
| 44. | ग्रहाणां स्वरुपं स्थितिश्च | श्रीकुलदीपः | 158 |
| 45. | बुद्धोपदेशवेदान्तोपदेशयोः समन्वयात्मको निबन्धः | श्रीनिरञ्जनभट्टः | 162 |
| 46. | मीमांसावगमने ज्यौतिषम् | श्रीनागपतिः हेगडे | 165 |
| 47. | अमेरिकायाः भगिन्यः भ्रातरश्च | श्रीउमामहेश्वरः एन्. | 167 |
| 48. | ग्रहस्फुटीकरणविधिः | कु. गणेशकृष्णभट्टः | 169 |
| 49. | काव्यप्रयोजनम् | कु. अमिर बाग् | 171 |
| 50. | न्यायनये शाब्दबोधः | कु. वाणीमञ्जुनाथहेगडे | 173 |
| 51. | संस्कृतकाव्येषु पुत्रोत्सवः | कु. सूर्यहेब्बारः ए. | 176 |
| 52. | कुन्तकानुसारेण काव्यमार्गाः | कु. अभिषेक परगाँई | 179 |
| 53. | स्त्रीशिक्षायाः महत्त्वम् | कु. बिप्लबरायः | 182 |
| 54. | अलौकिकसन्निकर्षविचारः | कु. ब्रह्मानन्दः | 183 |
| 55. | सत्सङ्गतिः | कु. रजत् सुयालः | 186 |
| 56. | विद्यावतां भागवते परीक्षा | कु. राजेशभट्टः | 187 |
| 57. | सूक्ष्मशिक्षणम् | कु. सजीवचन्द्ररायः | 189 |
| 58. | व्याकरणशिक्षणे प्रणाल्यः युक्तयश्च | कु. संजयदत्तभट्टः | 192 |
| 59. | काव्यस्यात्मा ध्वनिः तद्भेदाश्च | कु. ओम् प्रकाशपण्डा | 196 |
| 60. | श्रीमद्भगवद्गीतायाम् अभिक्रमिताधिगमस्य विवेचनम् | कु. शिवम् कुमार शुक्लः | 199 |



ISSN: 2320-740X

| | | | |
|---|---|---|---|
| 61. | जैनदर्शने कर्मविवेचनम् | कु. शुभम् हातगिणे | 202 |
| 62. | गर्वभञ्जनम् | कु. सुजाता नायक् | 203 |
| 63. | शिक्षामुपकुर्वन्ति शिक्षणविधयः | कु. सुशील-लोहनी | 204 |
| 64. | श्रीमद्भगवद्गीतायां बालकानां व्यक्तित्वविकासः कथं सम्भवति? | कु. मोहित जोशी | 206 |
| 65. | वैद्यकीयशिक्षणे तान्त्रिकशिक्षणे च संस्कृतस्य प्रासङ्गिकता | कु. रोहितकुमारः | 208 |
| 66. | संस्कृतिः संस्कृताश्रिता | कु. गिरीश अ. भट्ट | 210 |
| 67. | जीवनस्य सफलतायै लक्ष्यनिर्धारणम् | कु. चण्डीप्रसादः | 213 |
| 68. | राष्ट्रियशिक्षानीतौ संस्कृतस्य महत्त्वम् | कु. नरेन्द्रकुमारगुरुरानी | 214 |
| 69. | विद्यार्थिजीवनम् | कु. राजेशकुमारजुगरण् | 216 |
| 70. | वर्तमानकालः | कु. गुरुप्रसादः | 217 |
| 71. | कर्मण्येवाधिकारस्ते मा फलेषु कदाचन | कु. महेशबाघवर | 218 |
| 72. | संस्कृतभाषायाः वैशिष्ट्यम् | कु. मनोज म. भट्टः | 220 |


## हिन्दी विभाग


| | लेखः | लेखकः | पृ. सं |
|---|---|---|---|
| 1. | भक्तिकाल 'स्वर्णयुग' नहीं – पारसयुग | डा. राजेश कुमार शुक्ल | 225 |
| 2. | स्वतन्त्रता दिवस | | 231 |
| 3. | भारत का आर्थिक इतिहास | दीपक रतूडी | 233 |
| 4. | ए माँ तू बहुत याद आती है | अभिषेक शाण्डिल्य | 235 |
| 5. | कुछ यादें...... | रोहित कुमार | 236 |
| 6. | सच्चा प्यार | किरण कुमार पटेल | 237 |
| 7. | ज्ञान हमेसा झुककर हासिल किया जा सकता है | एम. के. सी. मुण्डु | 239 |
| 8. | शिक्षक वह पारस पत्थर है | हितेश भट्ट | 240 |
| 9. | शिक्षा | | 240 |
| 10. | मैंने देखा | पंकज पारीक | 241 |

## English Section


| | Article | Written By | Page. No |
|---|---|---|---|
| 1. | Plagiarism | Vinay M S | 245 |
| 2. | Benefits of Yoga and Aerobics | Ramachandra H.D | 248 |
| 3. | Whatsapp Etiquette | Raveesha N | 251 |
| 4. | Tricks to Handle the PC | Gopalakrishna Hangari | 258 |
| 5. | Five Senses | Yogita D. Chhatre | 263 |
| 6. | The Relation between Our Indian Culture and Our Health | Sujaataa Naik | 263 |
| 7. | Failures Are the Pillars of Success | Suraj Kumar Patel | 265 |
| 8. | A Memorable, Unforgettable Experience | Kausalya Vittal Bhat | 266 |
| 9. | Writers and Their Books | Nandeesh B.S | 269 |
| 10. | Value of Life | Sharanya P. | 273 |
| 11. | Some Quotes by Abdul Kalam | Amrutha.R.Kondi | 274 |
| 12. | Interesting Facts about India | Manaswini.K.G | 276 |
| 13. | Goal Quotes | Raj Kishor Jha | 277 |


## ಕನ್ನಡ ವಿಭಾಗ


| | ಲೇಖನ | ಲೇಖಕರು | ಪು. ಸಂ |
|---|---|---|---|
| 1. | ಆಧುನಿಕತೆ–ಪರಂಪರೆ: ಇಂದು ನೆನ್ನೆಗಳ ನಡುವೆ | ಡಾ ॥ ಕವಿತಾ ಎಸ್, | 281 |
| 2. | ಶಾಸನೋಕ್ತ ಶೃಂಗೇರಿ ಶ್ರೀ ಜಗದ್ಗುರುಗಳು | ಡಾ. ಎಂ. ಎ. ಪ್ರಭಾಕರ | 286 |
| 3. | ಫಲಾಪೇಕ್ಷೆ ಇಲ್ಲದೆ ಫಲ ಕೊಡುವ ಸಸ್ಯಸಂಕುಲ | ದಿನೇಶ್ ಎಸ್. | 288 |
| 4. | ಕವನ ಸಂಕಲನ | ಶ್ರೀಮತಿ. ಮಂಜುಳಾ. ಎಸ್ | 289 |
| 5. | ಲೀನವಾಯಿತು ಆತ್ಮ | ಪದ್ಮನಾಭ ಅಡಿಗ ಟಿ. | 290 |
| 6. | ಮುಸ್ಸಂಜೆ | ಚಂದನಾ ದೀಕ್ಷಿತ್ | 291 |
| 7. | ಭ್ರಮಾಲೋಕ | ವೆಂಕಟೇಶ ಹೆಗಡೆ | 291 |
| 8. | ಮಾಯಾನಗರಿ ರಜನೀ | ಮಹೇಶ್ವರೀ, | 294 |
| 9. | ಸಂಸ್ಕೃತ ಶಿಕ್ಷಣದ ಅವಶ್ಯಕತೆ | ಚರಣ್ ರಾಜ್ ಟಿ. ಎಸ್, | 295 |
| 10. | ಹಸ್ತಲಾಘವ | ಪಾರ್ಶ್ವನಾಥ ಜೈನ | 296 |
| 11. | ಭಾರತದ ಕ್ರೀಡಾ ಕ್ಷೇತ್ರ | ಅಕ್ಷಯ ಭಟ್ಟ. | 298 |
| 12. | ಗುರಿ ಗುರು | ರಮೇಶ್. ಬಿ. ಸಿ. | 301 |
| 13. | ಮುಸ್ಸಂಜೆ | ಸಮರ್ಥ ಬಿ ಎಮ್ | 303 |
| 14. | ಸ್ವರ್ಗಯಾತ್ರೆ | ಅನಿರುದ್ಧ ಕೊಂಡಿ, | 304 |
| 15. | "ದಶಾನನಂ ನಾಗಚಂದ್ರನ ದೃಷ್ಟಿಪಥದೊಳಗೆ" | ಮಹೇಶ ದೇವತೆ | 307 |
| 16. | ಮುಸ್ಸಂಜೆ | ಶ್ರೀಗಣೇಶ ವಿ. ಭಟ್ | 312 |
| 17. | ಕನ್ನಡ ಭಾಷೆಯನ್ನುಳಿಸುವಲ್ಲಿ ಕನ್ನಡಿಗರ ಪಾತ್ರ | ಕೀರ್ತಿ ಹೆಗಡೆ | 312 |
| 18. | ಗೆಳತಿಯ ನೆನಪು | ಚೈತ್ರಾ ಹೆಗಡೆ | 315 |
| 19. | ''ಅರಿವೇ ಗುರು'' | ಯಶಸ್ವಿನಿ ಹೆಗಡೆ | 315 |



ISSN: 2320-740X

# संस्कृतविभागः

ISSN: 2320-740X

# केनोपनिषत्

✍ आचार्यः पि. महाबलेश्वरभट्टः
वेदान्तविभागाध्यक्षः

**शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।**
**किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥**

उपनिषत्पदस्य ब्रह्मविद्या इत्यर्थं निरूपयन्ति आचार्यशङ्करभगवत्पादाः । उप + नि उपसर्गद्वयपूर्वक- षदलृ विशरणगत्यवसादनार्थकधातोः कर्तरि क्विप्प्रत्यये उपनिषत् इति रूपं सिध्यति । ये नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नाः परमपुरुषार्थमोक्षेच्छवः ते सद्गुरुमुपसद्य अनया वेदान्तविचाररूपया विद्यया निःश्रेयससिद्धिः साध्येति निश्चित्य सीदन्ति सेवन्ते श्रवणमनननिदिध्यासनानि कुर्वन्ति तेषां गर्भजन्मजरारोगादिकल्पितं प्रमातृत्वकर्तृत्वभोक्तृत्वादि बन्धनमवसादयति समूलं नाशयतीति उपनिषत्पदस्य मुख्यार्थः प्रकृतिप्रत्ययविभागेन सिध्यति । उपनिषदमधीते उपनिषदं पाठयामः इत्येवं प्रामाणिकप्रयोगप्राचुर्यदर्शनात् ग्रन्थेऽपि शब्दोऽयं प्रयुज्यमानो दृश्यते । ब्रह्मविद्याध्ययनसाधनत्वात् भाक्तप्रयोगः “तेजो वै घृतम्” लाङ्गलं गवादीन् उद्वहतीति प्रयोगतुल्यः । सेयं ब्रह्मविद्या उपनिषत्पदाभिधेया “परा विद्या” इति उपनिषत्स्वेव विख्याता “द्वे विद्ये वेदितव्ये परा चैवापरा च ।” तत्रापरा ऋग्वेदादिरूपा अनित्यफलप्रदा कर्मविद्या । परा अक्षरब्रह्मसम्पादिका मोक्षफला ब्रह्मविद्या । सेयमुपनिषत् वेदान्तः, अध्यात्मशास्त्रं, शारीरकमीमांसा, आत्मविद्या चेत्येवं बहुधा व्यवह्रियते शास्त्रविद्भिः लौकिकैश्च । “अध्यात्मविद्या विद्यानाम्” इति भगवान् गीताचार्यः श्रीकृष्णः अर्जुनाय विभूतियोगे उपादिशत् । समग्रोपनिषत्सारसङ्ग्रहात्मिका भगवद्गीता “गीतोपनिषत्” इति सार्वजनीनम् । प्रत्यध्यायान्ते “भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायाम्” इति पुष्पिका विचारमिमं पुष्णाति ।

तदिदम् उपनिषत्ब्रह्मवाक्यविचारात्मकं वेदान्तशास्त्रं प्रस्थानत्रयात्मकं वरीवर्ति । श्रुतिप्रस्थानम् उपनिषदः । स्मृतिप्रस्थानं भगवद्गीता । युक्तिप्रस्थानं ब्रह्मसूत्राणि । तत्र अपौरुषेया श्रुतिः उपनिषद्रूपा इतरप्रस्थानद्वयस्य आधारशिलायते । स्मृतियुक्तीनां श्रुतिमूलकत्वेनैव प्रामाण्यम् । श्रुतिस्मृतिवचांसि विचार्य न्यायेनैदम्पर्यं निर्णेतुं सूत्रप्रस्थानं प्रवर्तते । तथा चोक्तम् भाष्यकृद्भिः – “वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्” इति ।

अथ शतशः उपनिषदः श्रूयन्ते । तत्र दशपञ्चदश उपनिषदः प्रमुखाः सन्ति यासां भाष्यं

ISSN: 2320-740X

भगवत्पादैः शङ्कराचार्यैः प्राणायि। सूत्रभाष्ये क्वचिदधिकरणेषु विषयवाक्यतया स्वीकृत्य विचारिताश्च। बहुत्र प्रस्थानभाष्यत्रये समुद्धृताश्च।

मुक्तिकोपनिषदि बह्वीनामुपनिषदां नामानि श्रूयन्ते। तत्र "माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये" इति माण्डूक्योपनिषदः प्राधान्यं निरूपितम्। कथासंवादादिकं विहाय ओंकारस्य व्याख्यानं जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयनिरूपणपुरस्सरं प्रत्यगात्मैक्यम् अद्वैतं ब्रह्म प्रतिपादितम्। परमपूज्यानां गौडपादाचार्याणां कारिकाणां व्याख्यानं च विधाय भाष्यकारैः स्पष्टीकृतं ब्रह्मतत्वम्। खण्डचतुष्टयेन द्वादशमन्त्रैर्निरूपितं प्रत्यगात्मतत्त्वं द्विशताधिकाभिः कारिकाभिः व्यक्तीकृतं गौडपादैः।

अथापि केनोपनिषदः समस्ति किञ्चिद् वैशिष्ट्यं तन्निरूपणे प्रवृत्तमिदं लेखनम्। सामवेदस्य तलवकारशाखायां समाम्नातेयम् उपनिषत्काण्डचतुष्टयात्मना विभक्ता। चतुस्त्रिंशत्मन्त्राः समाम्नाताः ह्यत्र। पदभाष्यलेखनेन असन्तुष्टाः भाष्यकृतः वाक्यभाष्यमपि रचयामासुः। शारीरकमीमांसायाम् अस्याः वाक्यानि न निर्णीतानि। अतः वाक्यभाष्येण तात्पर्यार्थं प्रकटीचक्रुः भाष्यकाराः। "केनेषितं पतति प्रेषितं मनः?" इति प्रश्नवाक्येन यतः समारब्धा अतः केनोपनिषद् इति नाम प्राप्तम्। ईशावास्यमिति समारब्धा ईशावास्योपनिषद् इति विख्याता। एवं केनोपनिषद्।

चक्षुर्मन आदीनाम् इन्द्रियाणां प्रेरकः कः ? कथं वा प्रेरयति? प्रश्नोऽयं न संशयमूलः, किन्तु जिज्ञासामूलः। इषितप्रेषितप्रयोगस्वारस्येन अस्तिकश्चित् अचेतनानां चक्षुरादीनां प्रेरयिता। न दृष्टचरा लोके स्वतन्त्रतया प्रवृत्तिरचेतनानां रथयन्त्रादीनाम्। किञ्चान्यत् "सङ्घातः परार्थः" इत्यस्ति शास्त्रवित्समयः। मृत्काष्ठोपलादिसङ्घातः गेहादिः यथा व्यतिरिक्तगृहस्वाम्यर्थः तर्हि शरीरेन्द्रियादिसङ्घातः तदतिरिक्तचेतनपुरुषार्थः। तथा च प्रयोगः – चक्षुरादिप्रकृतिः चेतनपूर्विका अचेतनप्रवृत्तित्वात् रथादिप्रवृत्तिवत्। शरीरेन्द्रियसङ्घातः परार्थः संहतत्वात् गृहादिवत्। पुत्रदेहेन्द्रियमनोबुद्धिशून्यात्मवादाः श्रुतितात्पर्यवर्जितत्वेन एतेन परास्ताः।

सेयं प्रत्यगात्मजिज्ञासा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तकर्मानुष्ठानेन नितान्तनिर्मलस्वान्तस्य श्रद्धाभक्तिध्यानकृतभगवदुपासनेन शान्तमनसः दीर्घकालनिरन्तर-सत्कारसेवितवशीकृतचित्तस्य पुरुषधौरेयस्यैव भवति। कर्मभक्तियोगादीनि साधनानि प्रत्यगात्मजिज्ञासायाः उपकारकाणि भवन्ति निष्कामचित्तस्येति प्रत्यपादि भाष्यकारैः अस्या उपनिषदः उपोद्घाते।

गुरुशिष्यसंवादरूपेण आत्मैक्यं परमरहस्यं बुबोधयिषया प्रवृत्तेयम्। प्रथमं तावत् साधनचतुष्टयसम्पन्नः शिष्यः प्रथमेन मन्त्रेण स्वजिज्ञासां प्रकटयति केनेषितं पतति इत्यादिना। मनसादीनाम् इन्द्रियाणां प्रेरकः कः ? कथं वा प्रेरयतीति प्रष्टुरभिप्रायः।


ISSN: 2320-740X

शिष्यजिज्ञासां शमयितुं गुरुः प्रोवाच – "श्रोत्रश्च श्रोत्रम्" इत्यादिना । असौ एवं विशिष्टः इन्द्रियाणां प्रेरकः इति वक्तव्ये श्रोत्रस्य श्रोत्रम् इति वचनस्य कोऽभिप्रायः ? अत्रेदं रहस्यं यत् अहं पश्यामि, अहं शृणोमि इत्येवम् अनुभवानुसारेण नेत्रश्रोत्रादिषु आत्मबुद्धिः लौकिकानां दृष्टचरा । पण्डिताः अपि लोकसामान्यं नातिवर्तन्ते । वस्तुतः रूपप्रकाशनसामर्थ्यं यच्चाक्षुषः एवं शब्दप्रकाशन आकृतिर्वा श्रोत्रस्य विद्यते सा श्रोत्रनेत्रयोः न भवतः । किन्तु यस्मिन् चैतन्ये सति रूपं प्रकाशयति चक्षुः असति न प्रकाशयति तदेव चक्षुः वस्तुतः । एवं श्रोत्रस्य शब्दाभिन्नव्यञ्जनसामर्थ्यमपि चैतन्यायत्तमेव । एवं समेषामपि इन्द्रियाणां सामर्थ्यं कूटस्थचैतन्याधीनम् ।

तस्मात् भौतिकेषु इन्द्रियेषु आत्मबुद्धिः कर्तव्या । तत्तदिन्द्रियवृत्युपलक्षिते चैतन्ये आत्मबुद्धिः निधेया । एवं सर्वात्मबुद्धिसम्पादनेन अमृतत्वं भजन्ते । किञ्चेदं चैतन्यं आत्माभिधेयं नेन्द्रियाणां विषयः इन्द्रियव्यापारेण अस्तीति अनुमातव्यम् । अपरोक्षा हि प्रत्यगात्मप्रतीतिः । विदिताविदिताभ्याम् अन्यदिति निषेधमुखेन ब्रह्म उपदिश्य तदेव ब्रह्म त्वं विद्धि इति अभ्यासेन आत्मैक्यं प्रतिपादयति प्रथमखण्दे । द्वितीये "यदि मन्यसे" इत्यनेन शिष्यबुद्धिं परीक्षते । सोऽपि नोनवेदेति वेद च इत्यनेन आचार्यवचनम् अनुवदति । पश्चात् गुरुशिष्यसंवादेन सिद्धमर्थं सुस्पष्टयति – यस्यामतं तस्य मतं मतं यस्य न वेद सः ।

अविज्ञातं विज्ञातं विज्ञातमविज्ञातम् इति विद्वदनुभवेन विदिताविदिताभ्याम् अन्यत् यत् तदेव स्वरूपं तदेव ब्रह्मेति रहस्यं विवक्षति ।

पुनः यक्षोपारव्यानेन बहुधा दैवीसम्पदः उद्देश्यं करोति । देवानां दुर्लभेयं ब्रह्मविद्या हैमवत्या उमया इन्द्राय देवराजाय उपदिष्टा । एवं भगवत्या त्रिपुराभिधया देव्या अनुग्रहीता वयं जीवने अग्रतलं भजाम इति शम् ।

**********

## शब्दोऽयं नित्यः

✍ **प्रो. सुब्राय वि. भट्टः**

**मीमांसाविभागाध्यक्षः**

लोके हि दैनन्दिनः पारस्परिकः व्यवहारः शब्दमूलकः । मनुष्याणां परस्परम् अभिप्रायविनिमयसाधनं शब्द एव । अत एव आह आचार्यः दण्डी – "इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते ॥" इति ।

शब्दस्य अयं स्वभावः यदर्थज्ञानजनकत्वम् । अर्थप्रकाशकत्वादेव शब्दस्य ज्योतिष्ट्वेन व्यवहारः । मनुकुले वर्णात्मकः शब्दः अथवा क्वचित् संज्ञाबोधकत्वेन ध्वन्यात्मको वा सर्वोऽपि अर्थप्रकाशकः । एवमेव प्राणिपक्षिसङ्कुलेऽपि तत्तत्पारिभाषिकत्वेन शब्द एव अर्थं बोधयति । उच्चारणभेदेन स्वरभेदेन वा गवादयः प्राणिनः, काकशुकादयः पक्षिणश्च आहारादिप्राप्तिं वा अपायादिसूचनां वा अवगच्छन्ति इति तत्तत्प्राणिशास्त्रज्ञानामेकाभिप्रायः । सर्वमपि संवहनकार्यं लौकिकं शब्दमूलकम् ।

धर्माधर्मनिरूपणे प्रवृत्तनां मीमांसकानां शब्दस्वरूपचिन्तने का सङ्गतिः इति चेत् – परमपुरुषार्थसाधनस्य धर्मस्य निष्कृष्टस्वरूपचिन्तनमेव मीमांसाशास्त्रस्य विषयः । स च धर्मः अलौकिकः । अत एव अतीन्द्रियः । तत्र च अपौरुषेयो वेद एव प्रमाणम् । स च वेदः शब्दराशिरूपः । अनधिगताबाधितार्थबोधकत्वात् वेदस्य प्रामाण्यं साधितम् । वाच्यस्यार्थस्य प्रामाण्यसिद्धये वाचकस्य शब्दस्यापि प्रामाण्यमपेक्षितमेव । यदि वाचकः शब्दः अनित्यः अप्रमाणभूतः स्यात् कथं स नित्यमबाधितञ्चार्थं बोधयेत् ? अतः शब्दस्वरूपं किमिति गवेषणे प्रवृत्ताः मीमांसकाः ।

स च शब्दः द्विविधः । वर्णात्मकः ध्वन्यात्मकश्च । वर्णात्मकशब्दः प्रकृतविषयः । शब्दः नित्यः विभुश्चेति मीमांसकमर्यादा । तत्र सन्ति वैदिकानि प्रमाणानि । लौकिकाश्च युक्तयः । अत्र विप्रतिपत्तयः बहुधा श्रूयन्ते । यथा शब्दः अनित्यः । उत्पन्नो गकारः नष्टो गकारः इत्यादिलोकप्रतीतेः । उत्पादविनाशशालित्वादनित्यः । एवमेव कण्ठताल्वादिव्यापारानन्तरं शब्दः उपलभ्यते । प्रयत्नानन्तरोपलब्धिदर्शनात् शब्दः जन्यः इति प्रतीयते । यज्जन्यं तदनित्यम् एवं यद्विषयः प्रयत्नः सोऽनित्यः इति व्याप्तेः । एवमनुमानमपि शब्दः जन्यः प्रयत्नानन्तरोपलब्धेः, कुलालक्रियानन्तरोपलब्धघटवत् इति ।

तत्रेदं समाधानम् – मीमांसकाः शब्दः ध्वनिव्यङ्ग्यः इति वदन्ति । अभिव्यञ्जकः ध्वनिः अभिव्यङ्ग्यः शब्दः । अथवा कण्ठताल्वादिव्यापारव्यङ्ग्यः शब्दः । तावता न जन्यत्वं न वा अनित्यत्वम् । नित्यः सन् शब्दः कण्ठताल्वादिव्यापारेण अभिव्यज्यते । श्रवणेन्द्रियप्रत्यक्षो भवति इति यावत् । प्रयत्नानन्तरोपलम्भस्तु उत्पत्यभिव्यक्तिपक्षयोः समानः इति प्रयत्नानन्तरोपलब्धिरूपो हेतुः साधारणरूपदोषग्रस्तः इति नेदमनुमानं साध्यसाधनसमर्थं भवति ।

उच्चरितश्शब्दः मुहूर्तकालमपि नोपलभ्यते । तेन क्षणिक इत्यवगम्यते । अतः अनित्यः इति चेत् शब्दः उच्चारणक्रियया अभिव्यङ्ग्यः इति उच्चारणोत्तरमुपलभ्यते । यतः उपलब्धिस्थानं श्रोत्रम् । श्रोत्रदेशं प्रति शब्दस्याप्राप्तेः उपलम्भकारणाभावादेव नोपलभ्यते । अनुपलम्भमात्रेण अनित्यत्वं न स्यात् । अभिव्यञ्जकोच्चारणक्रियायाः क्षणिकत्वेन अभिव्यङ्ग्यस्य शब्दस्य क्षणिकत्वप्रतीतिः न तु


ISSN: 2320-740X

वास्तविकी स्थितिः।

घटं कुरु, पटं कुरु इत्यादिव्यवहारः लोकप्रसिद्धः। घटपटादीनां जन्यत्वेनानित्यत्वमपि प्रसिद्धमेव। एवमेव "शब्दं कुरु" "मा शब्दं कार्षीः" इति व्यवहारः प्रामाणिकः। अतः घटादिवत् शब्दोऽपि अनित्यः इति। तन्न शब्दं कुरु इति प्रयोगविषयकः व्यवहारः। शब्दप्रयोगं कुरु इत्यर्थः। अयं लाक्षणिकः प्रयोगः। गोमयान् कुरु इत्यस्य गोमयपिण्डविषयत्ववत्। विद्यमानस्य गोमयस्य पिण्डकरणाभिप्रायेण गोमयान् कुरु इति गौणप्रयोगः। तथैव विद्यमानस्य शब्दस्य उच्चारणक्रियाभिप्रायेण "शब्दं कुरु" इत्यादयः लोकव्यवहाराः प्रवर्तन्ते।

युगपदनेकपुरुषोच्चरितः शब्दः तत्तत्पुरुषाणां मुखादिस्थानेषु एकस्मिन्काले उपलभ्यते। तेन शब्दस्य नानात्वम् उत्पादविनाशशालित्वाच्च अनित्यत्वञ्च गम्यते इति चेत् यथा एकः आदित्यः नानास्थानेषु युगपदुपलभ्यते तथा शब्दस्यापि एकस्य नानापुरुषोच्चारणानुरोधेन नानादेशेषु युगपदुपलम्भः संभवति शब्दस्य विभुत्वात्। शब्दस्य उच्चारणक्रियाव्यङ्ग्यत्वात् न उत्पत्तिः न वा विनाशः इति न अनित्यत्वशङ्काप्रसक्तिः।

तथा "दध्यत्र" इत्यादौ इकारयकारादीनां सादृश्येन प्रकृतिविकारभवोपदेशात् अनित्यत्वं स्यादिति। तदपि "दध्यत्र" इत्यत्र इकारात् यकारः शब्दान्तरमेव। प्रकृतिविकारभावे सादृश्यं प्रयोजकं न भवति। अतो न तावत् इकारस्य विकारो यकारः।

एवमपि – मृत्पिण्डरूपकारणाधिक्येन (बहुत्वेन) कार्यस्य घटादेर्महत्वं लोकप्रसिद्धम्। तद्वत् शब्दस्यापि उच्चारयितृबहुत्वेन महत्वं परिदृश्यते। अतः अनित्यः शब्दः इति सिद्ध्यति इति चेत् – उच्चारयितृबहुत्वे "महान् शब्द" इति या उपलब्धिः सा शब्दाभिव्यञ्जकनिरन्तरकृत-संयोगविभागरूपनादानां वृद्धिनिमित्तैव। तदीयं श्रवणगतम् उच्चैस्त्वं न शब्दगतं किन्तु ध्वनिगतमेव। अतो न अनित्यत्वशङ्का।

तस्मात् शब्दः नित्यः। तदुक्तं सूत्रकृता जैमिनिना –"**नित्यस्तु स्यात् दर्शनस्य परार्थत्वात्**" (१-१-१८) इति। शब्दाभिव्यञ्जकोच्चारणस्य परप्रत्यायनार्थत्वात्। शब्दस्यानित्यत्वे अर्थप्रतिपत्तिं यावत् अनवस्थानात् परस्यार्थप्रतिपत्तिः न स्यात्। गोशब्दे उच्चारिते सकलगोव्यक्तिविषयकप्रत्ययः उत्पद्यते। शब्दस्याकृति(जाति)वचनत्वात्। आकृतिश्च नित्या। सा च प्रतीतिः शब्दस्य नित्यत्वे एव घटते नानित्यत्वे। अनित्यस्य नित्यसम्बन्धः न सम्भवति। क्रमशः श्रुतेष्वपि गकारेषु "स एवायङ्गकारः" इति बहूनामबाधितप्रत्यभिज्ञा जायत इति तस्य नित्यत्वमेकत्वञ्चावगम्यते।

भाष्यकारेण शबरस्वामिना उदाहरणं प्रदर्शितम् – दशकृत्वः गोशब्दे उच्चारिते दशगोशब्दाः उच्चरिता इति न व्यवहरन्ति। किन्तु दशवारं गोशब्द उच्चरित इत्येव प्रामाणिकानां व्यवहारः। स च

व्यवहारः स एवायं गोशब्दः इति प्रत्यभिज्ञया सिद्ध्यति। तस्य एकत्वादुपपद्यते प्रत्यभिज्ञा।

किञ्च लोके घटपटादेरिदं नाशकमित्युपलभ्यते नाशकारणं, तथा शब्दस्य नाशकमिति किञ्चिदपि केनचिन्नानुभूयते। विनाशहेतोरुपलम्भाभावात् नित्यः शब्दः। "वायुरापद्यते शब्दताम्' इति वचनात् वायवीययत्नेन अनित्यः शब्दः इति चेत् – उपादानतया वायवीयत्वयोगस्य साक्षात्कारस्याभावात् न वायुकारणकः शब्दः।

"वाचा विरूपनित्यया"(ऋ. सं)इति श्रूयते। ध्वंसप्रागभावाप्रतियोगित्वं नित्यत्वम्। शब्दसामर्थ्यरूपशक्त्यात्मकलिङ्गदर्शनादपि शब्दस्य नित्यत्वमवगम्यते। "**तस्मै नूनमभिद्यवे वाचा विरूपनित्यया वृष्णे चोदस्व सुष्टुतिम्**" ॥ (ऋ.सं.अ-६-५ - २५) इति समग्रो मन्त्रः। मन्त्रार्थस्तुहे विरूप – नानारूप, एतन्नामकमहर्षे ! त्वं तस्मै प्रसिद्धाय अभिगततृप्तये वृष्णे – वर्षकाय अग्नये, नित्यया – उत्पत्तिरहितया वाचा, मन्त्ररूपया, सुष्टुतिं नूनमिदानीं चोदस्व – स्तुहि इत्येवं ऋषिः स्वात्मानं ब्रवीति। यजमानो वा होतारं विरूपम्।

तस्मात् नित्यः विभुः द्रव्यञ्च शब्दः इति श्रुतियुक्तिभ्यां सिद्धः मीमांसकसिद्धान्तः।

***********

## अलङ्कारशास्त्रे साधारणीकरणम्

✍ आचार्या पि. इन्दिरा
साहित्यविभागाध्यक्षा

भारतीये काव्यशास्त्रे रससम्प्रदायः नितरां प्राचीनः। काव्यमीमांसाकारः राजशेखरः रससिद्धान्तस्य संस्थापकं नन्दिकेश्वरं मनुते। किन्तु साहित्यशास्त्रेतिहासकाराः नन्दिकेश्वरकृतग्रन्थस्यानुपलब्धत्वात् भरतमुनिमेव रसस्याद्यमाचार्यमवगच्छन्ति।

काव्ये आत्मेति शब्दः काव्यस्यानिवार्यव्यापकाभ्यन्तरसारो वा तत्वम्। तस्य वाच्यार्थतास्ति चेतनता वा ज्ञानं, परमिह तल्लक्ष्यार्थः स्वीक्रियते। काव्यस्य काव्यत्वप्रदानं तत्वम् आत्मा। यत्तत्वमुद्दिश्य सहृदयाः काव्ये प्रवर्तन्ते तदेवानन्दप्रदमानन्दस्वरूपं वा तत्वं काव्यस्यात्मा।

कलानां साम्राज्ञी भवति काव्यकला। मम्मटाचार्यः

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥**

इति अस्यानन्यलब्धा विशिष्टताम् आचष्टे। कलासु काव्यकलायाः सर्वोत्तमत्वात् तामधिकृत्य


ISSN: 2320-740X

"कलासीमा काव्यं" इत्येषा भणितिः सुविदिताऽस्ति । वस्तुतः आभ्यन्तरमभिव्यञ्जनं कलेति विद्वद्धौरेयः बैडलोमहाभागो मनुते ।

कलायाः कार्यमस्ति रसस्योद्भावनम् । प्रतीच्या प्राच्या च परम्परया ज्ञापयति यद् रसस्य विवेचनं परमपुरातनकालादेवारब्धमभूदिति । प्लेटो तं भ्रान्तिमयं सुखमिति मन्यते । यतो हि कला सनातनसत्तायाः क्षीणा छायैव इति तद्विचारः । अरिस्टोटिलस्तु इयमनुकृतेरानन्द इति वदति । प्रकृते स्थायिनां रूपाणामनुकृतिः कलाकृतिः इति तस्याभिप्रायः । प्लेटो अरस्तूदार्शनिकयोः सिद्धान्तमाधारीकृत्य तत्र रसमीमांसा अजायत ।

रसस्य भारतीया मीमांसा भरतादारब्धा, परं तन्मूलं बीजं वा वेदेषु वर्तते । वेदे काव्यस्य सौन्दर्यमुपलभ्यते । काव्यसौन्दर्यनिरूपके साहित्यशास्त्रे काव्यसौन्दर्याधायकानां येषां तत्वानां विवेचनं कृतमस्ति तानि सर्वाण्यपि मूलतत्वानि वेदेषु लब्धानि भवन्ति । रसस्य मनोविज्ञानदृष्ट्या या मीमांसा जाता सा अस्मद्देशस्यैव सम्पत् । विज्ञानपद्धतिः वस्तूनि विश्लेषयति । मनोविश्लेषणसिद्धान्तो विज्ञानस्यैवान्यतममङ्गम् । विश्वविख्यातो मनोविज्ञानवेत्ता फ्रायडः स्वकीये 'लियोनार्डो द विंची' नामकग्रन्थे – अचेतनमनसः गम्भीरास्तरङ्गाः, कलाकारस्य प्रतिभायाः कौशलेन बाह्यकृतेः रूपं गृह्णन्ति । न तत्र कलाकारोऽपि भवत्यभिज्ञः । प्रेक्षकास्तां कृतिं वीक्ष्य विस्मयं प्रकटीकुर्वन्ति । फ्रायडः रसं शैशवस्यानुभूतिरिव मन्यते । तदनुयायी जर्मनविचारकः युंगः कला अचेतनस्य दृष्टव्यस्वरूपं वर्तते, रसास्वादनसम्बन्धिनी क्रिया कलाकृतिविषयकगुणैः सहृदयं तदीयचेतनायाः मूलं यावत् कृषति इत्यभिप्रैति ।

कला सौन्दर्यमस्ति, आनन्दः तस्याः प्राणाय कल्पते । रसश्च तद्विधवैशिष्ट्यात् काव्यशास्त्रजगति अनन्यमादरं रसः प्राप्तवान् । रसतत्वप्रवर्तकः भरतमुनिः "न हि रसादृते कश्चिदप्यर्थः प्रवर्तते" इत्युक्तं च ।

काव्याद् रसः यदानुभूयते तदा भवत्येव स्वरूपानुभूतिः । वस्तुतो रसः लौकिकेष्वानन्देषूच्चतमः आनन्दः । आध्यात्मिकस्तु न स, तदास्वादानन्तरं चित्ते विकृतिरवश्यमेव जायते, न निवृत्तिः । अत एव ब्रह्मास्वादसहोदर इत्युक्तम् ।

रसनिष्पत्तिसन्दर्भे साधारणीकरणं विशिष्टमेव महत्वं भजते । सौन्दर्यानुभूतेः विलक्षणं लोकोत्तरं च प्रक्रिया भवति साधारणीकरणम् । काव्ये उपवर्णितानां लोकजीवितानां विश्वसनीयत्वं कथं सम्पद्यते ? यतः यत् वास्तविके दुःखमयं भवति तत् काव्ये वर्णिते आस्वाद्यतां प्राप्नोति । वास्तविकतायामुपरि कृत्रिमताया विजयः तत्र । अस्याः समस्यायाः समाधानं भवति साधारणीकरणम् । सौन्दर्यानुभूतेः नूतनं सर्वस्वीकार्यं पन्थानम् उद्घाटयति साधारणीकरणव्यापारः ।

साधारणीकरणव्युत्पत्तिः “च्वि” प्रत्यययोगे भवति । साधारण + च्वि + करणं = साधारणीकरणम् । पाणिनीयनियममनुसृत्य ‘च्वि’ प्रत्यययोगः अभूततद्भावे भवति । यत् एवं न भवति तत् तथा भवति । असाधारणस्य साधारणत्वं तत्र । तत् कथं भवति ? असाधारणविभावादयः साधारणो भूत्वा आस्वादपदवीं प्राप्नुवन्ति ।

साधारणीकरणसिद्धान्तस्य सर्वप्रथमप्रवर्तकः भुक्तिवादसिद्धान्तपरिपोषकः भट्टनायकाचार्यः । काव्ये वर्णितानां रामादीनां तच्चरित्रमाकर्ण्याधीत्य वा, रूपकेषु दृश्यमानानां पात्राणां तं तं व्यापारं प्रेक्ष्य, श्रोतुर्वा द्रष्टुः सम्बन्धः साधारण्यं प्रतिपद्यते । कृत्स्नतया सर्वविधोऽपि भेदभावो विलुप्तः सञ्जायते, अध्येता वा द्रष्टा द्वावपि अहम् अमुकः, स चामुकः इत्येतत् सर्वमपि विस्मरतः, सर्वमपि तस्य ध्यानपथात् स्रंसते । उक्तं च –

**साधारण्येन रत्यादिरपि तद्वत् प्रतीयते ।**
**परस्य न परस्येति ममेति न ममेति च ॥**

इति । काव्ये सीतारामादीनां तच्चरित्राण्यधीयानः, नाटके दुष्यन्तशकुन्तलादीनां अभिनयं नटः कुरुते, दर्शनसमये द्रष्टा “अहं काव्याध्येता वा नाटकस्य द्रष्टास्मि”, “अयं रामः” , “अयं नटः” इत्यादिसर्वप्रतिबन्धान् विस्मृत्य लोकोत्तरैक्यविषयकानन्दे निलीयते । एतस्यां स्थित्यां केवलानिर्वचनीयानन्दवर्षिणा रसेनानुगृह्यते सः । इदं हि दिव्यमैक्यं साहित्यशास्त्रे साधारणीकरणमिति परिभाष्यते ।

साधारणीकरणेन, वासनारूपेण स्थिताः सर्वे रत्यादिस्थायिभावाः समुपस्थाप्यमानाभ्यो विभावादिसामग्रीभ्यः उद्बुद्धाः भवन्ति । सामाजिकाः तदुपभोगावसरे रजोगुणतमोगुणविमुक्ताः सत्वगुणप्रधानात्मकप्रकाशेन प्रकाशमानाः नितान्तमेव वेद्यान्तरसम्पर्कशून्याः सञ्जायन्ते । विभावादीनां रसस्य च प्रतीत्यां कारणकार्यरूपपूर्वापरसम्बन्धो नास्ति, अपि तु द्वयोरपि प्रतीत्योः एकत्र युगपदवस्थानं जायते । अतः साहित्यशास्त्रे रसः समूहालम्बनात्मको भवति । यस्मादेष विभावादिसमूहालम्बनात्मकस्तस्मान्न कार्यः । एषां खण्डशः प्रतीतिः त्वरितगतित्वात् लक्षिता वा न भवति । ते त्रयोऽपि अखण्डाः परस्परसंश्लिष्टाश्च भूत्वा स्वां स्थितिं विदधति । तस्मादेव रसोऽखण्डः । प्रपाणकरसन्यायेन तेषां त्रयाणामपि संश्लिष्टा विशिष्टा अवर्णनीया च प्रतीतिरुद्भवति । उक्तं च –

**ततः संवलितः सर्वो विभावादिः सचेतसाम् ।**
**प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ॥**

विभावादिषु एकतमस्यैव वर्णने सत्यपि अवशिष्टौ द्वौ भावावाक्षिप्येते । तथाविधत्वेऽपि रसचर्वणा सम्भाव्यते ।


ISSN: 2320-740X

दशरूपककारः धनञ्जयोऽप्यस्मिन्नेव साधारणीकरणतत्वे प्रकारान्तरेण प्रकाशं प्रक्षिप्यते । साधारणीकरणमित्येतस्य पदस्य प्रयोगं न कृत्वा 'परित्यक्तविशेष' इत्येतत् पदं धनञ्जयेन प्रयुक्तम् ।

धनञ्जयो धनिकश्चोभौ आचार्याभिनवगुप्त-भट्टनायकाभिव्यक्तविचाराधारे साधारणीकरणस्य व्याख्यां चक्रतुः ।

आचार्यविश्वनाथः साधारणीकरणमुल्लिखन्, "ननु कथं रामादिरत्याद्युद्बोधककारणैः सामाजिकरत्याद्युद्बोध" इति प्रश्नं उत्थाप्य तदुत्तरम् उपन्यस्यति –

**व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ।**
**तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः**
**प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते ।**
**उत्साहादिसमुद्बोधः साधारण्याभिमानितः ।**
**नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ।** इति

"साधारण्येन" इत्यादिरपि तद्वत् प्रतीयते इत्यपि आह । अभिनवगुप्तमतमेव स्पष्टीकुर्वन् विशदीकुर्वन् च दृश्यते विश्वनाथाचार्यः ।

पण्डितराजजगन्नाथः रसगङ्गाधरे साधारणीकरणस्य विवेचनं एवं कृतवान् "नव्यास्तु काव्ये नाट्ये च कविना नटेन प्रकाशितेषु विभावादिषु व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरञ्च सहृदयतोल्लसितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पाद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः । अयञ्च कार्यो दोषविशेषस्य । नाश्यञ्च तन्नाशस्य" इत्यादिसाधारणीकरणरूपः सिद्धान्तः यदि सम्यक् अधीतोऽवधारितश्च स्यात् तदा तेषां दुःखात्मकतातः सुखात्मतायां परिणमनं समीचीनतया विदितं भवितुं शक्नोति । एतत् साधारणीकरणं भयं भयात्, शोकं शोकात् दूरीकरोति । एतावदेव न, तत्तत्सर्वं देशकालबन्धनादपि मुक्तं भूत्वा वर्तमान एवावतरति, समस्तमोहसङ्कटादिविषमता च ततो निवर्तते । फलमिदं भवति काव्यनाटकगतं पात्रं स्वविशिष्टं व्यक्तित्वं विहाय सामान्यमेव व्यक्तित्वं प्रतिपद्यते । रामादिनामानो जनाः पुरुषस्त्रीपात्राणि दशरथपुत्रसीतापतित्वादिपरमार्थविशेषरूपाणि त्यक्त्वा केवलप्रेमिप्रेमिकारूपेण गृह्यन्ते । सहृदयश्चापि साधारणीकरणप्रभावात् निजत्वपरत्वपरक-प्रतीतिधरातलादुत्थितो भूत्वा ततोऽप्युपरिस्थं धरातलं संसेवते ।

तथा च न कोऽपि रसः दुःखात्मकः भवति । लौकिकशोकहर्षादिकारणेभ्यो लौकिकहर्षादयो जायन्ते इत्येष लोक एव प्रतीनियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते ।

ISSN: 2320-740X

भयानकादिरसाः लोकोत्तरताप्राप्तिवशात् सुखात्मका भवन्ति।

प्रतीच्या विपश्चितोऽपि, करुणादिरसास्वादे विचारं कुर्वन्तो दृश्यन्ते। दुःखात्मकानि दृश्याणि प्रेक्षकस्य हृदयमुत्तेजयन्ति उद्वेलयन्ति च इत्येतदादिकं वदन् रूस्सो वदति- द्वेषजन्यदृश्येषु आनन्दजन्यतामनुभवन्ति । इतरे – कारुणिकदृश्येषु मानवसहानुभूतिपरकं सुखं लभ्यते । परसहानुभूतिश्च वस्तुतस्त्वात्मसहानुभूतेरेव रूपम्।

साधारणीकृतसिद्धान्तस्य सर्वाधिकसाम्यं पाश्चात्यानां समानुभूतिपरकसिद्धान्तस्यैव। अस्य सिद्धान्तस्य स्वच्छन्दतावादे (Romanticism) मूलं एवं नोवालिसः मैजिक् आइडियलिसम् वादे विकासश्च। क्रमशः यूरोपीयदेशे मनोवैज्ञानिकैः विद्वद्भिः पल्लवितं, सिद्धान्तरूपेण व्यवस्थापितञ्च। समानुभूत्याः आङ्ग्लेयपदं 'empathy' भवति। अस्य शाब्दिकोऽर्थः भवति feeling into. प्रथमतः मूर्तिस्थापत्यनृत्यादिकलासु प्रवृत्तमपि क्रमेण साहित्ये सौन्दर्यानुभूतेः प्रमुखसिद्धान्तत्वेन स्वीकृतं च। वस्तुतः ऐतिहासिकक्रमे थ्योडोरलिप्सः एव समानुभूतिसिद्धान्तस्य सूक्ष्मतात्विकगम्भीरविवेचनद्वारा प्रतिष्ठापकः इति प्रख्यातः।

इलोगेलो ब्रूते – ईदृशस्य दृश्यस्य दर्शनेन तस्याश्चेतनताया उदयो भवति यथा ज्ञायते यत् पार्थिवस्य जीवनस्य सञ्चालनं कस्याश्चन अदृष्टशक्तेरधीनतायामस्ति, यस्याः पुरः पुरुषस्य समग्रापि शक्तिः क्षुद्रा वर्तते। अनया भावनया धारणया वा एकतोऽहङ्कारः शाम्यति, अपरतश्चैतया धारणया दुःखे-विपदि, धैर्यमवाप्यते।

निकलसनस्य मतेन कारुणिकेषु नाटकेषु मानवहृदयस्य शूरतोदारताप्रभृतिगुणानां प्रदर्शनं भवति । वीरतायाः श्लथत्वेऽपि एको गरिमा निहितः आप्यते । शोकविपत्कालेऽस्मन्मानसे उदात्तानुभूतिः न च क्लेशजनिता व्यथा उत्पद्यते। सा अनुभूतिः सुखदा प्रीतिदा च भवति।

हीगेलोऽत्र भणति – "कारुणिकेषु दृश्येषु जीवनं जयपराजययोरनुभूतिं कुरुते । सा चास्मच्चेतनायाः परस्परविरोधिनी वृत्तीर्जनयति। अन्ततो गत्वा तत्र समन्वयतां च सा सूते" इति।

यद्यपि विभावानुभावादीनां प्रत्येकविभागः पाश्चात्यचिन्तायां नोपलभ्यते तथापि साङ्केतिकोल्लेखनानि तैः तत्र प्रदर्शिताः। उदा – टि-एस्-ईलियट् अभिप्रैति । The only way of expressing emotion in the form of art is by finding an "objective correlative". In other words a set of objects, a situation, a chain of events which shall be the formula of that particular emotion objective correlative. वस्तुपरकविभावनं तु संस्कृतकाव्यशास्त्रस्य विभावतुल्यमेव । "a set of objects" कथावस्तु प्रतिचरित्रस्य, भावात्मकप्रतिक्रिया, अनुभावसञ्चारीभावानां सङ्केतोऽपि भवति। Natural object – विभावः


ISSN: 2320-740X

भवति । George Williamson महाशयेन "structural emotion" इति यदुक्तं तत् स्थायिभावस्थानीयं, "floating feelings" व्यभिचारिस्थानीयं च ।

साधारणीकरणसमकक्षसौन्दर्यानुभूतिप्रक्रियाविषयकप्रमुखपाश्चात्यसिद्धान्ताः इमे निर्वैयक्तिकता, अवैय्यक्तिकता, समानुभूतिः, तटस्थता, पृथक्करणम्, मानसिकान्तरालः, निःस्सङ्गता, निस्स्वार्थता, भावतादात्म्यम्, संवेगसन्तुलनपरकनिर्वैय्यक्तिकत्वम् इत्यादयः । सौन्दर्यानुभूतिः मूलतः मुख्यतः च भावाधृत इति सर्वेषामभिप्रायः ।

रसानुभूतिप्रक्रियायाः सम्पूर्णव्याख्यानं भारतीयकाव्यशास्त्रे साधारणीकरणेनैव सम्भवति । पाश्चात्यसिद्धान्ते सर्वाङ्गपूर्णम् एकसिद्धान्ताभावत्वं वर्तते इति प्रतिभाति । साधारणीकृतसिद्धान्तस्य पूर्णताया कारणमिदमस्ति यत् एकसिद्धान्तद्वारा रसास्वादप्रक्रियायाः सर्वघटकानां, कविकाव्यसहृदयादीनां क्रमिकसम्बद्धप्रतिपादनद्वारा सम्पूर्णसोपानारोहणं सुशकं भवतीति ।

एवं यत् साधारणीकरणसिद्धान्तः विश्व-सौन्दर्यशास्त्रीयचिन्तने अद्वितीय इति सिद्धं भवति ।

**********

## बाधनिरूपणम्

✍ **आचार्यः का. इ. मधुसूदनः**

न्यायविभागाध्यक्षः

तत्रभवान् जैमिनिः महर्षिः "**अथातो धर्मजिज्ञासा**" इति सूत्रेण प्रमाणस्वरूपसाधनफलैः धर्मविचारं प्रतिज्ञाय प्रथमेऽध्याये प्रमाणं न्यरूपयत् । एवं द्वितीयादिनवमान्तेषु अध्यायेषु क्रमेण धर्मभेदः, शेषशेषिभावः, अनुष्ठापनशक्तिरूपा प्रयुक्तिः, एकप्रयोगान्तर्गताङ्गप्रधानानुष्ठानक्रमः, अधिकारविध्यवसेयः फलसम्बन्धः, सामान्येन अतिदेशः, विशेषेणातिदेशः (सापवादः), अतिदिष्टानां मन्त्रसामसंस्काराणामूहश्चेति प्रमेयजातमचिन्तयत् । सिद्धे च तत्रोहे दशमेऽति दिष्टानां पदार्थानामुत्सर्गापवादाभ्यां विकृतौ बाधो निरूप्यते । तदत्र लघुनिबन्धे बाधलक्षणम्, बाधप्रभेदाश्च यथामति समासेन ग्रन्थोक्तदिशा प्रतिपिपादयिष्यन्ते ।

### बाधस्वरूपम्

कोऽयं बाधो नाम यो दशमे प्राधान्येन प्रतिपाद्यते इति चेत्, **भाष्यकृदा**ह बाधो नाम यदेवेदमिति निश्चितं विज्ञानं कारणान्तरेण मिथ्येति कथ्यते इति । यद्विशेषादर्शने यस्य शास्त्रस्य यद्विषये यादृशनिश्चयजनकत्वम्, तादृशनिश्चयस्य तद्विशेषदर्शनेन अप्रामाण्यनिश्चय एव तद्विषये तस्य

शास्त्रस्य बाधः इति निष्कर्षः । यथा शरपदरूपविशेषादर्शने अतिदेशशास्त्रस्य कुशविषये उद्देश्यसम्बन्धनिश्चयजनकत्वम्, तस्य तद्विशेषदर्शनेनाप्रामाण्यनिश्चय इति तद्विषये तस्य शास्त्रस्य बाधः इति । इदञ्च बाधलक्षणं श्रुतिलिङ्गादिबाधसाधारणम् । **परन्तु** रागप्राप्तानृत-वदनादिबाधेऽव्याप्तम् । तस्य प्रासङ्गिकनिरूपणविषयत्वमेव, न तु प्राधान्येन प्रतिपाद्यत्वमित्युक्तौ नासङ्गतिरित्यन्यदेतत् ।

## खण्डदेवाभिमतं बाधसामान्यलक्षणम्

भाष्यकारोक्तलक्षणाक्रान्ते बाधे सर्वत्र अतिदेशोपजीवित्वं न सम्भवतीति अतिदेशेन उपजीवकत्वसङ्गत्यलाभात् बाधनिरूपणमसङ्गतं स्यादित्याशयेन प्राधान्येन दशमाध्यायनिरूप्यस्य बाधस्य स्वरूपमित्थमभ्यधायि **खण्डदेवाचार्येण** – प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहकप्रमाणाभावः बाधः इति । प्रकृतिसम्बन्धिनां दर्शपूर्णमासयोः "**कौशं बर्हिः**" इत्यनेन विहितानां कुशानां "**शरमयं बर्हिः**" इति प्रत्याम्नातैः शरैः कार्यसिद्धौ अतिदेशेन विकृत्यङ्गत्वाभावात् कुशेषु बाधः । "**प्राजापत्यं घृते चरुन्निर्वपेत् शतकृष्णलमायुष्कामः**" इति विहितायुष्कामेष्ट्यङ्गभूतेषु कृष्णलेषु स्वर्णखण्डरूपेषु अवघातस्य वितुषीभावरूपप्रयोजनलोपेन सतोऽप्यतिदेशस्य विकृत्यङ्गताग्राहकत्वाभावात् बाधः । एवं प्रकृतिभूतदर्शपूर्णमासतः विकृतिभूतपित्र्येष्टौ अतिदेशतः प्राप्तस्य होतृवरणस्य "**न होतारं वृणीते**" इति प्रतिषेधात् तत्रापि निरुक्तबाधः । अत्र विकृत्यङ्गताग्राहकप्रमाणाभावः इत्येतावन्मात्रोक्तौ घटादेरपि बाधव्यवहारापत्तिः । अतः प्रकृतिसम्बन्धिनः पदार्थस्येत्युक्तम् । नित्यप्रयोगे प्रसङ्गस्थले च बाधव्यवहारवारणाय विकृत्यङ्गताग्राहकप्रमाणाभाव इत्युक्तम् । तत्र हि अतिदेशरूपं विकृत्यङ्गत्वग्राहकप्रमाणमस्त्येव । सर्वत्र प्रकृतौ विकृतौ वा पदार्थानाम् अन्यतः उपकारालाभे प्रयाजादिभिः तत्तत्प्रधानस्योपकुर्यात्, उपकारलाभे तु तैरेव करणनिष्ठयोग्यतां कुर्यादित्येतादृशस्यैव प्रमाणस्य कल्पनात् । अन्यसम्बन्धिनः अन्याङ्गत्वग्राहकप्रमाणाभाव इत्युक्तौ विकृतिसम्बन्धिनः उपहोमादेः प्रकृतिसम्बन्धिनः प्रयाजादेर्वा ज्योतिष्टोमाङ्गत्वग्राहकप्रमाणाभाववत्त्वात् बाधव्यवहारापत्तिः । अतः प्रकृतिविकृत्योः विशिष्योपादानम् । **निष्कर्षस्तु** यद्धर्मावच्छिन्नस्य यत्प्रकृतिसम्बन्धित्वविशिष्टस्य यद्विकृतिभूतयदङ्गत्वग्राहकप्रमाणविषयत्वाभावः तद्धर्मावच्छिन्नस्य तत्र बाधितत्वम् इति ।

## बाधप्रभेदाः

स चायं बाधः त्रिविधः अर्थलोपात् प्रत्याम्नानात् प्रतिषेधाच्चेति । **अर्थलोपात् बाधो** यथा – विकृतिविशेषे स्वयन्दिनं बहिर्भवति इति श्रूयते । तत्र स्वतश्छिन्नबर्हिषि लवनप्रयोजनं नोत्पत्तुमर्हति ।


ISSN: 2320-740X

स्तरणोपयोगिमूलाग्रावयवसंयोगनाशो हि तत्प्रयोजनम् । स च प्रतियोग्यभावेन न सम्भवति । तस्मात् अर्थलोपात् अध्वर्युकर्तृकं प्रयोगान्तःपाति वैधं लवनं तदङ्गमसिदानादिकं च बाध्यते इति ।

कृष्णलचरौ वितुषीभावरूपप्रयोजनलोपात् अवघातस्य बाधः इति तु न युक्तम् । कृष्णलानां प्रदेयत्वेन प्रदेयचरुप्रकृतित्वाभावात् प्रदेयप्रकृतिभूतव्रीहिधर्माणाम् आग्नेयतः अतिदेशेन प्राप्तौ प्रमाणाभावेन बाधस्यास्य वैतुष्याभावप्रयुक्तत्वाभावात् । कृष्णलानां हि वाचनिकश्रपणे सत्यपि वैशद्याभावेन कृष्णलप्रकृतिकचरूत्पत्तौ प्रमाणाभावात् तेषामेव प्रदेयत्वमवगम्यते इति आग्नेयप्रकृतित्वात् प्रदेयपुरोडाशधर्माः एव पर्यग्निकरणादयः प्राप्यन्ते । घृते श्रपयतीति च न श्रपणविधानम् । विक्लृत्त्यभावात्, किन्तु लक्षणया घृताधिकरणकाग्निसंयोगमात्रम् ।

क्वच्चित्तु अन्यत्र वैतुष्याभावप्रयुक्तः बाधः अवघातस्य भवत्येव - यथा सवनीयहविरन्तर्गतलाजाख्यपरिवापे । तत्र हि धानाप्रकृतित्वेन यवानामिव लाजप्रकृतित्वेन व्रीहिषु प्राप्तस्य अवघातस्य बाधः वैतुष्यासम्भवादेव । कथं वैतुष्यासम्भवः इति चेत्, प्रदेयपाके तस्य विरोधित्वात् । न हि वैतुष्यं स्वरूपेण प्रकृतौ प्रयोजनम्, किन्तु प्रदेयपाकसाधनत्वेनैव । प्रकृते च सतुषद्रव्यस्यैव भर्जने लाजनिष्पत्त्या वैतुष्यस्य तद्विरोधित्वात् अवघातस्य बाधः वैतुष्याभावप्रयुक्त एव । वस्तुतस्तु तत्रापि न व्रीहिधर्माणामतिदेशेन प्रवृत्तिः । "**घृते श्रपयति**" इति श्रपणविध्याक्षिप्तोपादानकतण्डुलरूपद्वाराभावात् । किन्तु लाजत्वान्यथानुपपत्त्यैव तत्र व्रीहिमात्रग्रहणम् । अतो न तत्रापि द्वारलोपाद्बाधः ।

**प्रत्याम्नानात् बाधो** यथा – वैकृतेन शरादिना प्राकृतकुशादेः बाधः । उपकारपृष्ठभावेनैव पदार्थानामतिदेशः अङ्गीक्रियते । अतः यदुपकारजनकीभूतः पदार्थः विकृतावाम्नातः तदुपकारजनकीभूतप्राकृतपदार्थातिरिक्तपदार्थानामेव विकृतौ अतिदेशः भवति । अतः कुशादेः आकाङ्क्षाभावे अतिदेशविषयत्वमेव न कल्प्यते इति कुशानां नैव प्रामाणिकत्वम् । अयं च बाधः प्राप्तबाधः इति व्यवह्रियते ।

**प्रतिषेधात् बाधः** यथा – महापितृयज्ञे अतिदेशप्राप्तस्य होतृवरणस्य "**न होतारं वृणीते**" इति प्रतिषेधात् बाधः । एवमनाररभ्याधीतस्य "**आश्रावयेति चतुरक्षरमस्तु श्रौषडितिचतुरक्षरं यजेति द्व्यक्षरं येयजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्त**" इति यज्ञसामान्योद्देशेन विहितस्य येयजामहस्य "**नानुयाजेषु येयजामहं करोति**" इति प्रतिषेधात् बाधः । अत्र च प्रतिषेधयोः द्वयोः न नित्यं होतृवरणादिबाधकत्वम्, अष्टदोषदुष्टस्य विकल्पस्य प्रसक्तेः । प्रतिषेधापेक्षितायाः प्राप्तेर्हि शास्त्रीयत्वे शास्त्रप्राप्तस्यात्यन्तबाधायोगात् ग्रहणाग्रहणवद्विकल्पः अनिवार्यः । अतः पर्युदासः एव आश्रयणीयः । तत्त्वं च आख्यातार्थव्यतिरिक्तार्थप्रतियोगिकाभाव-

बोधजनकत्वम् । यदि च आख्याताातिरिक्तान्वयित्वं तत् तर्हि "**न होतारम् वृणीते**" इत्यत्रानुपपत्तिः । नञर्थस्य होतृवरणव्यतिरिक्तत्वरूपस्य आख्यातार्थे एवान्वयात् । अत्र नञः अन्योन्याभावपरत्वम् । तत्रापि नञ्धातुभ्यां लक्षणया वरणव्यतिरिक्तपदार्थजातस्यैव लाभात् तस्यैव आख्यातार्थान्वयः । लक्षणा च विकल्पापेक्षया न दोषः । नानूयाजेष्वित्यत्राप्येषैव रीतिः ।

यत्र तु तस्मिन्नेवार्थे प्रत्यक्षः विधिः, तस्मिन्नेव च निषेधः, यथा "**अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति**" इति तत्र अगत्या विकल्पस्य आवश्यकत्वात् प्रतिषेध एव । पर्युदासाश्रयणस्य लक्षणायां प्रमाणाभावेनायुक्तत्वात् । प्राप्त्यभावेन अर्थवादस्वीकारस्याप्ययोगात् । अत्र च निषेधेन षोडशिग्रहणाभावेऽपीतराङ्गैः क्रतुसाद्गुण्योत्पत्तिरित्यस्याक्षेपः । विधिना च षोडशिग्रहणस्यापि क्रतुसाद्गुण्ये सहकारित्वमाक्षिप्यते । तर्हि षोडशिग्रहणे प्रवृत्तिः कथमिति चेत्, फलभूमार्थं तदुपपत्तेः ।

एवं प्राप्ताप्राप्तबाधादिभेदेन बाधस्य वैविध्यं सुनिरूपमपि विस्तरभयान्नेह तन्यते इति शम् ।

**********

## शास्त्रीयत्वञ्च शास्त्रबोधितत्वम्

✍ डा. सि. एस्. एस्. नरसिंहमूर्तिः
व्याकरणविभागाध्यक्षः

महामहोपाध्यायनागेशभट्टविरचितेषु परिभाषेन्दुशेखर- शब्देन्दुशेखरादिषु ग्रन्थेषु इमाः पङ्क्तयो विद्यन्ते । ताः इत्थं सन्ति -

१) शास्त्रीयकार्ये एव स्थानिवद्भावः । तेन नायकसिद्धिः इति स्थानिवदादेशोऽनल्विधौ (१-१-५६) इति सूत्रे शब्देन्दुशेखरे ।

२) अनेन चाशास्त्रीयस्याप्यतिदेशः इति व्यपदेशिवदेकस्मिन् (प.सं.३०) इति परिभाषानिरूपणे परिभाषेन्दुशेखरे ।

३) एतेनायं न्यायः शास्त्रीयकार्य एव शास्त्रीयविकार एवेत्यपास्तम् इति एकदेशविकृतमनन्यवत् (प.सं.३७) इति परिभाषानिरूपणावसरे परिभाषेन्दुशेखरे च ।

१) शास्त्रीयकार्ये एव स्थानिवद्भावः । तेन नायकसिद्धिः इतिपङ्क्तेरयमाशयः तत्स्थानापन्नस्तद्धर्मं लभते इति न्यायेन यथा गुरोः स्थाने शिष्यः याज्यकुलानि गत्वा अग्रासनादीनि लभते, तथा आदेशे स्थानिप्रयुक्तकार्यसिद्धौ सूत्रमिदं किमर्थमिति शङ्कायां शास्त्रीयस्यास्य सूत्रस्यारम्भाच्छास्त्रीयकार्ये एव


ISSN: 2320-740X

स्थानिवद्भावः प्रवर्तत इति निश्चीयते। अत एव नायकः इति रूपं सिद्ध्यति। तथाहि - नयतीति नायक इत्यर्थे णीञ् = प्रापणे इत्यस्माद्धातोः ण्वुल्तृचौ (३-१-१३३) इत्यनेन कर्तरि ण्वुल्प्रत्ययः। णकार - लकारयोरित्संज्ञायां लोपः, णो नः (६-१-६४) इत्यनेन णकारस्य नकारादेशः नी + वु इति स्थिते युवोरनाकौ (७-१-१) इत्यनेन वु इत्यस्याकादेशः। नी + अक, अचो ञ्णिति (७-२-११५) इत्यनेन वृद्धिः नै + अक, एचोऽयवायावः(६-१-७७) इत्यनेन आयादेशः, कृदन्तत्वेन प्रातिपदिकसंज्ञायां सुः, रुत्वम्, विसर्गश्च नायकः इति भवति। अत्र नी + अक इति स्थिते अचो ञ्णिति (७-२-११५) इत्यनेन वृद्धिः वक्तव्येति चेद् णित्त्वं स्थानिवद्भावेन वक्तव्यम्। तदानीम्क्रियमाणं कार्यं वृद्धिः। सा च अचो ञ्णिति सूत्रबोधितातः शास्त्रीयं भवति । अतः स्थानिवद्भावः प्रवर्तते । तत्रैव यदि अक इत्यस्य वुरूपं स्थानिवद्भावेन आनीयेत तदाऽच्परकत्वाभावेन आयादेशाभावे नायकः इति रूपं न सिद्ध्यति । परमत्रायादेशाभावोऽशास्त्रीयं कार्यं भवत्यतः स्थानिवद्भावो न भवति । अतः नायकः इति रूपं सिद्ध्यति।

स्थानिवदादेशोऽनल्विधौ(१-१-५६) इति सूत्रेऽनल्विधावित्यंशः न ल्यपि (६-४-६९) इत्यनेन ज्ञापितः। अतस्सोंऽशः शास्त्रीयः। पुनस्तत्र विधिग्रहणाच्च शास्त्रीयकार्ये एव निषेधांशः प्रवर्तते। अतस्तदनुरोधेन विध्यंशोऽपि शास्त्रीयकार्ये एव प्रवर्तते। **शास्त्रीयत्वञ्च शास्त्रेण साक्षाद्बोधितत्वम्।** नायकः इत्यत्र आयादेशः अचि परे एचोऽयवायावः इति सूत्रेण बोधितः । अनचि आयभावश्शास्त्रतात्पर्यविषयो भवति। यथा साधुशब्दप्रयोगे धर्मः इति कथनेन अपशब्दप्रयोगेऽधर्मः इति शास्त्रतात्पर्यविषयत्वेऽपि न शास्त्रबोधितत्वं तद्वत्प्रकृतेऽपि।

२) अनेन चाशास्त्रीयस्याप्यतिदेशः इति व्यपदेशिवदेकस्मिन् (प.सं.३०) इति परिभाषायां विद्यते। लोके बहुपुत्रसत्वे एकस्मिन् ज्येष्ठत्वकनिष्ठत्वादिव्यवहाराः न भवन्ति, किन्तु एकपुत्रसत्वे तस्मिन्नेवायं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनीयानित्यादिव्यवहाराः युज्यन्ते । तादृशलोकव्यवहारेण व्यपदेशिवदेकस्मिन्निति परिभाषा सिद्धा। अत एषा परिभाषा शास्त्रीयकार्येषु अशास्त्रीयकार्येषु च प्रवर्तते।

तत्र शास्त्रीयकार्यस्योदाहरणानि -१) अस्यापत्यम् = इः, आभ्याम्, एभिः । इः इत्यत्र तस्यापत्यमित्यनुवर्तमाने अत इञ् (४-१-९५) इत्यनेन अशब्दादिञ्प्रत्ययः वक्तव्यः । तेनादन्तात्प्रातिपदिकादिञ् विहितः । दशरथस्य अपत्यमित्यर्थे बहवोऽचः सन्तीति कारणादकारान्तत्वसम्भवात् प्रत्ययो भवति, दाशरथिः इति रूपं सिद्ध्यति। अस्यापत्यमित्यत्र तु एक एव वर्णोऽस्ति, अतः प्रत्ययस्याप्राप्तावनेन न्यायेन तदन्तत्वस्यातिदेशादण् प्रवर्तते । तदन्तत्वञ्च शास्त्रेण बोधितमस्ति येन विधिस्तदन्तस्येत्यनेन । इत्थमेव आभ्यामित्यत्र अ+भ्याम् इति स्थिते

अदन्तस्य विधीयमानः सुपि च (७-३-१०२) इति दीर्घः, अ+भिस् इति स्थिते अदन्तस्याङ्गस्य विधीयमानमेत्वं च सिद्ध्यतः।

२) श्रियौ, भ्रुवौ, औपगवः, कापटवः इत्यादीन्युदाहरणानि भवन्ति । श्रीशब्दात् प्रथमाबहुवचने औप्रत्यये श्रि+औ इति स्थिते अचि श्नुधातुभ्रुवां य्वोरियङुवङौ(६-४-७७) इत्यनेन इयङ्ङादेशः कर्तव्यः । तेनाजादौ प्रत्यये परे इयङ्विहितः । अतः श्री+ अस् इत्यत्र भवति, तत्राजादिप्रत्ययपरकत्वात् । अत्रानेन न्यायेन एक एव अज्वर्णोऽपि अजादिर्भवति । तदादिविधिः "यस्मिन्विधिस्तददावल्ग्रहणे" इति परिभाषया बोधितत्वेन शास्त्रीयं भवति । अतः श्रियौ, भ्रुवौ इति रूपे सिद्ध्यतः। इत्थमेव औपगवः, कापटवः इत्यत्र उपगोरपत्यम् इत्यर्थे तस्यापत्यम् (४-१-९२) इत्यनेन अण्प्रत्यये अत्र ञ्नित्यादिर्नित्यम् (६-१-१९४) इत्यनेन ञिदन्तस्य, निदन्तस्य विधीयमानः स्वरः परिभाषामन्तरा न प्राप्नोति। अनया परिभाषया सम्प्रति भवति।

इत्थमादित्वान्तत्वे शास्त्रबोधितत्वाच्छास्त्रीये कार्ये भवतः।

अशास्त्रीयकार्यस्योदाहरणानि - १) भवति, इः, इयान् इति। भवतीति भूधातोः कर्तरि लटि प्रथमपुरुषैकवचने तिपि, शपि, भू+अ+ति इति स्थिते भू इत्यस्याङ्गसंज्ञायां सार्वधातुकार्धधातुकयोः (७-३-८४) इत्यनेन भू इत्यत्रोकारस्य गुणे अवादेशे भवति इति रूपं सिद्ध्यति। अत्र भू इत्यस्याङ्गसंज्ञा कथम्? यतः यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१-४-१३) इति सूत्रे तदादिरिति वर्तते । अतस्तदादेरेव सा संज्ञा वक्तव्या । प्रकृते भू इत्येव विद्यते । अनया परिभाषया केवलस्यापि तदादित्वस्वीकारादङ्गसंज्ञा भवति । अत्र तदादित्वं शास्त्रेण न बोधितमतोऽशास्त्रीयं भवति । तथाप्येषा परिभाषा प्रवर्तते। इः इत्यत्र केवलस्य इ इति तद्धितस्य कृत्तद्धितसमासाश्च (१-२-४६) इत्यनेन यस्माद्विहितस्तदादित्वाभावेन तद्धितान्तत्वनिबन्धना प्रातिपदिकसंज्ञा न स्यात् । अनया परिभाषया भवति।

अत्रेदमवगन्तव्यम् तदादिविधिः "यस्मिन्विधिस्तददावल्ग्रहणे" इति परिभाषया बोधितत्वेन शास्त्रीयं भवति। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१-४-१३) इति सूत्रघटकतदाद्यंशस्तु केनापि न बोधितः इत्यशास्त्रीयं भवति । यच्च शास्त्रकारेण साक्षात्प्रोक्तं तच्छास्त्रीयं भवति । यथा पूर्वोऽभ्यासः (६-१-४), तस्य परमाम्रेडितम् (८-१-२), उभे अभ्यस्तम् (६-१-५) इत्यादीनि। एकाच्त्वं, तदादित्वं वा तथा नोक्तमत अशास्त्रीये भवतः।

२) इयाय - इण् गतौ इति धातोः लिटि प्रथमपुरुषैकवचनम्। अत्र इ + अ(णल्) इति स्थिते एकाचो द्वे प्रथमस्य (६-१-१) इत्यधिकारे विद्यमानेन लिटि धातोरनभ्यासस्य (६-१-८) इत्यनेन द्वित्वं वक्तव्यम्। एकाजित्यत्र बहुव्रीहिसमासः स्वीक्रियते। अन्यथा गम्(जगाम), पच्(पपाच) इत्यादिषु न


ISSN: 2320-740X

स्याताम् । अत इयायेत्यत्र इणः एकाज्रूपत्वेन द्वित्वं न प्राप्नोति । अनया परिभाषया एकाच्त्वातिदेशेन द्वित्वं सिद्ध्यति । एकाच्त्वं शास्त्रेण न बोधितमतोऽशास्त्रीयमेव भवति । यद्यप्यत्र धात्ववयवत्वं, प्राथम्यञ्च व्यपदेशिवद्भावेनैव आनीयेते, अथाप्यादित्वपर्यायप्रथमत्वस्य (प्रथमैकाच्त्वस्य) धात्ववयवत्वस्य च शास्त्रीयत्वात्तौ विहायानेनाशास्त्रीयातिदेशे एकाच्त्वनिबन्धनद्वित्वसिद्धिरेव फलत्वेनोक्तम् ।

३) एतेनायं न्यायः शास्त्रीयकार्य एव शास्त्रीयविकार एवेत्यपास्तम् इति एकदेशविकृतमनन्यवत् (प.सं.३७) इति परिभाषायां वर्तते । एषा परिभाषा लोकन्यायसिद्धा - यथा छिन्नपुच्छे शुनि श्वत्वव्यवहारो लोके विद्यते, तथा शास्त्रे एकदेशविकारेऽपि कार्याणि प्रवर्तन्ते । लोकन्यायसिद्धस्यास्य न्यायस्य शास्त्रे स्वीकारे प्राग्दीव्यतोऽण् (४-१-८३) इति सूत्रस्थं भाष्यं प्रमाणम् तत्र हि दीव्यतः इति दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमिदमित्युक्त्वा किमर्थं विकृतिनिर्देशः? एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवद् इति । लोकन्यायसिद्धा, अशास्त्रीयविकृतिनिर्देशज्ञापिता चैषा । अतोऽशास्त्रीयकार्येष्वशास्त्रीयविकारेषु च प्रवर्तते, शास्त्रीयकार्ये शास्त्रीयविकार एवेति कथनमयुक्तम् । अत्र च अचः परस्मिन्पूर्वविधौ (१-१-५७) इति सूत्रस्थं भाष्यं प्रमाणम् - श्रायसशब्दादणन्ताद्द्विवचने "श्रायसौ" इत्यत्र वृद्धौ कृतायां सान्तस्योगित्वेनानेन न्यायेनाङ्गतया प्राप्तो नुम् पूर्वसम्बन्धिविधित्वेन वारितः । तथाहि - अयमनयोरतिशयेन प्रशस्य इत्यर्थे प्रशस्यशब्दाद् द्विवचनविभज्योपपदे तरबीयसुनौ (५-३-५७) इत्यनेन ईयसुन् प्रत्ययः, प्रशस्यस्य श्रः(५-३-६०) इत्यनेन प्रशस्यशब्दस्य श्रादेशः, प्रकृत्यैकाच् (६-३-१६३) इति प्रकृतिभावेन टिलोपाभावः श्रेयस् शब्दो निष्पद्यते । ततः श्रेयसि भवमित्यर्थे तत्र भवः (४-३-५३) इत्यण् प्रत्ययः, देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् (७-३-१) इति सूत्रेण श्रेयसित्यत्रैकारस्यात्वं, श्रायस् + अ = "श्रायस" इत्यस्मात् प्रथमाद्विवचने औप्रत्ययः, वृद्धिः श्रायसौ इति रूपं भवति । अत्र वृद्ध्यनन्तरम् श्रायस् इत्यस्य एकदेशविकृतन्यायेनाङ्गत्वमानीय उगिदचां सर्वनामस्थानेऽधातोः (७-१-७०) इति नुमः प्राप्तिमाशङ्क्य अचः परस्मिन्पूर्वविधावित्यत्र पूर्वसम्बन्धिविधावित्यर्थस्वीकारान्न भवतीति वारितः । अत्र सान्तेऽङ्गत्वमेकदेशविकृतन्यायेन साधितम् । तच्चाशास्त्रीयम् । यतस्तत्र अकारलोपः शास्त्रेण न बोधितः, एकादेश एव शास्त्रेण बोधितः । यद्येकदेशविकृतन्यायः अशास्त्रीयकार्ये न प्रवर्तेत तदा नुमाशङ्काऽनुचिता स्यात् । भाष्यकारेणाक्षेपकरणाद् अयं न्यायोऽशास्त्रीयविकारेऽपि प्रवर्तते ।

**शास्त्रतात्पर्यविषयत्वं न शास्त्रीयत्वम् ।**

वेः स्कन्देरनिष्ठायाम् (८-३-७३) इति सूत्रे अनिष्ठायामिति पर्युदासो वर्तते । तेन हि वेः परस्य

स्कन्देः षत्वं वा निष्ठाभिन्ने विधीयते। विष्कन्ता, विस्कन्ता इत्युदाहरणे भवतः। निष्ठायान्तु विस्कन्नः इति षत्वं न भवति। विस्कन्नः इत्यत्र विपूर्वात् स्कन्द् धातोः निष्ठाक्तप्रत्ययः, विस्कन्द् + त इति स्थिते अनिदितां हल उपधायाः क्ङिति (६-४-२४) इत्यनेन धातोरुपधानकारस्य लोपः, रदाभ्यां निष्ठातो नः पूर्वस्य च दः (८-२-४२) इत्यनेन निष्ठातकार - तत्पूर्वदकारयोश्च नत्वं भवति। सम्प्रति निष्ठान्तत्वं स्थानिवद्भावेन वक्तव्यम्। तथा सति निष्ठान्तभिन्नत्वाभावेन षत्वं न भवति। अत्र षत्वं शास्त्रेण अपदान्तस्य मूर्धन्यः (८-३-५५) इत्यनेन बोधितम्। अतः षत्वकार्यं शास्त्रीयं भवति। तदभावस्तु शास्त्रेण न बोधितः, अतोऽशास्त्रीयो भवति। अतः कथमत्र षत्वाभावे कर्तव्ये स्थानिवद्भावः इति चेद् - उच्यते, पर्युदासलभ्याशास्त्रीयस्यापि शास्त्रतात्पर्यविषयत्वेन शास्त्रीयवदतिदेशबोधनात् शास्त्रीयं भवति। अतस्स्थानिवद्भावः प्रवर्तते इति वृत्तिकारादिभिः सर्वैरङ्गीकृतत्वात् शास्त्रतात्पर्यविषयत्वमपि शास्त्रीयं भवत्येवेति चेद् -

अत्रेदं समाधानम् - अस्य सूत्रस्य व्याख्यानसन्दर्भे लघुशब्देन्दुशेखरे नागेशभट्टः एवमलेखीत् - कृत्येवेदम्, अनिष्ठायमिति पर्युदासात् इति प्रतीकमादाय परे त्वत्र न भाष्यानुग्रहः, अत एव अनुविपर्यभिनिभ्यः इति सूत्र इवाऽत्र भगवता पर्युदासप्रसज्यप्रतिषेधयोः फलभेदविचारो न कृतः। तस्माद् विपूर्वस्यास्य तिङ्यप्रयोगो वा, सषत्वो वा प्रयोग इत्याहुः। इति।

नागेशभट्टस्यायमाशयः - अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु (८-३-७२) इति सूत्रेण अनु-वि-परि-अभि-नि, एभ्यः परस्य अप्राणिकर्तृकस्य स्यन्दतेः सस्य षत्वं विधीयते। अनुष्यन्दते, अनुस्यन्दते वा जलम् इत्युदाहरणम्। अप्राणिषु इति पर्युदासाश्रयणेन अनुस्यन्दते हस्ती इत्यत्र षत्वं न भवति। मत्स्योदके अनुष्यन्देते इत्यत्रापि विकल्पेन षत्वं भवति, अप्राणिषु षत्वं भवतीति कथनात्। यदि अप्राणिष्वित्यत्र प्रसज्यप्रतिषेधः तदा प्राणिषु न भवतीति कथनात् मत्स्योदके अनुष्यन्देते इत्यत्र विकल्पेन षत्वं न स्यात्। सर्वदा षत्वरहित एव प्रयोगः स्यात्। इत्थं पर्युदासप्रसज्यप्रतिषेधयोः फलभेदो तत्र प्रदर्शितः, न तथाऽत्र वेः स्कन्देरनिष्ठायां फलभेदः प्रदर्शितः। यदि शास्त्रतात्पर्यविषयत्वं शास्त्रीयत्वं तदा अनिष्ठायामित्यत्र पर्युदासपक्षे निष्ठाभिन्ने भवतीति कथनेन तिङन्तस्य शास्त्रीयत्वात् विष्कन्दति इत्यत्र षत्वं भवति, प्रसज्यप्रतिषेधे निष्ठायां न भवतीति बोधनेनाशास्त्रीयत्वेन षत्वं न स्यात्। इत्थं फलभेदस्य विद्यमानत्वे भाष्ये विचार एव न कृतः। अत अनेन ज्ञायते शास्त्रतात्पर्यविषयस्य न शास्त्रीयतेति भाष्यकाराणामाशयः।

**********


ISSN: 2320-740X

# शिक्षायां चिन्तनविमर्शः

✍ डा. चन्द्रकान्तः
शिक्षाशास्त्रविभागाध्यक्षः

चिन्तनम् एका संज्ञानात्मिका जटिला क्रिया वर्तते । चिन्तनशक्तिकारणतः एव मानवः अन्येभ्यः प्राणिभ्यः श्रेष्ठः समजायत । समग्रसंसारस्य प्रगतौ मनुष्यचिन्तनस्य महत्वपूर्णं योगदानं विद्यते । चिन्तनम् एका तादृशी मानसिकक्रिया यत्र च कस्याश्चित् समस्यायाः समाधानसमये पूर्वानुभवानां प्रयोगः कृतो भवति । तस्मात् चिन्तनं मानवस्य ज्ञानात्मकव्यवहारेषु अनिवार्येण विद्यमानम् अपरिहार्यं महत्त्वपूर्णं तत्त्वमस्ति । लोके वयं शृणुमः यत् "कार्यानुष्ठानात् पूर्वं चिन्तयतु" इति । अनुभवसम्पादनात् पूर्वं किञ्चित् चिन्तयतु इति । अनेनावगम्यते यत् चिन्तनं केवलं ज्ञानात्मकव्यवहाराधारितं नास्ति परन्तु क्रियात्मकभावात्मकयोः व्यवहारयोः आधारः तत्र प्राधान्येन निहितः इति । यथा – कवितालेखन- कलाकृतिनिर्माण –नूतनाविष्करण –विशेषविचारादयः सर्वेऽपि तत्तत्सम्बद्धानां कार्यकर्तृणां चिन्तनस्य फलस्वरूपं वर्तते । एतादृशां कार्याणां लाभः तदैव जायते यदा चिन्तनस्य न्यायोचितः प्रयोगः जायते । तथा हि – केवलं व्यक्तिगतसमस्यानामेव समाधानं चिन्तनेन मिलति अपि तु समाजसम्बद्धानां, मानवताविकाससम्बद्धानां, वैज्ञानिकानां सांस्कृतिकानां च समस्यानां समाधानानि अपि मिलन्ति । एवं सति अस्माकं दैनन्दिनवार्तालापेषु अपि चिन्तनशब्दस्य प्रयोगं मनोवैज्ञानिकक्रियायाः कृते कुर्मः । यथा अहं तेषां दिनानां विषये चिन्तयन् आसम् । अपि च ते हि नो दिवसाः गताः इति । अत्र हि चिन्तनशब्दस्य प्रयोगः स्मरणार्थे मनोविज्ञानसम्बन्धे कृतः । एवमेव कश्चित् बालकः वदति अहं तद्भवनविषये चिन्तयन् अस्मि यदहं भविष्ये मम कृते तादृशं भवनं निर्मास्यामि इति, अत्र हि कल्पनार्थे चिन्तनशब्दप्रयोगः दृश्यते । अन्यः कश्चित् दूरे विद्यमानमस्पष्टं वस्तु दृष्ट्वा वदति यत् अहं चिन्तयामि तद् टेक्सी वर्तते इति । अत्र च जायमानस्य वा जातस्य प्रत्यक्षस्य व्याख्यानरूपे अर्थे चिन्तनशब्दः प्रयुक्तः दृश्यते ।

तथा हि न मनोविज्ञानस्य दृष्ट्या स्मरणं, कल्पनं, प्रत्यक्षीकरणं वा चिन्तनमिति वाच्यम् । अपि किमिदं चिन्तनमिति तथैवावतिष्ठते । अत्र च परिभाषाः - **वैलिणटन् महोदयस्य अभिप्रायः वर्तते यत् मनोविज्ञानदृष्ट्या चिन्तनशब्दस्य प्रयोगः तादृशक्रियायाः भवति यत्र शृङ्खलाबद्धविचारः कमप्युद्देशं किमपि लक्ष्यं पुरस्कृत्य अविरतप्रवाहात्मकः भवति इति ।**

**मोहसिन् महोदयस्य परिभाषा भवति यत् चिन्तनं समस्यायाः समाधानार्थं कृतः कश्चन अव्यक्तः व्यवहारः इति ।** (Thinking is an implicit problem solving behaviour – 1967 p.117 )

अव्यक्तव्यवहारेण व्यक्तः दृग्गोचरः क्रियाविशेषो वा व्यवहारः उपजायत इत्यत्र नास्ति विप्रतिपत्तिः । तस्मात् चिन्तनं समस्यासमाधानार्थं जायमानः अव्यक्तः मानसिकव्यवहारः इति चिन्तनस्य स्वरूपं वर्तते।

एतादृशस्य चिन्तनस्य कानिचन वैशिष्ट्यानि वर्तन्ते। तद्यथा –

1. चिन्तनमेका जटिला मानसिकक्रिया वर्तते यत्र सरलाः मानसिकक्रियाः निहिताः भवन्ति।
2. कयाचित् समस्यया, काठिन्येन, सङ्कष्टेन वा चिन्तनं प्रारभ्यते।
3. चिन्तनस्य फलरूपेण समस्यायाः समाधानं सम्पाद्यते।
4. चिन्तनं प्रयोगार्थं प्रेरयति।
5. चिन्तनप्रक्रिया स्थूलादारभ्य अमूर्तं प्रति तथैव सरलात् कठिनं प्रति च प्रयाति।
6. सङ्केतानां प्रतिमानानां सम्प्रत्ययानां सूक्ष्मसम्बन्धानां च योगदानं चिन्तने विशेषेण वर्तते।
7. संश्लेषणविश्लेषणक्रिययोः महत्त्वं चिन्तने महदस्ति।
8. चिन्तनं सर्वदा सोद्देश्यं भवति अतः अत्र अभिप्रेरणायाः पात्रं स्वाभाविकं विद्यते।
9. अभीष्टं कार्यं कर्तुं दिशानिर्देशं यच्छति चिन्तनम्।
10. चिन्तनं मानवानां विशिष्टः गुणविशेषोऽस्तीत्यत्रनास्ति संशयः।
11. वैयक्तिकभिन्नतापि चिन्तने महत्वपूर्णं पात्रं निर्वहति।
12. व्यक्तेः पूर्वानुभवः प्रशिक्षणं, परिपक्वता च चिनतनस्य उपरि प्रभावं जनयति।
13. ज्ञानात्मकभावात्मकचेष्टात्मकव्यवहाराणां सम्बन्धेन चिन्तनं परिवर्धते।

**चिन्तनस्य प्रकाराः**

चिन्तनं विषयाधारेण, स्वरूपाधारेण, सन्दर्भाधारेण नानाप्रकारकं जायते । तत्र प्रत्यक्षात्मककल्पनात्मकप्रत्ययात्मकतार्किकपरावर्तितचिन्तनानि प्रधानानि वर्तन्ते।

**१. प्रत्यक्षात्मकं चिन्तनं** – प्रत्यक्षात्मकचिन्तनं स्थूलं (concrete) चिन्तनमित्यपि प्रोच्यते। बालकानां मन्दमतिमतां, पशूनां चिन्तनमत्र अन्तर्भवति । एतादृशचिन्तनस्य मूलाधारौ संवेदनं प्रत्यक्षीकरणं च भवतः। अत्र भाषायाः सङ्केतस्य वा प्रयोगः नैव परिलक्ष्यते। चिन्तनमत्र -

**२. कल्पनात्मकं चिन्तनं** – कल्पनात्मकचिन्तनं सर्जनात्मकचिन्तनमिति प्रोच्यते। एतादृशचिन्तनस्य आधारः मानसिकोहः वा मानसिककल्पना भवति । एतस्मिन् चिन्तने वस्तु अथवा परिष्ठितिः प्रत्यक्षरूपेण नोपस्थीयते । अर्थादत्र मूर्ताकारस्य अभावः दृश्यते । स्मृत्याधारेण भविष्यस्य वा जायमानस्य घटनाविषये चिन्तनं प्रचलति।


ISSN: 2320-740X

**३. प्रत्ययात्मकं चिन्तनं** – प्रत्ययात्मकं चिन्तनम् अमूर्तचिन्तनमित्यपि कथ्यते । एतच्चिन्तनं चिन्तनस्य सर्वोच्चरूपं भवति । विचारस्य सामान्यीकरणं, भाषायाः प्रयोगः, सङ्केतानां प्रयोगश्चात्र जायते । इयमेका जटिला मानसिकप्रक्रिया वर्तते ।

**४. तार्किकं चिन्तनं** – तार्किकचिन्तने विचारस्य क्रमबद्धप्रस्तवनं, तर्कस्याधारेण क्रियते । अस्मिन् व्यक्तिः सोपानक्रमस्य नियन्त्रितरूपेणानुसरणं कृत्वा चिन्तनमुपस्थापयति । परम्परागतविचारस्य परिणामः प्रतिबिम्बितः भवति ।

**५. परावर्तितचिन्तनं** – परावर्तितचिन्तनं तार्किकचिन्तनापेक्षया उच्चस्तरीयं भवति । व्यक्तिः जटिलसमस्यानां समाधानार्थमेतादृशचिन्तनस्य प्रयोगं करोति । अन्तर्दृष्टेः विशेषाधारः अस्मिन् चिन्तने वरीवर्ति ।

एवमेव निर्देशितान्यनिर्देशितान्यपि चिन्तनानि चिन्तनस्य प्रकाररूपेण परिगणयितुं शक्यन्ते । एतादृशेषु चिन्तनेषु सोद्देश्यत्वं निरुद्देश्यत्वञ्च प्रधानं भवति ।

एवञ्च परिणाममाधृत्यैव तस्य स्वरूपं, लक्षणं, प्रकारं, सामग्रीं, प्रक्रियादिकं च विमृश्य मनोविज्ञानिनः समग्रं चिन्तनतत्वं समुपास्थापयन् इत्येव वक्तव्यं भवति ।

**परिशीलितग्रन्थाः**


- शैक्षणिक मनोविज्ञान – डा. एन्. वि. कोङ्गवाडा – 2008 – विद्यानिधि प्रकाशन गदग
- उच्चतर शिक्षामनोविज्ञान – डा. एस्. पि. गुप्ता – 2002 - शारदा पुस्तकभवन इलाहाबाद
- शिक्षामनोविज्ञान – एस्, के , मङ्गल – 2011 - PH Learning Private Limited, New Delhi.
- शिक्षा तकनीकी – जे. एस्. वालिया – 2009 – अहं पाल पब्लिशर्स गोपाल नगर जलन्धर
- शिक्षामनोविज्ञान – पी. डी. पाठक – 2007 – विनोदपुस्तकमन्दिर आगरा ।


**********

## वेदोऽखिलविज्ञानमूलम्


**✍ डा. रामचन्द्रलबालाजिः**

सहायकाचार्यः, शिक्षाशास्त्रविभागः


"यतोऽभ्युदयनिःश्रेयससिद्धिः सः वेदः" इति कथने न कापि अतिशयोक्तिः । यतो हि मानवानां

इहपराभ्युदयसाधने वेदं विनास्माकम् अन्यथा गतिर्नास्ति । सृष्टौ विद्यमानानां सर्वेषामस्माकं भोगसाधनानां मूलभूतानां सर्वेषां विज्ञानानां, सर्वासां कलानाञ्च मूलस्तम्भः भवति वेदः । न केवलं तत्, भारतदेशे एतावत्पर्यन्तं ज्ञानस्य रक्षणं भवति इत्युक्तौ तस्य कारणं भवति वेदः । जनेषु उत्तमभावनानां विकासे, उत्तममूल्यानां विकासे च वेदस्य पात्रमविस्मरणीयम् । अस्मिन् प्रबन्धे इहभोगसाधकानां केषाञ्चन विज्ञानोपकारणानां, मानवेषु उत्तमादर्शभावनानां विनाशे, अन्तर्दृष्टेर्विकासे, विमर्शनात्मकदृष्टेः विकासे च कारणीभूतानां केषाञ्चन वेदवाक्यानां विवरणं क्रियते।

आदौ सृष्टेः कारणं किमित्यत्र ऋग्वेदः एवमामनयति – “हिरण्यगर्भः समवर्तताग्रे ....” इत्यादिमन्त्रैः हिरण्यगर्भात् विराट्पुरुषात् सृष्टेः आरम्भः जातः इति । एवमेव पुरुषसूक्ते “सहस्रशीर्षापुरुषः...” इत्यादिमन्त्रैः विराट्पुरुषवर्णनानन्तरं भूम्यादिसृष्टिक्रमः विविध-वर्णानामुत्पत्तिक्रमश्च क्रमेण प्रतिपादितः । वेदेषु अकालमृत्युनिवारणोपायाः, कथं वनस्पतीनां रक्षणं कर्तव्यम् ? पर्यावरणरक्षणोपायाः, औषधिविज्ञानं, भूगर्भविज्ञानं, वास्तुविज्ञानं, विमानविज्ञानं, रसायनविज्ञानं इत्यादि बहवोऽपि विचाराः दरीदृश्यन्ते।

उत्तमचिन्तनानां विकासे, “सर्वे भवन्तु सुखिनः...” इत्याद्युद्धरणानि, “पश्येम शरदः शतम्, जीवेम शरदःशतम्....” इत्यादिदीर्घायुष्कामनाः मन्त्राश्च दृश्यन्ते । एतैः मन्त्रैः सर्वेषां जनानां स्वास्थ्यपूर्णं जीवनं काङ्क्षितं भवति।

एवमेव रुद्राध्याये “त्र्यम्बकं यजामहे ....” इत्यादिमन्त्राः अकालमृत्युनिवारकमन्त्राः भवन्ति।

अथर्ववेदे रोहिणीनामकोषधिसम्बद्धविचारः बहुवर्णितः वर्तते । अस्योपयोगेन वीर्यस्य, चर्मणः, मांसस्य च वर्धनं झटिति भवति । युद्धकाले जायमानापघातानां व्रणानां, अस्थिभङ्गादिक्लेशानां अस्योपयोगेन शीघ्रमेवोपचारः भवतीति श्रूयते।

एवमेव क्षुत्पिपासेन्द्रियक्षमतानां वर्धनाय, आनुवंशिकरोगाणां निवारणाय, च औषधानि बहूनि अथर्ववेदे उक्तानि वर्तन्ते। (अथर्ववेदः ४-१७-७, ४-१८-७)

ऋग्वेदे सम्पूर्णतया एकौषधीसूक्तं वर्तते । (ऋग्वेद – १०-१७, १-१३) । एवमेव रुधिरस्रावनिवारणार्थं हृदयरोगनिवारणार्थं ज्वरनाशनार्थं, विषमतामपाकर्तुमनिद्रामपाकर्तुं च मन्त्राः अथर्ववेदस्य पृथक् पृथक् अध्यायेषु वर्णिताः सन्ति । शल्यचिकित्साया अपि सविस्तरेण वर्णनमथर्ववेदे प्राप्यते । चतुर्षु वेदेष्वपि जीवप्रपञ्चसम्बद्धविचाराः बहवः वर्तन्ते । जीवानां नामानि, तेषां वर्गीकरणं, तेषां स्वभावादिवर्णनं, तेषामुपयोगितादिविचारः, पशूनां पालनं, पशुसंवर्धनं,


ISSN: 2320-740X

पशुचिकित्सादिः एतेषां विचाराणाञ्च उल्लेखः दृश्यते । अथर्ववेदे "तवेमे पञ्च पशवो विभक्ता गावो अश्वाः पुरुषा अजावयः" (११-२-९) । "पशूंस्तांश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये" (अथ वे – १९-६-१४-१) (यजु. ३१.६) (ऋग् १०.१०.८) इत्यादिविचाराः दृश्यन्ते ।

एवमेव वैदिककालादारभ्य महाभारतकालपर्यन्तं बहूनामस्त्राणां शस्त्राणां प्रयोगः दृश्यते । प्रायः तदनन्तरकाले विज्ञानस्य ह्रासः जातः इति वक्तुं शक्यते ।

वेदेषु आग्नेयवायव्यपाशुपतब्रह्मास्त्रादिविविधास्त्राणां वर्णनं दृश्यते । अथर्ववेदे "तेषां वो अग्निमूढानाम् इन्द्रो हन्तु वरं वरम्" (अ. ६.६७.२) चक्षूंषि – अग्निरादत्तां पुनरेतु पराजिता (अ.३.१.६) आग्नेयास्त्रसम्बद्धमन्त्राः दृश्यन्ते । एवमेव सम्मोहनास्त्रविषये –

"अग्निः .....स सेनांमोह्लयतु परेषां
निर्हस्तान् च कृणवत्" (अ. ३.१.१)

तदनन्तरकाले अग्निपुराणे, कौटिल्यार्थशास्त्रादिषु बहूनां शस्त्रास्त्राणां वर्णनं दृश्यते ।

एवमेव ऋग्वेदे, यजुर्वेदे, अथर्ववेदे च विविधप्रकारकाणां शस्त्रास्त्रप्रयोगः वर्णितः । एतेषां प्रयोगेन सद्यः प्राणहारकधूमानामुत्पत्तिः विषसम्मिलितधूमोत्पत्तिः, अन्धीकरणं रोगोत्पादकत्वं भवति ।

वेदेषु विविधविमानानां वर्णनं दृश्यते । विशिष्य स्वयंचालितविमानानां (Automatic air bus) अन्तरिक्षे समुद्रे च गम्यमानानां, पृथिव्याम् अन्तरिक्षे च गम्यमानानां दिनत्रयपर्यन्तम् इन्धनं विना गम्यमानानां वर्णनं दरीदृश्यते ।

अन्तरिक्षे समुद्रे च गम्यमानानां यथा – "तमूहथुर्नौभिरात्मन्वतीभिः अन्तरिक्ष-प्रुड्भिरपोदकाभिः" (ऋग्. १.११६.३) पृथिव्यामाकाशे गम्यमानानि यथा – "रथो ह वाम् – परिद्यावा पृथिवी याति सद्यः" (ऋग्. ३.५८.८)

दिनत्रयपर्यन्तं गम्यमानानि यथा – "त्रयः पवयो मधुवाहने रथे
त्रिर्नक्तं याथः त्रिर्वश्विना दिवा" (ऋग् १.३४.२)

एवमेव सौरशक्त्या गम्यमानानां विमानानामपि वर्णनं दृश्यते ।

कृषिविज्ञानं (Agricultural sciences) सम्बद्धाः बहवो हि विचाराः वेदेषु वर्तन्ते । यजुर्वेदे कृषेः उन्नतीकरणम् राज्ञः प्रमुखकर्तव्यं भवतीति वर्णितम् –

यथा – ''कृष्यै त्वा क्षेमाय त्वा रथ्यै त्वा पोषाय त्वा" (यजु. ९.२२)

यजुर्वेदे १८तमे अध्याये "यज्ञेन कल्पन्ताम्" इति यज्ञात् जायमानलाभानां विचारः विस्तृतरूपेण कृतः । अत्र कृषिसम्बद्धतथ्यानि बहूनि उक्तानि ।

१. यथा – वाजश्च मे प्रसवश्च मे (यजु १८-१)

२. सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे (यजु. १८.७)

३. कृषिश्च मे वृष्टिश्च मे (यजु. १८.९)

४. अक्षितं च मेऽन्नं च मे । (यजु. १८.१०)

५. अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यञ्च मे (यजु. १८.१४)

इत्यादीनि । एवमेव कृषेः कृते आवश्यकपदार्थाः, कृषिनाशकतत्वानि, कृषेः साधनानि च वेदेषु दरीदृश्यन्ते । वृष्टिविज्ञानेन (Meteorology) सम्बद्धाः बहवो हि विचाराः यथा, मेघानां रचना, तेषां निर्माणे सहायकतत्त्वानि, मेघानां विभिन्नरूपाणि मेघरचनायां यज्ञानां योगदानम् अतिवृष्टिनिवारकोपायाः, वर्षविषयकभविष्यवाण्यादिविषयाः वेदेषु निबद्धाः वर्तन्ते । वृष्टिविषये मनुः वदति "अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" (मनु - ३.७६) प्रायः अस्माकं सर्वेषु वेदेषु यज्ञद्वारा वृष्टेः उत्पत्तिः बहुत्र वर्णिता वर्तते । यथा "अयं यज्ञो भुवनस्य नाभिः" (ऋग्- १.१६४.३५) "भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः" (ऋग् १.१६४.५१) अनेन ज्ञायते यत् वृष्टेः प्राप्तौ यज्ञानां योगदानं बहु वर्तते इति ।

वेदादिषु स्मृतिषु च पर्यावरणप्रदूषणस्य तस्य कारणानां च उल्लेखो दृश्यते ।यथा "नू चिन्नु वायोरमृतं वि दस्येत" (ऋग् – ६.३७.३) एवमथर्ववेदे कतिपयपर्यावरणशोधकतत्त्वानाम् उल्लेखो दृश्यते । यानि प्रदूषणं नाशयन्ति । यथा – "ये पर्वताः सोमपृष्ठा आपः । वातः पर्यन्य आदग्निस्ते, क्रव्यादमशीशमन्" (अ. ३.२१.१०)

एवमेव ऋग्वेदे आयुर्वेदे च भूमेः उपरि विद्यमानस्य ओजोन् (ozone)इति पदार्थस्य सम्बद्धोल्लेखो दृश्यते। ऋग्वेदे"ओजोन्" इत्यस्य समानार्थकरूपेण् "महत् उल्ब" प्रयोगः दृश्यते। यथा "महत् तदुल्बं स्थविरं तदासीत् । येनाविष्टेतः प्रविवेशिथापः" (ऋग् – १०.५१.१) तस्योपजायमानस्य उल्ब आसीत् हिरण्ययः । (अ. ४.२.८) । प्रायः चतुर्ष्वपि वेदेषु प्रदूषणनिवारणार्थं यज्ञानां महत्त्वमधिकतया वर्णितमस्ति । यज्ञानां द्वारा पर्यावरणसुरक्षा, वायुमण्डलपवित्रता, विविधरोगाणां नाशः अपि भवतीति । ब्राह्मणग्रन्थेषु यज्ञस्य महत्त्वं विस्तृतरूपेण उक्तं वर्तते । "यज्ञो वै भुवनस्य नाभिः "(तैत्ति-ब्रा- ३.८.५.५) "भुज्युः सुपर्णो यज्ञः" (यजु १८-४२) अस्माकं भारतीयसंस्कृतेः मूलमपि वेदाः सन्ति । ये अस्माकं संस्कृतेः सिद्धान्ताः ते सर्वे वैदिकमन्त्रेषु धर्मशास्त्रेषु चोपदिष्टाः । राष्ट्रसङ्घटनस्य सिद्धान्तः वेदे एवं दृश्यते। "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् । देवा भागं यथापूर्वे सञ्जानाना उपासते" । सृष्टौ विद्यमानाः अनेकाः कलाः वैदिकवाङ्मये वर्णितास्सन्ति । यथा – धनुर्विद्या, सङ्गीतकला, नृत्यकला, कवित्वादयः । वैदिकवाङ्मये निहताभिः साक्षीभिः ज्ञायते यद् वैदिकयुगे


ISSN: 2320-740X

क्रीडाकौतुकं चित्रकलादयस्तु आसन्नेव। तैः सहैव ललितकलाः अपि मनोरञ्जनस्य साधनानि आसन्। कौषीतकीब्राह्मणे नृत्यगीतवादनानां सामूहिकं नाम शिल्पम् इति आसीत् । सङ्गीतकलायाः यत्र विचारः भवति तत्र सम्पूर्णसामवेदः उपस्थितो भवति । सामवेदस्य मन्त्राणां गायनेन सः भावः अस्माभिः अनुभूयते एव। वैदिककाले प्रत्येका कला एका साधनारूपेण साधयन्ति स्म। वैदिकवाङ्मये कलां मनोरञ्जनस्य साधनं वा मत्वा आराधनायाः तपस्यायाः वा रूपं प्रदत्तमासीत्। एवञ्च कलानैपुण्यं तस्याः तपस्यायाः फलं भवति।

एवं वैदिकवाङ्मये वास्तुकलायाः विचारोऽपि बहुत्र दृश्यते । गृहभवनादीनां निर्माणस्योचितस्थितिः, कक्षाणां, गवाक्षाणां, अट्टालिकानां निर्माणाय उचितनिर्देशाः सन्ति । व्यवस्थितगृहनिर्माणं न केवलम् इष्टिकापाषाणादीनां संयोगरूपम् अपितु सुखसमृद्धि-स्वास्थ्यपवित्रतादीनां सङ्गमस्थलमस्ति।

तदुक्तं वेदे – "ऊर्जस्वती पयस्वती पृथिव्यां निर्मिता मिता
विश्वान्नं बिभ्रती शाले मा हिंसीः प्रतिगृह्णतः" (अथर्ववेदः ९.३.१६)

शालायाः निर्माणम् एवं स्यात्। ऊर्जस्वती – बलारोग्ये पराक्रमे च वृद्धिं प्राप्नोत्। दयस्वती – यत्र पेयं जलदुग्धदधिघृतादीनां नानारसादीनां व्यवस्था भवेत्। पृथिव्यां निर्मिता मिता – यस्य सुन्दरतां कलां दृष्ट्वा गृहपतेः प्रशंसा भवेत्। विश्वान्नं बिभ्रती – तद्गृहे खाद्यादीनां पदार्थानाम् ऐश्वर्यं स्यात्। प्रतिगृह्यतः मा हिंसाः – तत्र निवासिनां कण्ठादयः न प्रभावमुत्पादयेयुः। आधुनिककाले गृहस्य मानचित्रं (Blue print) क्रियते । यतोहि तत्र निवासिनामनुकूलानां नियमानाम् अनुसारेण गृहनिर्माणं भवत्विति । एतादृशविचारः वेदे दृश्यते यथा –

ब्रह्मणा शालां निर्मितां कविभिर्निर्मिता मिताम्
इन्द्राग्नी रक्षतां शालाममृतौ सौम्यं सदः॥ (अ.वे. १०३.१)

अर्थात् उत्तमैः विद्वद्भिः शिल्पकारैः प्रमाणयुक्ता शाला निर्मिता स्यात् । सर्वाभिः सुविधाभिः, पूर्णमैश्वर्यपदं सुखदञ्च गृहं निर्मेयमिति । अथर्ववेदे "हविर्धानमग्निशालाम्" (१.३.७) इत्यस्मिन् मन्त्रे गृहाभ्यन्तरस्य रचनायाः प्रारूपं वर्णितमस्ति । गृहे होमस्थानं, स्त्रीणां निवासाय पृथक्स्थानं, ध्यानस्थानञ्च पृथक् भवति।

राजनीतिशिलान्तर्गते शासनव्यवस्थायां विभिन्नविभागेभ्यः योग्यजनानां नियुक्त्यर्थं स्पष्टं निर्देशं दत्तमस्ति। यथा "ब्रहणे ब्राह्मणं क्षत्राय राजान्यं ………" (यजुर्वेदे ३०.५) इत्यादि मन्त्रैः।

वैदिककाले छात्रेषु उत्तममूल्यानां विकासशिक्षायाः प्राधान्यं दत्तमस्ति । शिक्षायाः लक्ष्यं भवति "छात्रेषु अन्तर्निहित प्रमुखज्योतेः प्रज्वालनाम्" एतादृशलक्ष्यस्य पूरणार्थम् उपनिषत्सु नैकाः

रीतयः अनुसृताः। उपनिषत्सु वर्णिताः शिक्षणविधयः अद्यापि आधुनिकसमाजे अनुसर्तव्याः वर्तन्ते। उपनिषत्काराणाम् एषा दृढधारणा वर्तते यत् छात्रः स्वप्रयासेन ज्ञानं प्राप्नुयात्। अन्येन प्रदत्तं ज्ञानं शाब्दिकरूपेण ग्रहीतुं शक्यते, परं तद् आत्मसाक्षात्कर्तुं, तत्त्वं ज्ञानम् अन्तर्दृष्टेः विकासाय नोपयुक्तं भवति। उपनिषत्सु गभीरात्मज्ञानबोधनार्थं बहवः विधयः स्वीकृताः। ते च प्रहेलिकाविधिः, सूत्रप्रणाली, व्युत्पत्तिप्रणाली, कथाप्रणाली, चर्चाप्रणाली, इत्यादयः वर्तन्ते।

छान्दोग्योपनिषदि षष्ठाध्यायस्य पञ्चमखण्डतः सप्तमखण्डपर्यन्तं कश्चन विचारः वर्तते। यत्र गुरुः श्वेतकेतुमुद्दिश्य हे सौम्य अन्नमयं मनः आपोमयः प्राणः तेजोमयी वागिति प्रतिपादयति। तदानीं श्वेतकेतुः हे भगवन् कथं मनसः अन्नरसेनोपचयः इत्येतत् नाद्यापि समाहितमिति कथिते सति मनसः अन्नमयत्वं दृष्टान्तपूर्वकं प्रायोगिकप्रणालीमनुसृत्य बोधनं कृतं वर्तते।

छान्दोग्योपनिषदि षष्ठाध्याये प्रथमखण्डे अयं विचारः वर्तते। श्वेतकेतुः पितुः आज्ञानुसारं आचार्यसमीपं गत्वा द्वादशवर्षं यावत् चतुरः वेदान् सार्थान् ज्ञात्वा अनूचानमानी स्तब्धः अप्रणतस्वभावः एयाय गृहम्। तादृशपुत्रस्य गर्वापनाय प्रश्नकरणविधिं स्वीकृत्य न केवलं पुत्रस्य गर्वापनयनं कृतम् परन्तु नूतनविषयज्ञानार्थं प्रेरणा अपि दत्ता दृश्यते। आधुनिककाले उपयुज्यमाना सोक्रटीस् पद्धतिरपि प्रायः एतत्सदृशमेव भवति।

एवमेव तत्त्वान्वेषणार्थं 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिरूपेण कश्चन क्रमः प्रदर्शितः। अत्र श्रवणं केवलं बहिरिन्द्रियाणां कर्म। मननम् – अन्तर्बहिरिन्द्रियाणां सम्बन्धस्थापनम्। निदिध्यासनम्-केवलमन्तरिन्द्रियकर्म फलप्राप्तिहेतुः। अन्तर्दृष्टेः विकासनम् अत्र भवति।

प्रायः आधुनिककाले शोधनप्रक्रियायाम् अयमेव प्रकारः अनुवर्तते। एवं सर्वेषां इहपरसाधकविज्ञानानां वेद एव मूलं भवति। अतः इहपरसाधने वेदं विना अस्माकम् अन्यथा गतिर्नास्त्येवेति स्पष्टतया वक्तुं शक्यते।

परामृष्टग्रन्थाः


1. वेदाविज्ञानामृतम् - पद्मशास्त्री
2. वेदों मे समाजशास्त्र, अर्थशास्त्र और शिक्षाशास्त्र - कपिलदेव द्विवेदी
3. वेदों मे विज्ञान - कपिलदेव द्विवेदी
4. वेदों मे कृषि और आयुर्वेद - डा. गणेशदत्तशर्मा
5. वेदविज्ञान चिन्तन - प्रो. ब्रजतिवारी चौबे
6. वेदकालीन प्रौद्योगिकी - प्रो. ओमप्रकाश पाण्डेय


**********


ISSN: 2320-740X

# योगः कर्मसु कौशलम्

✍ डा. नवीनहोळ्ळः
सहायकाचार्यः, न्यायविभागः

मानवस्य जाग्रत्स्वप्नसुषुप्तयः तिस्रोऽवस्थाः भवन्ति। सुषुप्तौ सर्वकर्मभ्यः विरतोऽपि मानवः इतरावस्थायाम् अनवरतं शारीरं वाचिकं मानसं वा कर्म अवश्यमाचरति।

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। (भगवद्गीता १८.११)
सर्वस्यैव कर्मणः पञ्च कारणानि भवन्ति।
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्। (१८.१४)

अधिष्ठानकर्तृकरणचेष्टाः चत्वारि दृष्टकारणानि, दैवमित्यदृष्टकारणम्। दृष्टकारणेषु कर्ता- पुरुषः, करणम् - इन्द्रियम्, अधिष्ठानं- शरीरमिति त्रीणि सिद्धकारणानि। चेष्टा- प्रयत्नः असिद्धकारणम्। यथा दारुणः द्वैधीभावनिष्पत्तौ परशुः सिद्धं करणं, तदुद्यमननिपातनलक्षणव्यापारोऽसिद्धं करणम्। प्रत्यक्षज्ञानजनने इन्द्रियं सिद्धं करणं, इन्द्रियार्थसन्निकर्षः असिद्धं करणम्। अधिष्ठानप्रभृतिषु दृष्टकारणेषु चतुर्षु असिद्धत्वेन प्रयत्नस्य प्राधान्यम्।

लोके क्वचिद् उभयत्र समवहितानां दृष्टकारणानां तुल्येऽपि सामर्थ्ये एकत्र फलप्राप्तिः अपरत्र तदप्राप्तिरिति वैषम्यदर्शनात् दृष्टातिरिक्तम् अदृष्टं कारणमनुमीयते।

तुल्यं कर्षन्ति पृथिवीं तुल्यं शास्त्राण्यधीयते।
उन्मज्जन्ति निमज्जन्ति दैवस्यैकस्य लीलया॥

दैवं न स्वतन्त्रं कारणम्। पौरुषप्रयत्नमन्तरा अदृष्टमात्रात् कार्यसिद्धिर्न भवति।

यथा ह्येकेन चक्रेण चक्रस्य न गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिद्ध्यति।।
यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम्।
तथा पुरुषकारेण विना दैवं न सिद्ध्यति॥ (म.भा.अ.प.६.७)

मानुषप्रयत्नः क्षेत्रतुल्यः, अदृष्टं बीजतुल्यम्। क्षेत्रबीजयोरिव प्रयत्नादृष्टयोः समावेशात् फलं निष्पद्यते।

क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम्।
क्षेत्रबीजसमायोगात् ततः सस्यं समृध्यते। (६.८)

अदृष्टापेक्षया प्रयत्नस्यास्ति प्राबल्यम्। अल्पमपि हि अदृष्टं प्रयत्नातिशयवशात् फलं व्याप्नोति।

यथाग्निः पवनोद्धूतः सुसूक्ष्मोऽपि महान् भवेत्।
तथा कर्मसमायुक्तं दैवं साधु विवर्धते॥ (६.४३)

अदृष्टातिशयोऽपि प्रयत्नशैथिल्यहेतुना फलात् हीयते।

यथा तैलक्षयात् दीपः प्रह्रासमुपगच्छति।
तथा कर्मक्षयात् दैवं प्रह्रासमुपगच्छति॥

प्रबलमपि अदृष्टं विनीतशिष्यः गुरुमिव प्रयत्नमनुसरदेव फलोन्मुखं भवति। अदृष्टं धर्माधर्मभेदेन द्विविधम्। इत्थञ्च सर्वं कर्म न्याय्यान्याय्यभेदेन द्विविधम्। चक्षुरुन्मेषनिमेषादिकमपि तत्रैवान्तर्भवति।

शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः। (१८.१५)

न्याय्यं कर्म धर्महेतुकं सुखफलकम्, अन्याय्यं कर्म अधर्महेतुकं दुःखफलकम्।

प्राचीनधर्मवशात् दृष्टकारणसहकारेण इह न्याय्ये कर्मणि प्रेरितो मानवः ततः पुनः धर्मं तद्द्वारा सुखञ्च लभते। एवमधर्मवशात् अन्याय्ये कर्मणि प्रेरितः तातः अधर्मं तद्द्वारा दुःखं च अश्नुते। यथा हि अस्थायिनोऽपि अनुभवात् सूक्ष्मपरिणामः संस्कारः उत्पद्य चिरं स्थास्यति, कालान्तरे स्थूलपरिणामं स्मरणं जनयति। तथा अस्थायिनः कर्मणः सकाशात् सूक्ष्मपरिणामः अदृष्टं धर्मरूपमधर्मरूपं वा उत्पद्य चिरं स्थास्यति, कालान्तरे स्थूलपरिणामं सुखानुभवं दुःखानुभवं वा जनयति।

पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः।
नष्टप्रज्ञः पापमेव नित्यमारभते नरः॥
तस्मात् पापं न कुर्वीत पुरुषः शंसितव्रतः। (म.भा. उ. प. ३५.६१)
यत्नतस्तु निषेवेतः पुण्यं नित्यं समाहितः।
प्रज्ञावृद्धिर्भवेत्तेन पुण्यमारभते पुनः।

इत्थं कर्मफलबीजानाम् अविच्छिन्नशृङ्खलया बद्धो मानवः अनवरतं संसरति। यदा तु मानवः बन्धनस्वभावान्यपि कर्माणि यथा बन्धकानि न भवेयुः तथा निर्लिप्तबुद्ध्या समाचरति तदा सः शुभाशुभकर्म फलबीजशृङ्खलातो विनिर्मुक्तः योगी सम्पद्यते।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्। (भ.गी.२.५०)


ISSN: 2320-740X

**योगोन्मुखता**

अतीतानन्तकर्मणां सूक्ष्मपरिणामभूताः अदृष्टाः शुभाशुभवासनाः चित्तम् आक्रामन्त्यः दृष्टकारणसमवधानानुगुणं शुभमशुभं वा चिन्तनं तदनुरूपं कामं क्रोधं वा उत्पाद्यैव शुभे अशुभे वा कर्मणि प्रवर्तयन्ति, ततश्च सुखं दुःखं वा अनुभावयन्ति। यदा तु कर्मवासना चित्तभूमौ अशुभचिन्तनं प्रवर्तयितुमारभते तदा प्रबलेन पौरुषप्रयत्नेन अशुभचिन्तनं निरुद्ध्य शुभचिन्तनं बलात् प्रवर्तयेत्।

शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित्।
पौरुषेण प्रयत्नेन योजनीया शुभे पथि॥ (मुक्तिकोपनिषत् २.५)

यदा यदा अशुभचिन्तनमुपक्रमते तदा तदा तन्निरुद्ध्य शुभचिन्तनं प्रवर्तनीयम्।

अशुभेषु समाविष्टं शुभेष्वेवावतारयेत्।
शुभाया वासनायास्तु वृद्धौ दोषो न सुव्रत॥ (२.६)

शुभचिन्तनाधिक्येन शुभवासनायाः दार्ढ्यात् अशुभवासना शैथिल्यं प्राप्य अशुभकर्मप्रवर्तनसामर्थ्यात् हीयते। न च फलोन्मुखतायां प्राचीनाशुभकर्मवासनायाः निरोधः केनापि कर्तुमशक्यः।
स्मर्यते हि- अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥ इति वाच्यम्। (गरुडपुराणं ५.५७)
प्रारब्धवासनायाः निरोधासम्भवेऽपि चिराभ्यासबलेन क्षीणताऽपादनसम्भवात्। श्रूयते हि –

जन्मान्तरशताभ्यस्ता मिथ्या संसारवासना।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित्॥ (मुक्तिकोपनिषत् २.१४)

न चैवमपि प्राचीनकर्मवासनायाः पौरुषेण प्रयत्नेन शुभे पथि योजनम् असम्भवदुक्तिकमेव। प्राचीनवासनायाः दृढमूलकत्वेन साम्प्रतिकशास्त्रोपदेशजनितपुरुषप्रयत्नापेक्षया सर्वथा प्रबलत्वात्। प्रबलशुभवासनारूपेण चिराभ्यासयोगेन अशुभवासनायाः क्षीणतापादनस्य युक्तियुक्तत्वेन दर्शितश्रुतिसिद्धत्वेन च पुरुषप्रयत्नस्य तत्र अन्यथासिद्धत्वाच्चे वाच्यम्। विविधसाधनाभ्यासपरिपुष्टेन पुरुषप्रयत्नेन प्राचीनकर्मवासनायाः शुभे पथि योजनस्य विवक्षिततत्वात्।

ननु जीवानां शुभेऽशुभे वा कर्मणि प्रवर्तनं ततो निवर्तनं वा ईश्वरसङ्कल्पादेव भवति, न तु तत्र पुरुषस्य स्वातन्त्र्यमस्ति। श्रूयते हि "एष ह्येव साधु कर्म कारयति यमेष उन्निनीषते। एष ह्येवासाधु कर्म कारयति यमेष अधो निनीषते" इति। लोकानाम् अनुभवोऽपि अत्र संवदते। यथोक्तं दुर्योधनेन –

जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः।
केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करिष्ये॥ इति चेन्न। जीवानां प्राक्कृतशुभाशुभकर्मानुगुणमेव ईश्वरः सुकृते दुष्कृते वा कर्मणि प्रवर्तयति निवर्तयति वा। न तु

सङ्कल्पयानात् अत एवेश्वरस्य न वैषम्यम्। दर्शितश्रुतेरपि 'जीवेभ्यः दित्सितमपि फलम् ईश्वरः तदुचितं कर्म कारयित्वैव दास्यति, न साक्षात्' इत्यत्र तात्पर्यम्। लोकानां क्वचित् दुर्योधनप्रभृतीनां न्याय्ये कर्मणि प्रवृत्तेः अन्याय्यात् कर्मणा निवृत्तेश्च अनुत्पादः साधनान्तरसहकारविलोपात्।

**योगसाधनानि**

प्राचीनाशुभवासनानां क्षीणतापादने पुरुषप्रयत्नमात्रं न प्रभवति, नैकानि साधनानि अपेक्ष्यन्ते। तत्राद्यः साधुसमागमः –

साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः।
तीर्थं फलति कालेन सद्यस्साधुसमागमः॥

साधूनां लक्षणम् –

आकृत्यैव विराजन्ते मैत्र्यादिगुणवृत्तिभिः।
समास्समरसास्सौम्या सततं साधुवृत्तयः॥ (महोपनिषत् ४.१९)
अब्धिवद्धृतमर्यादा भवन्ति विशदाशयाः।
नियतिं न विमुञ्चति महान्तो भास्करा इव॥
नापदि ग्लानिमायान्ति निशि हेमाम्बुजा यथा।
नेहन्ते प्रकृतादन्यत् रमन्ते शिष्टवर्त्मनि॥

साधवो हि सुखिषु मैत्रीम्, दुःखिषु करुणां, पुण्यवत्सु मोदं, पापिषु उपेक्षां दर्शयन्ति। "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" । (पातञ्जलयोगसूत्रं १.३३) वस्तुतस्तु समदृष्टयः साधवः –

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥ (भ.गी.५.१८)

द्वितीयसाधनम्- मैत्र्यादिशुभवासनानाम् अभ्यासः।

तृतीयसाधनं प्राणसंरोधनम्। प्राणनिग्रहेण मनोनिगृह्यते, ततः इन्द्रियाणि निगृह्यन्ते।

"इन्द्रियाणां मनो नाथः मनोनाथस्तु मारुतः"। (वराहोपनिषत् २.८०)
यथा पर्वतसाधूनां दह्यन्ते धमनान्मलाः।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणधारणात्॥ (अमृतनादोपनिषत्-७)
इड्या वायुमारोप्य शनैः षोडशमात्रया।
कुम्भयेत् पूरितं पश्चात् चतुष्षष्टया तु मात्रया॥
रेचयेद् पिङ्गलानाड्या द्वात्रिंशन्मात्रया पुनः॥ (योगतत्त्वोपनिषत् ४१)


ISSN: 2320-740X

बाह्यवायुम् इडानाड्या षोडशमात्राकालं यावत् आकर्षयेत् । ततः पूरितं वायुं सुषुम्नानाड्यां चतुष्षष्टिमात्राकालं यावत् धारयेत् । ततः पिङ्गलानाड्या द्वात्रिंशन्मात्राकालं यावत् रेचयेत् । एषः प्राणायामः ।

चतुर्थसाधनं तत्वज्ञानाभ्यासः ।

गुरुमुखात् शास्त्रोपदेशेन स्थूलसूक्ष्मकारणशरीरेभ्यः त्रिविधेभ्यः अतिरिक्तस्य नित्यस्य निर्विकारस्य आत्मतत्त्वस्य ज्ञानमवाप्य अभ्यसनीयम् ।

ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः ।
स्थूलदेहगता एते स्थूलाद्भिन्नस्य मे न हि ।( आत्मप्रबोधोपनिषत्- २२)
क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः ।
लिङ्गदेहगता एते ह्यलिङ्गस्य न सन्ति मे ।।
जडत्वप्रियमोदत्त्वधर्माः कारणदेहगाः ।
न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः ।।

आत्मस्वरूपम् – “अकर्ताहम् अभोक्ताहम् अविकारोऽहमव्ययः ।
शुद्धो बोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ (अध्यात्मोपनिषत्-६९)

शास्त्रम् – उपनिषदः ।

गुरोर्लक्षणं तु – नित्यं ब्रह्म निराकारं येन प्राप्तं स वै गुरुः ।
स शिष्यं प्रापयेत् प्राप्यं दीपो दीपान्तरं यथा ॥ (गुरुगीता - १०४)

**योगसम्पत्तिः**

तत्त्वज्ञानशुभवासनादिसाधनपरिपुष्टेन पौरुषेयप्रयत्ने न अशुभवासनाः क्षयं यान्ति । निवृत्तिस्तु कर्मवासनानां सततमभ्यस्यमानस्य तत्वज्ञानस्य साक्षात्कारात्मतारूपपरिपाकादेव ।

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्ज्यं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।। (भ.गी.२.५९)

क्षीणासु अशुभवासनासु मैत्र्यादिशुभवासनाः अपि प्रबलया चिन्मात्रवासनया परित्यज्य ततः तामपि परियज्य आत्मस्वरूपे स्थितः योगी कर्मफलबीजशृङ्खलातो विनिर्मुक्तो विजयते ।

मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः ।
मैत्र्यादिवासनानाम्नीः गृहाण मलवासनाः ॥
ता अप्यतः परित्यज्य ताभिर्व्यवहरन्नपि ।
अन्तश्शान्तः समस्नेहो भव चिन्मात्रवासनः ।।

तामप्यथ परित्यज्य मनोबुद्धिसमन्विताम् ।
शेषस्थिरसमाधानो मयि त्वं भव माशुच ॥ (मुक्तिकोपनिषत् २.७१)

लोके मैत्र्यादिकं सुखदुःखे रागद्वेषौ वा प्रदर्शयन्नपि न बिभर्ति योगी । चिन्मात्रवासनः सोऽयं लोकसङ्ग्रहार्थं कर्माणि आचरन्नपि तत्फले आकाङ्क्षाविरहात् कर्मजन्यपुण्यपापाभ्यां न लिप्यते ।

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।। (भ.गी ५.१०)

न हि योगी कर्माचरणं श्रमसाध्यत्वेन विद्वेष्टि, कर्मपरित्यागेन सन्तुष्यति, नापि फलाकाङ्क्षया कर्माचरणम् अभीप्सति । नापि आचरितकर्मभ्यः फलस्य प्राप्तौ सन्तुष्यति अप्राप्तौ विषीदति । सोऽयं कर्मणां निष्पत्तौ अनिष्पत्तौ, ततः फलस्य निष्पत्तौ अनिष्पत्तौ च समो भावो योगः ।

"योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते" । (भ.गी २.४८)

**योगस्य लोकोत्तरता**

अज्ञो लोकः रूपरसादीनां बाह्यविषयाणामुपभोगाय शरीरमुपयुङ्क्ते, विवेकी जनः योगसाधनाय उपयुङ्क्ते ।

भोगाय पामराणां योगाय विवेकिनां शरीरमिदम् ।
भोगाय च योगाय च न कल्पते दुर्विदग्धानाम् ॥

अज्ञो लोकः मनोऽधीनः चेष्टते, व्यवहरति, मनोऽतीतमात्मतत्त्वं नैव जानाति । योगी तु आत्मतत्त्वे प्रतिष्ठितः स्वाधीनं मनः प्रवर्तयति ।

तरवोऽपि हि जीवन्ति जीवन्ति पशुपक्षिणः ।
स जीवति मनो यस्य मननेनोपजीवति ॥ (महोपनिषत् ३.१३)
वस्तुतस्तु योगिनः मनो विलीनं भवति ।
स्वात्मन्येव सदा स्थित्या मनो नश्यति योगिनः ।
मुक्त्या श्रुत्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मना ॥ (अध्यात्यो. ४)

अज्ञो लोकः बाह्यविषयेषु स्रक्चन्दनवनितादिषु सुखमन्विष्यति, न ततः सन्तृप्यति । अन्तर्गतं नैजानन्दं नैवानुभवति । योगी तावत् आत्मानन्देन सन्तृप्तः बाह्यविषयेभ्यः सुखं नैव प्रतीक्षते ।

अविदितपरमानन्दो वदति जनो विषयमेव रमणीयम् ।
तिलतैलमेव मृष्टं येन न दृष्टं घृतं क्वापि ॥

अज्ञः कर्तृत्वाभिमानेन कर्माण्याचरति । अत एव कर्मफलेन इतस्ततो नीयमानः अस्वतन्त्रः संसरति,


ISSN: 2320-740X

बलादापत्य कर्मफलं हर्षेण विषादेन वा तं विकरोति। योगी तु निर्लिप्तबुद्ध्या कर्माण्याचरति। अतः कर्म तत्फलं वा तं न विकरोति, नैव स्प्रष्टुं प्रभवति।

अज्ञो जन्तुरनीशोऽयं आत्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥ (म.भा.वनपर्व. ३०.२८)

अज्ञो लोकः जाग्रत्स्वप्नसुषुप्तिभिः तिसृभिः अवस्थाभिः अनवरतं बद्धः सञ्चरति। योगी तावत् ताभिः तिसृभिः अवस्थाभिः विनिर्मुक्तः स्वस्वरूपेऽवतिष्ठते।

अवस्थात्रयमन्वेति न चित्तं योगिनः सदा।
जाग्रन्निद्राविनिर्मुक्तः स्वरूपावस्थतामियात्॥ (नादबिन्दूपनिषत् ५४)

अज्ञस्य लोकस्य भवति सङ्कुचितमतिः, परिमितपरिवारः। योगिनस्तु वसुधैव कुटुम्बकम्।

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

**योगस्य हानिकारकम्**

योगमारुरुक्षोः अत्यशनानशनादिकं हानिकारकम्।

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ ( गी. ६.१६)

सम्माननमपि योगस्य हानिकारकम्। सम्माननं परां हानिं योगर्द्धेः कुरुते यतः।
जनेनावमतो योगी योगसिद्धिं च विन्दति। ( नारदपरिव्राजकोपनिषत् ५.२९)

तथा चरेत वै योगी सतां धर्ममदूषयन्।
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम्॥

**साध्यसाधनोभयपरो योगः**

मानवजीवनस्य लक्ष्यभूतं चरमं प्रयोजनं परमात्मचैतन्ये एकीभावः, तस्य साधनं मनोनिग्रहः तस्य पुनः अवान्तरप्रयोजनानि च योगशब्देन उच्यन्ते। तद्यथा, मनोनिग्रहो योगः "योगश्चित्तवृत्तिनिरोधः" (पां.सू. १.१.२) निर्लिप्तबुद्ध्या कर्माचरणं योगः "योगः कर्मसु कौशलम्" बुद्धेः निर्लिप्तत्वं योगः "सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते"
इन्द्रियमनोबुद्धीनां प्रशान्तता योगः

"यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सइ
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधाराणाम्॥" (कठोपनिषत्)

जीवात्मपरमात्मनोः एकीभावो योगः "संयोगो योग इत्युक्तौ जीवात्मपरमात्मनोः" (योगयाज्ञवल्क्यसंहिता १.४४) । दुःखानां अत्यन्तोपशयो योगः "तं विधाद् दुःखसंयोगवियोगं योगसंज्ञितम्" (भ.गी. ६.२२)

**योगस्योत्कर्षः**

प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते। सकलजीवीयचेष्टानां लौकिकानां वैदिकानाञ्च परमं प्रयोजनं सुखं दुःखनिवृत्तिर्वा नान्यत्। परिणामविरसत्वेऽपि आपाततः रमणीयता शमनकारिता च बाह्यवस्तुषु। परा काष्ठा आनन्दस्य दुःखनिवृत्तेश्च आत्मन्येव। "सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्" (म.स्मृ.)। अत एव –

आत्मानन्दरसो येन सकृदास्वादितो भवेत्।
स सर्वकार्यं सन्त्यज्य तत्रैव परिधावति॥

दीर्घकालं नैरन्तर्येण सादरमासेवितविविधसाधनानां दार्ढ्यात् यदा कर्मवासनाभ्यो विनिर्मुक्तं सन्मनः परिशुध्यति, तदा योगी देहेन्द्रियमनःप्राणेभ्यः अतीते परमसूक्ष्मे आत्मतत्त्वे निमग्नेन सर्वतो निवारितप्रचारेण मनसा परिशुद्धमात्मचैतन्यं पश्यन् आनन्दस्य चरमसीमां लभते।

युञ्जन्नेव सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखमश्नुते। (गी.६.२८)

प्रज्वलतो महतोऽग्नेः सकाशात् निरसरन्तः सहस्रशः विस्फुलिङ्गा इव परिपूर्णात् परमानन्दभयात् परमात्मचैतन्यात् आविर्भूताः सन्तोऽपि जीवाः शरीरेन्द्रियमनोभिः उपाधिभिः बद्धाः दुःखमनुभवन्तः संसरन्ति । मलिनान् दुःखमयान् परिच्छिन्नान् इमान् उपाधीन् अतिक्रम्य परिशुद्धपरमानन्दमय-सत्स्वरूपे प्रतिष्ठितो योगी अविदितलक्ष्यान् विपथगामिनश्च मन्त्रिणो लोकात् लक्ष्यप्रापणेन सान्निध्यमात्रेणापि उपकरोति।

देशः पूतो जनाः पूताः तादृशो यत्र तिष्ठति।
तत्कटाक्षोऽथ संसर्गः परस्मै श्रेयसेऽप्यलम्॥ (गुरुगीता ११६)
अत एव तपोज्ञानकर्मभ्यो योगस्य उत्कर्षः भगवता उक्तः गीतायाम्।
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ इति ( गी. ६.४६)

***********


ISSN: 2320-740X

# वीप्सा

✍ डा. चन्द्रशेखरभट्टः
सहायकाचार्यः, व्याकरणविभागः

सन्ति प्रयोगाः ग्रामो ग्रामो रमणीयः, वृक्षं वृक्षं सिञ्चति,गौर्गौः कामदुघा, वने वने चन्दनम्, इत्यादयः। प्रतीयते च एषु प्रयोगेषु कात्स्न्र्यम्। परं कस्यायं महिमा यद्द्विरुच्चारणमात्रेण साकल्यस्य प्रतीतिरिति। वीप्सायाः इति ब्रूमहे। अथ का वीप्सा ? आप्नोतेरयं विपूर्वादिच्छायामर्थे सन् विधीयते। व्याप्तुमिच्छा हि वीप्सा। ननु चैवं चिकीर्षतीत्यत्रापि प्राप्नोति। अस्ति चात्र करोतिना कटादेर्व्याप्तुमिच्छेति द्विर्वचनप्रसङ्गः। न ब्रूमः सामान्येन व्याप्तुमिच्छा इति। किं तर्हि ? व्याप्तिविशेषविषया प्रयोक्तुरिच्छा सा। योगरूढिर्न तु यौगिकः। वीप्सा च प्रयोक्तृधर्मः, आबाधवत्। आबाधः पीडा। गतगत इत्युक्ते प्रतिपद्यामहे प्रियस्य चिरगमनेन पीडितो वाक्यं प्रयुङ्क्ते इति। ननु स विशेषो नाद्याप्यभिहित इति चेत् शृणु। नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुः व्याप्तुमिच्छा। नानाभूतमर्थं द्रव्यलक्षणं ये शब्दा ब्रुवन्ति तेषां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत् प्रयोक्तुमिच्छा वीप्सा इत्यर्थः। क्रियागुणाभ्यामिति द्रव्यस्याप्युपलक्षणम्। क्रियोदाहरणम् - पुरुषः पुरुषो निधनमुपैति। इह निधनक्रियया पुरुषं व्याप्तुमिच्छति प्रयोक्ता। जातस्य हि ध्रुवो मृत्युरित्यर्थः। गुणोदाहरणम् - ग्रामो ग्रामो रमणीयः। इह निःशेषग्रामो रमणियत्वेन गुणेन व्याप्तुमिष्टः प्रयोक्त्रा। द्रव्योदाहरणम् - ग्रामे ग्रामे पानीयम्। पानीयेन द्रव्येण ग्रामकर्मकव्याप्तीच्छेह प्रयोक्तुः। चिकीर्षा हि कर्तुरिच्छा न तु प्रयोक्तुः। अतो न तत्र द्विर्वचनप्रसङ्गः। कथं पुनरयं विशेषो लभ्यते ? विशब्दोऽत्र वर्तते। विशिष्टा ईप्सा वीप्सेति प्रादिसमासो भविष्यति। तेनायं विषयविशेषो लभ्यते।

अथ किं वीप्सायाः प्रयोजनम् ? अनवयवेन साकल्येन द्रव्याणां प्रतिपत्तिरिति ब्रूमः। ननु जातावपि प्राप्नोति। यथा ब्राह्मणो न हन्तव्यः, सम्पन्नो व्रीहिरिति। साकल्यप्रतिपत्तिरिहास्ति। नैष दोषः, एकार्थत्वाज्जातेः। जातिर्हि एकार्था। एकार्थबुबोधयिषया जातिशब्दः प्रयुज्यते। व्यक्तिबोधस्तु नान्तरीयकः, अग्न्यानयनेऽचोदितपात्रानयनवत्। अनेकार्थाश्रया पुनर्वीप्सा। अनेकमर्थं सम्प्रत्याययिष्यामीति वीप्सा प्रयुज्यते। अतो जात्याख्यायां द्विर्वचनाभावः। अत एव लक्षणे नानाभूतार्थानामिति निवेशः। अथवा नेदं सूत्रं द्विर्वचननिर्वर्तकं, किं तर्हि ? निवर्तकमद्विर्वचनस्य। यावदर्थं प्रयोगे प्राप्ते वीप्सायां द्वे एव शब्दरूपे प्रयोक्तव्ये नातिबहु इति नियमः क्रियते। जातिशब्दे तु द्वयोर्बहूनां वा प्रयोगाभावः। कथं तर्हि निवृत्तानामर्थः प्रतीयते ? उच्यते।

एकशेषे यथान्येषामर्थः शिष्टेन गम्यते।
तद्वदत्र विशेषेऽपि शिष्टाभ्यामितरार्थधीः॥

शिष्यमाणे द्वे एव विवक्षितान् सर्वान् अर्थानभिधास्यतः। अस्मिन्वने अयं वृक्षः शोभनः, अयं वृक्षः शोभन इति क्रमविवक्षायामपि न द्विर्वचनम्, युगपद्ग्रहणात्। क्रमेण शोभनत्वप्रतिपादने बहूनपि शब्दान् प्रयुङ्क्ते प्रयोक्ता। अथात्र एकशेषः कुतो न ? नानावाचित्वाभावात्। पृथगर्थपर्यवसायित्वं हि नानावाचित्वम्। न चैकशेषे तदस्ति। तत्र प्रत्येकं विधेयसम्बन्धो नियमेन न प्रतीयते। न हि ब्राह्मणेभ्यः शतं देयमित्युक्ते प्रत्येकं शतं देयं भवति। ब्राह्मणाय ब्राह्मणाय शतं देयमित्युक्ते प्रत्येकं शतं दीयते। पृथगर्थपर्यवसायितया पृथग्देयसम्बन्धो ह्यत्र हेतुः। पृथगर्थपर्यवसायितायां यावदर्थं शब्दप्रयोगे प्राप्ते द्वावेव शब्दौ प्रयोक्तव्यौ इति अद्विर्वचननिवर्तकमिदमिति पूर्वमवोचाम।

किं पुनरिदं वीप्सायां सर्वमभिधीयत आहोस्विदेकम् ? सर्वमभिधीयते। न तर्हीदानीम्वृक्षं वृक्षमित्येकवचनमुपपद्यते। बहवश्च तेऽर्थाः। यावता बहवोऽर्थाः बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। अथ एकमभिधीयते, एवमपि सर्वद्रव्यावगतिर्न सिद्ध्यति। अस्तु तर्हि सर्वाभिधानम्। ननु चोक्तं बह्वभिधानात् बहुवचनप्रसङ्ग इति। नैष दोषः। इदं तावदयं प्रष्टव्यः बह्वर्थाभिधानात् बहुवचनमित्यापादयता त्वया किम् अवयवाद् बहुवचनं क्रियते आहोस्वित् समुदायात्? न तावदाद्यः, परिगृहीतैकत्वानां बहूनामभिधानात्। न ह्यन्यथा प्रत्येकं सम्बन्धः प्रतीयते। अथ ब्रूषे समुदायादिति तदपि न। द्विर्वचनोत्तरं सत्यामपि बहुत्वावगतौ बहुवचनं नोत्पद्यते समुदायस्य प्रातिपदिकत्वाभावात्। यथा पश्य मृगो धावति। इह सत्यपि दर्शनक्रियापेक्षे कर्मत्वे द्वितीयाऽश्रवणम् उक्तहेतोः।

अथास्मिन्वने धवखदिरपलाशाः शोभनाः इत्यादिद्वन्द्वे द्विर्वचनं प्राप्नोति। कुतोऽयं संशयः ? कात्स्न्र्यस्य प्रतीतेः इति चेत् अशेषविशेषव्याप्तावनभिमतायामपि एवं प्रयोगः क्रियते। नियमेन तस्यामभिमतायां हि द्विर्वचनं भवति। अत एव हेतोरस्मिन् वने वृक्षाः शोभनाः इत्येकशेषेऽपि न द्विर्वचनम्। यदापि सर्वशब्दप्रयोगः तदापि न द्विर्वचनं,सर्वशब्देनैव वीप्साया द्योतनात्। ननु वीप्सायां सर्वाभिधाने ब्राह्मणं ब्राह्मणमामन्त्रयते इत्यादौ जगतीतलवर्तिसर्वब्राह्मणामन्त्रणमिति प्रतीयते। तच्च असम्भवम्। नैष दोषः, कात्स्न्र्यमिह आधिकारिकम्। तत्तत्प्रयोक्तृबुद्धिस्थनानावस्तुविषयम्। न हि जगतीतलवृत्तिसर्वब्राह्मणामन्त्रणेऽयमधिकारी। आमन्त्रणाद्युपपदमहिम्ना सङ्कोचस्य तत्राव-श्यकत्वात्। यत्र तु सङ्कोचकं नास्ति तत्रासङ्कोच इष्ट एव। यथा - जातो जातो निधनमुपैति।

अथ क्व पुनरियं वीप्सा ? सुबन्तेषु। कुत एतत् ? तदभिव्यक्तौ सुबन्तानामेव सामर्थ्यात्। न हि तिङन्तानां प्रयोगे सोऽर्थः प्रतीयते। यथा - पचति पचति, जल्पति जल्पति। इह हि कर्ता अनुपरमन् पचति, अनुपरमन् जल्पति इत्यर्थोऽवगम्यते।


ISSN: 2320-740X

तदयमत्रार्थः - नानाभूतार्थवाचिनां यान्यधिकरणानि वाच्यानि तेषां सहविवक्षितानां पृथक्सङ्ख्यायुक्तानां प्रत्येकं क्रियया गुणेन वा व्याप्तुमिच्छा वीप्सा । उक्तं च कैयटेनापि - यदा पृथक्सङ्ख्यायुक्तानितरेतरयोगमप्राप्तान्सर्वानर्थान् क्रियया गुणेन वा युगपद्व्याप्नुवन् वाक्यं वक्ति तदा स वक्तृस्थ इच्छाविशेषो द्विर्वचनेन द्योत्यते । सा हि वीप्सा इति ।

**********

## अज्ञानलक्षणानि

✍ **डा. गणेश ईश्वर भट्टः**

सहायकाचार्यः, अद्वैतवेदान्तविभागः

स्वयं ब्रह्मस्वरूपोऽपि जीवः अनिर्वचनीयाज्ञानात् जैवरूपम् आपन्नः पौनःपुन्येन संसरति । तस्य अज्ञानस्य निवृत्तौ निवृत्तबन्धः स्वस्वरूपभूतेन ब्रह्मात्मना अवतिष्ठते । अतो मुमुक्षुणा जीवेन अज्ञाननिवृत्तौ सर्वात्मना यतनीयमिति सर्वे वेदान्ता उपदिशन्ति । सत्येवं किंलक्षणकम् इदमज्ञानमिति जिज्ञासा जायते । तत्र अन्ये दार्शनिकाः वेदान्तसम्मतम् अज्ञानं निरूपयितुम् अशक्यम् इति मन्वानाः अज्ञानलक्षणं दूषयन्ति । तथा हि अज्ञानशब्देन तावत् सिद्धान्त्यभिमतम् अज्ञानस्वरूपं न सिद्ध्यति । अज्ञानं नाम ज्ञानस्य अभावः, नञः अभवार्थकत्वात् । स च ज्ञानप्रागभावध्वंसयोः अन्यतरः, न तु तदतिरिक्तं किञ्चिदस्ति । अयं ज्ञानाभाव एव न जानामि इत्यनुभवे विषयः । यथा ज्ञेयस्य घटादेः अभावः न अनिर्वचनीयः, एवं ज्ञानस्य अभावोऽपि । यदि नञर्थः विरोधः, तदा संशयविपर्यासादेः इच्छादिगुणान्तरस्य च अज्ञानविरोधित्वात्, तयोश्च भावरूपत्वेन भावाभावविलक्षणत्वरूपम् अनिर्वचनीयत्वं नोपपद्यते । यदि तु अविद्यापदे नञः अन्यत्वम् अर्थः, तदपि न सम्भवति, विद्यान्यस्य आत्मादेरपि अविद्यात्वप्रसङ्गात् । तथा च अविद्याशब्देन तावत् सिद्धान्त्यभिमता अनिर्वचनीया अविद्या न सिद्ध्यति ।

लक्षणमपि तस्याः न सम्भवति । न तावत् ज्ञाननिवर्त्यत्वं लक्षणम्, उत्तरज्ञानेन निवर्त्यस्य पूर्वज्ञानस्यापि अविद्यापत्तेः । एतद्दोषपरिजिहीर्षया अज्ञानस्य अनादित्वं विशेषणं दीयते, पूर्वज्ञानस्य सादित्वेन तत्र लक्षणाप्रवेश इति यदि उच्यते, तदा अनादौ ज्ञाननिवर्त्ये ज्ञानप्रागभावे अतिव्याप्तिः । भावत्वं विशेषणमपि अत्र दातुम् अशक्यम्, आनादेः भावस्य आत्मवत् निवर्त्यत्वानुपपत्तेः । अनाद्यनिर्वचनीयत्वं इत्यपि तस्य लक्षणं न । अनिर्वचनीयत्वम् इत्यस्य निर्वचनागोचरत्वम् इति अर्थः असम्भवी, निर्वचनाविषयशब्देनैव निरुच्यमानत्वात् । नापि भावाभावविलक्षणत्वं तत्,

परस्परविरोधित्वेन असम्भावितत्वात् । भ्रमोपादानत्वमपि अलक्षणम्, भ्रमोपादानत्वेन अङ्गीकृते आत्मनि अतिव्याप्तेः इति। एवमाक्षिप्ते चित्सुखाचार्याः इदमज्ञानलक्षणं प्राणैषुः-

**अनादि भावरूपं यद्विज्ञानेन प्रलीयते।**

**तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते॥** इति।

अनादित्वे सति भावत्वे सति ज्ञाननिवर्त्यत्वम् अज्ञानस्य लक्षणम् । अत्र उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने, ज्ञानप्रागभावे, आत्मनि च अतिव्याप्तिवारणाय क्रमेण त्रीणि दलानि। अज्ञानस्य ज्ञाननिवर्त्यत्वोक्त्या अज्ञानपदे नञः विरोधः अर्थः इति ज्ञाप्यते । विरोधादेव अज्ञानं ज्ञानेन निवर्तते । अत्राशङ्का- शुद्धचैतन्यावरकस्य अज्ञानस्य अनादित्वसम्भवेऽपि रजताद्युपादानभूतं यत् शुक्त्याद्यवच्छिन्नं चैतन्यम्, तस्य सादित्वेन तदावरकम् अज्ञानमपि सादि । अतः तस्मिन् लक्षणस्य अव्याप्तिः इति । उच्यते- **आश्रयत्वविषयत्वभागिनी निर्विभागगतिरेव केवला** इति सङ्क्षेपशारीरककारवचनानुसारम्, शुद्धचैतन्यमेव अज्ञानस्य आश्रयः विषयश्च । अनादिशुद्धचैतन्याश्रितत्वात् रजतोपादानमपि अज्ञानम् अनादि । शुक्त्यादिकं जडं तु चैतन्यस्य अज्ञानविषयतायाः अवच्छेदकमेव न अज्ञानविषयः । अतः अनादित्वघटितं लक्षणं तत्रापि वर्तत एव।

एवमपि भावानामिव अभावस्यापि अज्ञानोपादानकत्वात्, अभावोपादानस्य भावरूपत्वासम्भवात् तादृशस्य अज्ञानस्य भावरूपत्वं नास्ति, **प्रकृत्या सह सारूप्यं विकाराणामवस्थितम्** इति न्यायात् इति आशङ्कायाम् एवं समाधीयते- भावरूपत्वोक्तिः अज्ञानस्य अभावविलक्षणत्वाभिप्रायेण, न तु वैशेषिकसम्मतं भावत्वम् अज्ञाने वर्तते । अन्यथा अज्ञानस्य अनिर्वचनीयत्वं न स्यात् । अतः आरोपिताभावोपादानस्य अपि अज्ञानस्य अभावविलक्षणत्वमिव भावविलक्षणत्वमपि वर्तते। न च तथापि अभावविलक्षणत्वस्यापि सत्त्वेन विजातीयं तदज्ञानं कथम् अभावोपादानम्, विजातीयस्यापि उपादानत्वे ब्रह्मणः अपि विजातीयमिथ्याप्रपञ्चोपादानत्वप्रसङ्गात् इति वाच्यम् । सर्वथा साजात्यस्य सर्वथा वैजात्यस्य वा सत्त्वे उपादानोपादेयभावस्यैव असम्भवेन अज्ञानाभावयोः सर्वथा साजात्यस्य आपादनासम्भवात् । अतः कार्याकारतः कारणाकारतश्च तयोः वैजात्यं वक्तव्यमेव । न चैतावता सत्यस्य ब्रह्मण एव असत्यजगदुपादनत्वापत्तिः, विवर्तोपादनत्वस्य ब्रह्मण इष्टत्वात् । तच्च वियदादिप्रपञ्चाकारेण परिणममानाज्ञानाधिष्ठानत्वम् । यदि केवलं सत्यं ब्रह्म जगदुपादानं स्यात्, तर्हि सत्यस्य निवृत्त्यसम्भवेन उपादाननिवृत्त्यभावात् उपादेयस्य प्रपञ्चस्यापि निवृत्तिः न स्यात् । अतः सत्यस्य ब्रह्मणः असत्याकारेण परिणममानत्वं नाभ्युपेयते। तदुक्तम्-

**शुद्धतत्त्वं प्रपञ्चस्य न हेतुरनिवृत्तितः।**

**ज्ञानज्ञेयादिरूपस्य मायैव जननी ततः॥** इति।


ISSN: 2320-740X

एवमत्र शङ्का- भामतीमते शुद्धब्रह्मणः ज्ञानविषयत्वाभावात् ब्रह्मविषयकाखण्डाकारवृत्तिदशायां तयैव वृत्त्या उपहितत्वात् ब्रह्मणः शुद्धत्वं नास्ति। अतः ज्ञानविषयीभूतं ब्रह्म उपहितम्। एवं सति उपहितब्रह्मविषयकज्ञानेन शुद्धब्रह्मविषयकाज्ञानस्य निवृत्त्यभावात्, शद्धब्रह्माश्रिते तस्मिन् अज्ञाने ज्ञाननिवर्त्यत्वघटितलक्षणस्य अव्याप्तिः इति। उच्यते- यथा अखण्डाकारवृत्तिदशायां ब्रह्म तयैव वृत्त्या उपहितं भवति, एवमेव अज्ञानदशायां ब्रह्मविषयकेन तेन अज्ञानेनैव ब्रह्म उपहितं भवति। न हि अज्ञानसत्त्वदशायां ब्रह्म अज्ञानानुपहितं भवितुमर्हति। अतः अज्ञानोपहितत्वात् अज्ञानविषयस्य ब्रह्मणः शुद्धत्वमेव नास्ति। अतः उपहितब्रह्मविषयकम् अज्ञानम् उपहितब्रह्मज्ञानेन निवर्तत इति समानविषयकत्वेन निवर्त्यनिवर्तकभावसिद्धिः।

पुनः शङ्का- औपाधिकभ्रमोपादानाज्ञाने जीवन्मुक्ताज्ञाने च ज्ञाननिवर्त्यत्वं कथम्? तथा हि तडागादितीरस्थवृक्षादीनां तडागजले अधोऽग्रत्वादिरूपेण यः प्रतिबिम्बो जायते, अयम् औपाधिकः भ्रमः। अत्र अधिष्ठानभूतवृक्षादीनां ज्ञाने सत्यपि प्रतिबिम्बानुवृत्तिदर्शनात्, भ्रमोपादानम् अज्ञानं न ज्ञाननिवर्त्यम्। एवमेव ब्रह्मसाक्षात्कारानन्तरमपि प्रारब्धकर्मसमाप्तिपर्यन्तम् अज्ञानस्य अनिवर्तमानत्वात् तस्मिन् अज्ञाने ज्ञाननिवर्त्यत्वस्य अव्याप्तिरिति। उच्यते- अप्रतिबद्धं हि कारणं कार्यजनकम्। प्रतिबन्धकवशात् क्वचित् कार्यानुदये अपि कारणस्य कारणत्वं तु नापैति। औपाधिकभ्रमस्थले उपाधिसत्ता, प्रारब्धकर्म च अज्ञाननिवृत्तौ प्रतिबन्धके भवतः। अत एव तयोः प्रतिबन्धकयोः निवृत्तौ भ्रमोपादानम् अज्ञानमपि निवर्तते। प्रतिबन्धककाले तु उत्पन्नेऽपि ज्ञाने ज्ञानप्रागभाववत् अज्ञानगतावरणशक्तिः निवर्तते। विक्षेपशक्त्या तु सह अज्ञानस्य विरोधो नास्ति। अत एव जीवन्मुक्तस्य विक्षेपशक्तिमदज्ञानम् अनुवर्तते।

अत्राशङ्का- अज्ञानस्य अनादित्वं नोपपद्यते, यत् कल्पितम्, तद्दोषजन्यधीमात्रशरीरम् इति व्याप्तेः शुक्तिरजतादौ दृष्टत्वेन, अज्ञानमपि दोषजन्यधीमात्रशरीरम्। तथैव अज्ञानमपि शुक्तिरजतवत् ज्ञाननिवर्त्यम् अभावविलक्षणं च। अतः कल्पितशुक्तिरजतसमानयोगक्षेमस्य अज्ञानस्य अनादित्वं नोपपद्यत इति। समधानम् - कल्पितत्वमात्रं न दोषजन्यधीमात्रशरीरत्वे प्रयोजकम्, तथा सति व्यावहारिकपदार्थानाम् उच्छेदापातात्। किन्तु प्रतिभासकल्पकसमानकालीनकल्पकवत्त्वम्। कल्पितस्य शुक्तिरजतादेः यः अविद्यावृत्तिरूपः प्रतिभासः, तस्य कल्पकः द्रष्टा अविद्यावृत्त्युपहितं चैतन्यम्, तदेव चैतन्यं शुक्तिरजतस्यापि कल्पकम्। अविद्याकल्पितरजततज्ज्ञानाभासयोः एक एव साक्षी द्रष्टा कल्पकः। अतः प्रतिभासकल्पकसमानकलीनकल्पकवत्त्वं शुक्तिरजतस्य वर्तते। अविद्यायास्तु इदं नास्ति। यतः अविद्यायाः कल्पकम् अविद्योपहितं चैतन्यम्। तच्च अनादिसाक्षिरूपं सर्वदैव अस्ति। किन्तु अविद्यावृत्तिरूपः अविद्याप्रतिभासः सर्वदा नास्ति। अतः वैलक्षण्यात्

दोषजन्यधीमात्रशरीरत्वाभावेन शुक्तिरजतवत् सादित्वम् अज्ञानस्य नापद्यते। किञ्च पूर्वपक्ष्युक्तरीत्या अविद्यायाः सादित्वसाधने **अजामेकाम् अनादिमायया** इत्यादिशास्त्रविरोधश्च।

तथापि अविद्यायाः अभावविलक्षणत्वात् तस्यां भावविलक्षणत्वं कथम्, भावाभावयोः परस्परविरोधात् इति चेत् इत्थम्- अविद्यायाः भावत्वे तस्याः निवर्त्यत्वायोगात्, अभावरूपत्वे च उपादानत्वासम्भवात् सा भावाभावविलक्षणा तृतीयप्रकारा। अतः यत्र न अभावत्वं तत्र भावत्वम्, यत्र न भावत्वं तत्र अभावत्वमिति भावत्वाभावत्वयोः परस्परविरहव्यापकत्वं नास्ति। यत्र अभावत्वम् तत्र भावत्वाभावः, यत्र भावत्वम् तत्र अभावत्वाभावः इति परस्परविरहव्याप्यत्वरूपः विरोधस्तु, एकविरहमात्रात् अपरस्य सत्त्वं नापादयति। यथा गोत्वविरहात् गजे अश्वत्वं नापद्यते। न च अविद्या न ज्ञाननिवर्त्या, अनादित्वे सति अभावविलक्षणत्वात् आत्मवत् इति वाच्यम्। आत्मत्वस्य उपाधित्वात्। आत्मत्वं हि दृष्टान्ते आत्मनि वर्तते, नास्ति च अविद्यायाम् । न च अस्य उपाधेः, यत्र ज्ञाननिवर्त्यत्वाभावः तत्र आत्मत्वमिति साध्यव्यापकत्वं नास्ति, अत्यन्ताभावान्यान्योन्याभावयोः ज्ञाननिवर्त्यत्वाभावे अपि आत्मत्वस्य अभावात् इति वाच्यम्। अधिकरणातिरिक्तस्य अनिवर्त्यस्य अत्यन्ताभावादेः अनभ्युपगमात् । वस्तुतस्तु, सादित्वम् अनादित्वं वा निवर्त्यत्वानिवर्त्यत्वयोः न प्रयोजकम् । अनादिरपि प्रागभावः विनश्यति । सादिरपि ध्वंसः न निवर्तते । अतः नाशसामग्र्याः सन्निपातः निवर्त्यत्वे प्रयोजकः । तदसन्निपातः अनिवर्त्यत्वे प्रयोजकः । यस्य नाशो भवति, तत्र नाशकसामग्रीसन्निपातो वर्तते, यस्य नाशः नास्ति, तस्य नाशकसामग्रीसन्निपातो नास्तीति सन्निपातासन्निपातौ फलबलकल्प्यौ । एवं च अनादिभावरूपत्वादिरूपम् अज्ञानलक्षणं निर्दुष्टम्।

भ्रमोपादानत्वमपि अज्ञानलक्षणम् । सर्वस्यापि भ्रमस्य अज्ञानमेव उपादानम् । इदं च विश्वभ्रमोपादानमायाधिष्ठानं ब्रह्म इति पक्षे। अस्मिन् पक्षे ब्रह्मणः उपादानत्वाभावात् न लक्षणस्य ब्रह्मणि अतिव्याप्तिः । यदि केवलं ब्रह्म अथवा ब्रह्मसहिताविद्या जगदुपादानम्, तदा अतिव्याप्तिपरिहाराय परिणामित्वम् अचेतनत्वं वा विशेषणं देयम्। परिणामित्वे सति भ्रमोपादानत्वम् अचेतनत्वे सति भ्रमोपादानत्वं वा अज्ञानस्य लक्षणम् । न च तथापि अभावभ्रमोपादानत्वं भावरूपाज्ञाने नास्ति इति तस्मिन् अज्ञाने लक्षणस्य अव्याप्तिरिति वाच्यम् । अभावभ्रमस्यापि प्रमानिवर्त्यत्वेन अज्ञानोपादानकत्वावश्यम्भावात् । अन्यथा ज्ञानम् अज्ञानस्यैव निवर्तकमिति नियमात् अभावप्रमया अभावभ्रमनिवृत्तिः न स्यात् । भ्रमस्य अज्ञानोपादानकत्वे तु अभावप्रमया अज्ञाननिवृत्तौ भ्रमोऽपि निवर्तत इति युक्तम्।

अत्र शङ्का स्यात्- भ्रमस्य भावविलक्षणाज्ञानोपादानकत्वं न घटते, तस्य भावरूपत्वात् । भावविलक्षणत्वे तु भ्रमस्य उपादेयत्वमेव न स्यात् । अतः भ्रमस्य भावत्वे सिद्धे, भावस्य


ISSN: 2320-740X

भावोपादानकत्वनियमात् भावविलक्षणम् अज्ञानं न भ्रमोपादानम् इति । समाधानं तु- भावत्वं न उपादानत्वोपादेयत्वयोः व्याप्यम् । न ह्यस्ति नियमः यः भावः सः उपादानम् उपादेयं वेति, आत्मनि भावत्वे सत्यपि उपादानत्वोपादेयत्वयोः अभावात् । अतः अन्वयिकारणत्वम् उपादानत्वे प्रयोजकमिति वक्तव्यम् । यत् कारणं कार्येऽपि अनुगच्छत् यद्भावानुरक्तबुद्धिबोध्यम्, तत् तदन्वयिकारणम् । यथा मृद्भावानुरक्तबुद्धिबोध्यं घटादि मृदन्वयिकारणकं भवति । एवं सादित्वम् उपादेयत्वे प्रयोजकम् । तथा च उपादानत्वोपादेयत्वयोः प्रयोजकयोः अनयोः द्वयोरपि भावत्वव्याप्यत्वाभावात्, उपादानत्वोपादेयत्वे अपि न भावत्वव्याप्ये । अतः अज्ञानस्य भावविलक्षणत्वेऽपि उपादानत्वम् उपपद्यते । न चैवं सति ध्वंसस्यापि उपादेयत्वापत्तिरिति वाच्यम् । अभावमात्रस्य अधिकरणस्वरूपत्वेन इष्टापत्तेः । एवमपि, भावविलक्षणस्य अज्ञानस्य यदि भ्रमोपादानत्वम् उच्यते, तर्हि ज्ञानप्रागभावस्यैव भावविलक्षणस्य क्लृप्तस्य भ्रमोपादानत्वमस्तु, किम् अभावविलक्षणाज्ञानोपादनत्वकल्पनया इति शङ्का स्यात् । तत्रोच्यते- प्रागभावस्य प्रतियोगिमात्रजनकत्वेन तस्य भ्रमकारणत्वमेव असिद्धम् । अतः तस्य भ्रमोपादानत्वं तु दूरापास्तम् । भ्रमाज्ञानयोः तु उभयोः सद्विलक्षणत्वेन युक्तः उपादानोपादेयभावः ।

न च भ्रमस्य अज्ञानोपादानकत्वे तस्य अज्ञानानुविद्धतया प्रतीत्यापत्तिः, मृदनुविद्धतया घटस्येव इति वाच्यम् । यत् यदुपादानकम्, तत् तदनुविद्धतया प्रतीयते इति नियमाभावात् । न हि घटोपादानकं रूपं घट इति प्रतीयते । न च तथापि यावन्ति ज्ञानानि तावन्ति अज्ञानानि इति इष्टसिद्धिकारमते यदज्ञानं न भ्रमोपादानम्, तत्र लक्षणस्य अव्याप्तिरिति वाच्यम् । भ्रमोपादानयोग्यत्वस्य तत्रापि सत्त्वात् । न हि सहकारिवैकल्येन कार्यानुदयात् कारणस्य योग्यता अपैति ।

एवमेव ज्ञानत्वेन रूपेण ज्ञानसाक्षान्निवर्त्यत्वम् इति अज्ञानस्य तृतीयं लक्षणम् । तत्र च अज्ञान -चैतन्यसम्बन्धादेः ज्ञाननिवर्त्यत्वे अपि ज्ञानसाक्षान्निवर्त्यत्वाभावात् नातिव्याप्तिः । ज्ञानप्रागभावस्य तु ज्ञानसाक्षान्निवर्त्यत्वेऽपि प्रतियोगित्वेन रूपेण निवर्त्यत्वेन ज्ञानत्वेन रूपेण निवर्त्यत्वाभावात् नातिव्याप्तिः । एवमेतानि अज्ञानस्य त्रीणि लक्षणानि अद्वैतसिद्धिकारैः उपपादितानीति शम् ।

**********

# नाट्यधर्मीदृष्ट्या रूपकयक्षगानयोः सम्बन्धः

✍ डा.राघवेन्द्रभट्टः
सहायकाचार्यः, साहित्यविभागः

भारतीयकलाप्रकाराणां शास्त्रीयाणां नृत्यगीतनाट्यानां तच्छायारूपाणां लोकनृत्यानाञ्च पारस्परिकः सम्बन्धो वर्तते। स सम्बन्धः परस्परम् उपकार्योपकारकभाव :। गीतप्रधाने प्रकारे वाद्यस्य, वाद्यप्रधाने गीतस्य, नृत्यप्रधाने उभयोः, नाट्यप्रधाने च बहूनामिति पोषकता अत्यन्तमपरिहार्या रसभावाभिव्यञ्जने आवश्यकी च वर्तते। 'त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्'(ना.शा.) इति मुनिवचनम् । अतः जगतो व्यवहारस्य प्रकाशनं भावाभिव्यञ्जनमूलकतया कर्तव्यम्। भावाभिव्यञ्जनपरतया सर्वविधः समावेशः कर्तव्य इत्यर्थः। एकविंशेऽध्याये पुनः

**वागङ्गमुखरागैश्च सत्त्वेनाभिनयेन च।**
**कवेरन्तर्गतं भावं भावयन् भाव उच्यते॥(ना.शा.२२.८)**

इतीदं तदुक्तं वचनञ्च कलानां भावाभिव्यञ्जनस्य प्रामुख्यं ख्यापयति।

भावाभिव्यञ्जनपराणां कलाप्रकाराणां मध्ये भासभवभूतिकालिदासादिमहाकविप्रणीतानां भारतीयरूपकाणां प्रयोगपरम्परा प्राचीनतमा वर्तते। तद्भिन्नः तत्सम्बन्धी च देशभेदेन लोकनृत्ताख्यः कलाप्रकारः विशिष्टः परिलक्ष्यते। तत्र कर्णाटकेषु प्रसिद्धं लोकनृत्तं भवति यक्षगानम्। अस्य आरम्भः क्रिस्तात्परं पञ्चदशे शतके अभूदिति इतिहासविद आमनन्ति । आरम्भदशायामसौ कलाप्रकारो गानमात्रलक्षण आसीत्। रामायण-महाभारत-भागवताश्रिताः कथाः यक्षगानकविना कन्नडभाषायां पद्यात्मना लिखिताः गीयन्ते स्म गानविद्भिः । क्रमेण नृत्यम्, आङ्गिक-वाचिक-आहार्य-सात्त्विकाभिनयपुरस्सरं प्रस्तूयमानतामवाप्य साम्प्रतिके काले दृश्यकोटौ विशिष्टः प्रकार इति यक्षगानं परिगण्यते। 'यक्षगानम्' इत्यत्र यक्षपदं नृत्यं गानपदं सङ्गीतञ्च द्योतयतः। इतिवृत्तं 'प्रसङ्ग' इत्युच्यते। यथा यज्ञसंरक्षणम्, सीतास्वयंवरम्, पादुकाप्रदानम्, वालिवधम् इत्यादि।

भारतीयकलाप्रकाराणां मूलाधारः नाट्यशास्त्रम् । एवं यक्षगानस्यापि आधारस्तदेव । नाट्यशास्त्रे उक्ता नियमा अत्र परिदृश्यन्ते। रूपकेषु इतिवृत्तं गद्यपद्यात्मकं कविना समुपनिबद्धं नटा वाचिकाभिनयार्थमाश्रयन्ते । यक्षगाने कथावस्तु पद्यरूपमेव भवति । यच्च *चण्डा*मृदङ्गश्रुतिसहायः गायकः तालं लयञ्च अवलम्ब्य भावानुरूपरागेण रङ्गपीठे गायति । आतोद्यसाहाय्यमादृत्य गीतं गायेदिति नाट्यशास्त्रीयो नियमः। अत्र गायकः *भागवतः* इत्युच्यते। तस्य गानावसरे नट आङ्गिक-सात्त्विकाहार्याभिनयं कुर्वन् नृत्यति। गानसमाप्तौ स गीतस्य साहित्यं विस्तारयन् वाचिकं करोति।


ISSN: 2320-740X

अयं वाचिकाभिनयः गायकेन गीतस्य पद्यस्य अर्थरूपः रसाभिव्यञ्जकतया क्रियते । अत्र वाचिकाभिनयावसरे नटः भौतिकपरिकरान् विना तत्प्रतीकभूतान् अंशान् वा विना केवलं वाचिकद्धारा एव अपेक्षितं सम्पादयति । यथा उद्यानचित्रणञ्चेत् जवनिका, लता, वृक्षो वा न भवति । वर्णनेनैव तदस्तित्वं सम्पादयति । एवं युद्धम्, विवाहः इत्यादि सर्वप्रसङ्गेष्वपि वाचा सामाजिकान् रसाप्लावितान् करोति । साङ्केतिकतया न किमपि वस्तु रङ्गमञ्चे भवति । रूपकप्रयोगावसरे तु नानापरिकराणां समावेशे पुष्टिर्भवतीति तयोर्भेदः ।

लोकप्रवृत्तिसम्बद्धो नाट्यांशः लोकधर्मीति कथ्यमानः अभिनयस्य सौन्दर्याधायकोंऽशो नाट्यधर्मी च नाट्ये इव यक्षगानेऽपि समाविष्टा वर्तते । पूर्वरङ्गो विधातव्य इति नियमो यक्षगाने अनुसृतो वर्तते । पूर्वरङ्गस्तु

**यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।**
**कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥**(सा.द.६.२२)

इति लक्षितः । तस्य अङ्गत्वेन च प्रस्तावना निर्दिष्टा-

**नटी विदूषको वापि पारिपार्श्विक एव वा ।**
**सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥**
**चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।**
**आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥**(सा.द.६.३१,३२)

इति नाट्यशास्त्रीयो नियमः यक्षगाने यथाविधि अनुस्रियते ।नामनि क्वचिद्भेदो वर्तते । पूर्वरङ्गः यक्षगाने “सभालक्षणम्” इत्युच्यते । ‘कोडङ्गी’ संज्ञितः ‘पीठिकास्त्री’ इतिसंज्ञिता च सूत्रधारनटीस्थाने क्रमेण वर्तेते । कालं प्रवृत्तमाश्रित्य सूत्रधारो वर्णयेत् ऋतुम् इति । अत्रापि मध्यमावतीभैरवीसौराष्ट्रादि-कर्णाटकसङ्गीतप्रकारस्य प्रायेण अशीतिः रागाः उपयुज्यन्ते । तेषु कालानुकूलः रागः पूर्वरङ्गे आश्रियते । रूपके पात्राणां प्रवेशः तालमाश्रित्य भवति । वाद्यप्रयोगोऽपि कर्तव्यः । यक्षगाने कृष्णः ‘ताकिट किटतक तोदिन्नक धिकुतक....’ इति आदितालक्रमम् आश्रित्य पदक्षेपं कुर्वन् रङ्गमञ्चं प्रविशति । अत्र यक्षगाने प्राधान्येन कोरे-एक-त्रिवुडे-अष्ट-रूपक-जम्पे-मट्टे इति अष्टौ ताला भवन्ति । तेषां पुनः त्वरितादयोऽवान्तरभेदा भवन्ति । प्रवेशे इव नृत्ये एतेषामुपयोगःभवति । नाटकेषु दम्पत्योर्मदनाश्रये, कान्ते सन्निहिते शृङ्गाराभिव्यञ्जनावसरे नृत्तं प्रयोक्तव्यम् । यदुक्तम्-

**यत्तु सन्दृश्यते किञ्चित् दम्पत्योर्मदनाश्रयम् ।**
**नृत्तं तत्र प्रयोक्तव्यं प्रहर्षार्थगुणोद्भवम् ॥**
**यत्र सन्निहिते कान्ते ऋतुकालादिदर्शनम् ।**

**गीतकार्थाभिसम्बद्धं नृत्तं तत्रापि चेष्यते ॥** (ना.शा.४.३११,३१२)

एवं क्वचित् नृत्तं न प्रयोक्तव्यम्-

**खण्डिता विप्रलब्धा वा कलहान्तरतापि वा।**
**यस्मिन्नङ्गे तु युवतिर्न नृत्तं तत्र न योजयेत् ॥**
**सखीप्रवृत्ते संलापे तथासन्निहिते प्रिये।**
**न हि नृत्तं प्रयोक्तव्यं यस्या वा प्रोषितः प्रियः ॥** (ना.शा.४.३१३,३१४)

यक्षगानेऽपि अयं नियमो दृश्यते । रुक्मिणीविवाहे कृष्णदर्शने जाते सख्यो नृत्यन्ति । एवं विप्रलम्भे यथा- सीतापहारात्परं रामस्य स्थितिः चित्र्यते तदा नृत्यं न भवति किञ्च एतादृशावसरे *चण्डा*वाद्यप्रयोगोऽपि न भवति। तस्य करुणप्रतिकूलत्वात्। वाचिकाभिनयः नाट्ये प्रमुखतां भजते। यथा मुनिनोक्तं

**वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनुस्स्मृता।**
**अङ्गनैपथ्यसत्वानि वाक्यार्थं व्यञ्जयन्ति हि ॥इति** (ना.शा.१४.२)

अन्येषु स्पष्टेष्वपि वाचिकः सुष्ठु न वर्तते चेत् रसास्वादात् सामाजिकाः विमुखतां प्रतिपद्यन्ते । अतः वाचिकाभिनयविषये नटानां जागरूकता अपेक्ष्यते । यक्षगाने प्राचुर्येण वाचिकाभिनयो भवति । तदर्थमेव यक्षगानस्य ताळमद्दले इतिप्रकारः वर्तते । अत्र नटाः नृत्यस्य इव वाचिकस्य अभ्यासं बहुकालं कुर्वन्ति । विभूषणम्, अक्षरसंहतिः इत्यादीनि षट्त्रिंशत्सङ्ख्याकानि वाचिकाभिनय-लक्षणानि नाट्याचार्येण प्रोक्तानि अभ्यसनीयानि नटैः। अतः –

**षट्त्रिंशदेतानि तु लक्षणानि प्रोक्तानि वै भूषणसम्मितानि।**
**काव्येषु भावार्थगतानि तज्ज्ञैः सम्यक्प्रयोज्यानि यथारसन्तु।**(ना.शा.१५.१५)

इत्युक्तम् । अभिषेकनाटके वालिवधप्रसङ्गः । राममुक्तबाणेन विद्धशरीरो वाली छन्नेन आत्मवधहेतुं ज्ञातुमना रामं बहुधा पृच्छति । प्रसङ्गेऽस्मिन् रामवालिनोः सम्भाषणं वाचिकाभिनयस्य सौष्ठवद्वारा परिणामं जनयति। यक्षगानेऽपि अयं प्रसङ्गः प्रसिद्धो वर्तते। वाचिकाभिनयस्य एतदुदाहरणम्।

**शैलयानविमानानि चर्मवर्मायुधध्वजाः।**
**मूर्तिमन्तः प्रयुज्यन्ते नाट्यधर्मी तु सा स्मृता ॥**
**ललितैरङ्गविन्यासैस्तथोत्क्षिप्तपदक्रमैः।**
**नृत्यते गम्यते यत्र नाट्यधर्मी तु सा स्मृता॥**
**योऽयं स्वभावो लोकस्य सुखदुःखक्रियात्मकः।**
**सोऽङ्गाभिनयसंयुक्तो नाट्यधर्मी प्रकीर्तिता॥**(ना.शा.१३.७२-७४)


ISSN: 2320-740X

एते नाट्यधर्मीसम्बद्धा विषयाः यक्षगानेऽपि संलक्ष्यन्ते।

उपकरणानां प्रयोगविषये सात्त्विकाभिनये वाचिकाभिनये च यक्षगान-संस्कृतरूपकयोर्विद्यमानः सम्बन्धः निरूपितः । स च सम्बन्ध आङ्गिकाहार्यादावपि वर्तते । एवं चारी,मण्डलविधानम्, आहार्याभिनयः इत्यादिषु अंशेषु यक्षगानस्य भारतीयरूपकाणाञ्च सम्बन्धो वर्तते।

संस्कृतरूपकाणां प्रयोगकौशलानां स्वीकारेण यक्षगानस्य, यक्षगानस्य प्रयोगकौशलानां स्वीकारेण रूपकाणां प्रयोगस्य च सौन्दर्यानयनं सुशकम्। तदर्थं तयोः सम्बन्धज्ञानं नितरामपेक्ष्यते।

**सहायकग्रन्थाः**


१. नाट्यशास्त्रम्
२. सङ्क्षिप्तनाट्यशास्त्रम्
३. साहित्यदर्पणम्
४. यक्षगानकले(कन्नडम्)
५. en.wikipedia.org/wiki/Yakshagana
६. www.yaksharanga.org/
७. www.yakshaganakendra.com
८. yakshagana-art.blogspot.com
९. yakshadhwani.blogspot.com/
१०. yakshavarthe.blogspot.com/


**********

## सूक्ष्मशरीरम्


**✍ डा. हरिप्रसादः के.**

सहायकाचार्यः, शिक्षाशास्त्रविभागः


अस्माकं सर्वेषां पाञ्चभौतिकं स्थूलशरीरं इन्द्रियगोचरं अस्ति इति वयं सर्वे जानीमः। एतस्य स्थूलशरीरस्य अभ्यन्तरे एकं सूक्ष्मशरीरम् अस्ति । इन्द्रियैः तत् ज्ञातुं न शक्यते इत्यतः एतत् सूक्ष्मशरीरम् इति वदन्ति । एतस्य सूक्ष्मशरीरस्य कारणादेव जडे स्थूलशरीरे बहवः क्रियाकलापाः जायन्ते। एते क्रियाकलापाः शरीरस्थस्य जीवस्य परिचयार्थं विद्यमानं एकं लिङ्गं भवति, इत्युक्ते चिह्नं भवति। अतः एतस्य लिङ्गशरीरम् इत्यपि नाम अस्ति। निद्रावस्थायां एतत् स्थूलशरीरे बहुधा अन्तः

सरति । अत एव तस्मिन् समये स्थूलशरीरस्य क्रियाकलापाः प्रायः स्थगिताः भवन्ति । सम्बन्धः सर्वात्मना यदा त्यक्तो भवति स्थूलशरीरस्य मरणं भवति । इत्युक्ते सूक्ष्मशरीरं तु तिष्ठत्येव । जागृदवस्थायां कृतानां सर्वेषां कर्मणां फलं एतत् सूक्ष्मशरीरं प्राप्नोति । अतः मरणात्परं एतत् सूक्ष्मशरीरं स्वकर्मानुगुणं कालान्तरे अन्यत् स्थूलशरीरं प्राप्नोति।

पञ्चप्राणाः पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि अन्तःकरणं चेति सूक्ष्मशरीरस्य तत्वानि भवन्ति। अन्तिमे तु चत्वारि अङ्गानि सन्ति। एतानि सर्वाणि अपञ्चीकृततत्त्वानि। अतः स्थूलशरीरस्य इव सूक्ष्मशरीरस्यापि उपादानं ब्रह्म एव।

"अयं वै अरयः"[1] (सः एव इन्द्रियाणि)। जीवव्यतिरिक्तानि जीवस्य उपकरणभूतानि तत्त्वानि ब्रह्मणः सकाशात् उत्पन्नानि । "जीवव्यतिरिक्तानि तत्त्वानि जीवोपकरणानि ब्रह्मणो जायन्ते"[2] इति भाष्यम्। सूक्ष्मशरीरस्य तत्त्वानाम् उत्पत्तिक्रमः इत्थमस्ति –

आदौ आकाशः उत्पद्यते । आकाशः शब्दगुणकः अस्ति । अग्रे उत्पत्स्यमानेभ्यः द्रव्येभ्यः अवकाशमपि कल्पयति । अयम् आकाशः वायुतन्मात्रेण मिलित्वा स्वस्य शब्दगुणेन वायोः स्पर्शगुणमपि योजयित्वा पञ्चीकृतवायोः उत्पत्तिं करोति। सः वायुः अग्नितन्मात्रे मिलित्वा पञ्चीकृतं अग्निं उत्पादयति, यत्र शब्दस्पर्शरूपाख्याः गुणाः भवन्ति। अग्निः जलतन्मात्रे मिलित्वा पञ्चीकृतं जलं उत्पादयति यत्र शब्दस्पर्शरूपरसाः भवन्ति । जलं पृथिवीतन्मात्रे मिलित्वा पञ्चीकृतां पृथिवीम् उत्पादयति यत्र गन्धेन सह पूर्वतनाः शब्दस्पर्शरूपरसख्याः चत्वारः गुणाः भवन्ति। इत्थम् आकाशात् वायुः उत्पन्नः, वायोः अग्निः उत्पन्नः, अग्नेः जलं उत्पन्नम्, जलात् पृथिवी उत्पन्ना इति तैत्तिरीयोपनिषदि उक्तम्। "**तत्तेजोऽसृजत**"[3] "**तदपोऽसृजत**"[4] इत्येवं छान्दोग्योपनिषदि उक्तं च महाभूतानां विषये एव। इत्युक्ते इदानीम् इन्द्रियैः ज्ञातुं शक्यानां पञ्चीकृतभूतानाम् एव विषयः अस्ति । "अधिकारस्तावत् तत्तेजोऽसृजत तदपोऽसृजत इति महाभूतविषये वर्तते" (सू. २.३.१२) । इत्थं पञ्चमहाभूतानि पञ्चीकृतानि चेदपि स्वीयं ब्रह्मस्वभावं न परित्यजन्ति। यथा छान्दोग्ये – "**ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि**[5]" । ब्रह्मणः पृथग्भूय स्वयं आपः पश्यन्ति इति कथनं न युज्यते। अतः अप्सु ब्रह्मस्वभावः अनुगतः अस्ति इति सिद्धम्। ततः परं पृथिव्याः ओषधयः (वृक्षलतादयः), ओषधिभ्यः अन्नम्, अन्नं

---

[1] बृ. २.५.१९

[2] सू. भा. ३. प्रथमाधिकरणस्य सम्बन्धभाष्यम्

[3] छा. ६.२.३

[4] छा. ६.२.३

[5] छा. ६.२.४


ISSN: 2320-740X

रेतसः रूपेण परिणामं प्राप्य पश्चात् पुरुषः इत्युक्ते हस्तपादादियुक्ताः मनुष्याः प्राणिनश्च उत्पद्यन्ते[1] । चतुर्मुखब्रह्मणः आरभ्य एते सर्वेऽपि प्राणिनः स्वस्वकर्मानुसारं शरीरं धारयन्तः पूर्वकल्पस्य जीवाः एव।

जडस्य स्थूलशरीरस्य क्रियाकलापेषु काश्चन ज्ञानक्रियाः काश्चन शारीरिकक्रियाश्च सन्ति । ज्ञानक्रियाः ज्ञानेन्द्रियमाध्यमेन भवन्ति । शारीरिकक्रियाः कर्मेन्द्रियमाध्यमेन भवन्ति । सूक्ष्मशरीरस्य नवदशतत्त्वेषु एकैकमपि तत्त्वम् आध्यात्मिकमिति, तस्य क्रियाः अधिभौतिकाः इति, तत्पृष्ठतः विद्यमानाम् अधिदेवतां आधिदैविकमिति च कथयन्ति । सूक्ष्मशरीरं जडमस्ति इत्यतः स्वतन्त्ररूपेण किमपि कर्तुम् न शक्नोति । चेतनाः अधिदेवताः एव तस्य प्रवृत्तौ कारणानि भवन्ति । क्रियाः अस्माकं नियन्त्रणे भवन्तु, न वा भवन्तु, तत्तदधिदेवतायाः अनुग्रहेण विना किमपि कर्तुं न प्रभवन्ति[2] ।

इतःपरं सूक्ष्मशरीरस्य एकैकमपि तत्त्वं विमर्शार्थं स्वीक्रियते ।

**अन्तःकरणम्**

जीवस्य भोगसहकारित्वेन शरीरे विद्यमानम् उपकरणं करणम् इत्युच्यते । एतेषु कारणेषु अग्रे वक्ष्यमाणानि चक्षुरादीनि पञ्चज्ञानेन्द्रियाणि बाह्यकरणानि सन्ति । बाह्यप्रपञ्चस्य विषयान् आदौ एतानि गृह्णन्ति । गृहीतं विषयं जीवस्य भोगाय अर्पणात्पूर्वं अन्यत् करणं परिष्कुर्यात् । इत्थं यत्करणं अन्तः परिष्करोति तत्करणं अन्तःकरणं इति वदन्ति । एतत् अस्ति एव इति कथं वक्तुं शक्यते इत्युक्ते – बहुवारं ग्रन्थपङ्क्तीनाम् उपरि दृष्टिपातः भवति चेदपि वयं तत् न पश्यामः । कस्यापि व्याख्यानं कर्णकुहरे प्रविशति चेदपि वयं तत् न शृणुमः । यतो हि एतदन्तःकरणं दृष्टायाः पङ्क्तेः श्रुतस्य वाक्यस्य वा परिष्करणं परित्यज्य अन्यत्र क्वापि लीनं भवति[3] । अत एव श्रुतिः वदति “**अन्यत्र-मना अभूवं नादर्शम् अन्यत्र-मना अभूवं नाश्रौषं मनसा ह्येव पश्यति मनसा ह्येव शृणोति**”[4] इति । इत्युक्ते मनः अन्यत्र आसीत्, अतः न दृष्टम् मनः अन्यत्र आसीत्, अतः न श्रुतम् । मनसा एव पश्यति, मनसा एव शृणोति च इति ।

एतदर्थं अपेक्षितं बलं अस्माकं आहाराल्लभ्यते । भुक्तम् अन्नं त्रिधा विभक्तं भवति । तत्र अतिस्थूलः भागः मलं भवति । मध्यमभागः मांसं भवति । अतिसूक्ष्मः भागः अन्तःकरणस्य आहारो भवति । “**अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्टो धातुः तत्पुरीषं भवति यो मध्यमस्तन्मांसं**

---

[1] तै. २.१.२

[2] गी. १८.१४

[3] सू. २.३.३२

[4] बृ. १.५.३

**योऽणिष्ठं तन्मनः**”[1] । अतः अन्तःकरणं भौतिकमेव । इत्थं त्रिषु भागेषु युक्तं अन्नं, पञ्चीकृतभूतमिव त्रिवृत्कृतम् अन्नम् इति वदन्ति । अन्नं न खादामः चेत् ग्रहणम्, निश्चयः स्मरणम् इत्यादीनि अन्तःकरणस्य कार्याणि दुर्बलानि भवन्ति । तावदेव न, अन्तःकरणस्य कार्यमपि आहरस्य गुणं अवलम्बते । इत्युक्ते आहारस्य सात्विकराजसतामसाख्यगुणान् अनुसृत्य अन्तःकरणे सात्विक-राजसतामसभावानां प्रचोदनार्थं पुष्टिः मिलति । अतः साधकाः स्वीयं आहारं सात्विकं भवेत् इति अभिलाषया तद्विषये बहून् नियमान् पालयन्ति ।

अन्तःकरणस्य चत्वारि अङ्गानि - मनः, बुद्धिः, अहङ्कारः, चित्तम् चेति । एतेषां स्थानानि क्रमशः कण्ठः, मुखं, नाभिः, हृदयम् च भवन्ति[2] । एतेषु “सङ्कल्पविकल्पात्मकं मनः” भवति । आगतान् सङ्कल्पान् विभज्य एतत् शुद्धम्, एतदशुद्धम् इति निश्चयं बुद्धिः करोति अतः “निश्चयात्मिका बुद्धिः” इत्युच्यते । चित्तं तु भावान् धारयति, अतः धारणात्मकं चित्तम् इत्युच्यते । “अहं पुरुषः” “अहं महिला” अहं गच्छामि” “अहं आगच्छामि” इत्यादिषु भावेषु विद्यमानम् “अहम्” इत्येतत् अहङ्कारः इत्युच्यते “**अहम्भावात्मकोऽहङ्कारः**” । अयमेव भावः बलवान् भवति चेत् “अहं धनिकः अस्मि”, “अहं बुद्धिमान् अस्मि” इत्येवं रूपेण दुरहङ्कारः भवति । एतेषां पूर्वोक्तानां चतुर्णां अङ्गानां क्रमशः चन्द्रः, चतुर्मुखः ब्रह्मा, विष्णुः, रुद्रश्च अधिदेवताः भवन्ति । किमपि कर्म सङ्कल्पादारभ्य निश्चयधारणयोः माध्यमेन “एतत् कर्म अहं कृतवान्” इति अहङ्कारेण पर्यवसानं प्रप्नोति । अतः कर्मफलं अन्तःकरणे एव संगृहीतं भवति । मुमुक्षुः साधनामार्गेण ज्ञानं सम्पाद्य मुक्तो भवति चेत् ज्ञानफलमपि अन्तःकरणे एव तिष्ठति ।

**पञ्चप्राणाः**

प्राणवायवः पञ्च सन्ति – प्राणः अपानः, व्यानः, उदानः, समानश्चेति । स्थूलशरीरे एतेषां प्राणानां स्थानानि अनेन श्लोकेन स्मर्तुं शक्यन्ते - “हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः” ॥ इति । प्राणवायोः स्थानं हृदयम् । उच्छ्वासनिश्वासौ तस्य कार्यम् । गुदं अपानवायोः स्थानं भवति । गुदगुह्ययोः संकोचविकासौ कृत्वा शुक्लशोणितयोः मूत्रपुरीषयोः विसर्जनकार्यस्य कारणं एषः वायुः भवति । समानस्य स्थानं नाभिः भवति । पचनम् एतस्य क्रिया भवति । व्यानं तु समग्रं शरीरं व्याप्य स्थितम् अस्ति । सन्धिषु मर्मस्थानेषु च एतस्य कार्यं चलति । बहवः पञ्चप्राणानां स्वरूपं इत्थं जानन्ति चेदपि एतत् श्रुतिसम्मतं नास्ति ।

श्रुत्यनुसारं तु वायोः वृत्तिविशेषाः एव पञ्चप्राणाः भवन्ति । प्राणवायोः स्थानं मुखम्;

---

[1] छा. ६.५.१

[2] शारीरिकोपनिषत् - “मनःस्थानं गलान्तं बुद्धेर्वदनमह~कारस्यहृदयं चित्तस्य नाभिरिति”


ISSN: 2320-740X

मुखनासिकाश्रोत्रनेत्रेभ्यः उच्छ्वासं एषः वायुः त्यजति[1] । इतरेषां चतुर्णामपि वायूनां एषः राजा भवति अतः एतं मुख्यप्राण इति वदन्ति[2] ।

गुदगुह्ये अपानवायोः स्थानम् । मूत्रपुरीषयोः विसर्जनं श्वासग्रहणञ्च अत्र भवति । गन्धस्य आघ्राणं अपानक्रियया एव भवति[3] ।

हृदयस्य दक्षिणरन्ध्रमाध्यमेन समग्रशरीरे व्याप्ताः नाड्यः व्यानवायोः स्थानमस्ति[4] । एताः हृदये १०१ सन्ति । एतासु एका मूर्ध्नःमाध्यमेन गच्छन्ती सुषुम्ना नाडी । एतासु नाडीषु प्रत्येकमपि नाडी शतधा विभज्य पश्चात् ७२००० संख्यया उपशाखाः भूत्वा समग्रशरीरे व्याप्ताः भवन्ति । एतदेव नाडीमण्डलं व्यानस्य स्थानम् । तस्य क्रिया तु प्राणापानयोः मध्ये विद्यमाना भवति । उच्छ्वासनिःश्वासयोः मध्ये विद्यमाना अस्ति । इत्युक्ते श्वासबन्धनं भवति । भाषणं, भारोन्नयनम्, अरणिना यागाग्नेः उत्पादनम्, इत्याद्याः अधिकश्रमयुक्ताः क्रियाः सर्वाः एतस्मादेव वायोः भवन्ति[5] ।

उदानवायोः स्थानं तु सुषुम्नानाडीतः पदतलपर्यन्तं व्याप्तं अस्ति । शास्त्रविहितं कर्म यः करोति तं उत्कृष्टजन्मसु, तद्विरुद्धकर्माणि यः करोति तं तुच्छजन्मसु एषः उदानवायुः नयति[6] । प्रतिदिनं एष एव वायुः सर्वान् पशून् सुषुप्तौ नयति ।

नाभिः समानवायोः स्थानम् अस्ति । देहस्य सर्वेषु अवयवेषु पीतस्य भुक्तस्य च समानरूपेण नयनं एतस्य कार्यम्[7] ।

भुक्तम् अन्नमेव यथा अन्तःकरणस्य आहारं भवति तथा पीतस्य जलस्य सूक्ष्मभागः एव प्राणस्य आहारो भवति । पीतं जलं त्रिधा विभज्यते । तस्य स्थूलः भागः मूत्रं भवति । मध्यमभागः रक्तं प्राप्नोति । अतिसूक्ष्मः भागः प्राणस्य आहारो भवति । **"आपः पीतास्त्रेधा विधीयन्ते तासां यस्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योणीष्ठः स प्राणः"**[8] । इत्युक्ते पीतं जलं त्रिवृत्कृतं भवतीत्यर्थः । अन्नं न भुज्यते चेत् स्थूलशरीरस्य अन्तःकरणस्य च क्रियाः यद्यपि दुर्बलाः भवन्ति तथापि

---

[1] छां. १.३.३ – "अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः स वाक् । तस्मादप्राणन्ननपानन्वाचमभिव्याहरति"

[2] प्र. ३.५

[3] बृ. १.५.३

[4] प्र. ४.३

[5] प्र.३.५-७, छा. १.३.३-५

[6] प्र. ३.९.१०

[7] प्र. ३.५

[8] छा. ६.५.२

प्राणिनः न म्रियन्ते । जलं पीयते चेत् मासत्रयपर्यन्तमपि प्राणाः न गच्छन्ति । जलं न पीयते चेत् स्वल्पकाले एव मरणं सम्भवति ।

प्राणापानव्यानोदानसमानानां आध्यात्मिकतत्त्वानां आधिभौतिक्रियाणाञ्च च क्रमशः आदित्यः पृथिवी, वायुः तेजः, आकाशः इत्येते अधिदेवताः भवन्ति[1] ।

एतदतिरिच्य पञ्च उपप्राणाः अपि सन्ति इति केचन वदन्ति । नागः (वमनकरः), कूर्मः (उन्मीलनकरः), कृकरः (क्षावकरः), देवदत्तः (जृम्भणकरः), धनञ्जयः (मरणात्परमपि समग्रं शरीरं व्याप्य स्थितः शरीरं प्रफुल्लयति ।)

**नागश्च कूर्मः कृकरो देवदत्तो धनञ्जयः ।**[2] । किन्तु श्रुतिषु एते कुत्रापि न दृश्यन्ते ।

### पञ्चज्ञानेन्द्रियाणि

श्रोतम्, त्वक्, चक्षुः, अथवा नेत्रम्, रसनम् अथवा जिह्वा, घ्राणञ्चेति पञ्च ज्ञानेन्द्रियाणि सन्ति । एतेषां आधिभौतिकाः क्रियाः क्रमशः इत्थं सन्ति – श्रवणं, कठिनमृदुशीतोष्णादीनां स्पर्शज्ञानम्, रूपज्ञानम्, रसज्ञानम्, आघ्राणनञ्च । इत्युक्ते शब्दस्पर्शरूपरसगन्धाः क्रमशः एतेषां विषयाः भवन्ति । स्थूलशरीरे एतेषां स्थानं क्रमशः कर्णौ, चर्म, नेत्रे, रसना, नासिका च । एतानि अङ्गानि एव, न तु इन्द्रियाणि । एतानि इन्द्रियगोलकानि सन्ति । इत्युक्ते इन्द्रियाणां कार्यस्थानम् । एतेषां अधिदेवताः क्रमशः दिग्देवताः, वायुः, सूर्यः, वरुणः, नासत्यदस्रौ चेति । तत्तदिन्द्रियं केवलं तत्तद्विषयं गृह्णाति । कर्णः द्रष्टुं नार्हति । नेत्रं श्रोतुं नार्हति इत्येवमादिक्रमेण । एकं इन्द्रियं यदा सक्रियं भवति तदा द्वितीयं इन्द्रियं कार्यं कर्तुं नार्हति । यथा कश्चन खाद्यं भक्षयन्नेव तस्य शब्दस्पर्शरूपरसगन्धान् अनुभवन्नपि, एकस्य अनुभववेलायां अपरं अनुभवितुं नार्हति । एतस्य कारणमपि अस्ति । मनसि पञ्चतन्मात्राणि सन्ति इत्यतः पञ्चविषयानपि परिष्कर्तुं तस्य शक्तिः तु अस्ति । तत् यदा परिष्करोति तदा जीवः तद्विषयस्य अनुभवं प्राप्नोति । किन्तु एतस्य विषयस्य अनुभूत्यर्थम् अपेक्षितं मनः एकमेव अस्ति इत्यतः एकस्मिन् क्षणे एकस्मिन्नेव इन्द्रिये एव प्रवहितुं शक्नोति । मनः स्वस्थानं एकस्मात् इन्द्रियात् इन्द्रियान्तरे झटिति परिवर्तयति इत्यतः आपाततः अवलोक्यमाने एतत् न ज्ञायते । किन्तु एकस्मिन् क्षणे एकमेव विशेषज्ञानं भवतीति अनुभववेद्यं वर्तते ।

### पञ्चकर्मेन्द्रियाणि

अस्य समूहस्य आध्यात्मिकतत्त्वानि एतानि सन्ति – वाक्पाणिपादपायूपस्थाख्यानि । एतेषां

---

[1] प्र. ३.८.९

[2] अमरकोशः १.७६


ISSN: 2320-740X

आधिभौतिकक्रियाः इत्थं सन्ति – भाषणम्, दानम् आदानम् च, चलनम्, मलविसर्जनम्, मूत्रशुक्लशोणितविसर्जनञ्चेति । अधिदेवताः क्रमशः अग्निः, इन्द्रः, उपेन्द्रः, मृत्युः प्रजापतिः चेति सन्ति । एतेषु वागिन्द्रियस्य बलं तु भुक्तस्य आहारस्य घृततैलादिभ्यः आयाति । अत्र वागिन्द्रियमिति उक्तं चेदपि तत् सर्वेषां कर्मेन्द्रियाणाम् उपलक्षणम् अस्ति । भुक्तं घृतादिकं त्रिवृत्कृतं भवति तेजः इति तदुच्यते । एतस्य तेजसः स्थूलभागः अस्थिषु गच्छति । मध्यमभागः मज्जासु गच्छति । सूक्ष्मभागः वाक्षु गच्छति । "**तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा, योणीष्ठः सा वाक्**"[1] इति ।

इत्थं सूक्ष्मशरीरस्य एतानि नवदशतत्त्वानि ग्रहातिग्रहा इति उच्यन्ते । एते ग्रहातिग्रहाः एव जीवस्य मृत्युः, इत्युक्ते बन्धनम् भवति[2] । एतस्य मृत्योः मृत्युः परमात्मा अस्ति । एतं यः प्राप्नोति तस्य मृत्युः न भवति ।

**सन्दर्भाः**


1. ब्रह्मसूत्रशाङ्करभाष्यम्बृ
2. बृहदारण्यकोपनिषत्
3. छान्दोग्योपनिषत्
4. प्रश्नोपनिषत्
5. तैत्तिरीयोपनिषत्
6. शारीरकोपनिषत्
7. गीताभाष्यम्
8. अमरकोषः


**********

## वक्रोक्तिः अलङ्कारः उत न ?

**डा. चन्द्रकला आर्. कोण्डि**

सहायकाचार्या, साहित्यविभागः

काव्यशोभासंवर्धका अलङ्कारा नैकविधाः । केचन शब्दालङ्काराः, केचनार्थालङ्काराः, अर्थालङ्कारेष्वपि केचन सादृश्यमूलाः, केचन अभेदमूलाः, केचन विरोधमूलाः, केचन शृङ्खलामूलाः, केचन न्यायमूलाः, केचन गूढार्थप्रतीतिमूलाश्च वर्तन्ते । तत्र गूढार्थप्रतीतिमूलकेषु सूक्ष्म-भाव-व्याजोक्ति-लोकोक्ति-छेकोक्ति-वक्रोक्ति-स्वभावोक्ति-भाविक-उदात्त-इत्यादयोऽलङ्कारा अन्तर्भवन्ति । तत्र वक्रोक्तिः, या विश्वनाथादिभिः अलङ्कारत्वेन, कुन्तकाचार्येण काव्यजीवितत्वेन, भामहादिभिः

---

[1] छां, ६.५.३

[2] बृ. ३.२.२-९

अर्थभावनमूलत्वेन विभाविता वर्तते। केचन अस्या अलङ्कारत्वमङ्गीकुर्वन्ति, केचन न तथा।

गत्यर्थक-भ्वादेः वञ्चु-धातोः रक् प्रत्यये 'वक्रोक्ति' शब्दः निष्पद्यते। वक्तुः साक्षात्कथनमन्यथा गृहीत्वा श्रोता अन्यमेवार्थं उत्तररूपेण वदति। कथनस्यायं प्रकारः वक्र इत्युच्यते, इति तादृशी उक्तिः यत्र भवति तत्र 'वक्रा उक्तिर्यत्रे'ति व्युत्पत्त्या वक्रोक्तिरलङ्कारः भवति। एकस्यैव पदस्य द्वौ अर्थद्वयं कल्पयतः इति विशेषोऽस्याः। वक्तुरभिप्रायः श्रोतुः कृते गूढः, श्रोत्रा गृहीतोऽर्थः वक्तुः कृते गूढ इति गूढार्थप्रतीतिमूलकोऽयमलङ्कार इति रुय्यकोऽभिप्रैति। अतः वक्रोक्तिः अलङ्कारसामान्य एव, न त्वतिशयोक्तिस्वरूप इति भाति।

भामहस्याभिप्राये वक्रोक्तिः काव्यव्यापी धर्मः, यः सर्वेषामलङ्काराणां मूलत्वेन वर्तमानः लोकोत्तरत्वाधायकश्च काव्यस्य-

सैषा सर्वैव वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥ [1]

दण्डिना काव्यविभागः स्वभावोक्तिः वक्रोक्तिश्चेति द्विधा कृतः-भिन्नं द्विधा स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयम्[2]। रत्नश्रियाम् एवमुक्तम्-वक्रोक्त्या किन्न ख्याप्यते, वक्रोक्ति-प्रदानत्वात् काव्यस्य इति [3]।

वामनमतानुसारं वक्रोक्तिः उपमामूलकालङ्कारः। सादृश्योद्भूता साध्यवसानलक्षणा वक्रोक्तिः- "सादृश्याल्लक्षणा वक्रोक्तिः"।[4] वस्तुतः साध्यवसानलक्षणैव अतिशयोक्तेर्मूलम्। वामनेन दत्तानि, "स्थानेन स्फुरतु सुभगः स्वार्चिषा चुम्बतु द्याम्","आलस्यमालिङ्गति गात्रमस्याः"- इत्याद्युदाहरणानामवलोकनेन तत्प्रतिपादिता वक्रोक्तिः नातिशयोक्तेर्भिद्यत इति भाति।

वक्रोक्त्यलङ्कारस्य उद्भावकः आचार्यरुद्रटः। सः वक्रोक्तेः शब्दालङ्कारत्वमप्यङ्गीकरोति, श्लेषगर्भत्वेन अर्थालङ्कारत्वमपि। शब्दालङ्कारस्य श्लेष-काकुभेदेन द्वैविध्यम्। वक्तुः द्वारा भिन्नार्थे उच्चरितस्य पदस्य, श्रोता पदविभजनद्वारा अन्यथा व्याख्याति, तत्र श्लेषवक्रोक्तिः। स्पष्टतया उच्चरितस्य पदस्य स्वरवैशिष्ट्यात् अन्यार्थप्रतीतौ काकुवक्रोक्तिः।[5] वक्रोक्तेः इदं भेदद्वयं परवर्तिनामाचार्याणामपि सम्मतम्। यस्मिन् वाक्ये प्रकृतार्थसम्बद्धान्यरसयुक्तभिन्नार्थप्रतीतिर्भवति,

---

[1] काव्यालङ्कारः- २/८५

[2] काव्यादर्शः- २/३६०

[3] रत्नश्री-पृष्ट-१५

[4] काव्यालङ्कारसूत्रवृत्तिः-४/३/८

[5] वक्त्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरदः। वचनं तत्पदभङ्गैर्विज्ञेया सा श्लेषवक्रोक्तिः। काव्यालङ्कार-२/१४ विस्पष्टं क्रियमाणादक्लिष्ता स्वरविशेषतो भवति। अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः॥ तत्रैव-२/६


ISSN: 2320-740X

तद्वक्रश्लेष इति कथ्यते। [1]भोजराजः वाकोवाक्यालङ्कारस्य भेदरूपेण वक्रोक्तेः द्विधा विवेचनं चकार- निर्व्यूढा अनिर्व्यूढा चेति।

एतद्द्वयमपि क्रमात् सभङ्गश्लेषवक्रोक्तिः, अभङ्गश्लेषवक्रोक्तिश्च।[2] अलङ्कारान्तरस्य भेदत्वेन काकु अपि तेनाङ्गीकृतम्।[3] मम्मटाचार्यः वक्रोक्तिं शब्दालङ्कारं मन्यते,अत् एव रुद्रटस्य शब्दवक्रोक्तेः भेदद्वयमपि एकस्यां कारिकायां निबबन्ध। श्लेषः द्विधा भवतीति हेतोः श्लेषवक्रोक्तिं द्विधा मन्यते। एतत्तु भोजस्य निरूपणमाधारीकृत्येति वक्तुं शक्यम् [4]। काकुर्ध्वनेर्विकारः, येन उच्चारयितुः शोक-रोषाद्यनुमीयते। तादृशः शोकाद्यनुमापकः जातिविशेषः काकुः।[5] यद्यपि काक्वा ज्ञातस्यार्थस्य अन्यथार्थयोजना व्यञ्जनैव तथापि काकोः शब्दधर्मत्वात् शब्दालङ्कारपङ्क्तौ परिगणनम् [6]। अत एव भोजराजः वाकोवाक्यमात्रे तदङ्गीकरोति। प्रदीपकारस्याभिप्रायेऽपि काकोः उपयुक्ततैव नास्ति [7]।

रुय्यकः वक्रोक्तिं मम्मटाचार्यकृतलक्षणसमानतयैव लक्षितवान् [8]। किन्तु वक्रोक्तेः गूढार्थपरकालङ्कारेषु परिगणनं तस्य विशेषः। विच्छित्तिरूपत्वात् सर्वेऽप्यलङ्कारा वक्रोक्तिस्वरूपा एव, किन्तु अत्र "वक्रोक्ति"रिति अलङ्कारविशेषाभिधानम् इत्यभिप्रैति रुय्यकः। [9] मम्मटाचार्यः वक्रोक्तेः प्रकारत्रयमङ्गीकरोति, रुय्यकस्तु उभयश्लेषगतरूपचतुर्थं भेदमप्यङ्गीकरोति। काकुवक्रोक्तेः अर्थादभङ्गश्लेषमूलाया वक्रोक्तेरुदाहरणं रुय्यकेन मम्मटाचार्यादेव स्वीकृतम्। शोभाकरदत्तं लक्षणं मम्मटाचार्यस्य वक्रोक्तिलक्षणादपि व्यापकं दृश्यते। यत्र वक्ता श्रोता वा अन्यथासम्भावितशब्दार्थौ प्रकारान्तरेण योजयतस्तत्र वक्रोक्त्यलङ्कारः, श्लेष-काकु-धर्मसाम्य-औपचारिकप्रयोगेषु मुख्यार्थप्राप्तिः, अर्थान्तरमात्रप्रयोगेषु भवति। [10] शोभाकरः इदमप्यङ्गीकरोति यत् रुय्यकस्य द्वितीय

---

[1] यत्रार्थादन्यरसस्तत्प्रतिबद्धश्च गम्यतेऽन्योऽर्थः। वाक्येन सुप्रसिद्धो वक्रश्लेषः स विज्ञेयः॥ तत्रैव-१०/९

[2] सरस्वतीकण्ठाभरणम्-पृ-२९६-७, शृङ्गारप्रकाशः-पृ-३८४

[3] सरस्वतीकण्ठाभरणम्-२/५६

[4] यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥ काव्यप्रकाशः-९/७८

[5] कायत्यर्थान्तरमिति काकुः। -------अथवा काकुर्जिह्वा, तद्व्यापारविशेषसम्पाद्यत्वात् शोकभीत्यादिभिर्ध्वनेर्विकारः काकुः। तदुक्तं भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते। बालबोधिनी-पृ-७२, काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः। अमरकोषः-१/६/१२

[6] अत्र काकोः शब्दधर्मतया शब्दालङ्कारता, अन्यथायोजनञ्च व्यञ्जनया। प्रदीपोद्योत, उद्धृत-बालबोधिनी, पृ-४९४

[7] इयं च न वाकोवाक्यमात्रे, किन्तु स्वतोऽप्यन्येनोक्तमन्यथायोजनमात्रे। काव्यप्रदीप-पृ-२८८

[8] अन्यथोक्तस्य वाक्यस्य काकुश्लेषाभ्यामन्यथायोजनं वक्रोक्तिः। अ.स. सूत्र-७७, वृत्तिश्च।

[9] वक्रोक्तिशब्दश्चालङ्कारसामान्यवचनोऽपीहालङ्कारविशेषे सञ्ज्ञितः। तत्रैव पृ-२०२।

[10] अन्यथासम्भावितयोश्शब्दार्थयोरन्यथायोजनं वक्रोक्तिः। अ.र.सूत्र-१०५

व्याघातः वक्रोक्त्या गतार्थः इति । [1] यं सविस्तरं खण्डितवान् जयरथः ।[2] नरेन्द्रप्रभसूरिः वक्रोक्तिं शब्दालङ्कारत्वेनाङ्गीकृत्य मम्मटाचार्यमनुगच्छति । [3] हेमचन्द्रोऽपि तां शब्दालङ्कारं मन्यते, किन्तु श्लेषरूपेणैव, काकुरूपेण न । [4] काकुस्तन्मते पाठधर्मः, न तु वक्रोक्तिः । पाठधर्मस्तु नाट्यगुणः [5]। "काकुः" इत्यत्र लौल्यार्थकः "कक्" धातुर्वर्तते । यत्र साकाङ्क्षनिराकाङ्क्षादिक्रमेण पठ्यमानः शब्दः, प्रकृतार्थातिरिक्तार्थप्रकाशनमीहते, तत्र तत् लौल्यमित्येवोच्यते । अथवा, "कु" इत्यस्य "ईशत्" इत्यर्थं स्वीकृत्य, "को" आदेशं कृत्वा "काकु"शब्दस्य निष्पत्तिर्यद्युच्यते, तदा "काकु"शब्दस्य 'हृदयस्थभावस्य ईशत् प्रकाशनम्' इत्यर्थः सिद्ध्यति । 'काकुः' इत्यस्य जिह्वा इत्यप्यर्थो वर्तत इति, जिह्वाव्यापारसम्पाद्य-मानत्वादपि काकुशब्दः प्रयुज्यते । एवं विधार्थयुक्तं काकुः कथं वक्रोक्तिर्भवति ? सप्तस्वराः, त्रीणि स्थानानि, चत्वारो वर्णाः, द्विविधः काकुः, षट् अलङ्काराः, षडङ्गानि-एतान् पाठगुणान् मन्यते भरतमुनिः। एतेषां सविस्तरं विवेचनं कृत्वा हेमचन्द्रः काकोः पाठधर्मत्वं समर्थितवान् । [6] 'अभिप्रायवान् पाठधर्मः 'काकुः' अलङ्कारः न भवति [7] इति राजशेखरोऽभिप्रैति । हेमचन्द्रः आनन्दवर्धनाचार्यश्च गुणीभूतव्यङ्ग्यस्य एकः प्रभेदः काकुः इति अभिप्रयतः-

**अर्थान्तरगतिः काक्वा या चैषा परिदृश्यते ।**
**सा व्यङ्ग्यस्य गुणीभावे प्रकारमिममाश्रिता ॥** [8]

पुनश्च सः काकोः साकाङ्क्ष-निराकाङ्क्षभेदद्वयं दर्शयित्वा, तस्य विधिनिषेधादिषु अर्थान्तरेषु पर्यवसितत्वं दर्शयन् ध्वनिविषयं साधितवान् [9] ।

वाग्भट(प्रथम)स्य मतानुसारं यत्र उत्तरदाता भङ्गश्लेषद्वारा प्रस्तुतस्य अन्यार्थाभिधानं करोति तत्र वक्रोक्तिर्भवति । सः तस्याः द्वे उदाहरणे दत्तवान्, तत्र द्वितीयोदाहरणेऽभङ्गश्लेषेण वक्रोक्तिर्भवति ।[10] वाग्भट(द्वितीय)स्य मतं तु मम्मटाचार्यमनुसरति । जयदेवः, विद्याधरः, दीक्षितः,

---

[1] अ.र.पृ-११४

[2] अत एव द्वितीयो व्याघातः नास्या भेदतया वाच्यः । वि.प्र. पृ-१७५-१७७

[3] अ.म.-७/२३

[4] अन्यस्यान्येनान्यथा श्लेषादुक्तिर्वक्रोक्तिः । काव्यानुशासनम्-५/८

[5] नाट्यशास्त्रम्-१९/३७

[6] अलङ्कारचूडामणिः, विवेकश्च-पृ-३३३-३७

[7] काकुर्वक्रोक्तिर्नाम शब्दालङ्कारोऽयमिति रुद्रटः । अभिप्रायवान् पाठधर्मः काकुः स कथमलङ्कारो स्यादिति यायावरीयः । काव्यमीमांसा-सप्तमाधिकरणम् ।

[8] (ध्व. ३/३८)

[9] अलङ्कारचन्द्रिका

[10] प्रस्तुतादपरं वाचमुपादायोत्तरप्रदः ।


ISSN: 2320-740X

देवशङ्करः, नरसिंहः, विद्यानाथश्च रुय्यकमतानुसारं इमां वक्रोक्तिम् अर्थालङ्कारेऽन्तर्भावयन्ति [1]। विश्वनाथः कर्णपूरश्च मम्मटमतानुसारं शब्दालङ्कारेऽन्तर्भावयन्ति [2] । अमृतानन्दयोगिनामभिप्राये यदा कोपः प्रियवद्वचनेन अभिधीयते तदा वक्रोक्तिर्भवति [3]। "साधु दूति पुनः साधु कर्तव्यं किमतः परम्" इत्याद्युदाहरणानि तैः प्रदर्शितानि, यानि ध्वनेरतिरिक्तानि न भवन्ति । श्लेष-काक्वित्यनभिमतपूर्वकं, वाकोवाक्यमेव वक्रोक्तिरिति केशवमिश्रः [4] । केचन काकु-श्लेषवक्रोक्त्यतिरिक्ततया विकृतश्लेषः, काकुविकृतः, श्लेषोभयः इत्यादिभेदेन अर्थान्तरावगमनेऽपि वक्रोक्तिमङ्गीकुर्वन्ति [5]। अनेन विवेचनेन स्पष्टं भवति यत् वामनाभिमता वक्रोक्तिः, रुद्रटोक्तः वक्रश्लेषः न समादरयोग्यः इति । रुद्रटोक्ता मम्मटाभिमता च शब्दवक्रोक्तिः सर्वैरङ्गीकृता । वक्रोक्तेः शब्दालङ्कारेऽन्तर्भावः श्लेष-काक्वोः शब्दधर्मत्वहेतुकः । अर्थालङ्कारान्तर्भावस्तु अर्थस्यान्यथायोजनाधारितः । तथापीदमङ्गीकरणीयमेव यत् शब्दधर्मत्वादेव काकूत्थवक्रोक्तेरलङ्कारत्वं सङ्गच्छते, अन्यथा काकुः गुणीभूतव्यङ्ग्यविषय एव । अत एव हेमचन्द्र-केशवमिश्र-विश्वेश्वराः वक्रोक्तिलक्षणे "काकु"पदं न प्रयुञ्जते । वस्तुतः "वक्रा उक्तिः" इति व्युत्पत्त्या ऋजुमार्गं त्यक्त्वा वक्रतया कथनमेव वक्रोक्तिः । कमप्यभिप्रायविशेषमनुलक्ष्यैव किमपि वदति वक्ता, प्रतिवक्ता तु वक्तुरभिप्रायं जानन्नपि अजानन्निव विनोदार्थमन्यार्थं प्रकल्पयति । एतादृशप्रयोगाः लोकेऽपि बाहुल्येन दृश्यन्ते । यदा एकस्यैव पदस्य द्वौ अर्थद्वयं कल्पयतः तदा स्वाभाविकतया श्लेषेण उपस्थीयते । अतः वक्रोक्तौ श्लेषस्य सहायः आवश्यक एव । किन्तु काकुः न तथा । काकुप्रयोगे व्यञ्जनया अर्थान्तरप्रतीतिर्भवति । श्लेषः सभङ्गाभङ्गभेदेन द्विविधः । यत्र पदभङ्गद्वारा अर्थद्वयाभिधानं तत्र सभङ्गश्लेषः, पदभङ्गं विनैव एकस्मात् पदादर्थद्वयं यद्यभिधीयते तदा अभङ्गश्लेषः । अतः वक्रोक्तावपि द्वैविध्यकल्पनं

समीचीनमेव । अत्र हेमचन्द्रस्य मतमधिकतयोपादेयत्वं प्राप्नोति ।

किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कां प्रति मयीत्यनुमानतोऽहम् ।
जानाम्यतस्त्वमनुमानत एव सत्य-

---

भङ्गश्लेषमुखेनाह यत्र वक्रोक्तिरेव सा ॥ वाग्भटालङ्कारः-४/१४

[1] वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम् । चन्द्रालोकः-२/१११

[2] अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यतः ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥ साहित्यदर्पणम्-१०/११

[3] कोपात् प्रियवदुक्तिर्वा वक्रोक्तिः कथ्यते तथा ॥ अलङ्कारसर्वस्वम्

[4] अन्याभिप्रायेणोक्तं वाक्यमन्येनान्यार्थकतया यद्योज्यते सा वक्रोक्तिः । एतदेव वाकोवाक्यमित्युच्यते । (अलङ्कारशेखरः)

[5] ब्रह्मतन्त्रस्वामी, अलङ्कारमणिहार-भाग-३, पृ-३०५-१६

मित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥ [1]

अत्र शिवेनोक्तस्य "गौरि" पदस्य (गौः+इ ), 'अनुमानतः' (अन्+उमा+नतः) इत्येते पदे भङ्गपूर्वकं पार्वत्या अर्थान्तरं योजितम्। सर्वातिशायिनी पार्वत्या उक्तिः सभङ्गश्लेषवक्रोक्तेः उदाहरणम्।

अहो केनेदृशी बुद्धिः दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिर्नतु दारुमयी क्वचित् ॥ [2]

दारुशब्दस्य काष्ठ-काठिन्यमित्यर्थद्वयसत्त्वात् पदभङ्गं विनापि अर्थद्वयमपि श्रोत्रा गृह्यते। अत एव भङ्गश्लेषपूर्विका वक्रोक्तिः। एतदेव पद्यम् अविकृतश्लेषवक्रोक्तेरुदाहरणत्वेन दत्तम् अप्पय्यदीक्षितैः कुवलयानन्दे। विकृतश्लेषवक्रोक्तेः पुनः,

भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः।
इयं यास्यत्युच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ॥

इतिपद्यं दत्तमस्ति। "भिक्षार्थी स क्व यातः सुतनु---------" इत्यादौ पद्ये अर्थश्लेषमूला वक्रोक्तिः, "असमालोच्य कोपस्ते------" इत्यादौ पद्ये च काकुवक्रोक्तिः अप्पय्यदीक्षितैरङ्गीकृता।

साहित्यदर्पणे विश्वनाथेन शब्दालङ्कारमध्ये पठितस्य वक्रोक्त्यलङ्कारस्येदमुदाहरणं दत्तम्-

के यूयं स्थल एव सम्प्रति वयं प्रश्नः विशेषाश्रयः
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ॥

एवं वक्रोक्तिः अलङ्कारत्वेनैव बहुभिरङ्गीकृता दृश्यते। वाग्विकल्पानामानन्त्यात् तेषां काव्य-शोभावर्धकत्वेन अलङ्कारप्रायत्वाच्च वक्रोक्तेः अलङ्कारत्वाङ्गीकारेण न कापि क्षतिरिति वक्तुं शक्यते।

***********

[1] काव्यालङ्कारः-२/१५

[2] काव्यप्रकाशः


ISSN: 2320-740X

# अथाऽतो धर्मजिज्ञासा

✍ डा. सूर्यनारायणभट्टः
सहायकाचार्यः, मीमांसाविभागः

अथाऽतो धर्मजिज्ञासेतीदं हि सूत्रं भगवता जैमिनिमहर्षिणा प्रणीतायां द्वादशलक्षण्यां प्रथमं सूत्रं शास्त्रारम्भसूत्रमिति कथ्यते । इयं द्वादशलक्षणी पूर्वमीमांसेत्यपि व्यपदिश्यते । पुरुषार्थचतुष्टये आद्यः पुरुषार्थो धर्मः शास्त्रस्यास्य प्रमेयभूतो विषयः । धर्मज्ञाने अवगते तस्यानुष्ठानमपि ज्ञातुं शक्यते । स च धर्मोऽर्थकाममोक्षाणां साक्षात् परम्परया वा साधनमिति सर्वैरनुष्ठेयो भवति अतः अनुष्ठानज्ञानार्थं ज्ञातव्यश्च भवति । तस्य च धर्मस्य ज्ञानं वेदाधीनमिति वेदाध्ययनम् आदौ कर्तव्यं भवति । तदुक्तं **"स्वाध्यायोऽध्येतव्य"**[1] इति । अस्य वेदवाक्यस्य अयमर्थः । स्वस्याध्यायः स्वाध्यायः । अत्र स्वशब्द आत्मकुलपरम्परावाचकः । अधीयत इत्यध्यायः । स चाध्यायशब्दः शाखावच्छिन्नवेदपरः । अध्येतव्य इत्यत्र अधिपूर्वकेङ् धातोरध्ययनमर्थः । अध्ययनन्नाम गुरुमुखोच्चारणपूर्वकशिष्यनूच्चारणम् । अर्थात् गुरुमुखोच्चारणानूच्चारणेनाध्ययनेन स्वाध्यायं स्वकुलपरम्परागतशाखावच्छिन्नं वेदं भावयेत् प्राप्नुयादिति ।

अत्र शास्त्रस्यास्य प्रथमसूत्रे "**अथाऽतो धर्मजिज्ञासे**[2]"त्यत्र विषयनिरूपणसन्दर्भे इदं "**स्वाध्यायोऽध्येतव्य**" इति वेदवाक्यं विषयीकृत्य जिज्ञासाधिकरणं समारचितम् ।

अस्मिन् शास्त्रे पञ्चभिः षड्भिर्वा अवयवैरधिकरणं निष्पद्यते । **"चिन्तां प्रकृतसिद्ध्यर्थामुपोद्धातं प्रचक्षते"** इति न्यायेन उपोद्धातस्सङ्गतिः । "स्वाध्यायोऽध्येतव्य" इति वेदवाक्यं विषयीकृत्य वेदाध्ययनानन्तरं गुरुकुले एव स्थित्वा विचारशास्त्राध्ययनं कर्तव्यं वा न वेति संशयः । स्वाध्यायविधिः स्वर्गाद्यर्थमध्ययनं विधत्ते अतः विचारशास्त्राध्ययनं विनापि लिखितपुस्तकपाठादिना अर्थज्ञानस्य सम्भवात् विचारशास्त्रं गुरुकुले स्थित्वा नाध्येतव्यमिति पूर्वपक्षाशयः । वेदाध्ययनं न स्वर्गार्थं किन्तु अर्थज्ञानार्थमिति सिद्धान्तः । मीमांसाशास्त्रस्य अनारम्भः पूर्वपक्षफलम् ।
तस्य आरम्भः पश्चात् वेदार्थनिर्णयः ततः कर्मानुष्ठानम्- कर्मानुष्ठानद्वारा पुरुषार्थसिद्धिः सिद्धान्तफलम् ।

अथाऽतो धर्मजिज्ञासा इति सूत्रार्थस्तु एवम् – अथशब्दस्य सत्सु नैकेषु अर्थेषु आनन्तर्यार्थः भाष्यकारादिभिः व्याख्यातः । यदि आनन्तर्यार्थः स्वीक्रियते तर्हि ततः पूर्वं केनचिद्वृत्तान्तेन भाव्यमेव ।

---

[1] तै. आ. २.१५.१

[2] जै.सू.१.१.१

अत्र भगवान् भाष्यकार आह – **"तत्र लोके अयमथशब्दः वृत्तात् अनन्तरस्य प्रक्रियार्थो दृष्टः । न चेह किञ्चित् वृत्तमुपलभ्यते । भवितव्यं तु तेन, यस्मिन् सत्यनन्तरं धर्मजिज्ञासावकल्पते । तथा हि प्रसिद्धपदार्थकः स कल्पितो भवति । तत्तु वेदाध्ययनम् । तस्मिन् हि सति साऽवकल्पते । नैतदेवम् । अन्यस्यापि कर्मणोऽनन्तरं धर्मजिज्ञासा युक्ता, प्रागपि च वेदाध्ययनात् । उच्यते – तादृशी तु धर्मजिज्ञासामधिकृत्याथशब्दं प्रयुक्तवानाचार्यः या वेदाध्ययनमन्तरेण न सम्भवति । कथम् ? वेदवाक्यानामनेकविधविचार इह वर्तिष्यत**[1] इति । अतः वेदाध्ययनानन्तरमेव धर्मजिज्ञासा अर्थात् वेदार्थविचारः कर्तव्यः इति फलितार्थः ।

अत्र अयमाक्षेपः पूर्वपक्षिणः – वेदाध्ययनानन्तरं गुरुकुले एव स्थित्वा वेदार्थविचारो नैव कर्तव्यः । गुरुकुले स्थित्वा आचार्यात् अध्ययने कृते स्वाध्यायाक्षरग्रहणं भवति । ततः पदावधारणादिना वाक्यार्थज्ञानं व्युत्पन्नस्य स्वत एव जायते । तच्च ज्ञानं प्रकृते फलं स्यात् । यथा कर्मानुष्ठानेन फलं जायते । तथैव पदावधारणादिना अपि वाक्यार्थज्ञानरूपं फलं भवत्येव । स्वर्गादिफलम् अस्यास्तीति दर्शपूर्णमासादि फलवद्भवति । तदनुष्ठानोपयोगित्वं स्वाध्यायाध्ययन-जन्यज्ञानस्य विद्यते । यतो हि सर्वत्र वाक्यश्रवणस्य वाक्यार्थज्ञानमेव फलमिति दृष्टम्। प्रकृतेऽपि वेदवाक्यश्रवणस्य तदेव फलम् । दृष्टे सम्भवति अदृष्टकल्पनायाः अन्याय्यत्वेन, अध्ययनस्य फलमर्थज्ञानं न तु स्वर्गः, अतः स्वर्गकल्पना नोचिता इति कस्यचिन्मतिः स्यात् । परं स्वाध्यायाध्ययनविधिरर्थज्ञानार्थः इति स्वीकारे तस्य वैयर्थ्यमेव । अध्ययनमात्रस्य अर्थज्ञानार्थत्वस्य लोकसिद्धत्वात् । अतो विधिबलादेव अध्ययनस्य फलं विश्वजिन्न्यायेन स्वर्गः इति वक्तव्यम् ।

तर्हि कोऽयं विश्वजिन्न्यायः इति सन्देहे **"विश्वजिता यजेत"** इत्यादि वेदवाक्यं पुरस्कृत्य द्वादशलक्षण्यां चतुर्थाध्याये अकथितफलवतां विश्वजिदादियागानां विषये विचारः उपस्थापितः । **"चोदनायां फलाश्रुतेः कर्ममात्रं विधीयते न ह्यशब्दं प्रतीयते"**[2] इति । अत्र तु विश्वजिदादिषु फलस्याश्रुतत्वात् नास्ति तस्य फलं तस्मात् विधिः निरर्थक इत्याक्षिप्य फलस्य कल्पनीयत्वात् सफलो विधिः । विश्वजिन्नाम्ना यागेन भावयेत् इत्युक्ता भावना भाव्यमपेक्षते किं भावयेदिति । अतः भाव्याकाङ्क्षायाः अनिवृत्तेः वाक्यार्थपूरणाय किञ्चित् फलमवश्यमध्याहर्तव्यम् । अध्याहृते च फले तत्कामिनः पुरुषस्य प्रवृत्त्या यागानुष्ठानं सिद्ध्यति । अन्यथा विधिवाक्यस्य वैयर्थ्यमिति फलं कल्पनीयम् । ततोऽग्रिमेऽधिकरणे **"एकं वा चोदनैकत्वात्"**[3] इति सूत्रेण विश्वजिदादेः यदि फलं

---

[1] मीमांसाभाष्यम् – प्रतिज्ञासूत्रम्

[2] जैमिनिसूत्रम् ४.३.१०

[3] म जैमिनिसूत्रम् ४.३.१४


ISSN: 2320-740X

कल्प्यते तर्हि पशुपुत्रवीर्येन्द्रियादिकं सर्वं फलत्वेन कल्पनीयमित्याक्षिप्य लाघवात् एकस्यैव फलस्य कल्पनया भाव्याकाङ्क्षायाः शान्तेः एकमेव फलं कल्प्यमिति संसाध्य पश्चात् **"स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्"**[1] इति सूत्रेण स्वर्गस्य पश्वादिफलवत् दुःखमिश्रितत्वाभावात् निरतिशयसुखत्वाच्च सर्वैः इष्टत्वात् स्वर्ग एव विश्वजितः फलमिति सिद्धान्तितम्।

अतः स्वाध्यायोऽध्येतव्य इत्यत्रापि अध्ययनस्य न किमपि फलं शब्दतः श्रूयते इति विश्वजिन्न्यायेन स्वर्गो भवतु यथा – अध्येतव्य इत्यत्र विधिं विनापि अर्थज्ञानं भवति अतः अर्थज्ञानार्थं न विधिः। विधिसामर्थ्यात् विश्वजिन्न्यायेन अध्ययनस्य फलं स्वर्ग इति। यथाहुः –

**विनापि विधिना दृष्टलाभान्न हि तदर्थता।**
**कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवदिति**[2] ॥

एवं स्वीक्रियमाणे **अधीत्य स्नायादि**ति स्मृत्यर्थोऽपि अनुष्ठितो भवति। अतः विचारशास्त्रस्य विधिप्रयुक्तत्वाभावात् केवलमक्षरग्रहणमात्रेण स्वर्गरूपं फलं लभ्यत इति धर्मविचारात्मकं मीमांसाशास्त्रं गुरुकुले स्थित्वा नाध्येतव्यम् अपि तु ततः परावृत्य समावर्तनादिकं च कृत्वा लिखितपुस्तकपाठादिना कर्मानुष्ठानं सम्पादनीयमिति।

अपि च अध्ययनविधिः अर्थज्ञानरूपदृष्टप्रयोजनपर्यवसायीति परिगण्यते तदा एतदध्ययनं प्रमाणान्तरेण अत्यन्तमप्राप्तं विधीयते उत पाक्षिकं विधीयते वेति वक्तव्यम्।

परमत्र नात्यन्तमपूर्वं विधत्ते न वा पाक्षिकम्। अत्र तु लिखितपुस्तकपाठादिना अध्ययनेन महाभारतादौ यथा अर्थज्ञानं जायते तथैव अत्रापि भवतीति प्रमाणान्तरेण प्राप्त एव अर्थः न अप्राप्तः अर्थः विधीयत इति अपूर्वविधिः। न वा नियमविधिः- यतो हि अवघातेनैव यदि तुषविमोकः क्रियते तर्हि नियमापूर्वं जायत इति नियमाङ्गीकारः तत्र सङ्गच्छते – तथा नात्र सम्भवति। स्वाध्यायोऽध्येतव्य इत्यत्र लिखितपुस्तकपाठादिना यदध्ययनं, तेन च यदर्थज्ञानं, तेन चार्थज्ञानेन क्रत्वनुष्ठानं भवतीति नियमः न अध्ययनं प्रति हेतुः। अतः एव अध्ययनस्य फलं स्वर्ग इति पूर्वपक्षाभिप्रायः।

### सिद्धान्तः

स्वाध्यायोऽध्येतव्य इत्ययं नापूर्वविधिरित्यत्र न कापि विप्रतिपत्तिः। यतो हि लिखितपुस्तकपाठादिना समधिगतार्थज्ञानेनापि कर्मानुष्ठानं सम्भवतीति अत्यन्तमप्राप्तं न विधीयते अतः न अपूर्वविधिरयम्। नियमविधिस्तु निराकर्तुं न शक्यते। यश्च पूर्वपक्षिणा प्रत्याख्यातमासीत्।

---

[1] म जैमिनिसूत्रम् ४.३.१५

[2] जैमिनीयन्यायमाला – जिज्ञासाधिकरणम्

तद्यथा – स्वाध्यायोऽध्येतव्यः इत्यत्र तव्यप्रत्ययेन विधिः प्रतीयते । तेन च शाब्दी भावना स्वीक्रियते । स्वाध्यायशब्देन वेदराशिः उच्यते । अध्येतव्य इति कर्मणि तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वाभिधानात् अध्ययनस्य स्वाध्यायफलमिति प्रमाणान्तरानधिगतत्वात् अध्ययनेन स्वाध्यायं भावयेदिति विवरणं युज्यते । अत्र केवलस्य स्वाध्यायपदवाच्यस्य वेदस्य कर्मत्वं तु प्राप्यकर्मत्वरूपम् । अध्ययनेन स्वाध्यायस्य प्राप्यत्वात् । परं स्वाध्यायस्य न केवलं प्राप्यत्वं विवक्षितम् । **"अनधीयाना व्रात्या भवन्ति"**[1] इति वाक्यान्तरेण केवलस्य स्वाध्यायस्य व्रात्यतादोषपरिहारार्थं सम्पाद्यत्वं वर्तते । तथा च विशेषणीभूतार्थज्ञानार्थमध्ययनं विधीयत इति सिध्यति । अपि च कर्मानुष्ठाने कः अधिकारीति संशये- समर्थः सर्वाङ्गयुक्तः वेदार्थज्ञानविशिष्टः यागे उपयोक्ष्यमाणपदार्थवान् विद्वान् कामीति सामान्यतोऽवगम्यते ।

अत एव **"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"**[2] इत्यादिविधयः क्रत्वनुष्ठानार्थम् अर्थज्ञानसहितं वेदाध्ययने पुरुषं प्रेरयन्ति । तस्मात् एतादृशक्रत्वनुष्ठानार्थज्ञानरूपसंस्कारः न लिखितपुस्तकपाठादिना जायत इति स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः अर्थज्ञानसहितमध्ययनं विधत्त इति नियम आश्रयणीयो भवति ।

यत्तु पूर्वपक्षिणा विधिवाक्येषु फलवाचकं पदं न स्यात् तदा विश्वजिन्न्यायेन स्वर्गः कल्प्यते येन विधिः निरर्थको न भवति इति प्रदर्शितम् – तन्न साधु – अत एवोक्तम् –

**लभ्यमाने फले दृष्टे नादृष्टफलकल्पना ।**
**विधेस्तु नियमार्थत्वात् नानर्थक्यं भविष्यतीति**[3] ॥

अतः अदृष्टस्वर्गपरिकल्पनां विनैव अर्थज्ञानरूपदृष्टफलेनैव विधिः सार्थको भवति । अतः वैधत्वात् इदं शास्त्रं गुरुकुले एव स्थित्वा आरम्भणीयम् ।

क्वचिच्च वेदवाक्येषु सन्देहो जायते । अधीतसाङ्गवेदोऽपि तादृशं सन्देहम् अपाकर्तुं न प्रभवति । परम् इदं विचारशास्त्रं समुपस्थितं सन्देहं दूरीकृत्य कर्मानुष्ठानार्थम् अपेक्षितमर्थमुपस्थाप्य उपादेयं भवति ।

ननु अधीत्य स्नायादिति स्मृतेः का गतिरिति चेत् समाधीयते – अनेन स्मृतिवाक्येन वेदाध्ययनान्तरं गुरुकुलात् परावृत्य समावर्तनं कर्तव्यमिति किञ्चित् विधीयते । परं वेदाध्ययनान्तरं गुरुकुले स्थित्वा विचारशास्त्रमारभ्यते चेत् न कापि क्षतिः ।

---

[1] भाट्टदीपिका – जिज्ञासाधिकरणम्

[2] तै. संहिता. ०२.२.५

[3] जै. न्यायमाला जिज्ञासाधिकरणम्


ISSN: 2320-740X

**"समानकर्तृकयोः पूर्वकाले"**[1] इति पाणिन्यनुशासनेन एककर्तृकयोः धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानात् धातोः क्त्वा प्रत्ययो भवति । तत्र द्वयोः क्रिययोर्मध्ये अव्यवधानं सूत्रेणात्र क्त्वाप्रत्ययस्य उपात्तत्वेन न विधीयते ।

यथा वा लोकेऽपि स्नात्वा भुङ्क्ते इत्यादौ स्नानं कृत्वा अन्यत्किमपि अकृत्वैव भोजनं करोतीति नार्थः । किन्तु स्नानानन्तरं वस्त्रपरिधानं सन्ध्यापूजादिकं विधाय भोजनं करोतीत्यनेन न कोऽपि विरोधः । इत्थं च वेदमधीत्य विचारशास्त्रमपि गुरुकुले एव स्थित्वा अधीत्य पश्चात् समावर्तनं क्रियते चेन्न कापि विप्रतिपत्तिः । अतः विधिसामर्थ्यात् इदं वेदार्थनिर्णयात्मकं मीमांसाशास्त्रं गुरुकुले स्थित्वा अध्येतव्यम् अतः इदं शास्त्रमारम्भणीयमिति शास्त्रारम्भसूत्रार्थ इति सर्वं सुमङ्गलम् ।

***********

## विदुरनीतौ शैक्षिकविचाराः

✍ **डा. गणेश ति. पण्डितः**

सहायकाचार्यः, शिक्षाविभागः

नीतिशास्त्रकोविदेषु विदुरः अग्रगण्यः आसीत् । अयं हि महापुरुषः कृष्णद्वैपायनदास्योः सङ्गमेन द्वापरे च युगे भुविमवततार । पाण्डुः धृतराष्ट्रश्च अस्य भ्रातरौ आस्ताम् । सकलशास्त्रमर्मज्ञोऽयं धर्मस्य अपरावतारः आसीदित्यपि कीर्त्यते । किञ्च माण्डव्यमुनिशापवशात् सनातनधर्मः एव विदुररूपेण जनिं लेभे इति महाभारते उट्टङ्कितमस्ति । तद्यथा –

**माण्डव्यशापाद्धि स वै धर्मो विदुरतां गतः ।**
**महाबुद्धिर्महायोगी महात्मा सुमहामनाः ॥** (२८/१२ आश्रमवासिप्रसङ्गे)

पुरा सुरगुरुः बृहस्पतिः असुरगुरुः शुक्राचार्यश्च सर्वविद्याविशारदौ आस्ताम् इति श्रूयते । विदुरस्तु एतयोरपेक्षयापि बुद्धिमान् आसीदिति महाभारते एव उल्लिखितमस्ति । यथोक्तम् आश्रमवासिनां प्रसङ्गे –

**बृहस्पतिर्वा देवेषु शुक्रो वाप्यसुरेषु च ।**
**न तथा बुद्धिसम्पन्नो यथा स पुरुषर्षभः ॥**२८/१३

"विद" ज्ञाने धातोः "कुरच्" प्रत्यये कृते विदुरः इति शब्दः सिध्यति । ज्ञानीति अस्य शब्दस्य अर्थः । अयं हि महापुरुषः कौरवाणां पाण्डवानां च हितैषी आसीत् । तत्रापि युधिष्ठरस्य विषये अस्य

---

[1]पाणिनिसूत्रम् ३.४.११

महती प्रीतिरासीत् । यथा धर्म एव विदुररूपेण अवततार तथैव विदुर एव पुनः युधिष्ठिररूपेण भुविम् अवततार इति श्रूयते । तद्यथा –

**“यो हि धर्मः स विदुरो विदुरो यः स पाण्डवः”** ॥

एकवारं पारिवारिकसमस्याभिः ग्रस्तः किङ्कर्तव्यविमूढश्च धृतराष्ट्रः दूतमुखेन विदुरं समाहूय हितमुपदिशतु इति विज्ञापयति । एतत्सर्वं महाभारतस्य उद्योगपर्वणि सूपपादितं वर्तते । तत्रापि उद्योगपर्वणः त्रयस्त्रिंशत्तमाध्यायात् चत्वारिंशत्तमाध्यायपर्यन्तं यः भागः वर्तते स एव भागः “विदुरप्रकरणम्” अथवा “विदुरनीतिः” इति जोघुष्यते । एवं कृष्णद्वैपायनविरचितमहाभारतान्तर्गतः कश्चन भागः अथवा खण्डः एव विदुरनीतिः इति फलितम् ।

**नीयते इति नीतिः** अथवा **“नीयते पुरुषार्थफलाय जगत् यया सा नीतिः”** इति नीतिपदस्य व्युत्पत्तिः । विदुरस्य नीतिः विदुरनीतिः । विदुरेण विषमसन्दर्भे धृतराष्ट्राय उपदिष्टाः श्लोकरूपाश्च इमाः नीतयः न केवलं धृतराष्ट्रमुद्दिश्य उपदिष्टाः अपि तु सर्वलोकहितायैव समुपदिष्टाः इत्यत्र समाकलनीयम् । धृतराष्ट्रोऽत्र निमित्तमात्रं वर्तते । सर्वलोकहिताय प्रोक्तायां विदुरनीतौ अनल्पाः शैक्षिकविचाराः सन्ति । शिक्षायाः शिक्षकस्य शिक्षार्थिनश्च गुणदोषस्वभावान् अधिकृत्य इदमित्थमिति विवरीतुं विदुरमन्तरा नान्यः समर्थः ।

विदुरनीतौ प्रोक्ताः शैक्षिकविचारोपेताः श्लोकरूपाश्च नीतयः सङ्ग्रहेणाऽत्र उदाह्रियन्ते । विदुरनीतिप्रकरणमधिकृत्य भाविनि काले शोधकार्यं कर्तुम् अनुसन्धातारः प्रेरणां प्राप्नुयुः इति धियैव मदीयोऽयं प्रयासः लेखमुखेनात्र प्रकटीकृतः । क्रमशः यथा –

**१. पण्डितलक्षणम् –**

शास्त्रोज्ज्वला बुद्धिः पण्डा । पण्डा अस्मिन् अस्तीति पण्डितः । पण्डितः नाम शास्त्रज्ञः, विद्यावान् , सुशिक्षितः इत्येवं वक्तुं शक्यते । विद्यातुरस्य पण्डितस्य गुणलक्षणानि यथा विदुरेण प्रोक्तानि न तथा अन्येन केनचित् प्रोक्तानि । उदाहरणं यथा –

**क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।**
**नासम्पृष्टो व्युपयुङ्क्ते परार्थे तत्प्रज्ञानं प्रथमं पण्डितस्य ॥**

यः बोधितान् विचारान् झटिति अधिगच्छति यश्च पुनः बोधनावसरे (अध्ययनावसरे) सहनया शृणोति, विना लोभं हिताहितं च विज्ञायैव कर्म प्रारभते किञ्च अनावश्यकरूपेण इतरेषां कर्मणि आत्मानं नैव नियोजयति स एव पण्डितः इति अत्र तात्पर्यम् । एवमेव पण्डितः (Educated) धाराप्रवाहरूपेण भाषितुं शक्नुयात् । प्रत्येकमपि घटनां सचित्रं विवरीतुं प्रभवेत् । सः ऊहापटुः प्रतिभासम्पन्नश्च सन् स्मृतिबलेन (न तु पाठ्यपुस्तकबलेन) पाठयितुं समर्थः स्यादेव । तद्यथा –


ISSN: 2320-740X

**"प्रवृत्तवाक् चित्रकथः ऊहवान्प्रतिभानवान् ।**
**आशुग्रन्थस्य च वक्ता च यः स पण्डित उच्यते ॥"**

विद्यार्थिनः विनीताः मितभाषिणः विश्वासपात्राणि च स्युरेव । अन्यथा ते मूढपदवाच्याः सम्भवन्ति । यथोक्तम् –

**अनाहूतः प्रविशति अपृष्टो बहु भाषते ।**
**अविश्वस्ते विश्वसिति मूढचेता नराधमाः ॥**

आधुनिकाः शिक्षाशास्त्रिणः "ज्ञानेन्द्रियाणि ज्ञानस्य द्वाराणि" (Senses are the gateways of knowledge) इति प्रलपन्ति । अनेन महती विपत्तिरेव भविष्यति इति विदुरमतम् । कुतश्चेत् यदि एकमपि ज्ञानेन्द्रियं छिद्रं भवति तन्नाम विषयालिप्तं भवति तर्हि मनः अपि तत्रैव तल्लीनं भवति । अतः इन्द्रियनिग्रहः अपरिहार्य एव इति विदुरः गदति । तद्यथा –

**पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम् ।**
**ततोऽस्य स्रवति प्रज्ञा धृतेः पात्रादिवोदकम् ॥**(७७/४८९९ उद्योगपर्वणि)

किञ्च मनुष्यः ज्ञानेन्द्रियाणां दासः भविष्यति चेत्तर्हि तस्य विपत्तयः शुक्लपक्षस्य चन्द्रवत् अभिवर्धन्तेतमाम् । यथोक्तम् –

**यो जितः पञ्चवर्गेण सहजेनात्मकर्षिणा ।**
**आपदस्तस्य वर्धन्ते शुक्लपक्ष इवोडुराट् ॥**५५/४९३७

तत्र हि मनुष्यस्य शरीरं रथरूपं वर्तते । आत्मा तु सारथिस्थानीयः, अश्वोपमानि पुनरिन्द्रियाणि । कुशलः सारथिः यथा अश्वान् नियन्त्रयन् गम्यं स्थानं प्राप्नोति तथैव चञ्चलाश्वरूपाणि इन्द्रियाणि निगृह्य मनुष्योऽपि जीवने लक्ष्यं प्राप्नुयात् । यथोक्तम् –

**रथं शरीरं पुरुषस्य राजन्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।**
**तैरप्रमत्तः कुशली सुदश्वैः दान्तः सुखं याति रथीव धीरः ॥** ५९/४९३९

अतः इन्द्रियाणामुपरि शिक्षणावसरे नाधिकं बलं देयमिति तु सुस्पष्टमेव ।

अद्यत्वे वैश्विकमूल्ययुता शिक्षा (Universal Value Based Education) बालेभ्यः देया इति सर्वेऽपि एककण्ठेन निगदन्ति । मूल्यानि अनन्तानि । तेषां गुणलक्षणसहितं विवरणं वयं विदुरनीतौ साद्यन्तम् अवलोकयितुं शक्नुमः । **"क्षमा हि परमं बलम्" "अहिंसैका सुखावहा" "सत्यं स्वर्गस्य सोपानम्" "आर्जवं वा विशिष्यते" "शान्तिं योगेन विन्दति" "सत्यो मृदुः स्वर्गमुपैति विद्वान्" "कुलं वृत्तेन रक्ष्यते" "धर्ममूलं श्रियं प्राप्य न जहाति न हीयते"** इत्यादीनि वैश्विकमूल्यानि विदुरनीतौ सर्वत्र नयनपथमवतरन्ति । आध्यात्मिकसामाजिकनैतिकमूल्यानां भाण्डागारोपमा नीतिरेषा इत्यत्र

नास्ति संशीतिः। विद्यार्थिनः सद्बुद्धिसम्पन्नाः शास्त्रज्ञाः इन्द्रियनिग्रहणक्षमाः मितभाषिणश्च भवेयुः। जीवने यशः प्राप्तुम् अष्टौ गुणाः तेभ्यः साहाय्यमाचरन्ति। अतः अध्ययनशीलाः पुरुषाः अष्टौ गुणान् सम्पादयेयुरेव। ते च यथा –

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च श्रुतं दमश्च।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥**

अष्टसु गुणेषु प्रज्ञा आद्या वर्तते। प्रज्ञावान् अथवा प्राज्ञः एव लोकव्यवहारं लोकवैचित्र्यं सम्यक् वेत्तुमर्हति। अतः विद्यार्थिनः प्राज्ञाः भवेयुरेव। अन्यथा लोकपर्यायवृत्तान्तं ते विज्ञातुं नैव शक्नुवन्ति। यथोक्तम्–

**न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये।**
**लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः॥ ३४/५०४१**

**"अविद्यः पुरुषः शोच्यः"** इति वदन् विद्यायै सर्वोत्कृष्टं स्थानं कल्पयति विदुरः। एवं विदुरनीतौ विद्यायाः अथवा शिक्षायाः शिक्षकस्य शिक्षार्थिनश्च स्वरूपं साद्यन्तं द्रष्टुं शक्नुमः इति शिवम्।

***********

## शृङ्गारकरुणरसौ

✍ **डा. वेङ्कटरमणभट्टः**
सहायकप्राध्यापकः, शिक्षाविभागः

विदन्त्येव समेऽपि लोकाः प्रयोजनमन्तरा न कश्चिदपि प्रवर्तते इति। तथा चोक्तम् – "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति। प्रयोजनशून्यत्वे काव्यरचनायां काव्यपठने वा लोकानां प्रवृत्तिः कथं स्यात् ? अत एव काव्यप्रकाशकारेण मम्मटेन स्वकीयग्रन्थस्यारम्भे एव नैकानि काव्यप्रयोजनानि प्रादर्शिषत।

तद्यथा –

"काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे"॥ (काव्यप्रकाशः -२)

काव्यनिर्माणेन केचन कीर्तिं प्रापुः। सम्पत्तिञ्च प्राप्नुवन् केचित्। व्यवहारकौशलम् अवाप्नुवन्। पापनष्टेन केचन उत्कृष्टानन्दञ्चाप्नुवन्। कतिपये कवयः उत्तमोत्तमकाव्यसंरचनया स्वजीवने साफल्यम् अन्वभूवन्। अन्ये केचित् तादृंशि काव्यानि पाठं पाठं स्वजीवनसार्थक्यम्


ISSN: 2320-740X

अन्वभवन् । काव्याध्ययनं शास्त्रध्ययनञ्चास्माकं प्राचीनभारतीयानामनिवार्यमङ्गम् । अस्मत्पूर्वजाः काव्यशास्त्रयोरनयोः अध्ययनाध्यापनाभ्यां कालं यापयन्ति स्म ।

तथा चोक्तम्

"काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्" इति ।

किं काव्यम् ? किञ्च लक्षणं तस्य ? यदध्ययनेन अध्यापनेन च धीमन्तः कालयापनं कुर्वन्ति । इत्युक्ते अत्र इदं वदनीयम् । विषयेऽस्मिन् विदुषां विप्रतिपत्तिः यद्यपि वरीवर्ति । तथापि रसप्रतिपादकं रसात्मकं वा काव्यं भवेदिति आलङ्कारिकाणां सर्वेषां समानाभिप्रायः वरीवर्ति । सरस्वतीकण्ठाभरणे भोजदेवेन इत्थमभिहितम् –

" निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति ॥" इति (भोजदेवस्य सरस्वतीकण्ठाभरणम्)

वाग्भटालङ्कारकर्ता वाग्भटोप्यवोचत् –

"साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥" इति (वाग्भटालङ्कारः – वाग्भटः)

एवं चन्द्रालोककारेण जयदेवेनापि न्यगादि –

"निर्दोषा लक्षणवती सरीतिर्गुणभूषाणा
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ॥" (चन्द्रालोकः -जयदेवः)

शौद्धोदनिरप्योवोचत् –

"काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत् " इति (शौद्धोदनिः ) ।

तथा साहित्यदर्पकारः विश्वनाथोप्यवादीत् –

"वाक्यं रसात्मकं काव्यम्" इति (साहित्यदर्पणः विश्वनाथः)

एवम् अलङ्कारशेखरकार्ता केशवमिश्रोऽपि ब्रूते –

"रसालङ्कारयुक्तं सुखविशेषसाधनं काव्यम्" इति ।(अलङ्कारशेखरः, केशवमिश्रः)

तर्हि कोऽयं रसो नाम ?

रस्यते आस्वाद्यते इति व्युत्पत्त्या रसिकैः आस्वाद्यमानो भवति रसः । स अष्टविधः । तथा प्रोक्तं भरतनाट्यशास्त्रे –

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥" इति (नाट्यशास्त्रम् – भरतमुनिः -६.१५)

केचित् शान्तरसमपि परिगणनां कृत्वा नवरसान् अभ्युपगच्छन्ति । तथा चोक्तं साहित्यदर्पणकारेण विश्वनाथेन –

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसा शान्तस्तथामताः ॥"(साहित्यदर्पणे ३ परिच्छेदे-श्लोकः १८२)

अष्टानां रसानाम् अष्टौ स्थायिभावाः न्यरूपिषत नाट्यशास्त्रे –

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥" इति(नाट्यशास्त्रे-६.१५)

**रसनिष्पत्तिक्रमः** - "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति नाट्यशास्त्रे भरतमुनिना प्रोक्तः । यथा - शर्करैलादीनां संयोगेन जले पानकाख्यरसनिष्पत्तिः तथैव विभावानुभाव-सञ्चारिभावैर्मिलितः स्थायी भावः रसतां प्राप्नोति ।

तथोक्तं विश्वनाथेन साहित्यदर्पणे –

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम् ॥ (साहित्यदर्पणे- तृतीयपरिच्छेदे श्लोकः ६)

विभावानुभावव्यभिचारिभावैः व्यक्तः (व्यञ्जनावृत्त्या प्रतिपादितः) (सहृदयेषु स्थितः) रत्यादिस्थायिभावः रसत्वमाप्नोति ।

**शृङ्गाररसः** - रसेषु शृङ्गारः श्रेष्ठः । अयं रसराजः इति प्रसिद्धः । शृङ्गाररस्य प्राधान्यं सर्वैरप्यङ्गीकृतम् । "एक एव रसोऽह्यङ्गी शृङ्गारो वीर एव वा" इति नियममनुसृत्य बहुभिः कविभिः शृङ्गाररसप्रधानानि नैकानि काव्यानि व्यरचिषत । "ऋ गतौ" इति धातोः "कर्मण्यण्" (पा.सू.३.२.१) इति सूत्रेण अण् प्रत्ययः । शृङ्ग इति उपपदमत्र । इत्थं शृङ्गार इति पदं निष्पद्यते । रसेषु प्रधानविषयीभूतः शृङ्गारः इत्यस्यार्थः । साहित्यदर्पणे कविना विश्वनाथेन शृङ्गारशब्दस्योत्पत्तिः अन्यया रीत्या प्रदर्शितः ।

शृङ्गं हि मन्मथोद्रेकः तदागमनहेतुकः ।
उत्तमप्रक्रतिप्रायो रसः शृङ्गार इष्यते ॥इति॥

(साहित्यदर्पणे तृतीयपरिच्छेदे श्लोकः -१८३, मदनप्राप्तिकारणभूतः शृङ्गार इति तात्पर्यम् ।)

**रसनिष्पत्तिः** – "विभावानुभावव्यभिचारिसंयोगात्" इत्युक्तम् । शृङ्गाररसजनने विभावादयः के इत्याकाङ्क्षायाम् – नायकनयिकाद्याः आलम्बनविभावः, निशाकरचन्दनद्विरेफझंकारादयः उद्धीपन-विभावः, कटाक्षभ्रूविक्षेपादयः अनुभावः, निर्वेदादयः व्यभिचारिभावः, रतिः स्थायिभाव इति विज्ञेयम् । रसोऽयं हरिदेवताकः श्यामवर्ण इति विद्वांसः ब्रुवन्ति ।


ISSN: 2320-740X

तदिदं कृत्स्नमुक्तं साहित्यदर्पणे विश्वनाथेन

परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम्।

आलम्बनं नायिकाः स्युः दक्षिणाद्याश्च नायकाः॥

चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।

भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः॥

त्यक्तौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः।

स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥ इति (साहित्यदर्पणे तृतीयपरिच्छेदे श्लोक-१८५)

सः शृङ्गारः द्विविधः विप्रलम्भसम्भोगाभ्याम्। तथैवोक्तं साहित्यदर्पणे विप्रलम्भोऽथ सम्भोग इत्येव द्विविधो मतः।

**विप्रलम्भशृङ्गारो** यथा - साहित्यदर्पणे तृतीय परिच्छेदे श्लो .१२७ इति।

**सम्भोगशृङ्गारो** यथा-

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।

यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः॥ (सा.द.तृ.प.श्लो .२१०)

चुम्बनालिङ्गनादिषु नैकप्रकारसद्भावात् परिगणनं कर्तुं न शक्यते इति कारणतः सम्भोगशृङ्गाररसः विद्वद्भिः एक एव अभिहितः । तथा चोक्तम् - सङ्ख्यातुमशक्ततया चुम्बन-परिरम्भणादिबहुभेदात्।

अयमेक एव धीरैः कथितः सम्भोगशृङ्गारः॥२॥ इति (अदिशब्देन अन्योन्याधरचुम्बनादयः गृह्यन्ते)

सम्भोगशृङ्गारे तावत् वसन्तदिऋतुषट्कस्य, चन्द्रादित्ययोः, तयोरुदयास्तमानयोः, जलक्रीडोपवनक्रीडयोः, प्रभातस्य, मदिरापानस्य, निशादीनाञ्च वर्णनं करणीयम् । तथा चोक्तम् -

तत्र स्यात् ऋतुषट्कं चन्द्रादित्यौ तथोदयास्तमयः।

जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः॥२१२॥

न केवलमेतत् चन्दनायनुलेपनभूषणपरिधानयादिकञ्च वक्तव्यम्। शुभ्रं वस्त्राद्यन्यत् पवित्रं यद्यदस्ति तत्सर्वं वर्णनीयम्। तथा चोक्तम् -

अनुलेपनभूषाद्याः वाच्यं शुचि मेद्यमन्यञ्च।

तथा भरतः -

यत्किञ्चिल्लोके शुचि मेध्यमुज्वलं तत्सर्वं शृङ्गारेणोपमीयते। (सा.द.तृ.प.श्लो.२१२-पृ.२५२)

**शृङ्गाररसे आलम्बनोद्दीपनविभावयोः निरूपणम्**

रामादिनायाकान्तर्गतानाम् इत्यादि स्थायिभावानाम् उद्बोधहेतवः सीतादय एव काव्ये प्रवेशिताः सन्तः "विभाव्यन्ते आस्वादाङ्कु राविर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावाः एभिः" इति विभावा उच्यन्ते । स च द्विविधः आलम्बनविभावः उद्दीपनविभावश्चेति । तथा चोक्तम् –

रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।
आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ । इति

आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात् ॥ (सा.द. तृ.प. श्लो. १३१)

(नायकादेः चोष्टाद्याः रूपभाषणादयः स्थानसमयादयः चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादयः)

**अनुभावाः**(सात्विकाः)

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपयुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाःस्मृताः ॥ ( सा. द.तृ.प.श्लो १६५-पृ.सं.१९२)

**सञ्चारिभावाः**

निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदः श्रमः ।
आलस्यं चैव दैन्यं च चिन्तामोहः स्मृतिर्धृतिः ॥
क्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥
सुप्तं विबोधोऽमर्षश्चाप्यवहित्थामथोग्रता ।
मतिर्व्याधिस्ताथोन्मादस्तथा मरणमेव च।
त्रासश्चैच वितर्कश्च विज्ञेया व्यभिचारिणः ।
एते आहत्य त्रयस्त्रिंशत् व्यभिचारिभावा इत्युच्यन्ते ॥ (ना.शास्त्र.६.१८.२९)
(निर्वेदादयः व्यभिचारिभावाः। आदिशब्देन सङ्केतादिः)

**करुणरसः** - इष्टनाशात् अनभीष्टविषयप्राप्तेः करुणरसो भवति । रसोऽयं पारावतवर्णयमदेवताक इति कथयन्ति विद्वांसः । अत्र के विभावादयः ? इति जिज्ञासायाम् अत्र शोकः स्थायिभावः, शोकविषयीभूतं (रामादिकं) आलम्बनविभावः, शोचनीयस्य दाहादिकाऽवस्था उद्दीपनविभावः, दैवनिन्दनभूपतनरोदन प्रभृतयः तथा विवर्णत्वोच्छ्वासस्तम्भप्रलपनप्रभृतयः अनुभावः, निर्वेदः (वैराग्यम्) मूर्छापस्मार-ग्लानि-स्मृतिपरिश्रमा विषादजडत्वचित्तविभ्रमाचिन्ताप्रभृतयः व्यभिचारि-भावाः भवन्ति । तथा चोक्तम्

इष्टनाशादनिष्टप्राप्तेः करुणाख्यो रसो भवेत् ।


ISSN: 2320-740X

धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥२२२॥

शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।

तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥१२३॥

अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।

वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि च ॥२२४॥

निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।

विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ (सा.द.तृ.य २२५)

शोच्यं विनष्टबन्धुप्रभृति । विषयेऽस्मिन् राघवविलासस्योदाहरणमेकं स्थालीपुलाकन्यायेन साहित्यदर्पणकारेण प्रदर्शितम् ।

"विपिने क्व जटनिबन्धनं ? तवचेदं क्व मनोहरं वपुः ?

अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्तनम् ॥" इति

अत्र वनगमनोन्मुखं श्रीरामं दृष्ट्वा दशरथः ब्रवीति कानने जटाधारणं क्व ? दृश्यमानमिदं तव सुन्दरं शरीरं क्व ? एकं कठिणं अपरञ्च मृदुलम् । तस्मात् तयोरस्ति महदन्तरम् । अनयोरुभयोर्जटानिबन्धनमनोहरवपुषोरेकत्र (रामे त्वयि) सङ्घटनं विधिना कृतमिति । अत्र रामः आलम्बनविभावः तस्य वनगमनोद्यमः उद्दीपनविभावः, स्थायी भावः शोकः, दैवनिन्दा अनुभावः, ग्लान्याद्याः व्यभिचारिभावाः इति ज्ञेयम् ।

**********

## अतिदेशः

✍ डा. एस्. वेङ्कटेशताताचार्यः

सहायकाचार्यः, मीमांसाविभागः

वेद इति शब्दराशिः अस्मभ्यं स्वर्गाद्यभ्युदयस्य निःश्रेयसस्य च साधनानि उपदिशति । तत्र स्वर्गादिफलमुद्दिश्य यागादिधर्माः विहिताः । तेषु केचन यागाः सर्वाङ्गोपेताः उपदिष्टाः । यथा दर्शपूर्णमासादयः । तेषां यागानां "कथमयं यागः कर्तव्यः" इति "कथमनेन यागेन स्वर्गः कर्तव्य" इति वा कथं भावाकाङ्क्षा उपदिष्टैरेव अङ्गैः शाम्यति । केचन यागाः न सर्वाङ्गोपेततया पठिताः । यथा "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम" इत्यादिवाक्यविहिताः सौर्यादियागाः । पूर्ववत् तेषां कथं भावाकाङ्क्षायां येन

ISSN: 2320-740X

प्रमाणेन अङ्गानां विधानं क्रियते तदेव अतिदेशः । तच्च "दर्शपूर्णमासवत् सौर्ययागं कुर्यादि"ति कल्पितवाक्यादिरूपं भवति ।

**अतिदेशलक्षणम्**

यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेन अवधारितः तस्यैव पदार्थस्य तेनैव उपकारेण तदन्याङ्गताबोधकं प्रमाणमिति । यथा "दर्शपूर्णमासवत् सौर्ययागं कुर्यात्" इति कल्पितं वचनम् । अनेन हि दर्शपूर्णमासाङ्गानि प्रयाजादीनि सौर्ययागेऽपि कर्तव्यानीति बोध्यत इत्यतः अस्य "प्रयाजादिपदार्थाः यादृशाङ्गापूर्वरूपोपकारद्वारा दर्शपूर्णमासाङ्गत्वेन अवधारिताः तेषामेव प्रयाजादिपदार्थानां तेनैवाङ्गापूर्वरूपोपकारद्वारेण दर्शपूर्णमासभिन्नसौर्याङ्गत्वबोधकत्वात् भवत्यस्य अतिदेशत्वम् ।

अत्र तेनैवोपकारेण इत्यस्याभावे चयने "अलूखलं सर्वौषधस्य पूरयित्वा अवहन्ति" इति वाक्यस्य अतिदेशत्वापत्तिः । तेन "व्रीहीनवहन्ती"ति वचनेन व्रीह्यङ्गत्वेन अवधारितस्य अवहननस्य तद्भिन्नसर्वौषधाङ्गत्वबोधनात् । तेनैवोपकारेणेत्युक्तौ तु येन तुषविमोकरूपोपकारेण अवहननस्य व्रीह्यर्थत्वं न तेनोपकारेण सर्वौषधार्थत्वं बोध्यते, किन्तु अतस्तद्द्वारेण नातिव्याप्तिः ।

अतिदेशः प्रथमतो द्वेधा विभज्यते – नामातिदेशः, वचनातिदेशश्चेति । कुण्डपायिनामयने "मासमग्निहोत्रं जुहोति" इति वाक्ये श्रुतमग्निहोत्रपदं नामातिदेशस्योदाहरणम् । तस्य हि मासाग्निहोत्रे प्रयोगान्यथानुपपत्त्या नित्याग्निहोत्रधर्माणां मासाग्निहोत्राङ्गत्वं ज्ञायत इत्यतः भवति नाम्नोऽतिदेशत्वम्। तथा हि – अग्निहोत्रपदं नित्याग्निहोत्रे च प्रयुज्यमानं नोभयत्र शक्तम् । अनेकशक्तिकल्पनापत्तेः । किन्तु "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहे"ति मन्त्रवर्णेन नित्याग्निहोत्रे अग्निदेवतायाः प्राप्तत्वेन प्रतिप्रख्यन्यायेन नित्याग्निहोत्रे एव शक्तम् । मासाग्निहोत्रे च गौण्या प्रयुज्यत इति वक्तव्यम् । सा च मासाग्निहोत्रस्य नित्याग्निहोत्रगतधर्मवत्त्वं विना नोपपद्यत इति अग्निहोत्रशब्दस्य मासाग्निहोत्रे प्रयोगान्यथानुपपत्त्या नित्याग्निहोत्रधर्माणां मासाग्निहोत्राङ्गत्वं ज्ञायत इति ।

वचनातिदेशः प्रथमतो द्विविधः – प्रत्यक्षवचनातिदेशः कल्पितवचनातिदेशश्चेति । श्येनवैशेषिकधर्माणामिषुयागाङ्गत्वबोधकम् इषुप्रकरणपठितं "समानमितरत् श्येनेने"ति वचनं प्रत्यक्षवचनातिदेशः । कल्पितवचनातिदेशः त्रिविधः – सादृश्यकल्पितवचनातिदेशः, स्थानापत्ति-कल्पितवचनातिदेशः, आश्रयतो धर्मातिदेशश्चेति । अत्र त्रैविध्ये बीजमिदम् – विकृतिषु (अनुपदिष्टाङ्गकयागादिषु) अङ्गाकाङ्क्षायां यः उपदिष्टाङ्गकपदार्थः (यागादिः) उपस्थितो भवति ततः अङ्गानामतिदेशः कल्पनीयः । उपदिष्टाङ्गकपदार्थस्य उपस्थितिश्च सादृश्यात्, स्थानापत्त्या आश्रयत्वेन च सम्भवतीति कल्पितवचनातिदेशस्य त्रैविध्यम् ।


ISSN: 2320-740X

सौर्ययागस्य औषधद्रव्यकत्वात् एकदेवताकत्वाच्च सादृश्येन तादृशस्य दर्शपूर्णमासान्तर्गतस्य आग्नेययागस्य उपस्थित्या आग्नेययागाङ्गानामतिदेशः कल्प्यते।

"यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत्, न्यग्रोधस्तिभिनीराहृत्य तास्संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोममि"ति यजमानचमसस्थाने राजन्यवैश्ययोः विहितस्य फलचमसस्य धर्माकाङ्क्षायां तस्य यजमानसोमचमसस्थानापन्नत्वेन तद्धर्माः अभिषवादय अतिदिश्यन्ते – "सोमचमसवत् (अभिषवादिद्वारा) फलचमसः कार्य" इति । अयं स्थानापत्तिकल्पितवचनातिदेशः। तदिदं तृतीयाध्यायषष्ठपादे निरूपितम्।

उक्थ्यादिकाम्यसंस्थाः पश्वादिफलोद्देशेन विहिताः – "पशुकाम उक्थ्यं गृह्णीयादि"त्यादि-विधिभिः। तासां च प्रकरणप्राप्तो ज्योतिष्टोम आश्रयत्वेन संबध्यते। फलोद्देशेन विहितानामेतासां संस्थानामङ्गाकाङ्क्षायां ज्योतिष्टोमस्य आश्रयत्वेन उपस्थितत्वात् तदीयधर्माः दीक्षणीयादयः अतिदिश्यन्ते। परन्तु ते धर्माः आश्रयीभूतज्योतिष्टोमार्थं काम्यसंस्थार्थं च न पृथक् क्रियन्ते किन्तु तन्त्रेण उभयोद्देशेन सकृदेवानुष्ठीयन्त इति विशेषः । इदमपि तृतीयषष्ठे एव अन्तिमाधिकरणे निरूपितमिति निरूपिताः सोदाहरणमतिदेशप्रकाराः।

**********

## रूपस्वरूपविमर्शः

✍ श्रीमान् श्यामसुन्दरः ए.

संविदध्यापकः, नव्यन्यायविभागः

न्याय-वैशेषिकदर्शनयोः गुणपदार्थतयाभ्युपगतं रूपं शुक्लादिभेदेन सप्तविधम् । तत्र पृथिव्यामाश्रयभेदेन सप्तविधं, जले अभास्वरशुक्लमात्रं तेजसि भास्वरशुक्लमात्रं च रूपं समवेतम्। पृथिव्यां परमाणावपि पाकेन[1] पूर्वरूपनाशरूपान्तरोत्पत्योः सम्भवात् , तत्र आपरमाण्वन्त्यावयवि पर्यन्तं समवेतं तदनित्यमेव । पाकजं कारणगुणपूर्वकं चेति द्विविधमपि रूपं पृथिव्यां वर्तते । परमाणोर्नित्यत्वेन तत्कारणाभावात् तत्समवेतं, रूपं, पाकजमेव। अनित्यपृथिव्यां क्वचित् पक्के घटादौ पाकजं, अपक्के पटादौ कारणगुणपूर्वकं च रूपमवतिष्ठते। जलतेजसोस्तु परमाणुसमवेतं रूपं नित्यं, तद्भिन्नसमवेतं चानित्यं, कारणरूपोत्पन्नम्।

[1] पाकः – पूर्वरूपादिपरावर्तको रूपान्तराद्युत्पादको विलक्षणतेजःसंयोगः।

काणादनये पार्थिवपरमाणुष्वेव पाकोऽङ्गीक्रियते न तु द्व्याणुकत्र्यणुकाद्यनित्यपृथिव्यामपि। तैः अवयविनावष्टब्धेषु अवयवेषु पाकानङ्गीकारात्। अत एवोक्तम् – **“तत्रापि परमाणौ स्यात् पाको वैशेषिके नये इति”**[1] । अतस्तन्मते जन्यपृथिव्यां द्व्यणुक-त्र्यणुकादौ सर्वत्र कारणगुणपूर्वकमेव रूपमभ्युपगम्यते। नैयायिकाः परम् अवयविनां सच्छिद्रत्वात् तदन्तःप्रविष्टैः वह्नेः सूक्ष्मावयवैः, अवयविनावष्टब्धेष्वपि अवयवेषु पाको जायत इत्यामनन्ति। तदुक्तम् – **“नैयायिकानां तु नये द्व्याणुकादावपीष्यते”**[2] इति (कारिका-१०६) ।

**रूपत्वजातिसिद्धिः–**

तादृशशुक्लनीलादिषु सप्तस्वपि रूपेषु ’इदं शुक्लरूपम्’ ’इदं नीलरूपम्’ इत्यादि रूपशब्दोल्लोखिन्या अनुगतप्रतीत्या, ’अयं शुक्लवर्णः’ ’अयं नीलवर्णः’ इत्यादि वर्णशब्दोल्लोखानुगतप्रतीत्या वा, द्रव्यादिविषयकलौकिकचाक्षुषप्रत्यक्षकारणतावच्छेदकतया वा वर्णत्वापरपर्याया रूपत्वजातिः सिध्यति । एवं शुक्लत्व-नीलत्वादिरपि प्रत्यक्षसिद्धो जातिविशेषः।

**रूपलक्षणं तद्दलसार्थक्यं च** –

अत्र च रूपस्य लक्षणस्वरूपादिजिज्ञासायामुक्तम् - “चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधं । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधं, अभास्वरशुक्लं जले, भास्वरशुक्लं तेजसि”[3] इति । चक्षुर्मात्रग्राह्यत्वे सति गुणत्वम् इति रूपस्य लक्षणम् । शुक्लादिसप्तरूपेषु चक्षुर्मात्रग्राह्यत्वगुणत्वयोः सत्वाल्लक्षणसमन्वयः। तत्र **“येनेन्द्रियेण या व्यक्तिर्गृह्यते तन्निष्ठा जातिस्तदभावस्तत्संसर्गश्च तेनैवेन्द्रियेण गृह्यते”** इति न्यायेन रूपे इव रूपत्व-रूपाभाव-रूपसम्बन्धेष्वपि चक्षुर्मात्रग्राह्यत्वसत्वात् तत्रातिव्याप्तिवारणाय गुणत्वमिति विशेष्यदलम् । रसादिगुणेष्वतिव्याप्तिवारणाय चक्षुर्मात्रेत्यादिविशेषणदलम् । तत्र मात्रपदानुपादाने संख्यादिसामान्यगुणेष्वतिव्याप्तिः, चक्षुर्ग्राह्यत्वगुणत्वयोस्तत्रापि सत्वात्, अतस्तदुपादानम्। चक्षुर्मात्रग्राह्यत्वं च चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वरूपम्। अत्र विशेष्यदलम् अतीन्द्रियधर्माधर्मादावतिव्याप्तिवारकतया, विशेषणदलं सङ्ख्यादिसामान्यगुणेषु अतिव्याप्तिवारकतया च सार्थकम् ।

---

[1] भा.प.गु.खं – १०५ कारिका ।

[2] भा.प.गु.खं – १०६ कारिका ।

[3] तर्कसङ्ग्रहः

**लक्षणविमर्शः** – यद्यपि मनसो ज्ञानसामान्यं प्रत्येव कारणत्वात्, चक्षुर्भिन्नमनोग्राह्यत्वस्यैव सर्वत्र शुक्लादिषु सत्वेन तदग्राह्यत्वं तत्राप्रसिद्धम् इत्यसम्भवो लक्षणस्य । तथाप्यत्र चक्षुर्भिन्नपदस्य त्वगिन्द्रियपरत्वेन त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वमिति पर्यवसितविशेषणदलस्य शुक्लादिरूपे सत्वान्नासम्भवः। तथा च "त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वम्" इति लक्षणं पर्यवसितम् । प्रभाभित्तिसंयोगे त्वगिन्द्रियाग्राह्यत्व-चक्षुर्ग्राह्यत्व-गुणत्वानां सत्वेऽपि, लक्षणघटकगुणत्वदलस्य विशेषगुणत्वपरत्वेन, सामान्यगुणे तत्र नातिव्याप्तिः।

विशेषगुणाश्च – **बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ।**
**अदृष्टभावनाशब्दाः अमी वैशेषिका गुणाः॥**[1] **इति ॥**

सामान्यगुणाश्चोक्ताः – **संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ।**
**गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ॥**[2] इति ॥

नन्वेवं सत्यवश्यनिवेशनीयविशेषगुणत्वदलस्य संख्यादिसामान्यगुणेष्वभावादेव अतिव्याप्त्यप्रसक्तेः लक्षणे त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वार्थकं मात्रपदं व्यर्थमिति तु नाशङ्कनीयम् । तस्य जले "इदं सांसिद्धिकद्रवत्ववत्" इत्यादिप्रत्यक्षविषयसांसिद्धिकद्रवत्वे चक्षुर्ग्राह्यत्वगुणत्ववति अतिप्रसङ्गवारकतया सार्थक्यात् ।

अत्रेयमाशंका – नन्वेवमपि अनुद्भूतत्वादतीन्द्रिये परमाण्वादिरूपे चक्षुर्ग्राह्यत्वाभावादव्याप्तिवारणाय जातिघटितलक्षणमवश्यं वक्तव्यमेव, यथा - **"त्वगिन्द्रियजन्य-प्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयीभूता या जातिः तद्वत्वे सति गुणत्वम्"** इति । घटादिरूपान्तर्भाविण चक्षुर्मात्रग्राह्यरूपत्वजातिमादाय सर्वत्ररूपे समन्वयसम्भवान्नाव्याप्तिः परमाणुरूपे । परन्तु एवं सति लक्षणे गुणत्वदलस्य वैयर्थ्यप्रसङ्गः। प्रभाभित्तिसंयोगत्वस्य जातित्वाभावेन, केवलसंयोगत्वस्य जातित्वेऽपि तस्य त्वगिन्द्रियाग्राह्यत्वाभावेन च तादृश-जातिपदेनोपादातुमशक्यतया तदुभयविधधर्ममादायापि प्रभाभित्तिसंयोगेऽतिव्याप्त्यप्रसक्त्या गुणत्वदलस्य विशेषगुणत्वपरत्वं नावश्यकम् । एवं रूपत्व-रूपाभावादावपि तादृश-जातिमत्वाभावादेवातिव्याप्त्यप्रसक्तेश्च, तत्राप्यतिव्याप्तिवारकतया सार्थक्यासम्भवादिति चेन्न

लक्षणे गुणत्वदलानुपादाने प्रभा-सुवर्णादावतिव्याप्तेः । प्रभात्व-सुवर्णत्वादिप्रत्यक्षस्य चक्षुर्मात्रजन्यत्वेन, चक्षुर्मात्रग्राह्यजातिमत्वस्य तत्र सत्वात् । तदुपादाने तु प्रभासुवर्णादीनां द्रव्यत्वेन गुणत्वाभावान्नातिव्याप्तिरिति आवश्यकमेव गुणत्वदलं लक्षणे ।

---

[1] भा.प.गु.खं – ९०-९१ कारिका ।
[2] भा.प.गु.खं – ९१-९२ कारिका ।

**लक्षणप्रयोजनम्** – लक्षणस्य तावल्लक्ष्ये स्वेतरभेदसाधनं प्रयोजनम् । तदुक्तं – "समानासमानजातीयव्यवच्छेदो लक्षणार्थः"[1] इति । तद्यथा – च "रूपं स्वेतरभिन्नं चक्षुर्मात्रग्राह्यत्वे सति गुणत्वात् यन्नैवं ( यन्न स्वेतरभिन्नं ) तन्नैवं (तन्न चक्षुर्मात्रग्राह्यत्वे सति गुणत्ववत्) यथा ससादि" इति स्वेतरभेदसाधकमनुमानम् । अथवा व्यवहारसिद्धिर्लक्षणप्रयोजनम् । तदुक्तमभियुक्तैः "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्" इति । व्यवहारसाधकमनुमानञ्च "रूपं रूपमितिव्यवहर्तव्यं चक्षुर्मात्रग्राह्यत्वे सति गुणत्वात् यन्नैवं तन्नैवं यथा रसादि" इति ।

**चाक्षुषे रूपस्य सहकारित्वम् –** उद्भूतरूपं तद्वद्द्रव्यं तत्समवेतान्येव योग्यगुणकर्मसामान्यानि च चक्षुषा प्रत्यक्षीक्रियन्ते । नत्वनुद्भूतरूपं तद्वद्द्रव्यं तत्समवेतगुणादयः पुनः इति सर्वानुभवसिद्धमिदम् । अत एवोक्तं भाषापरिच्छेदे –

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ।
क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम् ।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः ॥[2] इति ।

अन्वयव्यतिरेकसहचाराभ्यां च चाक्षुषलौकिकप्रत्यक्षोद्भूतरूपयोः कार्यकारणभावो निश्चीयते । पृथिव्यादित्रितयपरमाणुद्व्यणुकेषु समवेतमनुद्भूतरूपम् । त्र्यणुकमारभ्यान्त्यावयविपर्यन्तसमवेतम् उद्भूतरूपम् । उद्भूतत्वं च प्रत्यक्षत्वप्रयोजको धर्मः । तादृशप्रत्यक्षे चोद्भूतरूपस्य साक्षात् परम्परया वा सहकारिकारणत्वम् । तदुक्तम् –

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा ॥[3] इति । भा.षा.१००

विषयतासम्बन्धेन द्रव्यविषयकचाक्षुषलौकिकप्रत्यक्षं प्रति उद्भूतरूपं समवायसम्बन्धेन कारणम् । विषयतया द्रव्यसमवेतगुणकर्मसामान्यविषयकचाक्षुषलौकिकप्रत्यक्षे स्वाश्रयसमवेतसम्बन्धेन कारणम् । एवं विषयतया द्रव्यसमवेतसमवेतगुणत्वनीलत्व-कर्मत्वोत्क्षेपणत्वादि-विषयकचाक्षुषलौकिकप्रत्यक्षे तस्य स्वाश्रयसमवेतसमवेतत्वसम्बन्धेन कारणत्वम् इति कार्यकारणभावः ।

---

[1] न्यायवार्तिके

[2] भा.प.प्र.खं – ५४,५५ कारिका ।

[3] भा.प.गु.खं – १०० कारिका ।


ISSN: 2320-740X

**चित्ररूपविषये प्राचीनमतम् –** प्राचीनास्तावत् शुक्लादिषड्रूपातिरिक्ततया चित्ररूपमङ्गीकुर्वन्ति । तेषामयमभिप्रायः – नीलपीतादिनानाजातीयरूपवत्कपाल द्वयाद्यवयवारब्धे घटाद्यवयविनि समवायेन रूपोत्पत्यनङ्गीकारे तस्यावयविनः अचाक्षुषत्वप्रसङ्गः, द्रव्यचाक्षुषप्रत्यक्षे उद्भूतरूपस्य समवायेन हेतुत्वात् । अतः किञ्चिद्रूपं तत्राङ्गीकार्यम् । परन्तु तत्र समवायेन नीलरूपोत्पत्तौ स्वसमवायिसमवेतत्वसम्बन्धेन नीलेतररूपत्वेन पीतस्य, पीतोत्पत्तौ पीतेतररूपत्वेन च नीलस्य प्रतिबन्धकत्वात् तत्र व्याप्यवृत्तिनीलपीतादिकमुत्पत्तुं नार्हति । एतादृश-प्रतिबध्यप्रतिबन्धकभावानङ्गीकारे नीलादिकपालावच्छेदेनापि घटे पीताद्युत्पत्यापत्तेः । तत्राव्याप्यवृत्तिनीलादिरूपाणामुत्पादो भवतीत्यपि न युक्तम् । यतो हि व्याप्यवृत्तिजातीयगुणानाम् अव्याप्यवृत्तित्वे विरोधात्, सविषयकावृत्तिव्याप्यवृत्ति-वृत्तिजात्यवच्छिन्नगुणानाम् अव्याप्यवृत्तित्वासम्भवादित्यर्थः । अतो व्याप्यवृत्तिरूपनिष्ठरूपत्व-जात्यवच्छिन्नानां शुक्लनीलादिरूपाणाम् अव्याप्यवृत्तित्वं न सम्भवति । अत्र जातौ सविषयकावृत्तित्वं विशेषणात् व्याप्यवृत्तीश्वरीयज्ञाननिष्ठज्ञानत्वजातिमतोऽस्मदादिज्ञानस्य अव्याप्यवृत्तित्वेऽपि न क्षतिः । अतो अवयवगतनानाजातीयरूपैरवयविनि अतिरिक्तं विजातीयं चित्ररूपमुत्पद्यते इति चित्ररूपसिद्धिः ।

शुक्लनीलादिनानारूपाणां समुदाय एव चित्ररूपं न त्वतिरिक्तम् इत्युक्तौ एकचित्ररूपोत्पत्तिस्थले नानारूपाणामुत्पत्तिः, एकचित्ररूपध्वंसप्रागभावस्थले नानारूपाणां ध्वंस-प्रागभावाः, एकचित्ररूपविषयकप्रतीतौ नानारूपाणां विषयत्वं च कल्पनीयमिति गौरवम् , अतो लाघवात् अतिरिक्तचित्ररूपकल्पनमिति ।

**रूपविचारेऽर्वाचीनमतम् –** शुक्लत्वादिनानाजातीयं रूपमव्याप्यवृत्त्येव न तु व्याप्यवृत्ति । तत्तदवयवावच्छेदेन वर्तमानं (अव्याप्यवृत्ति) नीलपीतादिरूपमेव तत्र नानारूपवदवयवारब्धेऽवयविनि अङ्गीक्रियते । **'सविषयावृत्तिव्याप्यवृत्तिवृत्तिजातेः अव्याप्यवृत्तिवृत्तित्वे विरोधः'** इति पूर्वोक्तनियमो निष्प्रामाणिक एव । समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलेतररूपत्वेन प्रतिबन्धकत्वकल्पनं च गौरवावहम् । पीतादेश्च नीलाद्यप्रतिबन्धकत्वादेव वृषस्य तत्तदवयवावच्छेदेन नानाजातीयरूपवत्वबोधकशास्त्रमप्युपपद्यते । यथा –

**लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।**
**श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥** इति ।

एवं पक्वे च घटादौ उपरि रक्तरूपं, भग्ने च तस्मिन् अन्तः नीलरूपमपि उपलभ्यते इति एकस्मिन्नधिकरणे एककालावच्छेदेन विरुद्धयोः रक्तनीलयोः अवच्छेदक-

भेदमन्तरेणानुपलभ्यमानतया अवच्छेदककल्पनस्यावश्यकतया, किञ्चिदवच्छिन्न-वृत्तिकत्वरूपमव्याप्यवृत्तित्वं सिद्ध्यत्येव।

**नव्यमतरीत्या चित्रस्यातिरिक्तत्वनिरासः** – चित्रमपि अव्याप्यवृत्तिशुक्लादिसमुदायापेक्षया नातिरिक्तं रूपम् । "इदं चित्ररूपं" इत्यादिप्रतीतेर्निर्वाहाय तस्यातिरिक्तत्वमङ्गीकार्यम् इति चेन्न समानाधिकरणानाम् अव्याप्यवृत्तिनीलपीतादीनां समुदायादेव प्रतीतेः निर्वाहसम्भवात् । तस्यां च प्रतीतौ तादृशसमुदायस्यैव विषयत्वात् । यच्च चित्रविषयकप्रतीतौ शुक्लादिनानारूपाणां विषयत्वकल्पने गौरवं, लाघवात् एकचित्राङ्गीकार एवोचितः इति तदपि न, नीलादिरूपाणां स्वसजातीयरूपजनकत्वनियमेन विजातीयचित्ररूपजनकत्वासम्भवात् । एवञ्च अव्याप्यवृत्ति-नानाजातीयनीलादिसमुदायापेक्षया अतिरिक्तविजातीयचित्ररूपाङ्गीकारे तादृश नियमभङ्गात् नानाजातीयरूपवदवयवारब्धे अवयविनि तादृशसमुदायः एवाङ्गीक्रियते न त्वतिरिक्तं चित्ररूपम्।

**********

## न्यायकुसुमाञ्जलौ अन्विताभिधानवादः

✍ डा. आर्. नवीनः

संविदध्यापकः, न्यायविभागः

शाब्दसामग्रीतः शाब्द इति सर्वविदितमेव। स च शाब्दः अन्वितानां पदार्थानामभिधानरूप इति प्राभाकराः। अभिहितानां पदार्थानां अन्वयविषयक इति नैयायिकादयः। तत्र न्यायकुसुमाञ्जलौ किं नाम परपक्षविलक्षणं प्राभाकरसम्मतं अन्विताभिधानमिति विकल्पपुरस्सरं विचार्य दूषितम्। सः विचारांशः अत्र लिख्यते।

पदं अन्वितमर्थं ब्रूते इति अन्विताभिधानवादिनामाशयः । तथा च पदानां अन्विताभिधायकत्वं सिद्धम्। किं तत् पदानां अन्वितार्थाभिधायकत्वम् इति

तत्र **प्रथमपक्षः**

- संसृष्टार्थविषयकशाब्दबोधजनकत्वम्

**प्रथमपक्षविवरणम्**

पदं तावत् अन्वयविशिष्टपदार्थविषयकशाब्दबोधं जनयति इति भावः। यथा गामानयेत्यादौ गोपदं आनयेतिपदं वा आनयनविशिष्टगोविषयकं, गोविशिष्टानयनविषयकं वा बोधं जनयति। तथा च पदानां अन्वितार्थाभिधायकत्वं सम्भवतीति ।


ISSN: 2320-740X

**प्रथमपक्षदूषणम्**

निरुक्तं पदानाम् अन्विताभिधायकत्वं परमतेऽपि अङ्गीक्रियते । यतो हि नैयायिकानामपि पदानाम् अन्वितार्थविषयकशाब्दबोधजनकत्वं सम्मतमेव । तथा च परपक्षविलक्षणं पदानाम् अन्विताभिधायकत्वस्वरूपमनुपपन्नमिति ।

**द्वितीयः पक्षः**

- संसृष्टार्थतात्पर्येण पदार्थोपस्थापकत्वम्

**द्वितीयपक्षविवरणम्**

गामानयेत्यादौ अम्पदम् आधेयतासम्बन्धेन गोविशिष्टं कर्मत्वं बोधयत्विति तात्पर्येण प्रयुक्तानां गवादिपदानां अन्वितार्थविषयकशाब्दबोधजनकत्वमिति भावः ।

**द्वितीयपक्षदूषणम्**

- परमतेऽपि एतादृशतात्पर्यस्य शाब्दबोधजनकत्वाङ्गीकारेण पदानाम् एतादृशान्वितार्थाभिधायकत्वमिष्टमेव । तथा च परपक्षवैलक्षण्यानुपपत्तिरेवात्राऽपि दूषणम् ।

**तृतीयः पक्षः**

- अन्वितार्थविषयकसङ्गतिमत्त्वम्

**तृतीयपक्षविवरणम्**

सङ्गतिः नाम शक्तिः । तथा च अन्वितार्थविषयकशक्तिमत्त्वमेव पदानां अन्विताभिधायकत्वम् । यथा अम्पदादौ आधेयतया गवान्वितकर्मत्वविषयकशक्तिमत्त्वम् । तथा च अमादिपदानां निरुक्तान्वितार्थाभिधायकत्वमक्षतमिति भावः ।

**तृतीयपक्षदूषणम्**

श्रूयमाणानां वाक्यानां विभिन्नप्रकृतिप्रत्ययात्मकत्वेन पूर्वमज्ञातत्वात् वाक्यार्थस्यापि अज्ञातत्वात्, वाक्यवाक्यार्थयोरेव अज्ञातत्वेन तत्सम्बन्धभूतायाः शक्तेरपि पूर्वं अनवगतत्वेन संप्रति अन्वितार्थशक्तिग्रहस्य स्मरणात्मकस्य असम्भवेन शाब्दबोध एव न स्यात् ।

**चतुर्थः पक्षः**

- पदार्थसङ्गतिबलेन वाक्यार्थप्रतिपादकत्वम्

**चतुर्थपक्षविवरणम्**

पदानां पदार्थशक्याधीनवाक्यार्थबोधजनकत्वम् एव पदानां अन्विताभिधायकत्वमिति । यथा गोपदादेः गवि शक्तिरस्ति । तादृशगोपदार्थनिष्ठगोपदशक्तिप्रयोज्यः गोविषयकबोधः तज्जनकत्वं गोपदादेरिति भावः ।

ISSN: 2320-740X

**चतुर्थपक्षदूषणम्**

पदार्थसङ्गतिबलेनेत्यत्र सङ्गतिश्च शक्तिरेव। सा च पदार्थमात्रविषयिणी वा वाक्यार्थविषयिण्यपि वा । नाद्यः तस्याः पदार्थविषयमात्रव्यापृत्वेन पदार्थविषयकोपस्थितिजनकत्वसम्भवेऽपि वाक्यार्थबोधजनकत्वायोगात्। नान्त्यः। सङ्गतेः वाक्यार्थविषयकत्वस्वीकारे पदार्थप्रतीतिकाल एव कारणसत्वात् वाक्यार्थप्रतीत्यापत्तिः । आदौ पदार्थप्रतीतिः ततः वाक्यार्थप्रतीतिः इति प्रतीतिक्रमनियमानुपपत्तिश्च स्यात्। न चास्त्वेवं वाक्यार्थविषयकसङ्गतिवशात् पदार्थप्रतीतिकाल एव वाक्यार्थप्रतीतिः, इष्टापत्तेः इति वाच्यम् ।योग्यताज्ञानादिरूपककारणाभावेऽपि पदार्थोपस्थितिवत् वाक्यार्थप्रतीत्यापत्तेः।

**पञ्चमः पक्षः**

- वाक्यार्थप्रतिपादनानुगुणसङ्गतिशालित्वात् पदानां करणत्वम्

**पञ्चमपक्षविवरणम्**

यथा गोपदस्य गोविषयकबोधानुगुणसङ्गतिशालित्वात् गवादिपदानां शाब्दकरणत्वमिति। एतदेव च पदानां अन्विताभिधायकत्वमिति।

**पञ्चमपक्षदूषणम्**

सङ्गतौ विद्यमानं वाक्यार्थप्रतिपादनानुगुणत्वं किं नाम ? वाक्यार्थप्रतिपत्तिकरणत्वाश्रयत्वं, किं वा वाक्यार्थप्रतिपत्तिजनकव्यापारवत्त्वम् ? नाद्यः त्वन्मते सङ्गतेः जातिमात्रविषयकत्वात्। मन्मते जातिविशिष्टव्यक्तिमात्रविषयकत्वात् , तादृशव्यक्तिरूपवाक्यार्थविषयकप्रतिपत्तिकरत्वस्य सङ्गतौ विरहेण सङ्गतौ वाक्यार्थप्रतिपादनानुगुणत्वमनुपपन्नमिति भावः । न च सङ्गतेः जातिविशिष्ट-व्यक्तिविषयकत्वोपगमोऽस्त्विति शङ्क्यम्। वाक्यार्थापूर्वत्वप्रतीतिक्रमानुपपत्तिः स्यात्। न द्वितीयः। सङ्गतपदानामेव करणत्वात्, तेषामेव व्यापारवत्त्वनियमात् प्रकृते सङ्गतेः अकरणत्वात् वाक्यार्थप्रतिपत्तिजनकव्यापारवत्त्वं बाधितमिति भावः । नापि सङ्गतेः तदनुगुणत्वं वाक्यार्थप्रतिपत्तिजनकपदार्थोपस्थितिरूपव्यापारोपयोगित्वमिति । यतो हि निरुक्तान्विताभिधान-स्वरूपस्य अस्माकं नैयायिकानामपि इष्टत्वात् । तथा च अन्विताभिधानवादस्य परमतविलक्षणत्वानुपपत्तेरिति भावः।

**षष्ठः पक्षः**

- अन्विते एव सङ्गतिः


ISSN: 2320-740X

**षष्ठपक्षविवरणम्**

पदानाम् अन्विते एव शक्तिः । अयं भावः- पदान्तरस्मारितार्थान्विते पदस्य शक्तिरिति सिद्धान्तः । तथा हि गामानयेत्यादौ धातुपदस्मारितानयनान्विते गवि गोपदस्य शक्तिः । एवं गोपदस्मारितगवान्विते आनयने धातुपदशक्तिरिति । तदुक्तं आचार्यैः – समृतक्रियान्विते कारके स्मृतकारकान्वितायाञ्च क्रियायां सङ्गतिरिति । न च वाक्यार्थापूर्वत्वप्रतीतिक्रमानुपपत्तिरिति वाच्यम् । एतन्मते शक्तिःद्विविधा स्मारिका अनुभाविका चेति । पदार्थोपस्थितिप्रयोजिका स्मारिका शक्तिः । तत्र शक्तौ वाक्यार्थविषयकत्वानङ्गीकारेण पदार्थोपस्थितिकाले न वाक्यार्थप्रतीतिरिति वाक्यार्थस्यापूर्वत्वमिति सुघटम् । अनुभाविका च शक्तिः वाक्यार्थविषयिणी अन्वितविषयिणी वा । तथा च आदौ स्मारकशक्तिबलेन पदार्थोपस्थितिः ततः अनुभावकशक्तिबलेन च वाक्यार्थबोध इति नापि प्रतीतिक्रमः अनुपपन्नः इति ।

न च गामानयेत्यादौ क्रियान्वितकारकशक्तेन गोपदेन क्रिया कारकञ्चोच्यते एवं कारकान्वितक्रियापदेन क्रिया कारकञ्च उच्यतेत्यत्र क्रियापदकारकपदयोः पर्यायता स्यात् इति वाच्यम् । विशेषणविशेष्यभावव्यत्यासात् अर्थविशेषे व्यवस्थितिसम्भवात् । समानविशेष्यक-बोधजनकत्वे तु पदानां पर्यायता ।

न च कारकपदेन क्रियान्वितकारके बोधिते क्रियावाचकधातोःपुनरुक्ततेति वाच्यम् । आनयनादिरूपक्रियाविशेषस्य धात्वभावेऽलाभेन अपौनरुक्त्यात् । एवं धातोः कारकत्वेन स्मृतकारकान्वितानयनार्थकत्वात् गोत्वेन गोविशेषस्य गोपदाभावे अलाभेन न तस्य गोपदादेः पुनरुक्तता ।

न च कारकपदं, क्रियापदेन क्रियायां बोधितायां क्रियाविशिष्टं कारकं बोधयति । क्रियापदञ्च कारकपदेन कारके बोधिते कारकविशिष्टक्रियां बोधयति इति अन्योन्याश्रयः इति वाच्यम् । अस्त्यपेक्षा स्मारकशक्तेरनुभावकशक्तौ । न विपरीतम् । तथा च कारकपदं निरपेक्षया स्मारकशक्त्या कारकं बोधयति । एवं क्रियापदाद् क्रियोपस्तिथिः । तथा च पदान्तरस्मारकशक्त्यपेक्षया अनुभावकशक्त्या अन्वितबोध इति नान्योन्याश्रयः ।

एकैकं पदमपि इतरान्वितमेव बोधयति चेत् एकैकस्यापि पदस्य एकवाक्यरूपतया वाक्यभेदः स्यात् । तथा हि किं एकैकमपि पदं यत्किञ्चित्क्रियान्तरकारकान्तरान्वितमपि बोधयतु, तथा च "गामानय" इत्यत्र कारकपदं यत्किञ्चित्क्रियाभूतबन्धनक्रियान्वितं गोपदार्थं बोधयति इत्यतः "गां बधान" इत्यपि बोधः स्यात् । एवं क्रियापदं यत्किञ्चित्कारकभूताश्वान्वितम् आनयनपदार्थं बोधयति इति अश्वमानयेत्यपि बोधः स्यात् । इति वाक्यभेदः आपाद्यते ? अथवा एकेनापि पदेन वाक्यसाध्यस्य

ISSN: 2320-740X

वाक्यार्थबोधस्य जनितत्वात् प्रतिपदं वाक्यभेदस्स्यात् इति । यथा कारकपदात् आनयनान्वितगोविषयकबोधः क्रियापदात् गवान्वितानयनबोधः इति कारकक्रियापदयोः तत्त्वाक्यार्थोपस्थापकत्वेन वाक्यभेद इति । नाद्यः आनयनपदार्थस्मृतिसन्निधौ बन्धनादिरूपक्रियान्तरपदार्थानपेक्षणात् । एवं गवादिपदार्थस्मृतिसन्निधौ अश्वादिरूपकारकान्तर - पदार्थानपेक्षणात् । क्रियान्तरकारकान्तरस्वीकारे स्मृतक्रियाकारकयोः परित्यागापत्तेः । नाप्यन्त्यः । गोपदस्यानयनपदार्थस्मृतिसत्त्व एव आनयनान्वितगोबोधकत्वमिति न वाक्यभेदः । तस्मात् अन्वित एव पदानां शक्तिरिति वदतां प्राभाकराणां मते निपतितानां पर्यायपुनरुक्त्यन्योन्याश्रय वाक्यभेदादिरूपाणां दोषाणां परिहारसम्भवात् अन्विताभिधानवादः निर्दुष्ट इति प्राभाकराः ।

**अन्विताभिधानवादनिरासः**

नैयायिकास्तु अन्विताभिधानवादं निराकुर्वन्ति। पदानामन्विते शक्तिग्रह इत्यस्य कोऽर्थः ? यदि पदानामन्वयांशे न शक्तिग्रहः । किन्तु अन्वयवति शक्तिग्रह इति, यथा चक्षुषा स्पर्शवद्ग्रहः इत्युक्तौ चाक्षुषग्रहस्य न स्पर्शविषयकत्वं, किन्तु स्पर्शाश्रयविषयकत्वं तथेहापिति तर्हि अभिहितान्वयवादिनां मतेऽपि शक्तिग्रहस्य अन्वयविषयकत्वाभावेन परमतविलक्षणान्विताभिधानवादानुपपत्तिः । ईदृशान्विताभिधानवादस्य परेषामपि सम्मतत्वात् । यदि तु पदानामन्विते शक्तिग्रह इत्यस्य अन्वयेऽपि शक्तिग्रह इत्युक्ते तादृशशक्तेः अपदार्थतापत्तेः । तादृशशक्तिग्राहकप्रमाणाभावात् ।

**अन्वितशक्तिग्राहकप्रमाणोपन्यासः तन्निरासश्च**

नन्वस्ति अन्वितशक्तौ प्रमाणम् । यथा पदार्थधियः अन्यथानुपपत्तिः (अर्थापत्तिः) पदार्थशक्तौ प्रमाणम् । तथा अन्वयधियः अन्यथानुपपत्तिः अन्वयांशेऽपि शक्तौ प्रमाणमिति चेन्न पदैः पदार्थमात्राभिधानेऽपि आकाङ्क्षादिवशादेव पदार्थानां मिथः अन्वयधीरिति ।

न च जिज्ञासानुपपत्तिरूपार्थापत्तिरेव प्रमाणम् । आनयेत्यस्य सामान्यतः कर्मकारकान्विते शक्त्यभावे सति सामान्यतः कर्मणः ज्ञानासम्भवात् आनयनक्रियायां कर्म किम् इति विशेषजिज्ञासा न स्यात् । "विशेषजिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य कारणत्वात्" इति । तथा च विशेषजिज्ञासान्यथानुपपत्तिप्रमाणेन इतरान्विते पदानां शक्तिरिति वाच्यम् । तन्न । विशेषजिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य कारणत्वेऽपि पदादेव सामान्यतः कर्मणः ज्ञानमित्यत्र प्रमाणं नास्ति । कर्मणः सामान्यतो ज्ञानस्य अनुमित्यात्मकत्वोपगमेऽपि विशेषजिज्ञासानिर्वाहो उपपद्यते । गामानयेत्यादौ आनयेतिपदशक्त्या आनयनमात्रोपस्थितौ तस्य च आनयनस्य कारकाविनाभूतत्वेन


ISSN: 2320-740X

कारकसामान्यानुमितिः ततः विशेषजिज्ञासा इति पदानां अन्विते शक्तिग्रहमन्तरेणैव विशेषजिज्ञासा उपपद्यते इति न पदानाम् अन्विते शक्तिरिति।

***********

## क्षीणप्राया क्षात्रप्रज्ञा

✍ डा. रामकृष्णपेजत्तायः

संविदध्यापकः, ज्यौतिषविभागः

अस्मद्देशस्य स्वातन्त्र्यात् परं तदानीन्तनः प्रधानमन्त्री प्रमुखाः केचन नायकाश्च "वयं शान्तिप्रिया अहिंसामार्गगाश्च । तस्मादस्माकं सेना नावश्यकी" इत्यब्रुवन् ।(पश्चात् सेना घटितेति विषयान्तरम् । किन्तु, तस्मिन्नेव काले पि. एस्. शिवस्वामी अय्यर् वेङ्कटरमणशास्त्री वि. एस्. श्रीनिवासशास्त्री चेत्यादयो दाक्षिणात्या विद्वांसः अस्मत्सेनानिवेशः तत्रावश्यका विभागाः इत्यादिषु विषयेषु विस्तृतमध्ययनं कृतवन्त आसन् ।) विस्मयावहं खल्विदम् । सुचिरम् आङ्ग्लानां दुःशासनमारादीक्षितवन्तोऽपि स्वतन्त्रेऽस्मद्राष्ट्रे सेनासन्नाहं कुत एवं निराकुर्वन् ? विना सेनां राष्ट्ररक्षणं कथं स्यादिति बालेष्वप्याविर्भवन् प्रश्नः कथमेतेषु न समुद्भूतः?किं तावदस्य बीजम् ? इत्यादिका जिज्ञासापरम्पराऽवतरत्यस्मन्मानसे। सत्यम् ! प्रक्षीणा क्षात्रप्रज्ञैवास्य हेतुः।

स्वातन्त्र्योत्तरम् अस्मिन् देशेऽहिंसाया वैभवीकरणं तथा जातं यदहिंसा परमो गुणः हिंसा तु परमो दोष इति भावना तीव्रतरी जाता । (राष्ट्रहितार्थमात्मरक्षणार्थं वा क्रियमाणा हिंसाऽपि प्रशस्तैवेत्ययमंशस्तिरोभूतः।) राजकीयप्रेरितोऽस्मदितिहासोऽप्यहिंसयैव भारतेन स्वातन्त्र्यम् अवाप्तमिति प्राख्यापयत् । (तत्रापि तीव्रगामिनां बलिदानादिकं तिरोहितम् ।)तथा च, हिंसा वर्जनीयेति कथयन्तो मतिमन्मानिनः 'तद्धिंसामूलं क्षात्रमेव, तच्च नैजं प्रभुत्वं सर्वत्र विजृम्भयत् साधारणजनान् निपीडयती'त्यादिभिर्वचोभिरधिक्षिपन्ति । इयमेका कथा । अन्यतस्तु, यवनसम्राजामाक्रमणेन भारतं सुचिरं यज्जर्जरितं समभूत् तत्र भारतीयानां क्षात्रप्रज्ञाया अभाव एव हेतुरिति केचित्पण्डितमानिनः स्वीयां "प्राज्ञतां" प्राचीकटन् । यथा सैयद् शहाबुद्दीन् इत्याख्यो विमर्शकपाशः 'सण्डे'पत्रिकायां दशकत्रयात् प्राक् लिलेख –**हिन्दवो यवनेभ्यो भीताः। तेनैव हेतुना ते अहिंसाजात्यतीतत्वादिरूपं पन्थानमाश्रयन्ति । यदा यदा यवनसैन्येनाचक्रमे तदा सर्वदाप्येते निर्बलं तृणमिव नतशिरस्काः समभूवन् । तदेतदस्मदितिहासेऽसकृद् दृष्टम् ।** इति। "सनातनधर्मस्तु सर्वदा ब्रह्ममोक्षादिष्वलौकेष्वेव विषयेषु चिराद् रमते स्म । न तस्य व्यावहारिकेषु विषयेष्वासीत्

प्रवृत्तिः । तदित्थं परमार्थैकसक्तो व्यवहारविमुखश्च सनातनधर्मो यत्र जनान् शास्ति तस्य निर्वीर्यस्य देशस्येयं दुःस्थितिः सहजैवे"ति व्याख्यान्ति पुनरन्ये । एवमेवंविधैर्भूयोभिरुल्लेखैः सनातनधर्मे क्षात्रप्रज्ञा दुर्बलाऽसीदिति मिथ्याप्रथा बहुधा प्रसारितेति सुव्यक्तमेव । एवं क्षात्रस्य मूलम्, आबहोः कालादपि भारते तस्यावस्थितिः, साम्प्रतं तस्यावश्यकता च भूयसाम् अविदितप्रायैव वरीवर्ति । तदेतत्सर्वं मनसिकृत्य क्षात्रतेजोविषये सनातनधर्मस्य धारणां तत्रत्यान् गुणदोषांश्च प्रपञ्चयितुम्, साम्प्रतं तस्यावश्यकतां प्रतिपादयितुं च लेखनेऽस्मिन् प्रवृत्तोऽस्मि ।

तत्रादौ प्रकृतलेखने क्षात्रशब्देन किं विवक्षितमिति किञ्चिदुपस्तूयते । क्षात्रस्वभावोऽत्र विवक्षितोऽस्ति न तु जन्मना क्षत्रियत्वम् । क्षात्रस्वभावजानि कर्माण्यभिहितानि भगवता यथा –

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।**
**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥** इति ।

अनेन सुस्पष्टं यत् क्षात्रं गुणविशेष एव, न तु दोष इति । न हि क्षात्रं कमपि मनुष्यं निरर्थकहिंसायां प्रेरयति । यदि कैश्चित्तथा समाचरितं तर्हि स तद्व्यक्तिदोष एव, न तु क्षात्रदोषः । रक्षणमेव क्षात्रस्य मुख्यं कर्तव्यम् । यथोक्तं महाकाव्ये रघुवंशे–

**क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।** इति ।

लोके आर्त इति शब्दोऽपि न स्यादिति क्षत्रियाश्चापं धारयन्तीति श्रीरामेण वाचयत्यादिकविर्वाल्मीकिः । तथा च तद्वचनम् –

**क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति ।** इति ।

इत्थं क्षात्रं रक्षणाय प्रवृत्तं न तु तक्षणायेति निश्चप्रचमेव । किं बहुना ? क्षतात् त्रायते इति व्युत्पत्तिरपि तमेवार्थं समर्थयति ।

अन्यदपीह द्रष्टव्यं यत् 'क्षि'धातुः क्षयैश्वर्ययोरर्थयोः पठितः । क्षयशब्दो निवासार्थकोऽपि कोशेषु दृष्टः काव्येषु प्रयुक्तश्च । तस्मात्तज्जन्यः क्षात्रशब्दः क्षत्रियशब्दो वा आश्रयार्थत्वमपि भजते । अतो निराश्रितानामाश्रयप्रदानमपि क्षात्रकर्तव्यमित्यर्थः फलति ।

इत्थम् आर्तपरित्राणम् आश्रयप्रदानं च क्षात्रस्य लक्ष्यमिति सुस्पष्टम् । तदेतत् क्षात्रमनिवार्यम्, तेन विना जनजीवनं नैव सुस्थितं भवतीति ऐकमत्येन सङ्गिरन्ते वेदादयःसर्वे श्रद्धेया ग्रन्थाः । यथोक्तं शुक्लयजुर्वेदे -

**यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।**
**तं लोकं पुण्यं प्रज्ञेषं यत्र देवा सहाग्निना ॥**


ISSN: 2320-740X

अर्थः - यत्र ब्रह्म क्षत्रं च सहैव चरतः तं लोकं पुण्यमयं कुर्वन्ति देवा इति मे मतिः । सत्त्वप्रकृतिकं ब्रह्म ज्ञानशक्तै, रजःप्रकृतिकं क्षत्रं तु क्रियाशक्त्यै ।यदीदमुभयं सङ्गतं भवति तर्हि लोककल्याणं भवतीति श्रुतिहृदयमस्माभिरवलोकनीयम् ।

अथ विष्णुधर्मोत्तरे –

**दुष्टदण्डः सतां पूजा धर्मेण च धनार्जनम् ।**
**राष्ट्ररक्षा समत्वं च व्यवहारेषु पञ्चकम् ।**
**भूमिपानां महायज्ञाः सर्वकल्मषनाशनाः ॥**

दुष्टानां दण्डः, सज्जनानां पूजा, धर्मेण धनार्जनम्, राष्ट्रस्य रक्षणम्, व्यवहारेषु समत्वं चैते पञ्च राज्ञां महायज्ञाः इति भावः । दुष्टदण्डो राष्ट्ररक्षा च यज्ञ एवेति यदत्रोक्तं तन्मननीयतमम् ।

अन्यच्चोक्तं मनुस्मृतौ -

**सर्वो दण्डजितो लोके दुर्लभो हि शुचिर्नरः ।**
**दण्डस्य हि भयात् सर्वं जगद्भोगाय कल्पते ॥**

अत्रापि दण्डस्य पारम्यं सुवेद्यमेव । 'दुर्लभो हि शुचिर्नरः' इत्यस्य अर्थव्याप्तिरपि महीयसी । न केवलमिदं वाक्यं प्रजाविषयकम् । किञ्च साम्राज्यविस्तरणवाञ्छया मतान्धतया वा येऽस्मद्राष्ट्रमाक्रामन्ति तेषु विषयेष्वपि राजा जागरूकः स्यादिति भावः । वयं न युयुत्सवश्चेदपि परे यद्याक्राम्यन्ति तर्हि निजत्राणं दण्डेनैव स्यान्ननु ।

अथ रामस्य गुणगौरवं वर्णयतो भगवतो वाल्मीकेर्वाणी -

कुलोचितमिति क्षात्रं धर्मं स्वं बहुमन्यते ।

किं बहुना ? न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि चेत्यादिभिर्वाग्भिराहवविमुखं सव्यसाचिनं प्रति भगवतः श्रीकृष्णस्याधिक्षेपः –

**क्लैब्यं मा स्म गमः पार्थ नैतत् त्वय्युपपद्यते ।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥**

इत्थं क्षात्रप्रशंसापराणि परःशतानि वचांसि शक्यान्युदाहर्तुम् । निजप्राणान् पणीकृत्य राष्ट्ररक्षणाय सज्जमानेभ्यस्तेभ्यः क्षत्रियेभ्यः प्रकल्पिताः सौकर्यविशेषा अपि नैके । यथा – वीरपाणम् इत्यस्ति कश्चन शब्दः । तस्यार्थं वर्णयत्यमरसिंहः –वीरपाणं तु यत्पानं वृत्ते भाविनि वा रणे । इति । समरात् पूर्वम् उत्साहवर्धनाय ततः परं विजयोत्सवाय वा क्रियमाणं सुरापानं वीरपाणं वीरपानं वेति संज्ञितम् । सुरा तावद् युद्धोत्साहादिनिदानं रजोगुणं संवर्धयतीत्येषोऽत्र हेतुः । यो धर्मो 'न सुरां पिबे'दिति सुरापानं निषेधति स एव युद्धप्रसङ्गे तत्पुरस्करोतीत्येतदवधानार्हम् । इदानीमपि सैनिकानां-

न्यूनमूल्येन मद्यस्य प्रकल्पनम् अनया युक्त्या युक्तमेव।

तदित्थं श्रुतिस्मृतिपुराणेषु क्षात्रं नितान्तमादृतमिति स्फुटमेव। अथावलोकामह इतिहासम्। पूर्वोक्तश्रुत्याद्याश्रये सम्प्रवृद्धं सनातनधर्मं सेवमानानां राज्ञामधिपत्येऽप्यप्रतिहतमेवासीत् क्षात्रतेजः। चन्द्रगुप्त-पृथ्वीराजचौहाण-महाराणाप्रताप-शिवाजी-जयसिंहप्रभृतयः प्रतापिनो निजतेजसाऽप्रतिमा एवावर्तिषत। स्त्रियोऽपि न न सन्त्यस्यां पङ्क्तौ। चन्द्रगुप्तमौर्यस्य शोणोत्तराख्या काचिदङ्गरक्षिकाऽसीद् इति मुद्राराक्षसे नाटके समुल्लिखितमस्ति। राज्ञी पद्मिनी तु धैर्यातिशयेन अल्लावुद्दीन् खिल्जिना निबद्धं निजभर्तारं मोचयामास। रुद्रमदेवी चेन्नम्माजी झान्सी राज्ञी चेत्यादीनां स्त्रीरत्नानां चरितमपि चित्रावहम्। स्वपौरुषमतान्धतादारुणस्वभावादिभिः प्रपञ्चे बह्वीः संस्कृतीर्नाशयित्वा बहून् भूभागान् स्वाधीनीकृत्य तत्रत्यान् जनान् मतान्तरीकृत्य च विजृम्भमाणानां यवनयूरोपीयादीनां निरन्तरेष्वाक्रमणेषु सञ्जातेष्वपि सनातधर्मोऽधुनापि यत् सञ्जीवति तत्र पूर्वोक्तानां क्षात्रतेज एव बीजम्। यत्तु तथापि यवनादिभी राष्ट्रमिदं जर्जरितं तत्र क्षात्रोचितमौदार्यम् अन्तःकलहः समष्टिप्रज्ञाभाव इत्यादिकं कारणमस्ति नतु क्षात्रतेजसोऽभावः। यथा –पृथ्वीराजचौहाणो 'महम्मद्-घोरि'नामकम् आक्रामकं पराजित्य क्षमादानेन तं प्राहिणोत्। किन्तु पश्चात् स एव घोरी कुटिलतया पृथ्वीराजं युद्धनिबद्धं कृत्वा अमानुषेण क्रौर्येण तदक्षिणी विदारयामास। 'मायाविनं तु राजानं माययैव निकृन्ततु'। 'शठे शाठ्यं समाचरेत्' 'आर्जवं हि कुटिलेषु न नीतिः' इत्यादिः कृष्णकौटिल्यादिसम्मता नीतिर्नाश्रितेत्येष एव महान् दोषः। अपात्रेषु औदार्यं न युज्यते। क्षमा शौर्यस्य भूषणमिति मन्वानैर्भारतीयैः यवनाक्रामकाः तेषामाचारविचारादयश्च सम्मानिताः। मतान्तरस्त्रीमानहरणदेवालयभञ्जनादयस्तत्स्वभावा बहुकालं यावदविज्ञाता एवाभूवन्। तदेतत् स्वलाभायोपयुज्य कौटिल्येन साम्राज्यं प्रतिष्ठापयामासुर्यवनप्रभवो यूरोपीयाश्च। पराजये दैन्यं विजये क्रौर्यं प्राबल्ये दौष्कर्म्यं च प्रदर्शयन्तस्ते भारतीयानाम् औदार्यान्तःकलहस्वजनवञ्चनादीन् तत्र तत्र बुद्ध्योपयुज्य क्रमेणैधाम्बभूवुः। सर्वमिदं दृढीकर्तुं भूयांसो दृष्टान्ता उपलभ्यन्ते चेदपि विस्तरभयान्न तत्रात्मानं व्यापारयामि।

अस्य वास्तविकेतिहासस्याध्ययनं साम्प्रतमावश्यकम्। दुर्दैवेनास्माकमितिहासपुस्तकानि मिथ्याकथाभिरेव समाकीर्णाणि। विशिष्य, देशे प्रायः सर्वत्र इतिहासपाठ्यक्रमास्तदध्यापकाश्च यवनभूपतीनाम् आङ्ग्लानां च वैभवीकरण एव स्वधन्यतां सम्पादयन्तः सन्ति। न तैर्भारतीयानां गुणातिशयाः समुल्लिख्यन्ते। प्रत्युत, वर्णभेदः तारतम्यं शैववैष्णवादिमतीयकलहः इत्यादीन् स्वयमेव प्रकल्प्य, तैरेव देशोऽयं विप्लवमन्वभून्न त्वाक्रामकैरिति निगद्य च कृतार्था भवन्ति ते पण्डितपाशाः। एवम् अन्यथाप्रत्यायितस्येतिहासस्याध्ययनेन तदेव सत्यमिति भ्रमेण च स्वपरम्परादिषु तिरस्कारभाव


ISSN: 2320-740X

एव प्रवर्धते न तु गौरवादरादिकम् । अमीभिर्दोषैः क्षीयमाणेषु जीवनमौल्येषु क्षात्रप्रज्ञाऽप्यन्यतमा । अतो वास्तविकस्येतिहासस्य व्यवस्थितमध्ययनम् अधुनातनेष्वावश्यकेषु विषयेषु प्रमुख इति मां प्रतिभाति ।

अधुनापि अस्मान् परितो बहुषु विप्लवेषु जायमानेष्वपि तानजानन्तः प्रतिस्पन्दमकुर्वन्तश्च यद् वयं तिष्ठामः तत्रापि क्षात्रप्रकृत्यभाव एव हेतुः । समाजे तिष्ठतामस्माकं समाजहानिकारकेष्वेतेषु विप्लवेषु 'अहम् अलिप्तः' इति भावो नितमां न युज्यते । सोऽयं स्वभावो यदि न परिवर्तेत तर्हि महतानिष्टेन युज्येमहीत्यत्र नास्ति संशीतिः । तदर्थं धैर्यधनानां महितचरित्राणां शिवाजिप्रभृतीनां वीरगाथा आबाल्यादेव शिक्षणीयाः ।

तदेतत्सर्वं कथं प्रासङ्गिकमिति सम्यग् ग्रहणाय प्रख्यात इतिहासविद् आर्. सि. मजुम्दार्-वर्यो १९६२तमवर्षस्य भारतचीनायुद्धस्य प्रसङ्गे यदाह तस्य स्मरणं युक्तं स्यात् –

"No one can be great without an ideal before him. Our children's books, unfortunately, are full of useless trash; for example, writing about Ram Mohan Roy we only find mention of the part he played in the abolition of Suttee and not his fight against Cristian missionaries. What named of do we find in any of our children's textbooks? One has to admit that there in none. We therefore think it is immediately essential to recast our textbooks. The story of the heroes given above, history of Shivaji, of RanaPratap, of many other heroes – and now the heroes in this present war to repel the Chinese attack (1962) – Major Dhan Singh Thapa, SubedarJoginder Singh and others – should immediately be included in this."

(श्रेष्ठः कश्चिदादर्शः सम्मुखेन भवति चेत्को वा मानव औन्नत्यं प्राप्नुयात् ? दौर्भाग्येण अस्मद्बालानां पुस्तकानि निरुपयुक्तैरेव विषयैः सुपूर्णानि यथा, राजाराममोहनरायस्य सतीपद्धतिनिर्मूलनयत्न एवास्माभिः पठ्यते, न तु क्रैस्तमतप्रचारसंस्थाः विरुद्ध्य तेन कृतं सङ्घर्षम् । कस्य वा वीराग्रेसरस्य नाम अस्मदितिहासे लभ्यते? न कस्यापीत्येव वक्तव्यम् । इदमधुना अत्यनिवार्यं वर्तते यदस्मत्पाठ्यपुस्तकानि अर्थवत्ताम् आवहेयुः । शिवाजी राणाप्रतापः इत्यादीनां वीरवराणां चरित्रं शिक्षेरन्निमे बालाः । अथ च, सद्यःप्रवृते भारतचीनायुद्धे चीनानीकस्य पराभवनाय प्रदर्शितपराक्रमाणां मेजर् धनसिंह थापा, सुबेदार् जोगीन्दर् सिंह चेत्यादीनां वीरगाथा अपि पाठ्येषु योजनीयाः ।)

एवं च मे वक्तव्यं सुव्यक्तमेवेति मन्ये । अचिरादेवास्यां दिशि प्रवृत्तिरस्माकं जायतामिति शम्।

(आधमर्ण्याभिव्यञ्जनम् - प्रकृतलेखः शतावधानिनां डा. रा. गणेशवर्याणां “भारतीयक्षात्रपरम्परा” इत्याख्यायाः उपन्यासमालिकायाः आधमर्ण्यं बिभर्ति ।)

***********

## शारीरकमीमांसाशास्त्रारम्भसमर्थनम्

✍ डा. श्रीकरः जि. एन्
संविदध्यापकः, वेदान्तविभागः

चतुर्लक्षणी शारीरकमीमांसा भगवता बादरायणेन सूत्ररूपेण प्रणीता । तत्रादौ इदं शास्त्रमारम्भणीयं न वेति विषयप्रयोजनसम्भवासम्भवाभ्यां संशये सति पूर्वपक्षस्तावत् इदं शास्त्रं नारम्भणीयं विषयप्रयोजनासम्भवादिति । अत्र ब्रह्मात्मैक्यरूपः विषयः प्रयोजनञ्च न सम्भवति । यदसन्दिग्धमप्रयोजनञ्च तन्न जिज्ञास्यम् । यत् सन्दिग्धत्वे सति सप्रयोजनं तदेव जिज्ञास्यम्, यथा धर्मः । ‘बृहत्त्वाद्बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते’ इति शास्त्रेण ब्रह्म आत्मेति सिद्धम् । स च आत्मा अहम्प्रत्ययविषयः सर्वलोकप्रसिद्धः । सर्वे आत्मानमनुभवन्ति, अहमस्मि न वेति न कस्यापि संशयः, नास्मि इति च न भ्रान्तिः । तस्मादात्मा असन्दिग्धः अविपर्ययश्च । ‘अहं स्थूलः’ ‘अहं कृशः’ इति देहसामानाधिकरण्यदर्शनात् शरीरमेवात्मेति न शङ्कनीयम् । योऽहं बाल्ये पितरावन्वभवं स एव स्थाविरे प्रणप्तॄननुभवामीति प्रत्यभिज्ञायाः जागरूकत्वात्, बालस्थविरशरीरयोः भेदेऽपि आत्मनः एकत्वं नित्यत्वं च सर्वानुभवसिद्धम् । येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रम् । तथा बालादिशरीरेभ्यः आत्मनः भिन्नत्वं सिध्यति । नापि इन्द्रियमात्मा, योऽहमद्राक्षं सोऽहं स्पृशामीति इन्द्रियभेदेऽपि द्रष्टुः स्प्रष्टुश्च आत्मनः एकत्वप्रत्यभिज्ञानात् । एवं च असन्दिग्धतया आपामरविद्वद्भिः आत्मस्वरूपं स्पष्टमनुभूयत इति ब्रह्मविचारात्मकशास्त्रमिदं नारम्भणीयम् ।

अपि च ब्रह्मात्मैक्याङ्गीकारे प्रत्यक्षविरोधः दुर्वारः । अहं कर्ता अहं भोक्ता इत्यादिप्रत्यक्षेण अहमनुभवे प्रकाशमानस्य जीवस्य तद्विपरीतरूपेण ब्रह्मणा सह ऐक्यं न घटते । न च तत्त्वमस्यादिश्रुतिवाक्यैः तदैक्यसिद्धिः, विरुद्धधर्माक्रान्तत्वात् । सर्वप्रमाणज्येष्ठत्वात् प्रत्यक्षं प्रबलतमं तेन अहं कर्तेत्याद्यात्मानुभवः निःसन्दिग्धतया सिद्धे सति जीवस्य ब्रह्मणा ऐक्यं कथं सिध्येत । अतः अप्रामाण्यशङ्कानास्पदप्रबलप्रत्यक्षविरोधात् श्रुतयः अन्यथा व्याख्येयाः । तस्मात् विषयाभावात् शास्त्रं नारम्भणीयम् ।


ISSN: 2320-740X

जीवब्रह्मैक्यसिद्धिः संसारनिवृत्तिः अपवर्गः प्रयोजनं विवक्षितम् । स च संसारः आत्माज्ञानेन प्रवर्तते आत्मयाथात्म्यज्ञानेन च निवर्तते । किन्तु विना शास्त्रार्थविचारं सर्वे आत्मानं यथावदनुभवन्ति - अहमिति । आत्मज्ञानं वर्तते संसारोऽपि अनुवर्तत इति ज्ञानेन मुक्तिरिति वचनं अप्रामाणिकम् । एवं च कर्मसाध्या मुक्तिः, उपनिषदः न स्वार्थपराः किन्तु जपमात्रोपयोगिनः । तस्मात् प्रयोजनासम्भवाच्च इदं शास्त्रं नारम्भणीयम् ।

अत्रोच्यते – अहमनुभवः नात्मयाथात्म्यविषयः । समस्तोपाध्यनवच्छिन्न-मनन्तानन्दाद्वितीयमात्मतत्त्वं वेदान्तेषु असकृत् श्रूयते । ईदृशे ब्रह्मात्मैक्ये उपक्रमोपसंहारादि-तात्पर्यलिङ्गानि श्रुतिशिरोवचनानि च समन्वयन्ति । षड्विधतात्पर्योपेता श्रुतिः न शक्रेणापि अन्यथायितुं शक्या । तात्पर्यलिङ्गानि यथा -

**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।**
**अर्थवादोपपत्तिश्च लिङ्गं तात्पर्यनिर्णये ॥** इति।

छान्दोग्यषष्ठाध्याये यथा – **'एकमेवाद्वितीयम्'**(छा.उ.६/२/१) इति ब्रह्मोपक्रम्य **'ऐतदात्म्यमिदं सर्वम्'** (छा.उ.६/६/३) इत्युपसंहारः । इदमुपक्रमोपसंहारैकरूप्यं तात्पर्यलिङ्गम् । प्रकरणप्रतिपाद्यस्य ब्रह्मणः मध्ये **'तत्त्वमसि'**(छा.उ.६/८/७) इति नवकृत्वोऽभ्यासः । **'अत्र वाव किल सत्सोम्य न निभालयसे'**(छा.उ.६/१३/२) इति रूपादिहीनाद्वितीयब्रह्मणः प्रमाणान्तरागोचरत्वमपूर्वत्वमुक्तम् । **'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये'**(छा.उ.६/१४/२) इति ब्रह्मज्ञानात् स्वस्वरूपप्राप्तिरूपमोक्षः फलमुक्तम् । **'अनेन 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'** (छा.उ.६/१/४) इत्यादिमृदादिदृष्टान्तैः **जीवेनात्मनानुप्रविश्य'** (छा.उ.६/३/२) इत्यादिना ब्रह्मणः अद्वितीयज्ञानार्थोऽर्थवादः । कार्यकारणयोरनन्यत्वात् कारणव्यतिरेकेण कार्याभावरूपोपपत्तिरुक्ता । एवं सर्वत्र वेदान्तेषु तात्पर्यलिङ्गानि द्रष्टव्यानि ।

ननु प्रबलप्रत्यक्षविरोधात् कथं श्रुतिः प्रवर्तत इति चेत् – प्रत्यक्षं दोषशङ्काकलङ्कितम् – चन्द्रप्रादेशिकत्वादिस्थले यथा दृष्टत्वात् । श्रुतिस्तु अपौरुषेया समस्तपुरुषदोषविवर्जिता स्वतःप्रमाणभूता । व्यावहारिकसत्तायुक्तप्रत्यक्षमाश्रित्य प्रवृत्ता श्रुतिः तं बाधते । यथा प्रथमप्रवृत्तमपि रजतज्ञानं नेदं रजतं किन्तु शुक्तिरिति आप्तवाक्यं बाधते । एवं प्रथमप्रवृत्तं प्रत्यक्षं बाधते श्रुतिः । तस्मात् श्रुतिः प्रबला । उपनिषदः स्वार्थे प्रामाण्यवत्यः तासु प्रतिपादितमात्मतत्त्वं नान्येन केनापि प्रमाणेन अवगम्यते । तस्मात् औपनिषद्ब्रह्मज्ञानेन कर्तृत्वभोक्तृत्वादिसंसारनिवृत्य जीवस्य परमानन्दप्राप्तिः मोक्षः सिध्यति । तथा च विषयप्रयोजनसम्भवात् शास्त्रमिदमारम्भणीयम् ।

अत्र पुनः आक्षेपः यथा - विषयाधिकारिसम्बन्धप्रयोजनरूपानुबन्धचतुष्टयं विधिसन्निहितार्थवादवाक्यैः ज्ञातुं शक्यमतः **`अथातो ब्रह्मजिज्ञासा'** (ब्र.सू.१/१/१) इति अनुबन्धबोधकमिदं सूत्रं व्यर्थमिति । तद्यथा - **'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः'** (बृ.उ.४/५/६) इति श्रवणविधिः श्रूयते । तथाहि – **'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते'** (छा.उ.८/१/६) इति श्रुत्या 'यत्कृतकं तदनित्यं यथा घटः' इति न्यायेन च, **'न जायते म्रियते वा विपश्चित्'**(क.उ.१/२/१८) **'यो वै भूमा तदमृतोऽन्यदार्तम्'**(छा.उ.७/२४/१) इत्यादिनिगमवचांसि भूमात्मा नित्यः ततोऽन्यदनित्यमिति नित्यानित्यवस्तुविवेकः लभ्यते । **'परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन'**(मु.उ.१/२/१२) **'आत्मनस्तु कामाय सर्वं प्रियं भवति'**(बृ.उ.४/५/६) इत्यादिश्रुत्या अकार्यः मोक्षः कृतकेन कर्मणा न सिध्यतीति कर्मतत्फलेभ्यो विरागः बोध्यते ।**'शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्'**(बृ.उ.४/४/२३) इति श्रुतिः शमदमादिषट्कमुपदिशति । **'न च पुनरावर्तते'**(छा.उ.८/१५/१) इति मोक्षस्य नित्यत्वश्रवणात् मुमुक्षुत्वं सिध्यति । तथा च नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नः अधिकारीति श्रुत्या ज्ञायते । **'आत्मा द्रष्टव्यः'** इत्यात्मदर्शनमुद्दिश्य **'श्रोतव्यः'** इति विचारविधानात् आत्मदर्शने च **'तं त्वौपनिषदं पुरुषम्'**(छा.उ.३/९/२६) इत्यादिश्रुत्या वेदान्ताः प्रमाणमिति विचारस्य वेदान्ताः विषय इति लभ्यते । वेदान्तानां च प्रत्यग्ब्रह्मैक्यं विषयः **'तत्त्वमसि'**(छा.उ.६/८/७) इत्यादिश्रुतेः । **'तरति शोकमात्मवित्'**(छा.उ.७/१/३) **'ब्रह्मविद्ब्रह्मैव भवति'** (मु.उ.३/२/९) इत्यादिश्रुत्या आत्मज्ञानात् मुक्तिरिति प्रयोजनं सिध्यति । अधिकारिणा विचारस्य कर्तव्यतारूपः फलस्य प्राप्यतारूपः इत्यादिसम्बन्धोऽपि सुबोधः । अतः सूत्रमिदं व्यर्थमिति आक्षेपे सति उच्यते – आपाततः ज्ञातानाम् अधिकार्यादिश्रुतीनां स्वार्थे तात्पर्यनिर्णयाय सूत्रमिदमावश्यकम् । अन्यथा किं विवेकादिविशेषणवानधिकारी न वा इत्यादिसंशयानिवृत्तेः । श्रुतिस्मृतिषु उक्तस्यैवार्थस्य न्यायतो निर्णेतुं ब्रह्मसूत्राणि प्रवृत्तानि ।

**********


ISSN: 2320-740X

## भख्षालीहस्तप्रतिः

✍ डा. मुरळीकृष्णः ढि.
संविदध्यापकः, ज्यौतिषविभागः

इतिहासप्रसिद्धात्तक्षशिलातः ११० किलोमीटर् दूरे अखण्डभारतस्य वायव्यसीमनि, साम्प्रतं पाकिस्थानस्थे पेशावरजिल्लायाः मर्दान् समीपे भख्षाली इत्याख्यः कश्चन ग्रामः अस्ति। अस्मिन् ग्रामे क्रिस्तशके १८८१ तमवत्सरे भुवः खननावसरे कश्चित्कर्षकः भूर्जपत्रस्योपरि लिखितां हस्तप्रतिमवाप। अस्यां हस्तप्रतौ शारादालिपिमाश्रित्य प्राकृतभाषायां गाथाख्यदेश्यभाषायां गणितीयविषयाः निरूपिताः। व्यवकलनम्, सङ्कलनम्, वर्गमूलः, श्रेढीगणितम्, त्रैराशिकम्, क्षेत्रगणितमित्येवंविधाः नैके गणितविषयाः प्रस्तुताः।अस्यामाहत्य सप्ततिसङ्ख्यकानि भूर्जपत्राणि सन्ति। विद्यमानेषु कानिचित् पत्राणि खण्डितानि। एकैकस्यापि भूर्जपत्रस्य परिमाणं प्रायः सप्ताङ्गुलमितं दैर्घ्यं, चतुरङ्गुलमितं आयतञ्च। भख्षाली नामके ग्रामे प्राप्तेयं हस्तप्रतिरित्यत अस्याः भख्षालीहस्तप्रतिरिति नामकरणं विहितम्।

प्राप्तमेनं ग्रन्थं तद्देशीयारक्षकनिरीक्षक(Inspecter of Police) स्य मियान् अन् वान् उद्दीन् महाशयस्य अधिवासी (Tenant) कश्चिदविन्दत। स च आरक्षकनिरीक्षकद्वारा ग्रन्थमेनं मर्दान्प्रदेशस्थं सहायकायुक्तं (Assistant Commissioner) प्रापयत्। भारतसर्वकारस्य प्राधिकारे १९२७ तमे संवत्सरे काये (G R Kaye) महाभागः एतस्य सम्पादनमकरोत्। ततश्च इयं हस्तप्रतिः पञ्जाब् उपराज्यपालस्य (Lieutenant Governor) सकाशं समाप्नोत्। स च सेनाध्यक्षस्य कनिंघ्हाम्-वर्यस्य परामर्शानुसारं डा. होयर्नल् महाभागाय प्रादात्। डा. होयर्नल्-वर्यः १९०२ तमे वत्सरे इङ्ग्लेण्ड्-देशस्थे बाडिलियन् ग्रन्थागाराय प्रादात्। एवं तत्र विद्यमानासु अनर्घ्यासुभारतीयहस्तलिखितमातृकासु इयमन्यतमा विलसति।

अत्र डा. होयर्नल्वर्यः हस्तप्रतेः रचनाकालः क्रि. श. ३-४ शतकमित्याह। एनमेव कालमनुवदन्तिप्रसिद्धाः पाश्चात्यविद्वदग्रेसराः बूह्लर्(Buhler)-काण्टर्(Cantor)-केजोरी(Cajori)वर्याः। किन्तु कायेवर्यस्तु तत्सम्बद्धेषु स्वलेखनेषु पूर्वाग्रहपीडितस्सन् क्रि. श. द्वादशशतककालिकमित्याह। किन्तु नेयं कालगणना विश्वासयोग्या।

कृतेरस्याः कर्ता कालश्च अज्ञाता एव। किन्तु गणितविचाराणां वैशिष्ट्यं, प्रतिपादनशैली, भाषाप्रयोगादीनामपि अवलोकनमत्र विशिष्य कर्तव्यमिति मन्वानः, अस्मद्देशीयः भारतीयगणितक्षेत्रे प्रथितयशस्कः विभूतिभूषणदत्तवर्यः अस्याः हस्तप्रतेः कालः क्रि. श. २-३ शतकमित्यब्रवीत्।

अन्यमप्यंशमत्र प्रास्तौत् यथा – अयं ग्रन्थः न मूलग्रन्थः। मूलग्रन्थस्य एषा व्याख्यानात्मिका प्रतिलिपिः। यथाधुना कश्चिच्छात्रः पाठितमंशम् एकत्र लिखित्वा हस्ते(नोट्स् कृत्वा) स्थापयति तथा तक्षशिलायां अधीयमानच्छात्रेभ्यः गुरुणा (अथवा अधीयमानच्छात्रेण) निर्मितः कश्चन ग्रन्थः इति।

इदं पुस्तकं विदुषा ब्राह्मणेन चजकपुत्रेण वसिष्ठपुत्रस्य विद्याभ्यासार्थं लिखितमिति ग्रन्थान्तेऽस्ति। सामान्यतः स्वविरचितकृतिषु 'कृतं' अथवा 'विरचितं' इति पदप्रयोगः लभ्यते। अत्र न तथा, अपि तु 'लिखितम्' इत्येवास्ति। अतश्चजकपुत्राख्यः ग्रन्थकर्ता न। केवलं प्रतिलिपिः कृता इत्यभिप्रैति दत्तवर्यः।

टकाओ हयाशि इत्याख्यः विद्वान् १९८५ तमे वत्सरे एनां हस्तप्रतिमाधृत्य संशोधनात्मकं प्रबन्धं समुपस्थाप्य क्रि. श. सप्तमशकीयेयं कृतिरिति अकथयत्।

पश्यन्तु भवन्तः ..! अखण्डभारतस्य पुरुषपुरे (साम्प्रतं पाकिस्थानस्य पेशावराख्ये प्रदेशे) प्राप्ता हस्तप्रतिः इङ्ग्लेण्डदेशस्थबोडिलियन्ग्रन्थालये संरक्ष्यते। तस्य विस्तृतमध्ययनं जपान् देशीयः टकाओ हयाशी अकरोत्। तस्य मार्गनिदेशकः अमेरिकादेशीयः डेविड् पिङ्ग्री। एतस्याः कृतेः प्रकाशनं ऐदम्प्राथम्येन नेदर्लाण्ड्देशस्य ग्रूनिङ्गेन् मध्ये विहितम्। एवम् एतस्याः विशिष्टतायाः प्रकाशनाय बहवः वैदेशिकाः स्वमतिं प्रसारयामासुः। किन्तु भारतीयाः तद्विषये न तथा प्रयत्नमकार्षुरित्येतदाश्चर्यं खेदञ्च जनयति। अतः साम्प्रतमस्त्यस्माकमवसरः। अलोचयन्तु ......!

***********

## भामहकाव्यलक्षणविवेचनम्

✍ **डा. कोम्पेल्लि विनयकुमारः**

संविदध्यापकः, साहित्यविभागः

भामहाचार्यः **'शब्दार्थौ सहितौ काव्यम्'** इति काव्यलक्षणमाह। परमिदमेव काव्यस्य निष्कृष्टं लक्षणं भवितुं नार्हति। अतः भामहाचार्यस्य काव्यलक्षणविषयिणी आलोचनासन्ततिः प्रथमतः विज्ञेया, येन भामहस्य निष्कृष्टं काव्यलक्षणमवगतं भवति। भामहः काव्ये निर्दुष्टतायाः आवश्यकतां मन्यते। काव्ये गर्ह्यमेकमपि पदं न निगद्यम्। कश्चित् विलक्ष्मणा सुतेन दूष्यते तथैव कविरपि विलक्ष्मणा काव्येन दूष्यते। अतः काव्ये दोषः दूरतो वर्जनीयः। यथाह भामहः -

**सर्वथा पदमप्येकं न निगद्यमवद्यवत्।**
**विलक्ष्मणा हि काव्येन दुस्सुतेनेव निन्द्यते**[1]॥ इति॥


ISSN: 2320-740X

किञ्च –

**नाकवित्वमधर्माय व्याधये दण्डनाय वा ।**

**कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः**[2] ।।

इति कथयन् भामहः काव्ये दोषसान्निध्यं कवेः मरणमेव विभावयति । ततश्च उपर्युक्ताभिप्रायद्वयेन स्पष्टीभवति यत् – अदोषौ शब्दार्थौ काव्यमिति । एवं सति निर्दुष्टे शास्त्रकारोच्चरिते वाक्ये तत्प्रतिपाद्ये अर्थे च अदोषौ शब्दार्थाविति लक्षणस्य व्यापनात् अतिप्रसङ्गः । अतः भामहस्य आलोचनानुसारं दलान्तरं संयोज्य काव्यलक्षणं परिष्कर्तव्यम् । भामहः शब्दार्थशरीरात्मकस्य काव्यस्य अलङ्कारं शोभासम्पादकं कथयति । अलङ्कारेण हीनं काव्यं निर्भूषं वनिताननमिव पश्यति । यदाह भामहः –

**रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।**

**न कान्तमपि निर्भूषं विभाति वनिताननम्**[3] ।। इति ।।

तत्रायमलङ्कारः काव्ये कीदृशं स्थानमाक्रामतीति प्रश्ने भामहः – अलङ्कारः काव्यजीवितमिति वा काव्यात्मेति वा यद्यपि मुक्तकण्ठं नोद्घाटयामास, तथापि अलङ्कारातिरिक्तस्य तत्त्वस्य काव्यशोभाधायकत्वेन अनिर्देशात् ध्वनिकाराभिमततत्त्वस्यापि भामहमते अलङ्कारेष्वेव सद्भावात् अलङ्कार एव काव्यस्य प्रधानं तत्त्वमिति वक्तव्यम् ।

किञ्च ध्वन्यनन्तरकालिकेन प्रतीहारेन्दुराजेन उद्भटालङ्कारविवृतौ काव्यजीवितभूतः प्रतीयमानः अर्थः पर्यायोक्त्यादिषु कतिपयालङ्कारेषु अन्तर्भवतीति न्यरूपि। सोऽयं ध्वनेरलङ्कारान्तर्भाववादोऽपि प्राचीनानां भामहादीनां मते अलङ्कारः काव्यात्मा इत्यर्थं यद्यपि सूचयति, तथाऽपि न सर्वेषामलङ्काराणां तादृशी स्थितिरिति, भामहादीनामाचार्याणां मते काव्ये अलङ्कारः आत्मा इति कथनापेक्षया मुख्यं तत्त्वमिति कथनमेव ज्यायः। तत्रापि काव्यशोभासम्पादकः अलङ्कारः किमर्थालङ्कारः ? उत शब्दालङ्कारः ? इत्युक्ते भामहः स्वाशयप्रकटनात् प्राक् स्वपूर्ववर्तिनाम् आलङ्कारिकाणां मतद्वयमित्थं प्रस्तौति -**रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।**

**सुपां तिङाञ्च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्।**

**तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी**[4] ।।इति।।

अयमाशयः । काव्यस्य अलङ्कारकारकः रूपकादिरेवेति केचिदूचुः । परे तु रूपकादिमलङ्कारं बाह्यं मत्वा, सुबन्तानां तिङन्तानाञ्च सुन्दरं सन्निवेशमेव वाचामलङ्कारमाहुः ।

अयं तु भावः । शब्दार्थयुगलात्मके काव्ये शब्दस्य प्रथमोपस्थितिविषयत्वात् अन्तरङ्गत्वम्, अर्थस्य तु अनन्तरोपस्थितिविषयत्वेन बहिरङ्गत्वात् तदुपस्कारकाणां रूपकादीनां बाह्यत्वम् । तथा च अन्तरङ्गाणां शब्दानां सुन्दरसन्निवेश एव अलङ्कारः । एवञ्च काव्ये अनुप्रासादिः शब्दालङ्कार एव मुख्यः,

न तु रूपकादिरिति परेषां मतम् । एवं भामहात् प्राचीनाः केचित् अर्थालङ्कारमेव काव्यमौलिकतत्त्वम्, अपरे च शब्दालङ्कारमेव च मौलिकतत्त्वमकथयन् । परं द्विगुणीकृतसौन्दर्यपक्षपाती भामहः - **शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः** । (काव्यालङ्कारे) इत्युभयविधालङ्कारेऽपि आत्मनः अभीष्टतां दर्शयति । तथा च **अदोषौ सालङ्कारौ शब्दार्थौ काव्यम्** इति भामहमते निष्कृष्टं काव्यलक्षणं पर्यवस्यति । ननु -

**माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः।**
**समासवन्ति भूयांसि न पदानि प्रयुञ्जते॥**
**केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि[5]।**

इति कथयन् भामहः काव्ये माधुर्यौजःप्रसादलक्षणं गुणत्रयमङ्गीकरोति । तथा च भामहकाव्यलक्षणे – अदोषौ सालङ्कारौ इति दलद्वयमिव सगुणाविति दलान्तरमपि विन्यसनीयमेव इति चेत् सत्यम्, ते गुणाः भामहेनापि अङ्गीकृताः । तथाऽपि –

**प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च ।**
**प्रसादस्वभिधानं च यमकं कृतिनां मतम्[6]** ॥

इति कथयता भामहेन ओजःप्रसादयोः यमकालङ्कारनिष्पादने विनियोगो दर्शितः । अपि च गुणसामान्यस्वरूपमपि न किञ्चित् भामहेन निरूपितम्, न वा गुणानाम् अलङ्काराणामिव आवश्यकता क्वापि उद्घाटिता । अतश्च नियततया भामहमतानुसारेण गुणानां काव्यलक्षणघटकतायां प्रमाणं नोपलभ्यते । तस्मात् भामहमते '**अदोषौ सालङ्कारौ सहितौ शब्दार्थौ**' काव्यमित्येव काव्यसामान्यलक्षणं पर्यवस्यति ।

इत्थम् अलङ्कारशास्त्रीयपदार्थानाम् अनिष्पन्नसम्पूर्णस्वरूपे भामहसमये उपर्युक्तलक्षणं सम्पूर्णमेव । परं भामहस्य काव्यलक्षणं तु तदीयाशयपरिज्ञानपूर्वकम् अस्माभिस्सम्पादनीयमेव । किन्तु लक्षणमिदं निष्कृष्टमिति न तेन कण्ठोक्त्या स्पष्टीकृतम् । तथाऽपीदं लक्षणं पश्चात्कालवर्तिनां शब्दार्थोभयपरतया काव्यत्ववादिनां प्राचीनानां नवीनानाञ्च आदर्शप्रायं बभूव । किञ्च अलङ्कारप्राधान्यवादिना सताऽपि भामहेन न प्रतीयमानार्थकृतं सौन्दर्यं काव्याद्बहिष्कृतम्, किन्तु तदपि अलङ्काररूपेणैव दर्शितम् ।

**पण्डितराजेनाप्युक्तं पर्यायोक्तालङ्कारप्रकरणे -**

ध्वनिकारात्प्राचीनैः भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यङ्ग्यादिना न प्रयुक्ता इत्येतावतैव तैः ध्वन्यादयो न स्वीक्रियन्त इत्याधुनिकानां वाचोयुक्तिरयुक्तैव । यतः


ISSN: 2320-740X

समासोक्तिव्याजस्तुत्यप्रस्तुतप्रशंसाद्यलङ्कारनिरूपणेन कियन्तोऽपि गुणीभूतव्यङ्ग्यभेदाः तैरपि निरूपिताः। अपरश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायकुक्षौ निक्षिप्तः इति।(रसगङ्गाधरे)

अतः ध्वनिगुणीभूतादिशब्दव्यवहाराभावेऽपि भामहेनापि अलङ्कारमुखेन तादृशं सौन्दर्यं काव्ये समादृतम्।

**पादटिप्पण्यः**

१. भामहकाव्यलङ्कारे 1 परिच्छेदे-11 कारिका
२. भामहकाव्यलङ्कारे 1 परिच्छेदे -12 कारिका
३. भामहकाव्यलङ्कारे 1 परिच्छेदे -13 कारिका
४. भामहकाव्यलङ्कारे 1 परिच्छेदे -14 कारिका
५. भामहकाव्यलङ्कारे 2 परिच्छेदे -1 कारिका
६. भामहकाव्यलङ्कारे 2 परिच्छेदे -18 कारिका

**********

## संन्यासः

✍ **डा. गणपति वि. हेगडे**
संविदध्यापकः, अद्वैतवेदान्तविभागः

**सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥**

सम् नि उपसर्गद्वयपूर्वक असु क्षेपणे इत्यस्माद्धातोः घञ् प्रत्यये कृते संन्यास इति रूपं सिध्यति। वेदान्तेषु संन्यासः स्तूयते यथा –

**काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।**
**सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥**[1]
**सदन्ने वा कदन्ने वा लोष्टे वा काञ्चने तथा।**
**समबुद्धिर्यस्य शश्वत् स संन्यासीति कीर्तितः।**
**आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते।**
**योगारूढस्य तस्यैव शमः कारणमुच्यते॥**[1] इति।

[1] भगवद्गीता - १८ - २

अत्र शमः इत्युक्ते संन्यास इत्यर्थः । ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासाश्चेति आश्रमचतुष्टयं प्रसिद्धम् । **आश्रमाद् आश्रमान्तरं गच्छेत् , अनाश्रमी न तिष्ठेत** इत्यादिन्यायेन प्रत्येकं जीवः आश्रमादाश्रमान्तरं गच्छेत् । यथोक्तम् –

**एवं वनाश्रमे स्थित्वा तृतीयं भागमात्मनः ।**
**चतुर्थमायुषो भागं संन्यासेन नयेत् क्रमात् ॥** इति ।

कुटीचकाः, बहूदकाः, हंसाः, परमहंसाश्चेति, संन्यासिनः चतुर्विधाः । तत्र स्वपुत्रगृहे भिक्षां चरन्तः त्रिदण्डिनः कुटीचकाः । बहूदकास्तु त्रिदण्डिनः पादुकासनशिखायज्ञोपवीतकौपीनकाषाय-वेषधराः तीर्थान्यटन्तः भैक्ष्यं चरन्तः आत्मतत्त्वं द्रष्टुम् इच्छन्ति । हंसास्तु एकदण्डिनः शिखावर्जं यज्ञोपवीतधराः कमण्डलुपाणयः ग्रामैकरात्रवासिनः कृच्छ्रचान्द्रायणपराः । परमहंसास्तु एकदण्डधराः मुण्डा अयज्ञोपवीतिनः त्यक्तसर्वकर्माणः आत्मनिष्ठा इत्येवं चतुर्विधाः संन्यासिनः । संन्यासाश्रमधर्माः यथोक्ताः –

**सर्वसङ्गपरित्यागो ब्रह्मचर्यसमन्वितः ।**
**जितेन्द्रियत्वमावासे नैकस्मिन् वसतिश्चिरम् ॥**
**अनारम्भस्तथाहारो भिक्षा विप्रे ह्यनिन्दिते ।**
**आत्मज्ञानविवेकश्च तथाह्यात्मावबोधनम् ॥** इति ।

अयं संन्यासः ब्रह्मविद्याप्राप्त्युपयोगितया वेदान्तेषु श्रूयते –

**ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।**
**निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥**[2] इति ।
**मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यन्तमनित्यवस्तुषु ।**
**ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥**[3]

**ब्रह्मसंस्थोऽमृतत्वमेति**[4] **इति** छान्दोग्योपनिषदि ब्रह्मविद्याप्राप्तये संन्यासस्य प्राधान्यं प्रस्तूयते । शङ्कराचार्याः अपि ज्ञानमात्रे सर्वाश्रमाणाम् अधिकारः किन्तु संन्यासनिष्ठैव ब्रह्मविद्या प्राप्यते इति प्रतिपादितवन्तः । ब्रह्मसंस्थः इत्युक्ते ब्रह्मणि परिसमाप्तिः, अनन्यव्यापरतारूपं तन्निष्ठत्वम् अभिधीयते । तच्च त्रयाणाम् आश्रमाणां न सम्भवति । स्वाश्रमविहितकर्मणाम् अननुष्ठाने

---

[1] भगवद्गीता - ५ - ६

[2] भगवद्गीता – ५ - ३

[3] विवेकचूडामणौ - ७७

[4] छान्दोग्योपनिषत् - २- २३ - १


ISSN: 2320-740X

प्रत्यवायश्रवणात् । परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न सम्भवति । तस्मात् मोक्षसामग्र्यां संन्यासस्य प्राधान्यं वर्तते ।

अयं संन्यासः विद्वत्संन्यासः विविदिषासंन्यासश्चेति द्विविधः । आत्मैक्यसाक्षात्कारम् उद्दिश्य तत्साधनानाम् अनुष्ठानार्थं क्रियमाणः कर्मत्यागः विविदिषासंन्यासः । श्रवणाद्यनुष्ठानेन ब्रह्मसाक्षात्कारं प्राप्य तेन सम्पाद्यमानः विद्वत्संन्यासः । याज्ञवल्क्यादिसंन्यासः अस्योदाहरणम् । पुनःप्रकारान्तरेण संन्यासः त्रिविधः । यथा –

**ज्ञानसंन्यासिनः केचिद्वेदसंन्यासिनोऽपरे ।**
**कर्मसंन्यासिनस्त्वन्ये त्रिविधाः परिकीर्तिताः ॥ इति ।**

**ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा**[1]**, यदहरेव विरजेत् तदहरेव प्रवृजेत्**[2] इत्यादिना यस्मिन् आश्रमे वैराग्यप्राप्तिः तस्मिन् एव आश्रमे संन्यासे अधिकारः अभ्युपगम्यते । ननु

**ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।**
**अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यधः ॥**[3]

इत्यादिना ऋणत्रयापकरणं विना साक्षात् संन्यासाश्रमः अभ्युपगन्तुं न शक्यते । यतो हि ऋणत्रयापकरणन्तु गृहस्थाश्रमे एव सम्भवति । किञ्च **त्रयो धर्मस्कन्धाः**[4] इति छान्दोग्योपनिषदि श्रुतत्वात् आश्रमत्रयमेव वर्तते । तस्मात् संन्यासाश्रमः अभ्युपगन्तुं न शक्यते इति जैमिन्याचार्याः आहुः। अत्रोच्यते त्रयो धर्मस्कन्धाः इति वाक्ये यज्ञादिलिङ्गको गृहस्थाश्रमः एकः धर्मस्कन्धः, ब्रह्मचारी च द्वितीयः धर्मस्कन्धः, तप इति वानप्रस्थः तृतीयः धर्मस्कन्धः, श्रुतौ अग्रे श्रूयमाणब्रह्मसंस्थशब्देन संन्यासः अभिधीयते इति । अपि च **तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम्**[5]**, न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः**[6] इत्यादीनि वाक्यानि संन्यासपराणि सन्ति । अतः त्रयो धर्मस्कन्धाः इत्यत्रापि संन्यासविधिः कल्प्यते ।

कर्मसंन्यासस्य विद्योपयोगः कथम् इति चेदुच्यते । यज्ञाद्यपूर्वनिवर्त्यम्, संन्यासापूर्वनिवर्त्यञ्चेति विद्योत्पत्तिप्रतिबन्धकं द्विविधम् । संन्यासापूर्वमपि कर्मवत् विद्यायाम् उपयुज्यते ।

---

[1] परमहंसपरिव्राजकोपनिषत् - १

[2] जाबालोपनिषत् - ४

[3] मनुस्मृतिः

[4] छान्दोग्योपनिषत् - २- २३ - १

[5] ईशावास्योपनिषत् - १

[6] महानारायणोपनिषत्

# मनोरमादिशा जरायाः जरसन्यतरस्याम् इति सूत्रार्थविचारः

✍ डा. प्रमोदभट्टः
अतिथ्यध्यापकः, व्याकरणविभागः

जरायाः जरस् अन्यतरस्यामिति पदच्छेदः । त्रिपदं सूत्रम् । जरायाः इति षष्ठीविभक्त्येकवचनम्, जरस् इति प्रथमाविभक्त्येवचनं विधीयमानम् । अन्यतरस्यामिति सप्तमीविभक्तिप्रतिरूपकमव्ययम् । "अष्टन आ विभक्तौ" इति सूत्रात् विभक्तौ इति अनुवर्तते । "अचि र ऋतः" इति सूत्रात् अचि इति अनुवर्तते । अचि इति विभक्तौ इत्यस्य विशेषणम् । विशेषणत्वात् "यस्मिन् विधिस्तदादावल्ग्रहणे" इति परिभाषया तदादिः इति लभ्यते । एवं च अस्य सूत्रस्यार्थः जराशब्दस्य जरस् वा स्यात् अजादौ विभक्तौ परतः इति फलति । निर्जरसौ इति उदाहरणम् । निर्जर औ इत्यवस्थायां "औ" इति अजादिविभक्तिरस्तीति कृत्वा "जरायाः जरसन्यतरस्याम्" इति सूत्रेण जराशब्दस्य जरसादेशे निर्जरसौ इति रूपं भवति ।

**विभक्तौ इति पदानुवृत्तिः ।**

"जरायाः जरसन्यतरस्याम्" इति सूत्रे तावत् "अष्टन आ विभक्तौ" इति सूत्रात् विभक्तौ इति अनुवृत्य "जराशब्दस्य जरस् स्यात् अजादौ विभक्तौ परतः" इत्यर्थः सम्पद्यते इति अवगतम् । इदानीम् अयं चिन्तनीयः विषयः वर्तते यत् अत्र सूत्रे पूर्वसूत्रात् विभक्तौ इति पदस्य अनुवृत्तिः मास्तु, एवं च सूत्रार्थः भवति जराशब्दस्य जरस्वा स्यादचि इति । शब्दस्वरूपमिति विशेष्यम् अध्याहारात् भवतु । अचि इति शब्दस्वरूपे इत्यस्य विशेषणम् । विशेषणत्वात् तदन्तविध्यपवादतया यस्मिन् विधिरित्यादिन्यायेन तदादिविधिः । एवं च निर्जरसौ इत्यादीनि रूपाणि सिध्यन्त्येव । अतः एवं सिद्धे सूत्रे विभक्तौ इति पदं कुतः प्रयुक्तम् इति चेद् अत्र उत्तरं भवति जरायाः इदमिति विग्रहे जराशब्दस्य षष्ठ्यन्तात् "तस्येदम्" इति तद्धिताण्प्रत्यये सुपः लुकि सति जरा अ इति भवति । इदानीम् अत्रापि जराशब्दस्य अजादिशब्दस्वरूपमस्तीति कृत्वा जरसादेशः प्राप्नोति । ततः जारसमिति अनिष्टं रूपं स्यात् । अतः विभक्तौ इति अनुवृत्तिः आवश्यकी । तदा न कोऽपि दोषः भवितुम् अर्हति । यतो हि अस्य तद्धिताण्प्रत्ययस्य न केनापि सूत्रेण विभक्तिसंज्ञा विहिता इति कृत्वा तद्धिताण्प्रत्यये विभक्तिपरकत्वाभावात् न जरसादेशः भवितुमर्हति ।

**पदाङ्गाधिकारे तस्य च तदन्तस्य च ।**

अत्र इदानीम् एका शङ्का उदेति "जरायाः जरसन्यतरस्याम्" इति सूत्रेण जराशब्दस्य जरस्


ISSN: 2320-740X

आदेशः विहितः अजादौ विभक्तौ परतः। किन्तु निर्जरसौ इत्यत्र जराशब्दः नास्ति। किन्तु निर्जरशब्दः वर्तते। जराशब्दस्य विधीयमानं कार्यं कथं निर्जरशब्दस्य भवितुम् अर्हति इति।

अत्र विषये अयमंशः अवगन्तव्यः अस्ति यत् ' पदाङ्गाधिकारे तस्य च तदन्तरस्य च' इति एका परिभाषा व्याकरणशास्त्रे सुप्रसिद्धा वर्तते। तत्र पदमङ्गं च विशेष्यं विशेषणेन च तदन्तविधिः भवति। तस्याः अयमर्थः विद्यते पदाधिकारे अङ्गाधिकारे विद्यमानेन सूत्रेण यत्किञ्चित् कार्यं विधीयते चेत् तत्कार्यं येन सूत्रेण कार्यं विधीयते तत्सूत्रे यत्पदमुच्चार्य पाणिनिना कार्यं विहितं तत्कार्यं तत्सूत्रे उच्चारितस्य भवति अपि च सूत्रोच्चारितं पदम् अन्ते अस्ति चेदपि तत्पदस्य कार्यं भवति। प्रकृतस्थले "जरायाः जरसन्यतरस्याम्" इति सूत्रम् अङ्गाधिकारे अस्तीति अनेन सूत्रेण जराशब्दस्य जरसादेशः भवतीत्युक्तम्। किन्तु "पदाङ्गाधिकारे तस्य च तदन्तरस्य च" इति परिभाषया अतिजर इत्यत्र जरशब्दः अन्ते वर्तते इति कृत्वा जरशब्दस्य स्थाने जरसादेशः भवति अजादौ प्रत्यये परे। तत्रापि जराशब्दस्यैव जरसादेशः न तु अतिजर इति सम्पूर्णस्य स्थाने। कुतः एवम् इति चेत् सूत्रे केवलजराशब्दः एव निर्दिष्टः अतः "निर्दिश्यमानास्य आदेशाः भवन्ति" इति न्यायेन केवलजरशब्दस्य स्थाने जरसादेशे निर्जरसौ इति भवति रुपम्।

**पूर्वविप्रतिषेधेन इनातोः करणम् इति प्राचीनमतं तत्खण्डनञ्च।**

निर्जरशब्दस्य प्रथमाविभक्तौ निर्जरः, निर्जरसौ निर्जरौ, निर्जरसः निर्जराः इति रूपाणि। द्वितीयाविभक्तौ निर्जरसम्, निर्जरम्, निर्जरसौ, निर्जरौ, निर्जरसः निर्जरान् इति च रूपाणि।

सम्प्रति तृतीयाविभक्त्येकवचनविवक्षायां टाप्रत्यये निर्जर आ इति स्थिते "टाङसिङसामिनात्स्याः" इत्यनेन अदन्तान्ताङ्गात् परेषां टा, ङसि, ङस् प्रत्ययानां स्थाने क्रमात् इन आत् स्य आदेशाः विहिताः सन्ति। अतः टा स्थाने इनादेशः प्राप्तः। अयं (टा) प्रत्ययः अजादिः इति कृत्वा "जरायाः जरसन्यतरस्याम्" इत्यनेन जरसादेशः प्राप्तः वर्तते। एवं स्थितौ "विप्रतिषेधे परं कार्यम्" इत्यनेन परं कार्यं क्रियते। तच्च कार्यम् अत्र जरायाः इति सूत्रविहितं कार्यं जरसादेशकार्यं भवति। इदानीं जरसादेशे निर्जरसा इति रूपम्। जरसभावपक्षे निर्जरेण इति रूपम्। एवमेव पञ्चमीविभक्तौ निर्जरसः निर्जरात् इति द्रष्टव्यम्। एवं षष्ठीविभक्तौ निर्जरसः निर्जरस्य इति। अत्र वृत्तिकारादयः प्राचीनाः अन्यथैव व्याख्यानं करिष्यन्ते। तथा हि तेषां मतम् अत्र निर्जर टा इति स्थिते इदानीं "टाङसिङसामिनात्स्याः" इत्यनेन इनादेशः प्राप्तः, अजादिविभक्तिसत्वात् जरसादेशोऽपि प्राप्तः इति परस्परविरोधे दीक्षितैः परत्वात् जरस् इत्युक्तम्। किन्तु प्राचीनाः पूर्वविप्रतिषेधम् आश्रित्य आदौ इनादेशं कुर्वन्ति। तदा निर्जर इति स्थिते इन इत्यस्य स्थानिवद्भावेन प्रत्ययत्वमाश्रित्य अजादिप्रत्ययपरकत्वात् जरशब्दस्थाने जरसादेशं कृत्वा निर्जरसिन इति रूपं वदन्ति। यद्यपि अत्र

निर्जर टा इत्यवस्थायाम् इनादेशे कृते इदानीं पुनः जरसादेशः न भवति । यतो हि अदन्तमङ्गं टाप्रत्ययञ्च निमित्तीकृत्य आगतः इनादेशः इनादेशत्वेन अजादिविभक्तित्वं सम्पाद्य जरशब्दस्य जरसादेशं प्रति निमित्तं न भवति "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति न्यायाश्रयणात् । एवं च सन्निपातपरिभाषया जरसादेशः कथमपि न भवति खलु इति चेत् एते प्राचीनाः अत्र स्थले सन्निपातपरिभाषायाः अनित्यत्वमाश्रित्य जरसादेशं कृत्वा निर्जरसिन इत्येव रूपं जरसादेशपक्षे इति कथयन्ति । एवमेव पञ्चमीविभक्तौ अपि टाङसीत्यादिना पूर्वविप्रतिषेधेन आदादेशे कृते अजादिविभक्तिपरकत्वात् सन्निपातपरिभाषायाः अनित्यत्वं च आश्रित्य जरसादेशपक्षे निर्जरसादिति रूपं कथयन्ति । एवं च पूर्वविप्रतिषेधेन इनातोः कृतयोः सन्निपातपरिभाषायाः अनित्यताम् आश्रित्य जरसादेशे कृते निर्जरसिन, निर्जरसात् इति रूपं ये प्राचीनाः स्वीकुर्वन्ति तेषां मते षष्ठ्येकवचने निर्जरस्य इत्येकमेव रूपम् । यतो हि षष्ठीविभक्तौ एकवचने निर्जर ङस् इति स्थिते स्यादेशजरसादेशयोः प्राप्तयोः पूर्वविप्रतिषेधेन स्यप्रत्यये इदानीम् अजादिविभक्तिपरकत्वाभावात् जरसादेशः न भवति । तेन निर्जरस्य इत्येकमेव रूपम् । इदानीं अयं प्रश्नः इनातोः विषये एव पूर्वविप्रतिषेधः प्रवर्ततां प्राचीनानां मते, किन्तु स्यविषये आदेशानन्तरमपि अजादिविभक्तिः न सम्भवति अतः स्यविषये विप्रतिषेधे परं कार्यं जरसादेशभावरूपं भवतु । तेन जरसादेशपक्षे निर्जरसः, जरसभावपक्षे निर्जरस्य इति रूपद्वयं सिध्यतु नाम का हानिः इति । तथा वक्तुं तु न शक्यते यतो हि स्यादेशविधिः अपि इनादादेशविधौ एव उपात्तः वर्तते । अतः यथा इनातोः विषये पूर्वविप्रतिषेधः आश्रितः, तथैव स्यविषये अपि अवश्यमेव पूर्वविप्रतिषेधः आश्रयणीयः एव इति प्राचीनानाम् आशयः विद्यते ।

एवं च निर्जरशब्दस्य षष्ठीविभक्तौ निर्जरस्य इति एकमेव रूपस्वीकारात् "वीतजन्मजरसः परं शुचि ब्रह्मणः पदमुपैतुमिच्छताम्" इति भारविश्लोके वीतजन्मजरस्य भाव्यमिति भारविप्रयोगः न सम्यगिति उक्त्वा वीतजन्मजरसः इति न किन्तु वीतजन्मरजसः पठनीयमिति प्राचीनैः उक्तम् । किन्तु दीक्षितस्य मते षष्ठ्यामपि जरसादेशः भवति, भारविप्रयोगः सम्यगेव उपपद्यते ।

एवं च एतावता प्रबन्धेन प्राचीनैः यदुक्तं तत्तु न सम्यगिति ग्रन्थकारः प्राचीनमतं खण्डयितुम् उपक्रमते भाष्योक्तयुक्त्युक्त्या ।

तथा हि भाष्यकारैः "टाङसिङसामिनात्स्याः" इति सूत्रे इनातोः प्रत्याख्यानं कृत्वा नादेशः अदादेशश्च विहितः वर्तते । यदि नादेशः अदादेशश्च प्रत्याख्यातः तर्हि रामेण, रामादित्यादि रूपं कथं सिध्यति इति चेत् तैः उपायान्तरमाश्रितं वर्तते एतेषां रूपाणां साधनाय ।

तथा हि टा-ङसि-ङसां न-अत्-स्याः इत्येव सूत्रम् । “बहुवचने झल्येत्” “ओसि च” “आङि चापः” “सम्बुद्धौ च” इति सूत्रक्रमः अष्टाध्याय्यां सप्तमाध्याये तृतीयपादे पठ्यते । “आङि चापः” इत्यत्र योगविभागः क्रियते आङि इति । ततः चापः सम्बुद्धौ च इति । आङ् इति टा संज्ञा प्राचाम् । “अतो दीर्घो यञि” इति सूत्रात् अतः इति षष्ठ्यन्तमनुवर्तते, “बहुवचने झल्येत्” इति सूत्रात् एदिति प्रथमान्तम् अनुवर्तते एवं च “आङि” इति सूत्रार्थः फलति आङि परे अतः एत्वं स्यादिति । ततः “चापः सम्बुद्धौ” इति सूत्रम् । अत्र आपः इति षष्ठ्येकवचनम् । “बहुवचने झल्येत्” इत्यतः एदित्यनुवर्तते “आङि” इत्यपि अनुवर्तते । एवञ्च “आपः सम्बुद्धौ च” इत्यस्यार्थः फलति -एकारः स्यात् आङि सम्बुद्धौ च इति । राम टा इति स्थिते “टा-ङसि-ङसां न-अत्-स्याः” इत्यनेन आङः न इति आदेशः राम न इति जाते “आङि” इति सूत्रेण अदन्ताङ्गस्य एकारः विधीयते ततः णत्वे रामेण इति रूपं सिध्यति । हे रमे, इत्यत्र सम्बुद्धौ हे रमा स् इति स्थिते “आपः सम्बुद्धौ च” इत्यनेन सम्बुद्धौ परतः आपः एकारे “एङ्ह्रस्वात्सम्बुद्धेः” इत्यनेन सुलोपे रमे इति रूपम् । रमया इत्यत्रापि रमा आ इति स्थिते “आपः सम्बुद्धौच” इत्यनेन आङि परे आपः एकारे अयादेशे च रमया इति रूपं सिध्यति ।

इदानीम् अत्र रामेण इत्यादिरूपाणि योगविभागेन साधितानि चेदपि अनेन इत्यत्र “हलि लोपः” इत्यनेन लोपः स्यात् खलु इति चेन्न । अनादेशस्य नकारे परे विशिष्यविधानात् न भवति “हलि लोपः” । तथा हि इदं शब्दात् तृतीयैकवचने इदम् आ इति स्थिते त्यदाद्यत्वं पररूपत्वम् । इद इत्यस्य “अनाप्यकः” इत्यनेन अन् आदेशे अन आ इति जाते टाङसीति सम्प्रति श्रूयमाणसूत्रेण इनादेशे गुणे च अनेन इति रूपम् । अत्र इद टा इत्यवस्थायां “न” आदेशः इति पक्षे नादेशे कृते इद न इत्यवस्थायाम् इदानीं न इति हलादिविभक्तिसत्वात् अककारस्य इदमः इदः लोपः स्यात् आपि हलादौ इत्यर्थकेन “हलि लोपः” इत्यनेन इद इत्यस्य लोपः प्रयुक्तः । किन्तु “अनाप्यकः” इति सूत्रेण अत्र इद इत्यस्य अन् इत्यादेशः एव भवति । तथा हि “अ नापि अकः” इति सूत्रम् । अस्यार्थः भवति अककारस्य इदमः इदः नकारे आपि च परे अन् स्यादिति । प्रकृते इद न इत्यत्र नकारः परे अस्ति अतः इद इत्यस्य अन् भवति अनेन इति रूपं सिद्ध्यति । “अ नापि अकः” इत्यत्र अ इति नपुंसकस्य अन् इत्यस्य “नलोपः प्रातिपदिकान्तस्य” इत्यनेन नलोपेन निर्देशः भवति ।

अकारान्तस्थले पञ्चम्येकवचने तावत् राम अस् इत्यवस्थायां यदि टाङसीत्यादिसूत्रेण ङसः स्थाने अदादेशः इति उच्यते तर्हि “अतो गुणे” इत्यनेन पररूपं स्यात् खलु इति चेत् टाङसीति सूत्रे अदित्यकारोच्चारणसामर्थ्यादेव सवर्णदीर्घः भवतीति वक्तव्यम् । अन्यथा यदि अकारमुक्त्वा पररूपमेव भवतीति उच्यते तदा केवलं दकारमेव वदेत् भाष्यकारः । अतः अकारोच्चारणसामर्थ्यात् अकारान्तप्रातिपदिकस्थले सवर्णदीर्घः एव भवतीति तेन रामाद् इत्यादीनि रूपाणि सिध्यन्ति । एवञ्च

जराशब्दविषये पूर्वविप्रतिषेधः क्रियते चेत् इदानीम् अजादिप्रत्ययत्वाभावात् जरसादेशः न प्राप्नोत्येव इति पूर्वविप्रतिषेधे प्राचीनानामेव दोषः। अपि च प्राचीनमतम् उदाहरणान्तरप्रदर्शनेनापि खण्डयति। गोनर्दीयस्तु आह इत्यादिना। तथा हि "जराया जरसन्यतरस्याम्" इति सूत्रे भाष्यकारः गोनर्दीयस्त्वाह अतिजरैः इति भवितव्यं सन्निपातपरिभाषया इत्युक्तवान्। अत्र अतिजर भिस् इति स्थिते "अतो भिसः ऐस्" इत्यनेन भिसः स्थाने ऐस् इत्यादेशे अतिजर ऐस् इति स्थिते इदानीं स्थानिवद्भावेन ऐसादेशे प्रत्ययत्वं स्थानिवद्भावेन आनीयते चेत् अजादिविभक्तिसत्वात् जरसादेशः स्यात् तेन अतिजरसैः इति वदेत्। अतिजरैः भवितव्यम् इति वक्तुः गोनर्दीयस्य अयमाशयः अतिजर भिस् इति स्थिते अदन्तमङ्गम् एवं भिस्प्रत्ययं च निमित्तीकृत्य आगतः ऐसादेशः अजादिप्रत्ययत्वसम्पादनद्वारा अदन्ताङ्गविघातकजरसादेशं प्रति निमित्तं न भवतीति। यदि जरसादेशः स्यात् अदन्ताङ्गं विनश्येत्। अतः अत्र जरसादेशविषये सन्निपातपरिभाषायाः अनित्यत्वम् अस्तीति भाष्यकारस्यापि तात्पर्यमस्ति। एवञ्च एतावता प्रबन्धेन प्राचीनैः यद्रूपं स्वीकृतम् अतिजरसिन इत्यादि सन्निपातपरिभाषायाः अनित्यत्वं स्वीकृत्य तत्सर्वं भाष्यविरुद्धत्वात् त्याज्यमेव।

**********

## अधिगमस्य प्रकाराः

✍ **डा. नारायण वैद्यः**

अतिथ्यध्यापकः, शिक्षाविभागः

अधिगमः अनुभवजन्यः इति जीवसाधारणस्यानुभवः। तच्चाधिगमः चतुर्विधः। भौतिकाधिगमः, संज्ञानात्मकाधिगमः, चलनात्मककौशलाधिगमः, मनोवृत्यात्मकाधिगमश्चेति। अग्रे एतेषां विवरणं क्रमशः वक्ष्यते -

### भौतिकाधिगमः

अधिगमः केवलं मनसः सम्बद्धः नास्ति, अपि तु देहेन सह अपि सम्बद्धः वर्तते। प्रकृतिसहजाधिगमाय भौतिकाधिगमस्य आवश्यकता विद्यते। दैहिकाधिगमोऽपि अनुभवाज्ञायते। तन्नाम भौतिकक्रियाकलापेषु परिवर्तितानुभवेन उत्पन्नः शाश्वतप्रवृत्तिः एव भौतिकाधिगमः। यतोहि कायस्य अवयवानां क्रियाः परिवर्त्यन्ते। तदपि अनुभवाज्ञातं सापेक्षितञ्च।

तदत्र उदाहरणम् उपरितनचिन्तनं प्रमाणयति। यथा इदमिदानीं जातः शिशुः न चलति। एकवर्षानन्तरम् अवयवाः धावनाय सिद्धाः भवन्ति। तथापि ज्येष्ठाः कथं धावनं करणीयमिति अभ्यासं


ISSN: 2320-740X

कारयन्ति । तथैव कश्चित् सर्कस् समये स्वीयाङ्गान् विविधशैल्या भ्रामयति । तथा तस्य अवयवेषु परिवर्तनाय कारणं निरन्तराभ्यासः एव । तथैव तादृशक्रियाः तस्मिन् शाश्वताः भवन्ति । एवं विद्यालयेषु योगासनं, क्रीडाः, व्यायामः इत्यादीनाम् अधिगमाय भौतिकाधिगमस्य आवश्यकता विद्यते । नूतनवातावरणेन सह देहस्य सम्बन्धस्थापनाय निरन्तराभ्यासस्य आवश्यकता वरीवर्ति । एतच्च अवयवाः मांसखण्डानां साहाय्येन अवगमनात्मकाधिगमः अस्ति । अयं क्रियात्मकाधिगमः इत्यपि प्रसिद्धम् ।

**संज्ञानात्मकाधिगमः**

भौतिकाधिगमस्य सम्बन्धः देहेन सह वर्तते तथा एव संज्ञानात्मकाधिगमस्य संम्बन्धः बुद्धिशक्त्या सह अस्ति । संज्ञानात्मकाधिगमे अनुभवजन्यज्ञानस्य आन्तरिकावलोकनस्य च प्राधान्यं वरीवर्ति । कुत इति चेत् रटनापेक्षया अनुभवजन्यज्ञानं व्यक्तौ चिरकालं तिष्ठति । तस्मात् ईदृशाधिगमस्य महत्त्वं विद्यते । किञ्च एतादृशाधिगमः जीवस्य कृते कालान्तरेऽपि साहाय्यं करोति । अत्र जीवस्य स्वीयं किमपि उद्देश्यं भवति । उद्देश्यप्राप्त्यै नैकविधप्रयासं करोति जीवः । तदा अनुभूयमानजयापजयेन जीवस्य नूतनानुभवः प्राप्यते । येन उद्देश्यप्राप्त्युपायः लभ्यते ।

एकम् उदाहरणमत्रावलोकयामः - सस्यस्य विकासाय प्राणिजन्यवस्तूनि अपेक्षन्ते । प्राणिनः बुभुक्षाशमनाय सस्यम् अदन्ति । अनेन प्राणिसस्ययोः परस्परावलम्बनं विद्यते इति विषयं बालकाः यदा अवगच्छन्ति तदा विषयोऽयं बालकानां मनसि चिरं तिष्ठति । यतो हि इयं अनुभवजन्या प्रक्रिया वर्तते । अतः ईदृशाधिगमः संज्ञानात्मकाधिगमः इति वक्तुं शक्यते ।

**क्रियाकौशलात्मकाधिगमः**

क्रियाकौशलात्मकाधिगमः भौतिकबौद्धिकयोः संबन्धेन घटते । कौशलात्मकाधिगमे आदौ ज्ञानस्य अथवा परिणतेः आवश्यकता भवति । प्राप्तज्ञानं समुचितरीत्या सानुभवं अधिगमप्राप्तिः क्रियाकौशलात्मकाधिगमनाम्ना कीर्त्यते । वीक्षणेन निदर्शनेन च कौशलं सम्यक् अध्येतुं शक्यते । ईदृशाधिगमः शैक्षिकानुभवयुक्तमपि भवति । प्रतिदिनं नैकविधांशान् अधिगच्छामः । तथाधिगमसन्दर्भे विविधकौशलानि उपयुज्यन्ते । अत्र तन्त्राणां महत्त्वं विद्यते ।

तदत्र उदाहरणं पश्यामः -

1. **सम्पर्ककौशलम्** अभिनयः, भाषणम्, कथनम्, श्रवणम् ।
2. **क्रीडाकौशलम्** का क्रीडा क्रीडनीया ? कथं क्रीडनीया ? विजयप्राप्त्यै उत्तमतन्त्राणाम् उपयोगस्य अधिगमः ।

3. **प्रयोगशाला कौशलम्** प्रयोगशाला उपकरणानां प्रयोगस्य कौशलाधिगमः।

**मनोवृत्तीनामधिगमः**

कोऽयं मनोवृत्त्यधिगमः इति चेत् संवेदनात्मकवस्तुना युक्तमनोवृत्तिः अथवा मनसः भावनाः मनोवृत्तयः इत्यभिधीयन्ते । एतस्य संबन्धः बुद्धिशक्त्या सह वर्तते । **निर्दिष्टवस्तुं प्रति जीवस्य अनुक्रियया निर्दिष्टः अथवा चलनशीलप्रभावशक्त्यनुभवेन एकत्रितः मनसः नरमण्डलस्य च सन्नाहः एव मनोवृत्तयः इति** आल्पोर्ट् कथयति । जन्मतः मनोवृत्तिः विकसति । अयञ्च मनोवृत्तिः अनुभवेन फलितः भवति । प्रत्येकं जीवस्यापि सामाजिकः, धार्मिकः, राजकीयः च मनोवृत्तयः भवन्ति । एवं मनोभावनाः अनुभवेन फलितः भूत्वा यच्चाधिगमः जायते तदेव मनोवृत्त्यधिगमः इति वक्तुं शक्यते। बालकाः प्रतिदिनं परितः समाजे गोचर्यमाणवीक्षणं, मित्राणां, ज्येष्ठानां च अनुकरणं, अज्ञानेन सम्पद्यमानः अभिजातः क्रियाजन्यसोपादिताधिगमः इत्यादिभ्यः सामान्यमनोभावनाः अथवा मनोवृत्तयः विकसन्ति । शिक्षणेन अस्माकम् इच्छानुसारं मनोभावनाः परिवर्तयितुं शक्यन्ते । यथा - बालकाः अस्माकं देशः जात्यतीतराष्ट्रमिति बोधनीयाः । पुनश्च राष्ट्रगीतस्य राष्ट्रध्वजस्य च विषये बाल्यावस्थायां जागरणमुत्पादनीयम् । वयं सर्वे भारतीयाः इति वक्तव्यम् । अनेन बालकेषु राष्ट्रियभावैक्यताविषये मनोवृत्तिः उत्पद्यते।

**सन्दर्भग्रन्थसूची –**

1. **उच्च शिक्षा मनोविज्ञान –** डा. आर्. पी. पाठक, राधा पब्लिकेशन्स्, नई दिल्ली -०२,
2. **शिक्षा मनोविज्ञान –**डा. रामशकल पाण्डेय, आर्. लाल्. बुक्. डिपो, मेरठ – ०३.
3. **Psychology of Teaching Learning Process- B. D. Damral,** Radhakrishna Anand & Co. Pacca Danga, Jammu -01, ISBN-81-88256-11-0
4. **Advanced Educational Psychology- Ramanath Sharma & R. K. Sharma,** Atlantic Pub. & Distributors, B-2, Vishal Enclave, New Delhi – 27
5. **Psychology of Learning of Development-J. C. Aggarwal,** Shipra Publications, 115-A, Vikas Marg, Shakarpur, Delhi-92

**********

# "सुट् कात् पूर्वः" एकान्तः अनेकान्तो वा

✍ विदुषी एल्. सविता आर्या
अतिथ्यध्यापिका, व्याकरणविभागः

पाणिनीये शब्दानुशासने षाष्ठिकमिदं सूत्रं "सुट् कात् पूर्व[1]" इति पाणिनिना प्रतिष्ठितम् । अधिकारोऽयं प्रकृतसूत्रात् "पारस्करप्रभृतीनि च संज्ञायाम्"[2] इति यावत् । इत उत्तरं यद् वक्ष्यामस्तत्र 'सुट्' इति 'कात् पूर्व' इति च एतदधिकृतं वेदितव्यम् । वक्ष्यति- "सम्परिभ्यां करोतौ भूषणे" , "समवाये च", "उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु" । संस्कर्ता संस्कर्तुम् संस्कर्तव्यम् इति । ननु सुटि समुचितटित्त्वलिङ्गोपपादितत्वेन स्वयमेव तदाद्यवयवत्वे गम्यमानेऽपि सूत्रकारेण कात्पूर्वग्रहणं किमर्थं कृतमिति चेत् , कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थम् ।

यदि कात्पूर्वग्रहणं न क्रियते 'सञ्चस्कार' अत्र दोषः स्यात् । सुटः कात्पूर्वमेव इति तु नियमः न भवति, क्वचित्तर्हि द्वित्वे कृते द्वित्वानन्तरं कृतद्वित्वात् पूर्वं सुट् स्यात् 'संस्चकार' इति प्रसज्येत । "पूर्वं धातुः उपसर्गेण युज्यते पश्चात् साधनेन" इति पक्षे पूर्वं धातुः उपसर्गनिमित्तककार्येण युज्यते तत्पश्चात् साधननिमित्तककार्येण युज्यते इत्यर्थस्वीकारेण "सम्परिभ्यां करोतौ भूषणे[3]" इति सुड्विहितत्वात् उपसर्गनिमित्तककार्यं सुट् । साधनं-कारकं-कारकबोधकप्रत्ययः । लिडादिप्रत्ययनिमित्तकत्वेन द्वित्वप्रवृत्तिदर्शनात् साधननिमित्तककार्यं द्वित्वम् । ततः पूर्वं धातुः उपसर्गनिमित्तकसुट्कार्येण युज्यते पश्चात् साधननिमित्तकद्वित्वादिकार्येण इत्येवं कात्पूर्वग्रहणमनावश्यकमिति दीक्षितादयः ।

यद्येवं 'संस्कृषीष्ट' इत्यादौ कात्पूर्वग्रहणाभावात् सुटः तद्भक्तत्वात् धातोः संयोगादित्वं स्यात् , ततश्च "ऋतश्च संयोगादेर्गुणः[4]" ऋकारान्तात् संयोगादेर्धातोरुत्तरयोरिडागमो वा स्यादात्मनेपदेषु परतः, परतः, इति इडागमप्रसङ्गः । 'संस्क्रियत' इत्यादौ हि "गुणोर्त्तिसंयोगाद्योः[5]" अर्त्तेः संयोगादेरुकारान्तस्य च गुणः स्याद्यकि लिङि यकारादावसार्वधातुके च परतः इति गुणप्रसङ्गः । तदेवं "ऋतश्च संयोगादेर्गुणः" अत्र सूत्रे पूर्वसूत्रात् उपदेशग्रहणमनुवर्त्य उपदेशे यः संयोगादिः इति, औपदेशिकसंयोगादिधातुत्ववतः परस्य इडागमः स्यात् इति वचनेन 'संस्कृषीष्ट' अत्र इडागमप्रसक्तिरूपदोषो वारितः । "गुणोर्त्तिसंयोगाद्योः" इत्यत्र 'नित्यं छन्दसि' इत्यतः

---

[1] पा. अष्टा. सू. (6.1.135)

[2] पा. अष्टा. सू. (6.1.169)

[3] पा. अष्टा. सू. (6.1.137)

[4] पा. अष्टा. सू. (7.2.43)

[5] पा. अष्टा. सू. (7.4.29)

नित्यमित्यनुवर्तनेन नित्यं यः संयोगादिः इत्यर्थस्वीकारात् सुट्सहितस्य नित्यसंयोगादित्वाभावात् इडागमोऽप्यप्रसक्त इत्यतः कात्पूर्वग्रहणं प्रत्याख्यातं कैयटेन । नागेशोऽपि कात्पूर्वग्रहणं कालावधारणार्थम् इति बृहच्छब्देन्दुशेखरे व्याख्याय पुनः प्रत्याख्यानपक्षं भाष्यकृन्मतमेव समर्थयामास।

अस्तु तावत् । पूर्वं धातुः उपसर्गेण युज्यते इति चेत् 'प्रत्ययः' इत्यादि निर्देशः अशक्यः । उपसर्गनिमित्तककार्यस्य सवर्णदीर्घस्य पूर्वप्रवृत्तौ सत्यां गुणे अयादेशे च 'प्रतयः' इति स्यात् । अतः भाष्ये पक्षममुमुपस्थाप्य नैतत्सारः इति भाष्यकारः। किं तर्हि ? पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण इति सिद्धान्तितम् । पूर्वं धातुः साधननिमित्तककार्येण युज्यते चेत् प्रथमं गुणे अयादेशे च कृते यणादेशे च 'प्रत्ययः' इति न दोषः।

ननु साधनं-कारकम् । कारकबोधकप्रत्ययः कर्तरि विहितः कर्मणि विहितो वा इति पूर्वमभिहितम् । एवञ्च प्रत्येति अर्थं गमयतीति प्रत्ययः अत्र कर्तरि विहितत्वात् पूर्वं धातुः साधनेन – कर्त्रर्थे विहितप्रत्ययेन युज्यत इति बोधः । यदीह प्रत्ययनं प्रत्ययः भावे विहितश्चेत् भावः न साधनमतः पूर्वं साधनेन युज्यते इत्युक्तिरत्र न सङ्गच्छते । प्रतयः इत्येव स्यात् न तु प्रत्ययः।

तस्माद्धि साधनमित्युपलक्षणं भावार्थकप्रत्ययस्यापि इत्येवं न दोषापत्तिप्रसङ्गः[1]।

यत्तु पूर्वं धातुः उपसर्गेण इत्येवं वदन्ति, नियमस्य क्वचिद् व्यभिचारः इति तेषां तात्पर्यम्। यद्येवं तर्हि क्व पूर्वं साधनेन क्व च पूर्वं धातुरुपसर्गेण इति विनिगमनाभावात् भवत्पक्षे पूर्वं धातुरुपसर्गेण इत्यस्य एवमर्थस्वीकारो वरम् यत् उपसर्गेण युज्यते उपसर्गार्थान्तर्भाविण धातोः वृत्तिः साधननिमित्तककार्येण युज्यते इत्येवमर्थस्वीकारे नार्थगौरवं स्यात् । अथवा पूर्वं धातुः साधनेन युज्यते पश्चात् उपसर्गेण इत्येव सिद्धान्तः , अत्रैव भाष्यस्वारस्यमपि । तदेवं सिद्धान्तपक्षे पूर्वं धातुः साधनेन युज्यते इत्युक्तम्, तथा च कात्पूर्वग्रहणमपि प्रत्याख्यातम् इत्यतः साधननिमित्तकद्वित्वकार्यं पूर्वं प्राप्तं भवति । कात्पूर्वग्रहणमपि नास्ति अतः ,संस्चकार, स्यादिति दोषापत्तिः । कथं 'सञ्चस्कार' इति।

सत्यमेतत् , द्विर्वचनं नाम किम् ? स्थाने द्विर्वचनमुत द्विःप्रयोगः? द्विःप्रयोगो द्विर्वचनं षाष्ठम्। धातुत्वं हि प्रत्ययाव्यवहितपूर्वत्वविशिष्टोऽयं धर्मः; कृ-लिट् अत्र द्विःप्रयोग इति वचनेन आगन्तूनामन्ते निवेश इति न्यायात् प्रत्ययाव्यवहितपूर्वत्ववैशिष्ट्येन यस्य मुख्यं धातुत्वं ततोऽपि पूर्वं निवेशः द्विःप्रयोगस्य । यद्यपि एकवृन्तस्थितफलद्वयवत् उभयोरपि पृथक्-पृथक् धातुत्वं अस्ति "हेरचङि" 'अजीहयत्' इति ज्ञापकात् तथापि प्रत्ययाव्यवहितप्राग्वर्तिनः एव सोऽयमिति प्रत्यभिज्ञा भवति अतः तस्यैव मुख्यं धातुत्वम् । सम्भवति मुख्ये गौणस्याग्रहणात् मुख्ये एव आद्यवयवत्वेन सुडागमः । "शर्पूर्वाः

---

[1] अष्टा. सूत्रम् (6.)


ISSN: 2320-740X

खयः” इति सूत्रप्रवृत्त्यवसरे वस्तुतस्तु तद्गुणसंविज्ञानमिति सिद्धान्तः किन्तु कात्पूर्व-अग्रहणपक्षे अत्र अतद्गुणसंविज्ञानबहुव्रीहिराश्रयणीयः। तेन कात्पूर्वग्रहणपक्षोऽपि न दोषभाक् , “पूर्वं साधनेन युज्यते” इति पक्षेऽपि न दोषप्रसक्तिः। ‘सञ्चस्कार’ इति लिटि साधुः।

अथ च यद्यपि सिद्धान्ते कात्पूर्वग्रहणं प्रत्याख्यातमथापि सूत्रकारेण कृतमेव कात्पूर्वग्रहणं **सुट् कात् पूर्वः** इति सूत्रे इत्यतः अनवयवीभूय सुट् कात्पूर्वो भवतु इत्याशयः सूत्रकारस्य। स्थितस्य गतिश्चिन्तनीया इत्युक्तत्वात् कात्पूर्वग्रहणेन सुट् तदनवयव इति वक्तव्यम्।

अतएव कात्पूर्वग्रहणप्रत्याख्यानापरपक्षे कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थमिति काशिका। स च सुट् ‘संस्कुरुते’ इत्यादौ “तिङ्ङतिङः[1]” इति अतिङन्तात् पदात् परं तिङन्तं निहन्यते इति सूत्रेण विहितनिघातः सुटः अभक्तत्वात् तद्व्यवधानाद्यद्यपि न प्राप्नोति तथापि **स्वरविधौ व्यञ्जनमविद्यमानवद्**[2] इति वचनात् व्यञ्जनभूतोऽयं सुटः सकारः असन्नेव भूत्वा निघातत्वं न निवारयति अपितु अवश्यं निघातः भवत्येव।

वस्तुतस्तु वार्तिकमिदं भाष्ये प्रत्याख्यातम्। केचित्तु स्वरविधौ इत्यत्र स्वरकर्मकविधौ इत्येवमर्थग्रहेण “तिङ्ङतिङः” इत्यादि स्वरकर्मकविधिषु परिभाषेयं प्रवर्तत इति। अन्ये तु स्वरोद्देश्यकविधौ इत्येवम् अर्थं गृह्णन्ति। स्वरोद्देश्यकविधिर्यथा – “अनुदात्तादेरञ्[3]” ‘मायूरः’ इति “उदात्तादनुदात्तस्य स्वरितः[4]” , “उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य[5]” इत्यादि। ननु “अनुदात्तादेरञ्” सूत्रेण विधीयमानोऽयमञ् प्रत्ययः ‘औदुम्बरवतम्’ , ‘आम्रवतम्’ इत्यादावेव स्यात्। न तु कापोतं मायूरमित्यादौ। स्वरकर्मकविधौ इयं परिभाषा इति चेत् मयूरादीनां घृतादिगणपठितत्वात्तस्यान्तोदात्तता। अतः मयूरशब्दः न अनुदात्तादिरिति। अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोति , हलादित्वेन अनुदात्तादित्वाभावात्। उदात्तादिधर्माः स्वभावतः अज्निष्ठाः, न तु हल्निष्ठाः, मयूरशब्दोऽयं हलादिः न तु अजादिः। कथमनुदात्तादित्वं स्यात् , मकारोत्तरवर्त्ती अकारः अनुदात्तः। अनुदात्तादित्वाभावात् “अनुदात्तादेरञ्” इत्यञ्सिद्धिः ‘मायूर’ इति कथम् ? अतः स्वरोद्देश्यकविधौ व्यञ्जनमविद्यमानवत् इति पक्षाश्रयणेन मयूरशब्दे अनुदात्ताकारपूर्ववर्तिनः व्यञ्जनधर्मनिष्ठमकारस्य अविद्यमानवत्वे अकारस्य अनुदात्तादित्वात् अञ्

---

[1] पा.अष्टा. सू. (8.1.28)

[2] परिभाषा ७१

[3] पा. अष्टा. सू. (४.२.४२)

[4] पा. आष्टा. सू.(८.४.६६)

[5] पा. आष्टा. सू.(८.२.४)

सिद्ध्यति । "नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु[1]" इति सूत्रे पृथिव्यादिपर्युदासोऽस्य ज्ञापकः । अन्यथा पृथिव्यादीनामनुदात्तादित्वाभावादप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव । अत्र ज्ञापकमाह – "नोत्तरपदे... इत्यादिसूत्रं "देवताद्वन्द्वे च" इत्यनेनोभयोर्युगपत् प्रकृतिस्वरे प्राप्ते तन्निषेधकम् । पृथिव्यादिभिन्नेऽनुदात्तादावुत्तरपदे युगपत् प्रकृत्या नेति । इन्द्राग्निभ्यामित्यादिकमुदाहरणम् । यदीयं परिभाषा न स्यात्तर्हि पृथिव्यादीनां व्यञ्जनादित्वात् अनुदात्तादित्वाभावेन निषेधाप्राप्तौ द्यावापृथिव्यादौ "देवताद्वन्द्वे च" इति पूर्वसूत्रेण पूर्वोत्तरपदयोः प्रकृतिस्वरेणेष्टसिद्धौ निषेधाभावाय कृतः पृथिव्यादिपर्युदासो व्यर्थस्सन् प्रकृतपरिभाषां ज्ञापयति । पृथिव्यादिभिन्नानुदात्ताद्युत्तरपदे विधीयमानस्य स्वरनिषेधस्य स्वरोद्देश्यकविधित्वेन तत्कर्मकविधित्वाभावात् तत्रत्यपृथिव्यादिपर्युदासेन ज्ञापिताया अस्याः परिभाषाया अपि स्वरोद्देश्यकविधिविषयत्वं न्याय्यम् । तस्मात् स्वरोद्देश्यकविधावियमिति परिभाषेन्दुशेखरादौ प्रपञ्चितम् ।

अन्ततो गत्वा भाष्यकारेणेयं परिभाषा एव प्रत्याख्याता । कथं तर्हि मयूरादिषु व्यञ्जनस्याविद्यमानवत्त्वाभावात् अनुदात्तादित्वानुपलभ्यमानत्वात् "अनुदात्तादेरञ्" सिद्ध्यति इत्यापत्तिरिति चेत् मकारोत्तरवर्तिनः अकारस्यानुदात्तता प्रसिद्धा एव गणपठितत्वात् । अनुदात्तत्वादीनामज्धर्मत्वादजुपरागेण व्यञ्जनेषु तद्धर्मो भासत एवेति व्यञ्जनानामविद्यमानवद्भावस्यावश्यकता नास्तीति कैयटाशयः । तद् अकारस्यानुदात्तत्वे तत्समीपस्थो हल् अपि तद्धर्मरूषितो भवति । अतः अज्धर्मनिष्ठानुदात्तता तद्धर्मरूषितत्वात् हलि मकारेऽपि आरोप्यते । तेन हि मयूरशब्दस्यानुदात्तादित्वं सिद्धं , न दोषापत्तिः ।

तत्र "उच्चैरुदात्तः[2]" सूत्रे "**अथ प्रथमानिर्दिष्टमज्ग्रहणमनुवर्तते , उताहो न**" इति भाष्यव्याख्यायाम् "ननु को विशेषः ? यावता यत्र स्वरो विधीयते तत्र व्यञ्जनस्याविद्यमानत्वादच एव भविष्यति । "अनुदात्तादेरञ्" इत्यनुवादेऽपि न दोषः । स्वत एव हलोऽनुदात्तत्वं भवतु , अजुपरागवशाद् वा । तदनुवादेन कार्यविधाने न कश्चिद्विशेषः । एवं तर्हि न्यायव्युत्पादनार्थ एवायं विचारः" इति कैयटेनोक्तम् । अनेन ग्रन्थेन प्रकृतपरिभाषायाः अनावश्यकत्वं स्पष्टम् । ननु उदात्तत्वविशिष्टाजुपरागवशाद् व्यञ्जनस्योदात्तादिवदवभासेऽपि वास्तविकोदात्तादिशब्दैस्तेषां ग्रहणं न भवतीत्यत आह मूले तत्र भाष्येऽपि ध्वनितमेतत् इति । तत्र हि "नैते व्यञ्जनस्य गुणाः , किन्त्वच एव । तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते । तद्यथा द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते" इत्यादिना उदात्तत्वादीनामज्धर्मवत्त्वम्, व्यञ्जनेषु सामीप्यादवभासमात्रमिति

---

[1] पा. आष्टा. सू.(६.२.१४२)

[2] पा. आष्टा. सू.(१.२.२९)


ISSN: 2320-740X

व्यवस्थाप्य स्वरोद्देश्यकस्य "अनुदात्तादेरञ्" इत्यादेः व्यञ्जनादौ व्यञ्जनान्ते च प्रवृत्तौ न कश्चिदुपायः प्रदर्शितः । तेन अजुपरागवशात् प्रातिभासिकोदात्तत्वादिधर्मवतां व्यञ्जनानामुदात्तादिशब्दैर्ग्रहणं भवतीति सूच्यते।

यद्येवं , "स्वरविधौ व्यञ्जनमविद्यमानवद् भवति" इति परिभाषा एव प्रत्याख्याता चेत् **सुट् कात् पूर्वः** इति सूत्रे कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थमिति पक्षे संस्कुरुते, इत्यादौ सुटा व्यवहितत्वात् "तिङ्ङतिङः[1]" निघातानापत्तिरूपदोषः कथं वार्येत इति चेत् अत्रापि तद्धर्मरुषितत्वं उकारपूर्ववर्तिककारे यथा, सकारस्यापि तथा तद्धर्मरुषितत्वं वर्तते। तस्माद्धि अभक्तत्वेऽपि न दोषः, निघातस्सिद्ध एव परिभाषा च नाश्रयणीया इत्येवं भाष्ये सिद्धान्तवादिनः।

तदे **सुट् कात् पूर्वः** इति सूत्रे भाष्यकृन्मते कात्पूर्वग्रहणं प्रत्याख्यातम्। प्रत्याख्यानपक्ष एव सिद्धान्तितः। तथा च स्वरविधौ व्यञ्जनमविद्यमानवदित्येषा परिभाषापि प्रत्याख्याता सिद्धान्तपक्षे।

अथापि सिद्धान्तभूतपक्ष एव आश्रयणीय इत्यत्र आलङ्कारिकाणामाग्रहो न भवति, ते तु इङ्गितेन निमिषितेन चेष्टितेन स्वल्पमपि उपलक्षणं प्राप्तञ्चेत् तदाधारेण अनुक्षणं तस्य विराट्-स्वरूपं प्रकाशयन्ति इत्यतः सिद्धान्तपक्षे प्रत्याख्यातमपि कात्पूर्वग्रहणं सूत्रकारेण प्रकृतसूत्रे कृतमेव तद्ग्रहणमिति कृत्वा कविकृतावपि सभ्याभरणग्रन्थस्थकारिकायां कात्पूर्वग्रहणमस्तीति पक्षे एव दृष्टान्तदार्ष्टान्तिकभावः सूपपादः । एवमेव प्रकृतेयं परिभाषापि प्रत्याख्याता अथापि प्राचीनमतमाश्रित्य स्वरकर्मकविधावपि इयमित्यभिमानेनात्र पद्ये विषयः उपस्थाप्यते कारिकाकारेण रामचन्द्रभट्टेन। स्वरकर्मकविधौ इति पक्षाश्रयणेनैव "तिङ्ङतिङः" इत्यत्र प्रसङ्गः सङ्गच्छते।

दृष्टान्ततया सभ्याभरणे इत्थमुपस्थापितम् पद्यम् –

**स्थानासनादिरलं येनाभक्तोऽपि पालितो विगुणः।**
**भवति निघातव्यसनेऽसन्निव तस्यापि सुट्कपूर्व इव[2] ॥12॥**

स्थानासनादिरलं विगुणः अभक्तः पालितः येन सः खलः तस्य अपि निघातव्यसने कपूर्वः सुडिव असन्निव भवति। अलं शब्दः भूषणे पर्याप्तौ प्रतिषेधे सामर्थ्ये च। विगतः गुणः यस्य सः विगुणः खलः । पालितः कर्मणि क्तः । स्थानं च आसनञ्च स्थानासने । आदिशब्दः आश्रयार्थे । तद्यथा-भीष्मादिः सुयोधन इति भारते। हरिकारिकायामपि आश्रयार्थे प्रयुक्तो आदिशब्दो दृश्यते –

**स्वपदैरभिधाने तु व्यापारोऽस्य न विद्यते।**
**विभक्त्यादिभिरेवासौ उपकारः प्रतीयते ॥ इति ॥**

---

[1] पा. आष्टा. सू.(८.१.२८)

[2] सभ्याभरणम् ३।१२

विभक्त्याश्रयैरेव-विभक्त्यादिभिरेव प्रातिपदिकैः उपकार्योपकारकभावः प्रतीतः वाच्यवाचकभावः अर्थबोधको भवतीति।

स्थानासनयोरादिः आश्रयः मूर्खो विगुणः अभक्तोऽपि सेवामकुर्वाणोऽपि येन साधुना स्थानमुपवेशनार्थं स्थलमासनं कार्पासजनितं मृदु आदिशब्देन भोजनादिः तैः अतिशयेन पालितोऽपि सत्कृतोऽपि सन् तस्य साधोरपि निघातव्यसने नितरां घातो यस्मिंस्तादृशे व्यसने दुःखे क्लेशानुभूतिसमये सति असन्निव भवति। क्वापि निलीय तिष्ठति। मोचनाद्युपकारं न करोतीत्यर्थः। क इव ? कपूर्वः सुडिव। यथा **सुट् कात् पूर्वः** इत्यधिकारमङ्गीकृत्य **सम्परिभ्यां करोतौ भूषणे** इत्यादिभिः सूत्रैः 'संस्कृषीष्ट' 'संस्क्रियत' इत्यादौ विधीयमानः सुट् तादृश एव। कात्पूर्व इति वचनादभक्तत्वं यथा सुटः तद्वत् स्वातन्त्र्यं स्वतन्त्रमासनं खलस्य, आसनमित्युपलक्षणं भूषणार्थस्य, उपलक्षणत्वात् "किरतौ लवने[1]" "हिंसायां प्रतेश्च[2]" इति लवनाद्यर्थकता चेत्यादिभिरुपायैरलं पूर्णसामर्थ्येन पालितः सन्नत एव अभक्तः यदागमास्तद्[3]..... इति न्यायनिरपेक्षः, भूषणरूपार्थेन अलं पर्याप्ततया पालितोऽपि अन्यार्थैः संसर्गाद् **उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु** , **हिंसायां प्रतेश्च** इत्यादिभिरर्थैः दूषितः सन् खलः विगुणः गुणरहितो भवति गुणं न करोतीत्यर्थः। 'संस्क्रियत' इत्यादौ हि **गुणोर्त्तिसंयोगाद्योः**[4] इति प्राप्तगुणो न भवति, अभक्तत्वेन संयोगादित्वाभावात्। कार्यधर्माः कारणेषु यथा आरोप्यन्ते तद्वत् ऋकारे विद्यमानं गुणराहित्यं तद्धेतुभूतऋकारे गुणराहित्यहेतुभूत-अभक्तत्वविशिष्टसकारे गुणराहित्यमारोप्यते। सुट्सकारे साक्षाद् विगुणत्वं तु न।

सिद्धान्तवादिनः **स्वरविधौ व्यञ्जनमविद्यमानवदि**ति परिभाषाप्रत्याख्यानपक्षे तद्धर्मरूषितत्वमित्याश्रितम्। तत्पक्षे सुभाषितसमालोचनमुच्यते – संस्कुरुते इत्यादौ "तिङ्ङतिङः" इति निघातकर्तव्यतायां मयूरादिशब्दे मकारादौ तदुत्तरवर्त्यकारादिवत् तद्धर्मरूषितत्वं गन्तव्यम् इत्युक्तम्। किञ्च, अजव्यवहिततया समीपतया विद्यमानस्य एकस्यैव तद्धर्मरूषितत्वं नानेकस्य इत्यत्र तु विनिगमनं नास्तीत्यतः सुट्-सकारः व्यवधायकमेव भवति। व्यवधायकत्वे सति तिङन्तस्य सर्वानुदात्ततां वारयितुं शक्नुयात् ; तदेवं वारयितुं शक्तस्सन्नपि स्वयं अविद्यमानवत्तां प्राप्य तिङन्तस्य निहन्यमानत्वं (तदनुदात्ततां) न निवारयतीत्येव तस्य दुष्टतरत्वं खलत्वमिति॥

**********

[1] पा. आष्टा. सू.(६.१.१४०)

[2] पा. आष्टा. सू.(६.१.१४१)

[3] परिभाषा ११

[4] पा. आष्टा. सू.(७.४.२९)


ISSN: 2320-740X

# षड्वर्गः मिहिरसम्मतः

✍ डा. प्रसादभट्टः
अतिथ्यध्यापकः, ज्यौतिषविभागः

"**समासोक्तस्य शास्त्रस्य सुखं ग्रहणधारणे**" इत्यादिवचनमाश्रित्य विचित्रवृत्तैः स्वल्पीभूतस्य शास्त्रस्य ग्रहणधारणयोः सुखतरं सम्पादनाय टीकानामध्ययनमेव राजमार्गः । ग्रन्थवरममुं होराशास्त्रमादृत्य विरचिताः बह्व्यः टीकाः । तत्र अपूर्वशैल्या टीकिता अपूर्वार्थप्रदर्शिका इतरापेक्षया नूतना व्याख्या । "**स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे**" इत्यत्र '**यो यो विधिरन्यग्रन्थेषु पठ्यते तत्तद्विधिरस्मिन् ग्रन्थे यत्र कुत्रापि सूक्ष्मरूपेण द्रष्टुं शक्यः**' इति स्वाभिप्रायं, टीकायाः दिग्दर्शनमपि कृतवान् राघवः । होरातन्त्रे अतीव श्रद्धाभक्तिसमन्वितः एषः

**क्षितिजसितज्ञचन्द्ररविसौम्यसितावनिजाः सुरगुरुमन्दसौरिगुरवश्च ग्रहांशकपाः**
**अजमृगतौलिचन्द्रभवनादिनवांशविधिः भवनसमांशकाधिपतयः स्वगृहात् क्रमशः ॥**

अस्मिन् श्लोके नवविधानामंशकानां स्वरूपदर्शनं करोति षोडशवर्गविचारः मिहिरस्य सम्मतः इति दर्शयितुम् । तद्यथा – अत्र "**नवांशक इति नवविधानामंशकानां सूचकः**" राशिनवांशयोः स्पष्टज्ञानसद्भावादत्र तुर्यांश-सप्तांश-द्वादशांश-षोडशांश-विंशांश-सप्तविंशांश-चत्वारिंशांश-पञ्चचत्वारिंशांश-षष्ट्यंशात्मक- एकादशवर्गाः व्याख्याताः । अर्थात् नवविधानामंशकानां सूचनं विशेषतया कृतवान् । तद्यथा - तत्र 'नव' इत्यक्षरसंख्यया चत्वारिंशत् अनेन चत्वारिंशांशविधिः । पुनः नव इति चत्वारिंशत् चत्वारिंशत्कलात्मकपञ्चचत्वारिंशांशग्राहको नवशब्दः । भवनसमांशकाधिपतयः इत्यत्र भं नक्षत्रं सप्तविंशांश इत्यर्थः । वनमिति जलम् । जलशब्देन सप्तजलधयो गृह्यन्ते । अतः सप्तांश इत्यर्थः । समाः वर्षाः अतः समांशकाः षष्ट्यंशाः । अधि इति अक्षरसङ्ख्यया नवतिः । भनवतिकलात्मकविंशांशः अधिशब्देन सूचितः । जलं चत्वार्यपि भवति तुरीयांश इत्यर्थः । भ+वन+सम इति पदच्छेदे भस्य वन, सम तत्सम वनवनेत्यर्थः । वनवनांशाधिपतयः षोडशांशेशाः इति व्याख्यातवान् । षड्वर्गस्य व्याख्यानं मिहिराचार्येण कृतमित्यतः अवशिष्टवर्गयोः परिचयं अग्रे करिष्यति ।

किन्तु एतदसमीचीनम् । यदि शास्त्रकारस्य षोडशवर्गः अभीष्टः तर्हि तस्य प्रयोजनमपि व्यक्तरूपेण वा अव्यक्तरूपेण वा वक्तव्यम् । यथा पराशरः वर्गविवेचनाख्ये सप्तमाध्याये

लग्ने देहस्य विज्ञानं होरायां सम्पदादिकम् ॥१॥
द्रेष्काणे भ्रातृजं सौख्यं तुर्यांशे भाग्यचिन्तनम् ।

पुत्रपौत्रादिकानां वै चिन्तनं सप्तमांशके ॥२॥
नवमांशे कलत्राणां दशमांशे महत् फलम् ।
द्वादशांशे तथापित्रोश्चिन्तनं षोडशांशके ॥३॥
सुखासुखस्य विज्ञानं वाहनानां तथैव च ।
उपासनाया विज्ञानं साध्यं विंशतिभागके ॥४॥
विद्या या वेदबाह्वंशे भांशे चैव बलाबलम् ।
त्रिंशांशके रिष्टफलं खवेदांशे शुभाशुभम् ॥५॥
अक्षवेदविभागे च षष्ट्यंशेऽखिलमीक्षयेत् ।
यत्र कुत्रापि सम्प्राप्तः क्रूरषष्ट्यंशकाधिपः ॥६॥
तत्र नाशो न सन्देहो मुने! विधिवचो यथा ।
यत्र कुत्रापि संप्राप्तः कलांशाधिपतिः शुभः ॥७।

इत्येवमतिविस्तरेण प्रतिपादयामास । किन्त्वत्र टीकाकारोऽपि षड्वर्गस्य प्रयोजनं कुत्रापि नोक्तवान् ।

अतः **मिहिराचार्यः षोडशवर्गस्यापेक्षया षड्वर्गमेव स्वीकृतवान्** इति अङ्गीकर्तव्यम् । अतः एव अग्रे 'द्रेक्काणहोरानवभागसंज्ञा'[1] इत्यादिरूपेण षड्वर्गनिरूपणमकारि । पुनः षड्वर्गे 'वृत्तातामृ-दृगुष्णशाकलघुभुक् क्षिप्रप्रसादोटनः.....'[2] इत्यादिना राशिफलं 'कट्यां सितवस्त्रवेष्टितः....'[3] इत्या-दिना द्रेक्काणफलम् एवमेव नवांशद्वादशांशफलं राशिफलवत् त्रिंशांशफलन्तु 'कन्यैव दुष्टा व्रजतीह दास्यं....'[4] इत्यादिना होरायाः फलं "यातेष्वसत्स्वसमभेषु दिनेशहोरां....." इत्यादिना सम्पूर्णषड्वर्गस्य निरूपणं स्पष्टतया कृतवानित्यतः षड्वर्गः एव आचार्यस्य सम्मतः इति द्योत्यते ।

तथैव मिहिरमतमनुसृत्य केरलीये पराशरमतातिरिक्तं षड्वर्गप्रयोजनं द्रष्टुं वयं शक्नुमः ।

गेहात् सौख्यमुदाहरन्ति मुनयो होराबलं शीलताम् ।
द्रेक्काणैः पदवीं धनस्य निचयो सप्तांशके चिन्तयेत् ।
वर्णान् रूपगुणान् सुधीसुतनयो प्रायो नवांशेऽखिलम् ।
लिङ्गे द्वादशगे वपुर्वयमिदं त्रिंशांशके स्त्रीफलम्[5] ॥

---

[1] बृ. – १/९

[2] बृ. – चन्द्रराशिशीलाध्यायः - १

[3] बृ. – द्रेष्काणाध्यायः - १

[4] बृ. – स्त्रीजातकाध्यायः - ३

[5] बृहज्ञातकस्य कन्नडटीकायां केरलीये इति राशिभेदाध्यायस्य नवमश्लोकव्याख्याने


ISSN: 2320-740X

इत्यादिरूपेण अन्याचार्योक्तमतमेव स्वीकृतमिति ज्ञायते । तथा च रुद्रविवरण्यां 'द्रेक्काणहोरानवभागसंज्ञा' इत्यारब्धश्लोकव्याख्याने कालपुरुषदेहप्रतिपादनानन्तरमुक्तानां षड्वर्गाणां द्रेक्काणादिक्रमेणोक्त्या कालपुरुषस्य मूलाधारादयः षडाधाराः क्रमेण सूत्रिताः ।

मूलाधारे दृगाणः स्यात् पितृचिन्ता रविस्तथा ।
स्वाधिष्ठाने तु होरा स्यान्मातृचिन्ता तथा शशी ॥
मणिपूरे नवांशश्च भ्रातृचिन्ता कुजोऽपि च ।
अनाहते च त्रिंशांशो वाणीचिन्ता बुधस्तथा ॥
विशुद्धौ द्वादशांशः स्यात् पुत्रचिन्ता तथा गुरुः ।
आज्ञायां क्षेत्रमुद्दिष्टं जायाचिन्ता सितस्तथा ॥
द्वादशान्ते शनैश्चारी नाशचिन्ता च कीर्तिता ।
तत्रस्थैस्तदधीशैश्च बलाबलवशात् फलम् ॥ इत्युक्तम् ।

दशाध्याय्यामपि – राशिः स्थूलशरीरं, द्रेक्काणः शरीरस्योर्ध्वमध्याधोभागभेदेन त्रिधाभिन्नः होरावामदक्षिणभागभेदेन भिन्ना, नवांशकः क्षेत्रज्ञः द्वादशांशाः वायुमनोबुद्धयः, त्रिंशांशकाश्चक्षुरादीन्द्रियपञ्चकमिति । अतः षोडशवर्गेण चिन्त्यमानफलं सर्वं पूर्वोक्तप्रकारेण षड्वर्गे एव चिन्तयितुं शक्यते इति प्रायः स्वल्पीकरणाय सुलभीकरणाय च षड्वर्गमेव स्वीकृतमिति मे मतिः ।

***********

## वारप्रवृत्तिः

✍ विद्वान् रमानन्दभट्टः एन्.
संविदध्यापकः, डिप्लोमाविभागः

वेदषडङ्गेष्वन्यतममिदं ज्योतिश्शास्त्रं वेदविहितकर्मणां कालं निबोधयति । अस्यैव शास्त्रस्य अङ्गभूते मुहूर्ते विवाहादिसंस्काराणां तथा वाप्यारम्भादिकार्याणां कालविशेषाः निगदिताः । तत्र यत्कर्म वस्त्रपरिधानादिकं वा वाप्यारामतडागकूपभवनारम्भादिकं वा अभिचारघातोग्रभेदपशुदमादिकं वा यस्य वासरे विहितं तत्सत्यावश्यकत्वे उक्तवासरस्य अलाभे वा अस्य वाराधिपस्य कालहोरायां कर्तव्यं भवति ।

तदाह रामदैवज्ञः "वारे प्रोक्तं कालहोरासु तस्य[1]" इति । नारदोऽपि "यस्य खेटस्य यत्कर्म वारे

[1] मुहूर्तचिन्तामणिः १.५६

प्रोक्तं विधीयते । ग्रहस्य क्षणवारे[1]ऽपि तस्य तत्कर्म सर्वदा" इत्युवाद ।

यद्येवं तर्हि कालहोराज्ञानमपेक्षितं भवति । तद्गणनामाह रामदैवज्ञः "वारादेर्घटिका निघ्नाः स्वाक्षह्च्छेषवर्जिताः । सैकास्तष्टा नगैः कालहोरेशा दिनपात्क्रमात्[2]" इति । वारादिघटिकाः द्विगुणाः, द्विष्ठाः, एकत्र पञ्चभिर्विभज्य शेषमपरत्र स्थापिते वर्जितं कृत्वा एकं योजयित्वा सप्तभिर्विभज्य अवशिष्टाः शेषसङ्ख्यातुल्याः रव्यादयः कालहोरेशाः भवन्ति ।

अत्र वारादेर्घटिकाः इत्यस्ति । वारादिशब्देन वारप्रवृत्ति[3]रुच्यते । तर्हि वारप्रवृत्तिः कदा भवतीति प्रश्नः । तत्र न प्राचीनाः एकमतयः । सिद्धान्तशेखरे तत्प्रादर्शि श्रीपतिना –

**केचिद्वारं सवितुरुदयादाहुरन्ये दिनार्धाद्**
**भानोरर्धास्तमयसमयादूचिरे केचिदेवम् ।**
**वारस्यादिं यवननृपतिर्दिङ्मुहूर्ते निशायां**
**लाटाचार्यः कथयति पुनश्चार्धरात्रे स्वतन्त्रे[4] ॥**

एवं प्राञ्चः वारप्रवृत्तिः सूर्योदयादिति, मध्याह्नतः इति, रवेरर्धास्तमनकालादिति, रात्रौ दशभिः मुहूर्तैरिति, अर्धरात्रकालादिति च भवतीति विवदन्ते । साम्प्रतिकोपलब्धसूर्यसिद्धान्ते तु –

**वारप्रवृत्तिः प्राग्देशे क्षपार्धेऽभ्यधिके भवेत् ।**
**तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत्[5] ॥**

लङ्कारेखादेशयोः याम्योत्तरवृत्तमेकमेव । यदा लङ्कार्धरात्रकालः तदैव रेखार्धरात्रम् । लङ्कार्धरात्रकालः एव वारप्रवृत्तिकालः सर्वदेशे[6] फलार्थमुपयुक्तः । रेखातः प्राग्देशे देशान्तरनाडीभिरधिके क्षपार्धे वारप्रवृत्तिः स्यात् । स्वार्धरात्रानन्तरं[7] देशान्तरकाले व्यतीते वारप्रवृत्तिरित्यर्थः । एवं रेखातः पश्चिमदेशे स्वार्धरात्रात्पूर्वमेव वारप्रवृत्तिः भवतीति सौरमतम् ।

वसिष्ठसिद्धान्ते – "प्रभाकरस्योद्गमनात्पुरे तु वारप्रवृत्तिर्दशकन्धरस्य" इति[8], रत्नकोशे – "वारप्रवृत्तिं मुनयो वदन्ति सूर्योदयाद्रावणराजधान्याम्" इति[1] च लङ्कायामर्कोदयादेव वारप्रवृत्तिरुक्ता

---

[1] क्षणवारः = कालहोरा

[2] मुहूर्तचिन्तामणिः १.५५

[3] वारशब्दः वासरपर्यायः, दिनमित्यर्थः । अतो वारप्रवृत्तिः = दिनप्रवृत्तिः ।

[4] शेखरवैशिष्ट्यम् – पृ.सं ४१

[5] सूर्यसिद्धान्तः १.६३

[6] सौरवासनायां कमलाकरभट्टः ।

[7] अत्र क्षपार्धपदं निरक्षविषयमिति सौरभाष्ये नृसिंहदैवज्ञः ।

[8] प्रौढमनोरमायां दिवाकरः ३.८, "वसिष्ठसंहितायामिति" पीयूषधारायाम् १.५४


ISSN: 2320-740X

वर्तते। भट्टोत्पलस्तु बृहत्संहिताविवृतौ[2] – "लङ्कार्धरात्रसमये दिनप्रवृत्तिं जगाद चार्यभटः। भूयः स एव चार्कोदयात् प्रभृत्याह लङ्कायाम्" इति आर्यभटमतं प्रादर्शयत्। पुनः भट्टब्रह्मगुप्तमतं प्रददर्श सः – "जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः सृष्टैः।यस्माद्दिनप्रवृत्तिः दिनवारोऽर्कोदयात् तस्मात्॥ दिनवारादिः पश्चादुज्जयिनीदक्षिणोत्तरायाः प्राक् देशान्तरघटिकाभिः प्राक्पश्चाद्भवति रव्युदयात्॥" इति। एवं लाटदेवः अस्तगे सूर्ये, लाटाचार्यः अर्धरात्रे, सिंहाचार्यः लङ्कायां रव्युदये, यवनाः निशि दशभिर्गतैर्मुहूर्तैः, रोमकसिद्धान्ते मध्याह्ने, सूर्यसिद्धान्तब्रह्मवसिष्ठचन्द्रपराशरार्यभटादिषु च अर्धरात्रिसमये[3] वारप्रवृत्तिरुक्ता। भास्करोऽपि "यतो लङ्कोदये वारादिः"[4] इति लङ्कायामर्कोदयादेव वारप्रवृत्तिं जगाद।

एवमनेके मतभेदाः सन्त्यपि शास्त्रेऽस्मिन् प्रसिद्धाः सिद्धान्तिनः भास्करादयः लङ्कोदये एव वारप्रवृत्तिं जगुः इत्यतः स एव पन्थाः साधुरिति प्रतिभाति। तत्र तावत् ब्रह्मगुप्त आह –

**जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः सृष्टैः।**
**यस्माद्दिनप्रवृत्तिर्दिनवारोऽर्कोदयात्तस्मात्[5]॥**

अत्र वासनाभाष्ये[6] अस्यार्थ एवं निरुपितः। सृष्ट्यादौ यस्मिन् काले भास्करोदये ग्रहास्सृष्टाः तस्मात्कालादेव वारप्रवृत्तिः भवितुमर्हति। यतः सर्वदा दिनमादौ, रात्रिरनन्तरं भवति। यदि मध्यरात्राद्वारप्रवृत्तिरित्युच्यते तर्हि तत्कालपर्यन्तं विद्यमानाः षट्प्रहराः वाररहिताः भवेयुः। अतः तन्न। यदि मध्यरात्रकालः सृष्टेः पूर्ववर्तीति कथ्यते तर्हि तदपि न। यतो रविं विना दिनरात्रिभेदस्य अनवगमः[7]। पुनश्च सृष्टिपूर्वकाले सर्वमेव तमोभूतमासीत्। अतः सर्वमपि अप्रज्ञातम्, अलक्षणम्, अप्रतर्क्यम्, अनाधृष्टं, प्रसुप्तञ्चासीदिति उदयात्पूर्ववर्तिकालनिर्देशः अशक्यः[8] इत्यतः तस्मिन् काले वारप्रवृत्तिरपि असम्भवः।

श्रीपतिरपि एवमेवाचख्यौ –

---

[1] चोलविपश्चित्कृतसूर्यभाष्ये – मातृकायां वर्तते। सिद्धान्तशेखरे मध्यमाध्याये १२ श्लोकः।

[2] बृहत्संहिता – २ अध्यायः - "षष्ट्यब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिच्छेदवित्" इत्यस्य व्याख्याने।

[3] अत्र केचनांशाः शेखरवैशिष्ट्यमित्यतः, चोलविपश्चित्कृतसूर्यभाष्यतश्च स्वीकृताः। अत्र क्वचित्पूर्वोक्ताद्विरोधः दृश्यते। किन्तु ग्रन्थस्थं विषयं तथैव स्वीकृतवान्।

[4] सिद्धान्तशिरोमणिः - गणिते मध्यमाधिकारे वासनायाम्।

[5] ब्रह्मस्फुटसिद्धान्ते मध्यमाधिकारः – ३४ श्लोकः

[6] ब्रह्मस्फुटसिद्धान्ते एव।

[7] "सति धर्मिणि धर्माश्चिन्त्यन्ते" इति नियमः प्रदर्शितः।

[8] अत्र मनुवचनं प्रमाणतया निर्दिष्टम् वासनाभाष्ये – "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमनाधृष्टं प्रसुप्तमिव सर्वतः॥" इति। ब्रह्मस्फुटसिद्धान्तः मध्यमाधिकारः ३४ श्लोकः।

**सृष्टेर्मुखे ध्वान्तमये हि विश्वे ग्रहेषु सृष्टेष्विनपूर्वकेषु।**
**दिनप्रवृत्तिस्तदधीश्वरस्य वारस्य तस्मादुदयात्प्रवृत्तिः**[1] ॥ इति।

भास्करमतमपि इदमेवेति पूर्वमेव प्रदर्शितम्। भट्टोत्पलस्तु "दिनवार औदयिकः इत्यस्माकं मतम्"[2] इत्युक्तवान्।

एतद्विषये वराहः –

**दिनवारप्रवृत्तिर्न समा सर्वत्र करणे कथिता।**
**नेहापि भवति यस्माद्विप्रवदन्ते दैवज्ञाः॥**
**द्युगणाद्दिनवाराप्तिर्द्युगणोऽपि च देशकालसम्बन्धः।**

इति वदन् अग्रे,

**तत्रापि नाप्तवाक्यं न च युक्तिः काचिदप्यस्ति**[3]**।**

इत्युवाच। वारप्रवृत्तिविषये आचार्याणां निश्चयो नास्ति। पूर्वोक्तवत्केचन उदये, केचन मध्याह्ने, अन्ये मध्यरात्रकाले, इतरे सूर्यास्ते वा वारप्रवृत्तिमिच्छन्ति। ततः कालात् प्रतिदेशं यदि वारप्रवृत्तिं ततो दिनाधिपं ब्रूमश्चेत्तथाकरणे किमपि प्रमाणं नास्तीति कथयन् निश्चयं नाब्रवीद्वराहः।

बहूनामाचार्याणां मतं लङ्कोदये एव सृष्ट्यादौ युगमासवर्षादिकानां युगपत्प्रवृत्तिरिति। अस्यैव युगादिकानामारम्भस्थाननिर्णयस्य वैषम्याद् वारप्रवृत्तिकालेऽपि भेदः सम्भवति। अन्यत्र एवमपि दृश्यते। **मेषप्रथमबिन्दौ सग्रहमुडुचक्रं पद्मसम्भवः कृत्वा। सिद्धपुरि मध्याह्ने सृष्ट्यादौ तन्निवारयामास**[4]॥ अतः सृष्ट्यादौ सिद्धपुरे मध्याह्नकाले वारप्रवृत्तिः, रोमके अस्तमने, यमकोट्यामुदये, लङ्कायाञ्च अर्धरात्रे वारप्रवृत्तिरित्युक्तं भवति। एवं भूवृत्तपादवर्तिदेशेषु यत्र कुत्रापि उदयादिकालचतुष्टये यस्मिन् सृष्ट्यादिरुच्यते तदा स कालः भूवृत्तपादवर्तीतरदेशेषु कालचतुष्टये शिष्टेष्वन्यतमो भवेदेव इत्येतद्गोलविदामतिरोहितमेव। अत एवाह दिवाकरः प्रौढमनोरमायां "सौरमते लङ्कार्धरात्रे सृष्टिरिति"। अतः ब्रह्मगुप्तेन मध्यरात्रकालिकसृष्टिविषये यदुक्तं तच्चिन्त्यमेव।

एवमुदये वारप्रवृत्तौ बहूनां मतिरिति तत्र उक्तविषयस्य युक्तिमत्वाच्च स एव क्रमः बहुभिराद्रियते। तथा च भूपादान्तरितदेशेषु लङ्कायाः आसन्नत्वात्तत्रैव सृष्ट्यादिः, अतो वारप्रवृत्तिरुच्यते। अत्रायं प्रश्नः सन्तिष्ठत एव यत् स कालः मध्यरात्रम् वोदयः इति। तदा सिद्धान्तभेदे

---

[1] सिद्धान्तशेखरः मध्यमाध्याये ११ श्लोकः

[2] पूर्वप्रदर्शितस्थले एव।

[3] पञ्चसिद्धान्तिकायां १५ अध्याये १८ तः द्रष्टव्यम्।

[4] यल्लयविरचिते सूर्यसिद्धान्तस्य कल्पवल्लीव्याख्याने १.६३।


ISSN: 2320-740X

सत्यपि बहुसम्मतत्वादुदयः[1] स्वीक्रियते। पुनस्तत्र प्रश्नः। उदयश्चेत् लङ्कोदयकाले वा स्वदेशोदये इति। यदा लङ्कायामुदयः तदैव सर्वत्र वारप्रवृत्तिर्भवति। यत आह भास्करः "अर्कोदयादूर्ध्वमतश्च ताभिः प्राच्यां प्रतीच्यां दिनप्रवृत्तिः[2]" इति। सिद्धान्तोक्तवद्देशान्तरघटीः संसाध्य रेखादेशतः पूर्ववर्ती यदि स्वदेशः तर्हि ताभिर्घटीभिरूर्ध्वं स्वदेशोदयाद्वारप्रवृत्तिर्भवति। पश्चाच्चेत्स्वदेशोदयात् पूर्वमेव वारप्रवृत्तिर्भवति। पुनश्च रवावुत्तरगोलस्थे उन्मण्डलक्षितिजवलयमध्यवर्तिचरार्धघटिकाभिरूर्ध्वम्, दक्षिणे त्वधो वारप्रवृत्तिर्भवति। एवं देशान्तरघटीभिः चरार्धघटिकाभिरित्येवं संस्कारद्वयसम्भवे तयोस्संस्कारक्रममाह श्रीपतिः –

**लङ्कोदग्याम्यसूत्रात् प्रथममपरतः पूर्वदेशे च पश्चा**
**दध्वोत्थाभिर्घटीभिः सवितुरुदयतो वासरेशप्रवृत्तिः।**
**ज्ञेया सूर्योदयात् प्राक्चरशकलभवैश्चासुभिर्याम्यगोले**
**पश्चात्तैः सौम्यगोले युतिवियुतिवशाच्चोभयोः स्पष्टकालः[3]॥**

अत्र व्याख्याकारः चरदलदेशान्तरनाडिकाभिः युतिवियुतिवशाद्योगवियोगाभ्यामुभयोः वासरतदीशयोः स्पष्टकालः इति व्याख्यातवान्। किन्तु अत्र उभयोः इत्यनेन देशान्तरचरदलयोः योगवियोगाभ्यां वारप्रवृत्तेः स्पष्टकालः ज्ञेयः इति व्याख्यानं वरं मन्ये। यतोऽत्र पीयूषधारायां श्रीपतीयः इति निर्दिष्टः कश्चन श्लोकः – **चरार्धदेशान्तरयोर्वियोगयोगोत्थपानीयपलैश्च सम्यक्। सूर्योदयादूर्ध्वमृणे धनेऽधो वारप्रवृत्तिं मुनयो वदन्ति[4]॥** इत्यस्ति। अस्य तात्पर्यमाह गोविन्दः – अत्र देशान्तरं पूर्वापरयोजनवशादृणं धनं च। चरमुत्तरदक्षिणगोलवशादृणं धनञ्च। ऋणयोः देशान्तरचरयोः योगे सूर्योदयादधः, धनर्णयोः योगे अन्तरं कार्यम्। तद्यदृणं धनं च तदा सूर्योदयादूर्ध्वमधश्च वारप्रवृत्तिः इति। अत्र पुनः भट्टोत्पलेन संहितायां बलभद्रभट्टस्येति निरूपितानामेतद्विषयकश्लोकानां विषये लिखन्तः सुधाकरद्विवेदिनः "प्राग्देशान्तरे उत्तरगोले चरदेशान्तरघटीयोगसमायां सूर्योदयाद्गतघटिकायां दिवसे वारप्रवृत्तिः। पश्चिमदेशान्तरे दक्षिणगोले तद्योगसमायां निशाशेषघटिकायां वारप्रवृत्तिः। पुनश्च पश्चिमदेशान्तरे उत्तरगोले देशान्तरचरार्धान्तरं यत् तावति काले

---

[1] मध्यरात्रमिति स्वीक्रियते चेदपि एवमेव। किन्तु तत्र चराभावात्केवलदेशान्तरघटीभिरेव स्वरात्र्यर्धात् प्रागूर्ध्वं वा वारप्रवृत्तिरुच्यते।

[2] सिद्धान्तशिरोमणिः मध्यमाधिकारे – ३८ पृ.सं।

[3] सिद्धान्तशेखरे मध्यमाध्याये १३ श्लोकः। अस्मात्पूर्वतनश्लोकेऽपि अस्यैवार्थः प्रतीयते।
तथा वसिष्ठसिद्धान्ते – 'चरार्धदेशान्तरनाडिकाभिरूर्ध्वं तथाधोऽप्यपरत्र तस्मात्' इति {प्रौढमनोरमायाम्}।
मुहूर्तचिन्तामणौ केवलं देशान्तरघटीसाधनमभिहितम्, तदद्वारैव वारप्रवृत्तिर्ज्ञेया - १.५४ श्लोके।

[4] १.५४, श्रीपतिपद्धतिटीकायां कृष्णदैवज्ञः "रत्नमालायां श्रीपतिभट्टः" इति निरूपितवान्। अत्र वारप्रवृत्तिकालज्ञानार्थं कृष्णदैवज्ञः चरार्धदेशान्तरयोगवियोगरूपगणितं स्फुटतया दृष्टान्ते कृतवान्। अग्रे तदुक्तम्।

दिनगते वारप्रवृत्तिः यदि देशान्तरतः चरमानमधिकम् । यदि देशान्तरतः चरमूनं तदा रात्रिशेषे देशान्तरचरार्धान्तरं यत्तावति काले वारप्रवृत्तिः" इति न्यरूपि सम्यक् ।

एवं लङ्कायां यदा वारप्रवृत्तिः तदैव सर्वत्रेति बहूनां मतम् । किन्तु तत्तद्देशीयोदयकाले एव तत्र तत्र वारप्रवृत्तिः ज्ञेया इति केषाञ्चिन्मतिः । तथा च पुनः ब्रह्मगुप्तः – "भूगोले यस्मिन् यस्मिन् देशे वा स्थितः उदयार्कं पश्यति तदुदयकाल एव वारप्रवृत्तिकालः, तथैव केचिद्व्यवहरन्ति च"[1] इति । पुनश्च यल्लयः – "एवं सकलसिद्धान्तमतेन तत्तद्देशेषु वारप्रवृत्तिकालवैषम्यात् स्वदेशकालवारप्रवृत्तिं ज्ञात्वा तत्तद्वारप्रवृतियुक्तकर्माणि तत्तद्वारप्रवृतियुक्तदोषाः तत्तद्वारप्रवृतियुक्त-कालहोराश्चैवमादीनि सर्वाण्यनुसन्धेयानि भवन्ति, नो चेत् तत्तत्कर्मफलवैकल्यभाग्भवति" इत्याह ।

एवं वारप्रवृत्तिकाले लङ्कोदयस्वदेशोदयरूपभेदसत्वात् ततः वाराधिपभेदः, तस्मात्कालहोराधिपत्यमपि अनिर्धारितमेव भवति । एवमव्यवस्थायां सत्यां सर्वं व्यवस्थापयति वसिष्ठः स्वसंहितायाम् – **वारप्रवृत्तिविज्ञानं क्षणवारार्थमेव हि । अखिलेष्वन्यकार्येषु दिनादिरुदयाद्भवेत्**[2] **॥** इति । अतः लङ्कोदयाद्वारप्रवृत्तिर्या कथिता सा केवलं कालहोराज्ञानार्थम्, अन्यत्र सर्वत्र स्वदेशसूर्योदयादेव वाराः ग्राह्याः इति व्यवस्था सुस्था ।

किन्तु पद्धतिगणिते कालबलानयने "पादः स्ववर्षे च दलं स्वमासे ....."[3] इत्यादिना प्रोक्ते कालहोराधिपबले कालहोराधिपः कः इति ज्ञानार्थं वारप्रवृत्तिः वसिष्ठवचनाल्लङ्कोदयादेव गणनीयेति आपतिते तत्राह दिवाकरः "अर्कलग्नान्तरसाधितो होरेशः पद्धतौ ग्राह्यः" इति[4] । अतः उदयादेव होरेशो गण्यते । इदञ्च युक्तमेव । यतः वर्षेशादीनामुदयतः प्रवृत्तानां साहचर्याद्धोरेशोऽपि उदयादेव गणनीयः इति गोविन्ददैवज्ञः । कृष्णदैवज्ञस्येदं नाभिप्रेतम् । स तु "केचिद्बलनिमित्तं सूर्योदयमारभ्य होरा भवन्ति न तु वारप्रवृत्तेरितीच्छन्ति । तन्न प्रामाणिकाचारः" इति वदन् होराधिपसाधनमेवं कृतवान् । अथ होरेशः । पश्चिमतो रेखायोजनानि ३० । एतानि त्रिगुणानि ९० चतुर्भक्तानि जातानि देशान्तरपलानि २२ धनम् । चरपलानि १३८ धनम् । अनयोर्योगे १६०। सूर्योदयादूर्ध्वमृणं भवेदित्युक्तत्वात्सूर्योदयात्पूर्वं ०२।४० वारप्रवृत्तिः । अथेष्टकालः २८।१८ वारप्रवृत्तिर्धनघटीभिः ०२।४० युतः ३०।५८ । अथैतावता

[1] यल्लयविरचिते सूर्यसिद्धान्तस्य कल्पवल्लीव्याख्याने १.६३ ।

[2] प्रौढमनोरमायां पूर्वोक्ते एव स्थले ।

[3] श्रीपतिपद्धतिः ३.१४ ।

[4] प्रौढमनोरमा – केशवपद्धतिः ३.८ ।


ISSN: 2320-740X

वारप्रवृत्तेः सकाशाद्धटिका ३०।५८ द्विघ्नाः ६१।५६ शराप्तगताः कालहोराः १२[1] । वर्तमाना शुक्रहोरा । होरेशः शुक्रः ।"इत्येवं बलनिर्णयेऽपि कालहोरासाधनं वारप्रवृत्तेर्घटिकाभिः कृतं कृष्णदैवज्ञेन[2] ।

एवं वारप्रवृत्तिप्रयोजनं[3] कालहोराज्ञानमिति फलितम् । एवञ्च वारक्रमनिर्णये उपयुक्तस्य कालहोराख्यविषयस्य ज्ञानं वारप्रवृत्त्या भवति । **कालोऽयम् अनाद्यन्तः** इति आर्यभटोक्तवदनाद्यन्तस्य कालस्य निर्णयः न सुलभसाध्यः इति वदन् विरमामि विस्तरात् ।

**ग्रन्थसूची –**


- श्रीपतिपद्धतिः
- सूर्यसिद्धान्तः
- ब्रह्मस्फुटसिद्धान्तः
- सिद्धान्तशिरोमणिः
- पञ्चसिद्धान्तिका
- आर्यभटीयम्
- केशवजातकपद्धतिः
- मुहूर्तचिन्तामणिः
- शेखरवैशिष्ट्यम्, बृहत्संहिता


**********

## भाषाकौशलानि (परिचयः)

✍ **डा. अरविन्दकुमारसोमदत्तः**

अतिथ्यध्यापकः,शिक्षाविभागः

भाषाशास्त्रकोशे –भाषा नाम सा या कविश्लेषणशक्तिमानवोच्चारितध्वनीनामभिव्यञ्जिका । अपि च या मानवनियमानुसारं भावानां च नितरामभिव्यक्तीकरणाय प्रयुज्यमाना । उल्लिखिताः परिभाषाः परिशील्य भाषासम्बन्धिनीं विस्तृतां परिभाषामेवं वक्तुं शक्नुमः – **भाषा मानवोच्चारणावयवैः उच्चारिता यादृच्छिकध्वनिप्रतीकानां सा संरचनात्मिका व्यवस्था, यया तत्रत्याः**

---

[1] अत्र सैकं सप्ततष्टमिति न कृतम् । तथा कृते उक्तलब्धिः प्राप्यते ।

[2] कृष्णदैवज्ञकृतश्रीपतिपद्धतिव्याख्यायाम् । {मातृकासु वर्तते} ।

[33] अत्र रङ्गनाथस्य गूढार्थप्रकाशे, कमलाकरभट्टानां सौरव्याख्याने च अन्यत्रप्रयोजनं द्रष्टुं शक्नुमः । १.६६ ।

**सामाजिकाः परस्परं विचारविनिमयं कुर्वन्ति** इति।

एतादृशी भाषा वक्तुः अभिप्रायान् विचारान् श्रोतारं प्रापयति। भाषा प्रायो मौखिकी भवति परन्तु सञ्चितज्ञानम् अग्रे सम्प्रदानाय लिखितोपयुज्यते। अनन्तं ज्ञानम् अनेकानि शास्त्राणि कतिपयेषु स्वरव्यञ्जकेषु वर्णेषु (त्रिषष्टिः) निबद्धानि भवन्ति। अमूर्तज्ञानं (Abstract) वर्णापदवाक्यैः भाषायां मूर्तरूपं ददाति। भाषा ध्वनिरूपा क्षणप्रध्वंसिनी परन्तु स्फोटरूपा नित्या भवति। भाषा अनुकरणेन सम्पाद्यते शिक्ष्यते च। अतः अर्जितं सम्पत्। एतादृशविशिष्टायाः भाषायाः अध्ययने तद्गतानां प्रमुखानां कौशलानां भूमिका वरीवर्ति। तानि कौशलानि श्रवण-भाषण-पठन-लेखनरूपेण चतुर्धा विभक्तुं शक्यते।

**अम्बाम्बेति यथा बालः शिक्ष्यमाणः प्रभाषते** इति वाक्यपदीयस्य वचने बालस्य मातृभाषाधिगमे शब्दानाम् अनुकरणमेव प्रथमसोपानत्वेन उररीकृतं वर्तते। प्रारम्भिकस्तरे बालः शब्दस्य अर्थम् अजानन् अपि अन्यैः उक्तं श्रुत्वा तदेव अनुकरणं कर्तुं प्रयत्नं करोति। गच्छता कालेन सः बालः पदानामर्थं क्रमशः अवगच्छति। तानि श्रुतानि पदानि तं सम्भाषणं विधातुं महदुपकुर्वन्ति। ततश्च सः अग्रे पठनस्य प्रारम्भं करोति। अन्तिमे च लेखनस्य अभ्यसनं क्रियते। अनेन इदं स्पष्टं विज्ञायते यत् श्रवणं, भाषणं, पठनं, लेखनञ्च इत्येतानि चत्वारि कौशलानि एव संस्कृतभाषाभ्यासस्य क्रमिकाणि सोपानानि भवन्ति इति। अभ्यासकर्त्रा च एतेषां सोपानानां क्रमशः आरोढनं विधातव्यम्। ततः एव भाषायां प्रावीण्यं सम्पादयितुं शक्यते। श्रवण-भाषण-पठन-लेखनरूपाणि एतानि चत्वारि कौशलानि क्रमेणैव प्राप्तव्यानि इत्युक्तम्। तन्नाम भाषाधिगमे एतेषां पौर्वापर्यमपि एवमेव भवति, नान्यथा। आदौ श्रवणं, तत्पश्चात् भाषणम् – इत्येतत् सर्वेषामपि अनुभववेद्यम्। अतः अत्र नास्ति कस्यापि विप्रतिपत्तिः। किन्तु पठनलेखनयोर्मध्ये लेखनमेव आदौ भवेत्। तत्पश्चादेव पठनं भवेत्। यतः लेखनाभावे वर्णमालायाः स्वराणां व्यञ्जनानां संयुक्ताक्षराणां वा ज्ञानं न भवति। तादृशज्ञानाभावे पठनं भवितुमेव नार्हति इति केचन अत्र विप्रतिपत्तिं प्रदर्शयेयुः। परन्तु अत्र लेखनम् इत्यनेन वर्णमालायाः अभ्यासनिमित्तं यत् लेखनं क्रियते तत् नाभिप्रेतम्। पठनलेखनकौशलयोः अभ्यासनिमित्तमपेक्षिता प्राथमिकी आवश्यकता भवति वर्णमालायाः अभ्यासः। तदभावे एतन्न सम्भवति। किञ्च वर्णामालायाः अभ्यासः एव लेखनकौशलाभ्यासः नैव। अत्र तु लेखनमित्यनेन स्वाभिलाषितस्य अभिप्रायस्य विचारस्य वा प्रकाशनाय यत् लिख्यते वाक्यसमूहरूपं तदेव अभिप्रेतम्। तादृशं लेखनं कर्तुमिच्छुकः जनः तत्पूर्वं पठनं कुर्यादेव। अतः एतेषां चतुर्णां कौशलानां पौर्वापर्ये नास्ति कापि असङ्गतिः। भगवतः ब्रह्मणः चत्वारि मुखानि यथा तथा भाषाब्रह्मणः अपि एतानि चत्वारि मुखानि आवश्यकानि। एतेषु कौशलेषु श्रवणं भाषणं च


ISSN: 2320-740X

ध्वनिसम्बद्धे भवतः। पठनं लेखनञ्च लिपिसम्बद्धे भवतः। श्रवणे भाषणे च ध्वनेः उपयोगः एव भवति। एवमेव लिपिं विना पठनं लेखनं वा न सम्भवति । अतः कदाचित् भाषया पठनं लेखनं वा कर्तुमिच्छुकः जनः तदर्थं काञ्चित् लिपिम् आश्रयेत् एव । लिपिस्तु सङ्केतरूपा । यतः या भाषा शिक्षयितुमिष्यते तस्या एव लिपिः भवेत् इत्यत्र नास्ति नियमः । देवनागरीमजानन्तः अपि बहवः अन्यभाषालिपीः आश्रित्य संस्कृतेन पठनं लेखनं वा कुर्वन्तः अद्यापि दृश्यन्ते। तथापि संस्कृतशिक्षणे देवनागरलिपेः एव उपयोगः प्रयोगश्च श्रेयस्करः।

चतुर्षु कौशलेषु श्रवणं पठनं च ग्रहणकौशलत्वेन, भाषणं लेखनं च अभिव्यक्तिकौशलत्वेन च व्यवह्रियन्ते । प्रथमद्वयं ज्ञानग्रहणे उपयुक्तं भवति, अन्तिमद्वयञ्च अर्जितस्य ज्ञानस्य अभिव्यक्तौ सहायकं भवति । संस्कृतभाषाशिक्षणे एतेषां चतुर्णामपि महत्त्वं समानतया दृश्यते । परन्तु संस्कृतभाषायां ग्रहणकौशलयोः शिक्षणे यावत् महत्त्वं प्रदीयते तावत् अभिव्यञ्जनकौशलयोः कृतेच् न दीयते। अर्थात् चतुर्षु कौशलेषु अन्यतमयोः अन्यतमस्य वा त्यागे कृतेऽपि भाषाशिक्षणं साकल्येन कृतं न भवति। एवं संस्कृतशिक्षणे एतेषां चतुर्णामपि महत्त्वं समानतया एव भवतीति ज्ञायते।

**********

## वास्तुशास्त्रस्य डिप्लोमाकार्यक्रमस्य परिशीलनम्

✍ **डा. सुधांशुकुमार नन्दा**

संविदध्यापकः, डिप्लोमाविभागः

राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्यास्य एकः नूतनपाठ्यक्रमः **“वास्तुशास्त्रडिप्लोमा”** इति। ऐषमः एवास्य शुभारम्भः सञ्जातः। **वास्तुशास्त्रडिप्लोमा** इति वाक्यांशं वास्तुशास्त्रम्, डिप्लोमा, वास्तुशास्त्रडिप्लोमा इति त्रिधा विभज्य, पाठ्यक्रमस्यास्य सामाजिकजीवनयापने आवश्यकतया सह वास्तुशास्त्रस्य परिचयप्रदानपूर्वकं स्वस्य विचारधारा लेखनेऽस्मिन् प्रस्तोष्यते।

**वास्तुशास्त्रम् -** वास्तु इति शब्दः वस् धातोः निष्पन्नः। वासोपयोगिस्थलं भवनभूखण्डं वा वास्तु। पुनश्च वसन्त्यस्मिन्निति वास्तु, वसन्ति प्राणिनो यत्र वेति। विश्वकर्मणः वास्तुशास्त्रे उच्यते –

देवतानां नराणां च गजगोवाजिनामपि।
निवासभूमिश्शिल्पज्ञैर्वास्तुसंज्ञमुदीरितम्॥ मयमतं पश्यामश्चेत् –

अमर्त्याश्चैव मर्त्याश्च यत्र यत्र वसन्ति हि।

तद् वास्त्विति मतं तज्ज्ञैः....... ।।

अर्थात् निवासयोग्यभूमिः वास्तु, तत्सम्बद्धं शास्त्रं वास्तुशास्त्रमिति । एवमपि वक्तुं शक्यते यदुपयुक्तस्थानस्य चयनं कृत्वा तदुपरि प्रकृत्यानुकूल्येन गृहादीनां निर्माणाय मानवः यत् शास्त्रमाश्रयति तदेव वास्तुशास्त्रम् । अस्य स्थापत्यशास्त्रं, शिल्पशास्त्रं, वास्तुशास्त्रं एते पर्यायवाचिनः भवन्ति । अस्य शास्त्रस्य प्रमुखतः अष्टादशप्रवर्तकाः सन्ति । ते यथा –

भृगुरत्रिर्वशिष्ठश्च विश्वकर्मा मयस्तथा।

नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।।

ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।

वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।।

अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः ।।

अस्मिन् शास्त्रे गृहादीनां निर्माणकलाकौशलं पञ्चभूतमाश्रित्य वर्णितमस्ति । केचन वास्तुशास्त्रोक्तविधिमनुसृत्य उपयुक्तस्थानस्य चयनं कृत्वा, केचन तु परिस्थित्या यत्रकुत्र अपि, अन्ये च यस्यां भुवि मनसः सन्तोषः जायते तत्रैव गृहं निर्मान्ति । वास्तुरत्नावल्याम् उक्तमस्ति यत्

मनसश्चक्षुषोर्यत्र सन्तोषो जायते भुवि।

तस्याङ्कार्यं गृहं सर्वैरिति गर्गादिसम्मतम् ।।

**गृहस्थस्य क्रियास्सर्वा न सिद्ध्यन्ति गृहं विना** इति वास्तुरत्नावल्यनुसारं गृहस्थस्य सर्वाः क्रियाः गृहमाश्रित्यैव प्रवर्तन्ते इति हेतोः गृहस्य प्रयोजनमनिवार्यं भवति । यतोहि

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं

जन्तूनां निलयं सुखास्पदमिदं शीताम्बुधर्मापहम्।

वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते

गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ।।

अन्ते एवमपि वक्तुं शक्यते यत् न केवलं वासार्थं गृहनिर्माणं अपि च कूपतडागादीनां खननं, पशुशालानिर्माणं एवं च वाटिकादियोजनादिभिः सह सर्वविधनिर्माणकौशलानां विवरणं यस्मिन् शास्त्रे विद्यते तदेव वास्तुशास्त्रम् ।

**डिप्लोमा -** प्रायशः डिप्लोमा इति शब्देन, शिक्षानुष्ठानेन प्रदत्तं एकं प्रमाणपत्रं भवितुमर्हति । यत्र एकः जनः सफलतया निर्दिष्टपाठ्यक्रमं निर्दिष्टसमयाभ्यन्तरे च परिसमापयति । अन्तर्जालं पश्यामश्चेत् A


ISSN: 2320-740X

certificate awarded by an educational establishment to show someone has successfully completed a course of study इति । पुनः

A **diploma** (from Greek δίπλωμα *díplōma*, meaning "folded paper") is a certificate or deed issued by an educational institution, such as a college or university, that testifies that the recipient has successfully completed a particular course of study or confers an academic degree. In countries such as the United Kingdom and Australia, the word diploma refers to a level of academic award.

Diploma and certificate programs taken alone are similar to associate's degree programs. However, they take less time because general education courses are not required. A degree program differs from certificates and diploma programs in that it often requires the student to take general education courses to support a more rounded education.

**वास्तुशास्त्रे डिप्लोमा -** अस्मिन् ज्यौतिषं, वास्तुशास्त्रं व्यावहारिकसंस्कृतं चाधारीकृत्य पञ्चपत्राणि पाठ्यन्ते। विशदेन पत्रविवरणं यथा –

प्रथमं पत्रं संस्कृतशिक्षणम् – भारतीयज्ञानस्याधारः वेदः। वेदस्य भाषा संस्कृतम्। यदि संस्कृतभाषां वयं भारतीयत्वेन न जानीमः तर्हि कदाचित् अस्माकं जीवनं तथा भवितुमर्हति यथा मूलेन हीनः वृक्षः जीवति। सा (भाषा) सर्वासां भाषाणां जननी देवभाषा च उच्यते। यतोहि साम्प्रतमपि देवपूजनादिकं संस्कृतभाषया एव प्रचलति। अयं संस्कृतविश्वविद्यालयः इति हेतोः अस्याः भाषायाः संरक्षणमस्य उत्तरदायित्वं भवति। पुनश्च भारतीयवास्तुशास्त्रस्य मूलं संस्कृतभाषया एव दैवज्ञैः विरचिताः। तस्मात् पाठ्यक्रमे संस्कृतशिक्षणस्य पत्रस्यावश्यकता अस्ति एव।

द्वितीयं पत्रं ज्यौतिषशिक्षणम् - ज्यौतिषशास्त्रस्यास्य मुख्यतः विभागत्रयं सिद्धान्तसंहिताहोरारूपकम्। एतेषु त्रिषु संहिताभागान्तर्गतं भवति वास्तुशास्त्रम्। तत्र ज्यौतिषमज्ञात्वा एव वास्तोः सम्पूर्णं ज्ञानमित्युक्ते तथा भवितुमर्हति यथा द्वारस्य उद्घाटनं विना प्रकोष्ठान्तः प्रवेशार्थं प्रयत्नः। तदर्थं **जन्मपत्रदीपक** इति पुस्तकम् पाठ्यते। अस्मिन् पुस्तके जन्मपत्रिकानिर्माणविधि-द्वादशभावसाधन-ग्रहाणां शयनाद्यवस्था-अयनांशविचारैः सह अनेकानि जौतिशशास्त्रस्य मौलिकानि तत्वानि विद्यन्ते। यद्यप्याधुनिकरीत्या तन्त्रांशेन (software माध्यमेन) शीघ्रतया (जन्मदिनाङ्कस्य, जन्मसमयस्य, जन्मस्थानस्य च प्रदानेन) जन्मपत्रिकायाः विवरणमागच्छति तथापि तस्याधारः ज्योतिषशास्त्रोक्तप्रकार एव। पुनः पञ्चाङ्गादीनां ज्ञानं (तिथि-वासर-नक्षत्र-योग-करणानि च) विना वास्तुशास्त्रं सम्यग्ज्ञातुमपि न शक्यते। तदर्थं ज्यौतिषशिक्षणमावश्यकम्।

तृतीयं पत्रं वास्तुशिक्षणम् – अस्मिन् पत्रे श्रीजीवनाथविरचितं वास्तुरत्नावलीपुस्तकं पाठ्यते। जनः यत्र (ग्रामे) वस्तुमिच्छति तस्मै तस्य ग्रामस्य शुभाशुभत्वं कथं ज्ञातव्यमित्यस्य विचारः, भूशोधनप्रक्रिया, शुभाशुभभूमेः लक्षणम्, दिक्साधनम्, गृहसमीपस्थशुभाशुभवृक्षस्थितेः विचारः, वास्तुपूजनक्रमः प्रभृतयः विचाराः अत्र विस्तृततया विचारिताः। वास्तुशास्त्रस्य मौलिकज्ञानमस्मिन् (fundamental knowledge of vastushastra) सरलप्रक्रियया विद्यते।

**मुहूर्तविचारः**

वेदास्तावद्यज्ञप्रवृताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।
शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्॥

इति भास्करस्य वचनेनैव मुहूर्तविचारस्यावश्यकता सिद्ध्यति। गृहनिर्माणस्य स्थलं वास्तुशास्त्रदृष्ट्या शुभं विद्यते चेदपि तस्यारम्भः अज्ञानेनाशुभमुहूर्ते(काले) भवति चेत् गृहस्वामी कुतः गृहसौख्यं प्राप्स्यति। तदर्थं शुभाशुभमुहूर्तविचारस्य प्रामाणिकं पुस्तकं मुहूर्तचिन्तमणिः अत्र विहितः।

पञ्चमं पत्रं वास्तुक्षेत्रपरिमापनप्रशिक्षणं साम्प्रतिकवास्तुशास्त्राध्ययनञ्च –

क्षेत्रं तु सर्वदा शास्त्रोक्तरीत्या न भवति। (कुत्र वर्गाकारं, कुत्र आयताकारं, अन्यत्र चक्राकारं विषमाकारं वा) तत्र मापनज्ञानाभावे दिक्साधनेन क्षेत्रं संशोध्य तद्वासोपयोगिक्षेत्रत्वेन परिवर्तयितुं न शक्यते। तदर्थं लीलावतीपुस्तकस्य क्षेत्राधिकारः, रेखागणितस्य च आदितः अध्यायद्वयं पाठ्यते। पुनः आधुनिकरीत्या निर्माणस्य कलाकौशलमत्र पाठ्यते। यथा – चिकित्सालयनिर्माणं कथं करणीयं तस्य योजना, तत्र च मुख्यद्वारं कुत्र भवेत्, वैद्याः कुत्र भवेयुः, रोगिणः शय्या च कुत्र भवेत् इत्यादयः अनेके विषयाः विद्यन्ते।

इतः एवं ज्ञातुं शक्यते यद्वास्तुशास्त्रडिप्लोमापाठ्यक्रमस्योपयोगः साधारणजनानामपि भवत्येव। यतोहि मानवस्य मौलिकावश्यकतात्रयं खाद्यं,वस्त्रं,वासगृहञ्च विद्यते। तेषु गृहं मानवस्यानिवार्यं भवत्येव। अपि पक्षिणः पशवश्च स्वानुकुल्यस्थानस्य चयनं कृत्वैव वसन्ति।
अतः अयं पाठ्यक्रमः सर्वेषाम् उपयोगाय भवतीति वक्तुं शक्यते।

**********


ISSN: 2320-740X

# चान्द्रयोगाः

✍ श्रीविनायकभट्टः, ओड्लमने
परियोजनासहायकः

वेदाङ्गेषु नेत्रस्थानमवाप्य त्रिस्कन्धात्मकं ज्यौतिषशास्त्रं तमसि द्रव्याणि दीप इव शुभाशुभफलानि दर्शयति।

"कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति[1] इति वचनमनुसृत्य पूर्वजन्मनि दृढोपार्जितं सत् अदृढोपार्जितं असत् दृढादृढोपार्जितं सदसत् इति त्रिविधं यत्कर्म तस्य परिपाकः इहजन्मनि अभिव्यज्यते होरया इत्युक्तं आचार्यैः। तेषां चिन्तनप्रकारस्तु एवं वर्तते –

दशाप्रभेदेन विचिन्तयेत् दृढं दृढेतरं चाष्टकवर्गगोचरैः।
दृढादृढं योगवशेन चिन्तयेत् इति त्रिधा जातकसूक्ष्मसङ्ग्रहः॥[2]

मिहिराचार्यस्तु दशाप्रकरणं अष्टकवर्गप्रकरणञ्च उक्त्वा दृढादृढकर्मसमुद्भूतफलादेशार्थं राज-नाभस-प्रवृज्या-चान्द्रादियोगानाह। को नाम योगः इति चेदुच्यते –

ग्रहाणां स्थितिभेदेन पुरुषं योजयन्ति हि।
फलैः कर्मसमुद्भूतै इति योगाः प्रकीर्तिताः॥ इति

युजिर्-योगे इति णिजन्ताद्धातोः निष्पन्नोयं योगशब्दः प्राग्जन्मार्जितशुभाशुभफलैः पुरुषं योजयति इत्यर्थे प्रवृत्तः।

मूलं कालतरोः स्मृतं हिमरुचिः....., चान्द्रं बलं तु निखिलग्रहवीर्यबीजं..., लग्नात्पुत्रकलत्रभे..चन्द्राद्वा , इत्यादि वचनैः स्पष्टं यत् फलादेशे चान्द्रबलं तु महत्वं भजते इति। अत एव चन्द्रमधिकृत्य प्रवृत्तानां योगानामपि महिष्ठं स्थानं वर्ततेऽस्मिन् शास्त्रमहार्णवे।

प्रधानतया विनयः धनधान्यसम्पत्, ज्ञानं, बुद्धिकौशलम् इत्येते चत्वारः विचाराः निर्णीयन्ते चान्द्रयोगेन। तद्यथा अर्कस्य केन्द्रस्थे चन्द्रे पूर्वोक्तानां पदार्थानां अधमत्वं ,पणपरस्थे मध्यमत्वं, आपोक्लिमत्वे वरिष्ठत्वं च ज्ञेयम्। तत्रापि अर्कस्थितराशिः तद्द्वितीय-तृतीयेषु विनयस्य , चतुर्थ-पञ्चम-षष्टेषु स्थिते चन्द्रे वित्तस्य, सप्तमादिषु ज्ञानस्य दशमादिषु धीनैपुण्यस्य अधम-सम-वरिष्ठत्वं च ज्ञेयेम् इति कश्चन चिन्तनक्रमोऽपि संसूचितः रुद्रभट्टेन। तथा चन्द्रात् सप्तम-निधनेषु एकत्रस्थितैः पृथक्स्थितैर्वा बुध-गुरु-शुक्रैः अधियोगो नाम कश्चन योगविशेषः जाजायते। तस्मिन्योगे शुभग्रहेषु

[1] बृहज्जातकम् १-३
[2] सारावलिः

हीनबलेषु चमूपस्य जन्म,मध्यबलेषु सचिवस्य जन्म, पूर्णबलेषु महीपालस्य च जन्म भवति इति महीधरस्य अभिप्रायः।

हित्वार्कं सुनभानभाधुरुधुराः स्वान्त्योभयस्थैर्ग्रहैः
शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ ॥[1]

इत्युक्तप्रकारेण सूर्यं हित्वा अन्यग्रहैः चन्द्रात् धनस्थिते ३१ प्रकारेण सुनफायोगः, व्ययस्थिते ३१प्रकारेण अनफायोगः, उभयत्र स्थिते १८० प्रकारेण धुरधरायोगश्चेति त्रिधा योगाः सम्भवन्ति । स्वयमधिगतवित्तः पार्थिवस्तत्समो वा

भवति हि सुनभायां धीधनख्यातिमांश्च।
प्रभुरगदशरीरः शीलवान् ख्यातकीर्तिः
विषयसुखसुवेषो निवृतश्चानभायाम् ॥[2] इति

सुनभानभा योगानां फलचिन्तनमपि कृतं वर्तते। अनेन स्पष्टं यत् सुनफा-अनफाख्यौ योगौ राजयोगसमौ इति। चन्द्रस्य उभयत्र ग्रहाभावे केमद्रुमो नाम कश्चनदारिद्र्ययोगोपि सम्भवति। अस्य योगस्य फलमपि एवमुक्तम्-

योगे केमद्रुमे प्राप्ते यस्मिन् कस्मिंश्च जातके।
राजयोगा विनश्यन्ति हरिं दृष्ट्वा यथा द्विपाः ॥[3] इति।

राजयोगे जातः अपि केमद्रुमयोगस्य प्रभावात् निर्धनः भविष्यति। परन्तु केमद्रुमयोगस्य भङ्गमपि निर्दिष्टम् –

निशाकरे केन्द्रगते भृगौ वा जीवेक्षिते नैव दरिद्रयोगः।
शुभान्विते वाऽशुभमध्यगेन्दौ जीवेक्षिते नैव दरिद्रयोगः ॥[4]

इत्यनेन चन्द्रः शुक्रो वा केन्द्रसंस्थे गुरुणा निरीक्षिते केमद्रुमभङ्गः। तथा शुभान्वितः शुभमध्यस्थितः जीवेक्षितश्च चन्द्रः चेत् केमद्रुमापवादः।

उत्साहशौर्यधनसाहसवान् इत्यादि श्लोकैः सुनफादिषु योगेषु योगकतॄणां ग्रहाणां- फलविशेषः अपि निर्दिष्टं आचार्येण । चन्द्रात् उपचयगतैः समस्तैः सौम्यैः वसुमद्योगः द्वाभ्यां समवसुमद्योगः तदूनतायां अल्पवसुमद्योगः भवतीति सम्पन्निर्णायकः कश्चन योगविशेषः।

---

[1] बृहज्जातकम् १३-३

[2] बृहज्जातकम् १३-५

[3] जातकपारिजातः ७-५२

[4] जातकपारिजातः ७-५०


ISSN: 2320-740X

मनःकारकचन्द्रात् केन्द्रस्थे ज्ञानकारकगुरौ गजकेसरी योगो भवति।

गजकेसरी सञ्जातो तेजस्वी धनधान्यवान् ।
मेधावी गुणसम्पन्नो राजप्रियकरो भवेत् ॥[1]

इति तस्य फलचिन्तनमपि सम्यग्निरूपितं वैद्यनाथेन जातकपारिजाते । यदि चन्द्रात् कर्मस्थाः शुभग्रहाः तर्हि आचन्द्रार्ककीर्तिकारी अमलायोगो भवतीति तस्यैवोक्तिः । चन्द्रात् षष्टे अष्टमे वा गुरुश्चेत्तथाऽसौ गुरुः लग्नात् केन्द्रे न भवेत्तदा शकटयोगो भवति । अस्मिन्योगे राजकुले जातोऽपि निर्धनः क्लेशादिवशान्नित्यसंतप्तः नृपविप्रियश्च भवति ।

निर्बलेषु ग्रहेषु "परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः"[2] इत्युक्तप्रकारेण स्वप्ने एव तद्योगस्य फलानुभूतिर्भवति । एवं चन्द्रस्य तथा योगकारकग्रहाणां बलाबलं विचिन्त्य फलमादिशेत् दैवज्ञः ।

**आधारग्रन्थाः**


- बृहज्जातकम् –रुद्रटीका
- महीधरकृतं बृहज्जातकविवरणम् (मातृका)
- सारावली
- जातकपारिजातः
- फलदीपिका


**********

## अथातः शेषलक्षणम्


✍ **श्रीमञ्जुनाथभट्टः**
परियोजनासहायकः


भगवता जैमिनिना द्वादशसु अध्यायेषु धर्मो विचारितः । तत्र तृतीयाध्यायस्य प्रथमपादस्य प्रथमं सूत्रं भवति "**अथातः शेषलक्षणम्**" इति । शेषो नाम अङ्गम् । अथातः शेषलक्षणं, शेषः परार्थत्वात् इत्यनयोः सूत्रयोः शेषनिरूपणस्य स्पष्टं प्रतीयमानत्वात् शेषनिरूपणमेव प्राधान्येन तृतीयाध्यायस्यार्थः ।

---

[1] जातकपारिजातः ७-११७

[2] बृहज्जातकम् ८-२२

शेषिनिरूपणन्तु शेषत्वस्य ससम्बन्धिकत्वेन सिध्यति । द्वितीयतृतीयाध्याययोः उपजीव्योपजीवकभावसङ्गतिः दृश्यते । द्वितीयाध्याये शब्दान्तरादिभिः षड्भिः प्रमाणैः कर्मभेदे निरूपिते इदानीन्तेषु अङ्गाङ्गिभावः निरूप्यते इति उपजीव्योपजीवकभावसङ्गतिः । श्रुत्यादि षड्भिः प्रमाणैः अङ्गत्वं निरूप्यते । तदर्थं अङ्गत्वलक्षणम्, श्रुत्यादीनि षट्प्रमाणानि, तयोर्विरोधे बलाबलत्वम्, विरोधः कुत्र इत्यादयो विचाराः तृतीयाध्याये क्रियन्ते । अत्र अथ, अतः, शेषलक्षणम् इति सूत्रार्थः । अथ शब्दः आनन्तर्यार्थः । अतश्शब्दः हेत्वर्थकः । कर्मभेदलक्षणहेतोः वृत्तत्वात् शेषलक्षणमुच्यतेऽत्यर्थः ।

"**शेषः परार्थत्वात्**" इति द्वितीयं सूत्रं भवति । अङ्गत्वं नाम पारार्थ्यम् । तच्च यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत् तत्वं तदङ्गत्वम् । यदुद्देशेन- स्वर्गोद्देशेन, प्रवृत्तः यः पुरुषः तदीय क्रतौ आख्यातार्थभूतायां भावनायां करणत्वेन विधीयमानः यागादिः स्वर्गाङ्गमिति लक्षणसमन्वयः । तत्र व्रीह्यादि द्रव्यस्य, आरुण्यादि गुणस्य, स्वर्गकामस्य कर्तुः, पौर्णमास्यादि कालस्य, समादि देशस्य लक्षणसमन्वयः सम्भवति । कृष्यादीनान्तु यागकृतिकारकत्वात् अङ्गत्वप्रसक्तौ विधेयत्वान्तात् न तत् । इत्थञ्च पारार्थ्यापरपर्यायस्य अङ्गत्वस्य लक्षणं स्पष्टम् ।

पारार्थ्यम् अङ्गत्वमिति लक्षणमभिप्रेत्य कालादयोपि शेषाः इति जैमिनिमतसंक्षेपः । परमत्र बादरिः एतन्नाङ्गीकरोति । तन्मतं - समानपदश्रुत्या यागादेरेव भावनाभाव्यत्वेन स्वर्गोद्देशेन विहितत्वाभावात् न यागादेरङ्गत्वम् । स्वर्गकामपदस्यतु परस्त्रीकामः प्रायश्चित्तं कुर्यादितिवत् कर्तृपरत्वादिनोपपत्तेः न भाव्यपरत्वस्यावश्यकता । अत न यागादेः तत्वम् । अतः व्रीह्यादेर्द्रव्यस्य आरुण्यादेर्गुणस्य, अवघातादेः संस्कारस्य उपकारकत्वादङ्गत्वम् । यद्यपि **द्रव्यगुणसंस्कारेषु बादरिः** इत्यादिसूत्रेणात्र पूर्वमुक्तशेषत्वस्य लक्ष्यनिर्देशः क्रियते । तत्र बादरिः इत्थमभिप्रैति – पारार्थ्यस्य अङ्गत्वरूपत्वेन यागादेः पारार्थ्यात् अङ्गत्वमिति यदुक्तं तन्न घटते । कुत इति चेत् स्वर्गोद्देशेन यागविधाने यागस्य पारार्थ्यं सिध्यति । परं भावनायाः भाव्यापेक्षायां समानपदोपात्तधात्वर्थस्यैव भाव्यत्वसंभवेन तदतिक्रम्य कालान्तरोपात्तस्वर्गादेः भाव्यत्वायोगात् तस्यैव प्राधान्येन न पारार्थ्यम् । अतः विधेः प्रवर्तकत्वानुरोधेन इष्टसाधनत्वाक्षेपकत्वेन च यागादेः इष्टसाधनत्वज्ञानाभावे यागादौ प्रवृत्यनुपपत्या स्वर्गस्यैव भाव्यत्वावश्यम्भावात् यागस्य पारार्थ्यम् अवश्यम् अङ्गीकर्तव्यम् । तस्मात्पारार्थ्यमेव शेषत्वम् ।

**********


ISSN: 2320-740X

## देवप्रश्ने बृहज्जातकस्य उपयोगः

✍ श्री श्रीपतिः

शोधच्छात्रः

**"स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे"**[1] इति प्रतिज्ञा वराहस्य । इयमेव समादृत्य बृहज्जातकम् इदं बह्वर्थकं शास्त्रम् इति परिगणय्य बहवः बुद्धिवृद्धाः हौरिकाः विशेषतया अर्थप्रकाशकानि नाना व्याख्यानानि रचयामासुः । तत्प्रोक्तक्रमेण कल्पिताः, किन्तु तेषु अनुक्ताः सम्प्रदायप्राप्ताः अर्थाः अपि बहवः सन्ति, येषाम् उपयोगः प्रश्नजातकादिषु बहुधा क्रियमाणः अद्यापि लोके दृश्यते । तेषां स्थूलदर्शनम् अत्र कार्यते । "लोकात् शास्त्रमुखात् तथा गुरुमुखात्" इति न्यायवशाद् अत्र यन्निरूपितं तत्सर्वं मद्गुरूणां प्रसाद एव । (क्वचिच्च अत्र मया अपि अर्थाः कल्पिताः इति । तथा अत्र निरूपणे अयं क्रमः – बृहज्जातकोक्तशब्दैः देवताचिन्तनम् उपरि निरूप्यते, तत्र प्रमाणभूतानि इतरज्यौतिषग्रन्थवचनानि वा मन्त्रशास्त्रवचनानि वा इतरप्रमाणानि टिप्पण्यां दीयन्ते इति वाचकेषु निवेद्यते ।)

प्राथम्येन वराहेण साक्षादुच्यते – **वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः**[2] इति । अत्र रविणा अग्निः, चन्द्रेण वरुणः, कुजेन अग्निजो गुहः, बुधेन विष्णुः, गुरुणा इन्द्रः, शुक्रेण इन्द्राणी, शनिना कस्य नाम ब्रह्मा च चिन्तनीयाः इत्युक्तम् । तथैव **शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण**[3] इत्यनेनापि क्रमेण कुजादिभिः अग्नेः, भुवः, अकाशस्य, जलस्य, वायोश्च चिन्तनं करणीयम् इति निरूपितम् ।

**१. गणपतिः -** गणपतिचिन्तनं तु मेषराशिशीलेन **क्षिप्रप्रसादः**[4] इत्यनेन शक्यते[5] । एवमेव मेषद्रेक्काणेषु - **रौद्रं परशुं समुद्यतम्**[6] इत्यत्र, अत्रैव पाठान्तरे **रौद्रः**[7] इत्यनेन, **रक्ताम्बरा, रक्तानि वस्त्राणि बिभर्ति**

[1] बृहज्जातकम्-१.०२.

[2] बृहज्जातकम्-२.०५

[3] बृहज्जातकम्-२.०६

[4] बृहज्जातकम्-१६.०१

[5] शारदातिलके क्षिप्रप्रसादमन्त्रः गणपतिपरः । शारदातिलकम् - १३.९४ – "क्षिप्रप्रसादनो विघ्नो देवता..."

[6] अनेन द्रेक्काणफलेन "रक्तविलोचनः" इत्यनेन महाकाली अपि चिन्त्या । मन्त्रमहोदधौ "घोरास्याम्..." इत्यादि ध्यानम् - ३.९

[7] भट्टोत्पलीयः पाठः । रुद्रसम्बन्धी रौद्रः – गणपतिः, स्कन्दः, वीरभद्रोपि । "रौद्रो भीष्मे....रौद्री गौर्याम्" – अतः गौरी अपि चिन्त्या – शब्दार्थकौस्तुभे रौद्रशब्दो द्रष्टव्यः ।

ISSN: 2320-740X

इत्येतैः परशुधारी, रक्तवासाश्च गणपतिरेव इति चिन्त्यम्[1] । द्रेक्काणाध्याये वृषभान्त्ये **द्विपसमकायः**[2] इति, कन्यामध्येन **पुरुषः प्रगृहीतलेखनिः** इत्येताभ्यां, अत्रैव **लेखनः**[3] इति पाठान्तरे तेनापि, तथा धनुषि स्थितस्य शुक्रस्य **गणैः पूज्यः**[4] इत्यनेन फलेन च धनुषि स्थिते शुक्रे गणपतिः चिन्त्यः । तथैव भू**गणपः**[5] इत्यनेनापि बुधशुक्रयुतिफलेन शुक्रबुधसम्बन्धे सति शुक्रेण (शुक्रः प्रधानम् अस्मिन् चिन्तने इत्यर्थः) गणपतिः चिन्त्यः । अनफायोगदेन वा सुनफायोगकर्त्रा शनिना तत्प्रोक्ताद् **गणेशः**[6] इति फलाद् गणपतिः चिन्त्यः इति भावयामि । अनेन गणपतिचिन्तनं युज्यते इति मम अभिप्रायः ।

**२.दुर्गा- दुर्गारण्य**पथा**लया सिंहे**[7] इत्यनेन उक्तेन दशादिस्थितचन्द्रफलेन सिंहस्थे चन्द्रमसि, कर्कमध्ये **अरण्यगता** इत्यनेन च वनदुर्गाचिन्तनं[8] कर्तव्यम् । तत्रैव **सितर्क्षेन्नदा** इत्यनेन चन्द्रेण शुक्रक्षेत्रस्थेन अन्नपूर्णाचिन्तनं करणीयम् । शुक्रे सिंहस्थे **प्रवरयुवतिः**[9] इति फलम् । तेन प्रवरा च सा युवतिश्च इत्यर्थं स्वीकृत्य दुर्गा वा तद्भेदं श्रीरूपादिकं चिन्त्यम् । कुजर्क्षे शुक्रे कुजशुक्रयुतेश्च **परयुवतिरतः**[10],[11] इति फलम् । अत्रापि परा च सा युवतिश्च, तस्यां रतः इत्यर्थं स्वीकृत्य पूर्वोक्तचिन्तनमेव क्रियते । कन्याराशेः अन्त्यद्रेक्काणेन गौरीचिन्तनम् अन्नपूर्णाचिन्तनं च क्रमात् **गौरी, कटच्छुहस्ता**[12] इत्याभ्याम् लक्षणाभ्याम् । अत्र **गौरी** नाम कन्या[13] इत्यतः कन्याकुमारी अपि ग्राह्या । कन्याराशेः आद्यद्रेक्काणस्थेन **कन्या**पदेन कन्याकुमारी, कन्यकापरमेश्वरी वा चिन्त्या । तत्रैव **गुरोः कुलं वाञ्छति** इत्यतः रेणुकापरमेश्वरी चिन्त्या । धनुषः मध्यद्रेक्काणे **भद्रासने तिष्ठति** इत्यतः त्रिपुरसुन्दरीचिन्तनम् (ललिता)

---

[1] गणपत्यथर्वशीर्षे - "रक्तं लम्बोदरं...रक्तवाससम्" । श्रीगणेशमहादर्शनाख्ये ग्रन्थे ३८० पृष्ठे - "रक्तो रक्ताङ्गरागांशुक..." । तस्मिन्नेव ग्रन्थे १७ पृष्ठे "उद्वहन्परशुम्.." ।

[2] शारदातिलकम्-१३.९४,८८ – "हस्तिमुखः...."

[3] अयं पाठः रुद्रभट्टीयः । श्रीगणेशमहादर्शनाख्ये ग्रन्थे १३ पृष्ठे – "यं पुस्तकाक्ष...करभूषणम्....." – द्विजगणपतेः ध्यानम् । शुक्रशनियुतौ अपि गणपतिः चिन्त्यः "भवति च लिपि पुस्तचित्रवेत्ता..." (बृहज्जातकम् – १४.५)

[4] बृहज्जातकम्-१६.२९

[5] बृहज्जातकम्-१४.०४

[6] बृहज्जातकम्-१३.०८

[7] बृहज्जातकम्-०८.११ – अरण्यम् आलयः यस्याः सा । सिंहराशिस्थितश्चन्द्रो भगवती अन्यपूजिता – प्रश्नमार्गः – १.२०९

[8] शारदातिलकम्-११.७१-"विन्ध्यनिवासिनीम्...."

[9] बृहज्जातकम्-१६.२९

[10] बृहज्जातकम्-१६.२७ । रतिः श्रद्धा (द्रष्टव्यम् - शब्दार्थकौस्तुभे रति वा रत )

[11] बृहज्जातकम्-१४.०३

[12] कटच्छुः लोहभाण्डविशेषः इति रुद्रः, दर्वीति भट्टोत्पलः । अन्नपूर्णाध्याने – "दर्वीहाटकभाजनम् च दधती.."–मन्त्रमहोदधिः-९.७

[13] "गौरी तु नग्निकानागतार्तवा" इत्यमरः - २.६.८ ।

इति तद्विदां मतम् । तत्रैव **चम्पकहेमवर्णा** इत्यनेन, चापान्त्ये **हाटकचम्पकाभः**[1] इति, मीनमध्ये **वर्णेन चम्पकमुषा** इत्यपि लक्ष्मीः (वा रत्नाम्बिका) चिन्त्या[2] । मीनान्त्येनापि **कूलं प्रयाति...** इत्यादिना लक्ष्मीः, जलदुर्गा च चिन्त्या । मकरमध्ये **कलास्वभिज्ञा** इति सरस्वती, पुनः तत्रैव **श्यामा**, कुम्भान्ते च **श्यामः** इत्येताभ्यां श्यामलादेवी, शूलिनी दुर्गापि[3] चिन्त्या । मेषान्त्ये **चण्डः** इत्यनेन स्त्रीत्वम् अपेक्ष्य चण्डिकाचिन्तनं क्रियते । कर्कमध्ये **पद्मार्चिता**, कन्यान्ते **देवालयं स्त्री प्रयता प्रवृत्ता** इति पद्मावती, **मूर्धनि भोगियुक्ता** इति महाकाली अपि चिन्त्या । मेषमध्येन **वाजिमुखी** इति अश्वारुढा पार्वती चिन्त्या ।

**३.शिवः-** वृश्चिकस्थे रवौ[4] उक्तेन **साहसिको विषार्जितधनः शास्त्रान्तगः**[5] इत्यनेन फलेन शिवः चिन्त्यः । । सिंहस्य अन्त्यद्रेक्काणे **कूर्ची मनुष्यः कुटिलैश्च केशैः**[6] इति, धनुषः अन्त्यद्रेक्काणे च **कूर्ची** इत्येताभ्याम् अपि शिवः चिन्त्यः । वृषभस्य अन्त्यद्रेक्काणे **शरभसमाङ्घ्रिः**, कर्कादौ च **शरभाङ्घ्रिः** इत्येताभ्यां शरभेश्वरो विचिन्त्यः । कर्कटस्य अन्त्यद्रेक्काणेन **सर्पवेष्टितः** इत्यनेन तथा **शशाङ्के पापलग्ने...**[7] इत्यनेनापि रुद्रः वा कालकण्ठः चिन्त्यः । तुलान्त्ये **विभीषयन् तिष्ठति वने मृगान् काञ्चनतूणवर्मभृद्** इत्यनेन किरातेश्वरो विचिन्त्यः । तत्किरातरूपं किरातार्जुनीयादिषु प्रसिद्धम् ।

**४.विष्णुः-** मिथुने कन्यायां च लग्ने वा चन्द्रमसि उक्तेन **स्त्रीलोलः...दूतः..**[8]**, परगृहैः संयुज्यते**[9] इत्यनेन, बुधस्य मेषवृश्चिकयोः राशिफलेन **द्यूतान्नपान..चोर..**[10] इत्यादिलक्षणेन, वृषतुलयोः बुधफलेन **आचार्यभूरि...गुरुभक्तियुतश्च**[11] इत्यनेन, बुधस्य कर्कटराशिफलेन **स्वजनस्य शत्रुः**[12] इत्यनेन, सिंहस्थे

---

[1] “शुद्धजाम्बूनदाभाम्...” इति लक्ष्मीहृदये प्रसिद्धं महालक्ष्मीध्यानम् ।

[2] अत्र गणपतिरपि चिन्त्यः - श्रीगणेशमहादर्शनम् - ३८५ पृष्ठे - लक्ष्मीविनायकमन्त्रः-“कनकाभमीडे” इति ध्यानात् ।

[3] शारदातिलकम् - ११.३७,४६

[4] प्रश्नमार्गेपि वृश्चिकरवौ “कीटे स्वयम्भूः” (१५.२०५) इति शिवचिन्तनमेव उक्तम् ।

[5] बृहज्जातकम्-१६.१६ (समुद्रमथने प्राप्तं कालकूटं सहसा पीत्वा तद्द्वारा लोके विख्यातिरूपं धनं प्राप यः स साक्षात् शिव एव । तथा केवलं वैराग्यस्य मूर्तरूपमपि स एव इत्यतः शास्त्रान्तगः इत्यनेनापि स एव ग्राह्यः इति लक्षणत्रयस्यापि शिवे सङ्गतिः ।)

[6] “गङ्गातरङ्गरमणीयजटाकलापम्....” प्रसिद्धं शिवस्तोत्रम् ।

[7] बृहज्जातकम्-५.०३ – शिवः सर्पाभरणः । रुद्रध्याने “ब्रह्माण्डव्याप्तदेहा....भुजङ्गैः... “ । तथा शारदातिलके - २०-१०,२८ - अघोर-पाशुपतध्यानयोः – “सजलघन....भुजगधरम्....”, “पन्नगभूषणम्...”

[8] बृहज्जातकम्-१६.०३ – “हरेः शशिभुवः” प्रश्नमार्गः - २४.१२

[9] बृहज्जातकम्-१६.०६

[10] बृहज्जातकम्-१६.२१

[11] बृहज्जातकम्-१८.०८ । “वृषसंस्थः बुधो गोपालकृष्णः स्यात्” – प्रश्नसङ्ग्रहः – १४.४१

[12] बृहज्जातकम्-१६.२२

रवौ **वनशैलगोकुलरतिः**[1] इति, **गीतप्रियो नृत्यवित्**[2] इति बुधगुरुयुतिफलेन गुरुणा वा बुधेन, कुम्भमध्यद्रेक्काणेन **दग्धे शकटे** इत्यनेन[3], **कृष्णः** इति मेषाद्यद्रेक्काणफलेन, वृश्चिकराशिशीलेन **शैशवे जनकगुरुवियुक्तः**[4] इत्यनेन च कृष्णः चिन्त्यः। स च क्वचिद् वेणुधरः, मुरलीगानलोलः, कालीयमर्दनः वा शकटासुरभञ्जनः इत्यादिकं इतरलक्षणेन उक्तेन च विचिन्त्य वाच्यम्। द्रेक्काणाध्यायोक्तैः फलैः मिथुनमध्ये **धनुष्मान्** इति, कन्यामध्ये **विपुलञ्च बिभर्ति कार्मुकम्** इति, धनुरादौ **धनुर्विगृह्य** इति, मिथुनावसाने **सधनुष्कः** इति, तुलान्ते **धनुर्धरः** इत्येतैः श्रीरामचिन्तनं युज्यते। मेषादौ **रौद्रं परशुं** इत्यनेन परशुरामः चिन्त्यः। मेषमध्ये **वाजिमुखी** इति, सिंहमध्ये **हयाकृतिः** इति, धनुरादौ **अश्वसमानकायः** इति, मकरान्त्ये **किन्नरोपमतनुः** इति तुलान्ते **किन्नररूपभृन्नरः** इत्येतैः हयग्रीवः चिन्त्यः[5]।

कर्काद्यद्रेक्काणे उक्तेन **क्रोडतुल्यवदनः** इत्यनेन, मकरादौ **सूकरकायसमानशरीरः** इत्यनेन, बुधशुक्रयुतिफलेन **भूगणपः**[6] इत्यनेनापि बुधेन वराहः चिन्त्यः। सिंहराशेः मध्यद्रेक्काणे **सिंहः** इत्यनेन, वृश्चिकान्ते **मृगपतिः** इत्यनेन, कुजे सिंहे **वनचरः**[7] इत्यनेन, रविलग्नफलेन **शूरस्स्तब्धः**[8] इत्यनेन, सिंहे राशौ च उदिते नृसिंहः चिन्त्यः। कुम्भान्त्ये **त्वक्पत्रनिर्यासफलैः बिभर्ति** इत्यनेन, रवौ धनुषि उक्तेन **भिषक्**[9] इति फलेन च धन्वन्तिरिः चिन्त्यः। सिंहमध्येन **बिभर्ति कृष्णाजिनकम्बलं नरः** इत्यनेन वामनः चिन्त्यः। तुलाद्यद्रेक्काणेन **भाण्डं विचिन्तयति कस्य विपण्यमेतद्** इत्यादिना पाण्डुरङ्गस्य चिन्तनं, तुलामध्येन **मनसैति तुलाधरमध्यगतः** इति श्रीनिवासस्य चिन्तनमपि क्रियते। मीनराशौ उदिते मीनावतारी विष्णुः चिन्त्यः। मकरान्त्ये **तूणचापकवचैः समन्वितः** इत्यनेन कल्किः चिन्त्यः। **कच्छपकुम्भसमानशरीरा** इति वृश्चिकमध्ये, अल्यन्ते च **कूर्मतुल्यवक्त्रः** इति कूर्ममूर्तिः चिन्त्यः। मीनादौ **स्रुग्भाण्डमुक्तामणिशङ्खहस्तव्याक्षिप्तहस्तः** इत्यनेन शङ्खपाणिः चिन्त्यः।

---

[1] बृहज्जातकम्-१६.१५

[2] बृहज्जातकम्-१४.०४

[3] अत्र दैत्यमर्दिनीदेवी अपि चिन्त्यते।

[4] बृहज्जातकम्-१७.८

[5] अत्र स्त्रीदेवतालक्षणे सति अश्वारुढा पार्वती चिन्त्या। अश्व-खड्ग-बाणसम्बन्धे सति कल्किरपि चिन्त्यः। तथा हयग्रीवध्याने – "अश्ववक्त्रम्........" इति – शारदतिलकम् – १५.७५

[6] बृहज्जातकम्-१४.०४

[7] बृहज्जातकम्-१६.२०। नृसिंहस्वरूपम् – प्रपञ्चसारः - २५.७,८। "नृसिंहो भूमिपुत्रस्य" - बृहत्पराशरहोरा – २.५।

[8] बृहज्जातकम्-२०.१

[9] बृहज्जातकम्-१६.१६। "रविकण्टककोणस्थः धिषणः रविवर्गगः धन्वन्तरीति कथ्यते..." – प्रश्नानुक्रमः – १४.११७। अत्र गुरुवर्गे रविः इति विलोमतया कल्प्यते केवलं पारस्परिकः सम्बन्धः एतयोः अपेक्षितः इत्यतः।


ISSN: 2320-740X

**५. क्षेत्रपालः-** शनौ बुधक्षेत्रे सति **रक्षापतिर्भवति**[1] बौधे इति फलम् । अनेन क्षेत्रपालः चिन्त्यः । अनेन रक्षकमन्त्रोपि अत्र विचिन्त्यः ।

**६.हनूमान् -** शनौ बुधक्षेत्रे सति **मुख्यभृतश्च बौधे**[2] इति फलम् । अनेन हनूमान् चिन्त्यः । तथा द्रेक्काणेषु सिंहान्त्ये **वानरतुल्यचेष्टः** इति, तुलावसाने **वानररूपभृद्** इति हनुमान् वक्तव्यः ।

**७.स्कन्दः-** मेषस्वभावे **शक्त्या पाणितलेङ्कितः**[3] इत्युक्तेन स्कन्दो निर्दिष्टः[4] । मेषवृश्चिकयोः सति कुजे **चमूप**[5] इति, गुरौ मेषवृश्चिकयोः सति **सेनानीः**[6] इत्येतैः फलैः सुब्रह्मण्यः चिन्त्यः ।

**८.सर्पः/नागः -** सर्पद्रेक्काणैः अल्यादि-अलिमध्य-कर्कान्त्य-मीनान्त्यैः क्रमात् **सर्पनिबद्धपादा, भुजगावृतदेहा, सर्पवेष्टितः, सर्पविवेष्टिताङ्गः** इत्येतैः फलैः सर्पचिन्तनं, तक्षकादिभेदचिन्तनं वा युज्यते । विषसम्बन्धित्वाद् वा सर्पवेष्टितत्वाद् विषधरः शिवः चिन्त्यः । सर्पवेष्टितत्वाद्गणपतिरपि[7] चिन्त्यः ।

**९.नन्दी-** मकरादौ **योक्त्रकजालजकबन्धनधारी** इति, वृषभमध्ये **लाङ्गले सशकटे कुशलश्च** इति, वृषोदये वा नन्दी चिन्त्यः ।

**१०.वीरभद्रः -** मकरादौ **रौद्रमुखः** इत्यनेन, मेषादौ **रक्तविलोचनः** इत्यपि वीरभद्रः चिन्त्यः । अत्रैव रुद्रगणाः वा सक्षात् रुद्रः चिन्तयितुं शक्यः ।

**११.गरुडः -** मिथुनमध्यद्रेक्काणस्थेन **गरुडाननश्च** इत्यनेन, सिंहादौ **गृध्र**शब्देन, तुलामध्ये **गृध्रमुखः** इत्यनेन, कुम्भादौ **गृध्रतुल्यवदनः** इत्यनेन च गरुडः चिन्त्यः । गरुडवाहनोप्यत्र चिन्त्यः ।

अत्र यदुदीरितं, ये च अर्थाः विशेषतया प्रतिपादिताः तेषु सर्वेष्वपि तत्तद्ग्रहकारकत्वम्, इतरशास्त्रबलवत्त्वं, तन्त्रोक्तदेवताध्यानादिना कल्पितत्वं, पुराणमहाभारतादीनामप्याश्रितत्त्वं वा

---

[1] बृहज्जातकम्-१६.३०

[2] बृहज्जातकम्-१६.३० । "अर्कपुत्रेण वाच्यः स्याद्धनूमान्..." – प्रश्नानुक्रमः - १४.११४ ।

[3] बृहज्जातकम्-१६.०१। प्रश्नमार्गेपि "कुजालयोदयद्वशः स्कन्दस्य" (२४.१२) इत्युक्तम् ।

[4] तन्त्रसमुच्चयः-७.६१ । स्कन्दध्याने "करयुगेन शक्तिं पविं दधानम्" इति । शक्तिधरत्वाद्गणपतिरपि अत्र चिन्तयितुं शक्यः - श्रीगणेशमहादर्शनम् – वीरविघ्नेशः - १४ पृष्ठे ।

[5] बृहज्जातकम्-१६.१८

[6] बृहज्जातकम्-१६.२५ । "पार्वतीनन्दनः...सेनानीः..." – अमरकोषः -१.१.३९ ।

[7] श्रीगणेशमहादर्शनम्-प्रयोगप्रकरणम् - ३७५ पृष्ठे बीजगणपतिमन्त्रः-"भोगीन्द्राबद्धभूषम्..."।

अस्त्येव । पुराणादिप्रसिद्धं विस्तरभयान्नात्र प्रतिपादिताः, तथैव शब्दशः यज्ज्ञायते तदपि नोक्तम् । तथाप्यत्र एकः दृष्टान्तः – बुधे चन्द्रर्क्षे **स्वजनस्य शत्रुः** इत्यदः फलमाश्रित्य चन्द्रर्क्षस्थेन बुधेन कृष्णः इत्युक्तम् । तत्र हरिवंशे प्रसिद्धं कंसः कृष्णस्य मातुलः । तस्यैव वैरी कृष्णः इति । अतः इदं लक्षणं कृष्णे घटते । किन्तु केवलमेतावता वक्तुं न शक्यते (क्वचिच्च शक्येत) । किन्त्वत्र प्रश्नमार्गोक्तस्य (१५.०६) बुधस्य **श्रीरामाद्यवतारविष्णुरितरक्षेत्रेषु चन्द्रात्मजः** इति फलरूपं लक्षणं, तथा **चन्द्रस्य यदुनायकः** इति फलञ्च[1] पूर्वोक्तं पोषयतीति चन्द्रर्क्षस्थेन बुधेन कृष्णः चिन्तितः । तत्र कंसमर्दनकालिकः कृष्णः बालः इत्यतः बालकृष्णः, बालगोपालकृष्णः इति वा कथयितुं शक्यते । अन्यत्रापि एवमेव योज्यम् ।

मया यदुक्तमत्र लक्षणं तस्य दर्शनमात्रतः यथावत्फलकल्पनं न कार्यम् । देवतानिर्णयार्थं लग्न-नवम-द्वितीय-पञ्चम-एकादश-दशमभावानाम् आधिपत्यं, तत्र कथञ्चित्सम्बन्धो वा ग्रहस्य दृश्येत । एवं देवतानिर्णयाय प्रश्नमार्गादिशास्त्रोक्तमार्गः समाश्रयणीयः । अत्र केवलं देवताभेदाः प्रपञ्चिताः । अत्रोक्तं लक्षणम् "इदम् अन्यतमम्" इत्येव स्वीकृत्य लक्षणबाहुल्याद् यः निर्णयः स एव निर्णयः स एव आदेष्टव्यः इति **स्फुटमिह भवति द्वित्रसंवादभावाद्** इत्यादिशास्त्रनियमाः अत्र सर्वत्र समन्वयन्ति । तत्र उक्तं ग्रहफलं तत्तद्ग्रहसत्त्वे एव, इतरराश्यादिफलं केषुचिद्ग्रहेषु एव युज्यते केषुचिन्न इत्यपि द्रष्टव्यम् । राशिफलम् इत्युक्ते चन्द्रस्यैव फलम् । तत्फलम् लग्ने कल्प्यम्, क्वचिच्च ग्रहेष्वपि । राशिफलं क्वचिच्चन्द्रे न युज्येत । अन्यस्मिन् ग्रहे सति युज्येत[2] । तद्यथा युज्यते तथैव स्वीकार्यम् । देवताचिन्तने द्रेक्काणानां महान् उपयोगः । द्रेक्काणैश्च देवतामूर्तिभेदान्, मूर्तिस्वरूपादिकं, सात्त्विकादिभेदांश्च प्रकल्पयेत् । पुरुषद्रेक्काणे स्त्रीत्वे अपेक्षिते स्त्रीत्वकल्पनं, स्त्रीद्रेक्काणे पुरुषत्वकल्पनम् इत्यादि कार्यम् । राशिफलं तु प्रश्ने तल्लग्नोदये, द्रेक्काणफलमपि तदुदये, तथा राशिद्रेक्काणयोः उभयोः फलं तयोः पूर्वोक्तभाव-भावाधिपसम्बन्धे, कारकग्रहे वा तस्मिन् सति यथायोग्यं समायोजयेत् । तथा ग्रहरहितराशिभ्यः बलिभ्यः अधिपग्रहफलं वा केवलं राशिफलं कथयेत् इत्यादि द्रष्टव्यम् । एवं देवबाधाचिन्तने, देवताभेदचिन्तने, परिहारचिन्तने, मूर्तिचिन्तने, मन्त्रचिन्तने इतरस्मिन् देवताविषयचिन्तने च होरायाः, तत्रापि द्रेक्काणाध्यायस्य महान् उपयोगः । अत्र यन्निरूपितमेतद्दिङ्मात्रम्, इतोपि सन्ति बहवः विषयाः प्रश्नजातकचिन्तनोपयोगिनः, ते अत्र स्थलाभावन्न निरूप्यन्ते । तथा अत्र निरूपितानां समेषां विषयानाम् उपलब्धिरेव वासना इत्यलमतिपल्लवितेन ।

---

[1] बृहत्पराशरहोरा – २.५ । "स्वामिफलाः राशयः सर्वे" – इति होराकृष्णीये – १९..०४ ।

[2] गुरुणा तु देवताभेदाः "ज्ञेया ग्रहर्क्षान्वियात्" (प्रश्नमार्गः - १५.६) ज्ञेयाः इत्यादि राश्यन्वयेन देवताचिन्तनम् । "स्फुटमिह भवति द्वित्रसंवादभावाद्" – प्रश्नमार्गः – १४.३० ।


ISSN: 2320-740X

**ग्रन्थसूची -**

1. जातकफलसारोद्धारः - श्रीनिवास आचार्यः - ज्योतिर्विज्ञानप्रकाशन – कब्याडिमठ।
2. शारदातिलकम् – चौखाम्भा संस्कृत भवन – वाराणसी।
3. प्रपञ्चसारः – मोतीलाल बनारसीदास – देहली।
4. श्रीगणेशमहादर्शनम् – श्रीबह्मवत्पादप्रकाशनम् – स्वर्णवल्लीमहासंस्थानम् – शिरसि।
5. आगमोक्तपूजाविधानम् – प्राणेशप्रकाशन - शिबरूरु।
6. तन्त्रसमुच्चयः – नाग प्रकाशक – देहली।
7. बृहत्पराशरहोराशास्त्रम्- पद्मनाभ शर्मा- चौखाम्बा सुरभारती, वारणासी-२००९
8. दशाद्ध्यायी- सनातनभारती पाठशाला, मैसूरु-२००४
9. बृहज्ज्ञातकम्- रुद्रविवरणम्- चौखाम्बा सुरभारती, वारणासी-२००७
10. अपूर्वार्थप्रकाशिका- अड्यार् लैब्ररी-१९५१
11. प्रश्नसङ्ग्रहः- (कन्नड) रत्नावती प्रकाशन- उडुपी- २००४
12. प्रश्नमार्गम् (कन्नड)- होन्नपद्म, उडुपी-२००१
13. होराकृष्णीयम्- (कन्नड) पूर्णप्रज्ञसंशोधनमन्दिर, बेङ्गलूरु-२००९
14. होराकृष्णीयम्- चतुरसुन्दरी (अज्ञातमूलम्)
15. जैमिनीयसूत्रम्- चौखाम्बा संस्कृत सीरिस् ओफिस्
16. बृहज्ज्ञातकम्- भट्टोत्पलविवृतिः- मोतीलाल बनारसीदास-२००५

**********

## विशिष्टवाचकपदानां क्वचिद् विशेष्यमात्रपरतानियमस्य विमर्शः

✍ **श्रीनारायण बी. राय्कर्**

शोधच्छात्रः

सुविदितमेवेदं यत् शास्त्रप्रतिपादितसिद्धान्तानां व्यवस्थापनार्थं शास्त्रकृतः तत्र तत्र कांश्चन नियमान् अनुसरन्तीति । केचन नियमाः उत्सर्गाः केचन अपवादभूताः प्रवर्तन्ते । तादृशेषु नियमेषु पदानां विशेष्यविशेषणबोधकता व्यवस्थापनपरमेकं नियममवलम्ब्य प्रभामञ्जूषाव्याख्यानोक्तरीत्या विमृश्यते।

भाषापरिच्छेदव्याख्याने “विघ्नविघातायकृतं मङ्गलम् शिष्यशिक्षायै ग्रन्थतो निबध्नाति” इत्यत्र

विपूर्वकघातपदस्य उत्पत्तिमदभावोऽर्थः प्रसिद्धः । ननु घातपदेनैव उत्पत्तिमदभावरूपार्थबोधनात् विपदमनर्थकमिति चेत्, न। अत्रायं नियमः - विशिष्टवाचकपदानां सति विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वमिति । यथा "स कीचकैर्मारुतपूर्णरन्ध्रैः" इत्यत्र कीचकशब्दस्य "कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इति कोषवाक्येन मारुतपूर्णरन्ध्रत्वविशिष्टवेणुरूपार्थे शक्तिसिद्धावपि पृथक् मारुतपूर्णरन्ध्रत्वरूपविशेषणवाचकपदसद्भावेन कीचकपदस्य वेणुमात्रार्थपरत्वम्। तथा च प्रकृतेऽपि घातपदस्य उत्पत्तिमदभावरूपार्थे शक्तत्वेऽपि उत्पत्तिमत्त्वार्थबोधकविशेषणवाचकविपदसद्भावेन घातपदस्य अभावरूपविशेष्यमात्रबोधने तात्पर्यम्।

ननु विशेषबोधकविशब्दस्य क्वचित् भावरूपार्थे क्वचित् अभावरूपार्थे प्रयोगस्यैव अनुभवसिद्धत्वात् कथं तादृशपदस्य उत्पत्तिरूपार्थबोधकत्वमङ्गीकर्तुं युक्तमिति चेत् सत्यम्। विपदस्य विशेषबोधकत्वमेव । स च विशेषः ध्वंसे प्रागभावात्यन्ताभावान्योन्याभावव्यावृत्तः उत्पत्तिरेव । उत्पत्तिमत्त्वविशिष्टाभावस्यैव ध्वंसपदार्थत्वात् । तथा च उत्पत्तिमत्त्वरूपविशेषणमन्तरा ध्वंसत्वनिर्वचनासम्भवेन तादृशविशेषणमेव ध्वंसं प्रागभावादिभ्यो व्यावर्तयतीति तादृशार्थबोधकत्वेन विपदस्य सार्थकत्वमुपपद्यते।

अत्र चिन्त्यते – नु घातपदस्य जन्याभावत्वरूपध्वंसत्वविशिष्टे तात्पर्यस्वीकारे अपि विपदस्य आनर्थक्यं न प्रसज्यते। यतो हि जन्यत्वम् स्वरूपसम्बन्धरूपं, प्रागभावप्रतियोगित्वरूपं वा घातपदात् उपस्थाप्यते । तथा चोत्पत्तेः आद्यक्षणसम्बन्धरूपायास्तु घातपदात् अलाभेन तद्बोधकतया विपदं सार्थकं भवति । न च स्वरूपसम्बन्धरूपं प्रागभावप्रतियोगित्वरूपं उत्पत्तिरूपं वा जन्यत्वं घातपदार्थतावच्छेदकमित्यत्र विनिगमनाविरहात् त्रयाणामपि तथात्वस्य स्वीकरणीयतया विपदस्य निरर्थकत्वमस्त्येवेति वाच्यम् । यदि घातपदस्य त्रिष्वप्यर्थेषु एका शक्तिरुपगम्यते तदा एकेनैव अभावान्तरव्यावृत्तिसम्भवेन इतरयोः शक्ति वैयर्थ्यप्रसङ्गात् । यदि पृथग्शक्तिः उपगम्यते तदा घातपदस्य नानार्थकतापत्तिः स्यात्। अतः लाघवेन स्वरूपसम्बन्धरूपजन्यत्वविशिष्ट एव घातपदस्य शक्तिस्वीकारो युक्तः। इत्थञ्च विपदसमवधानेन उत्पत्तेः विपदेनैव प्रतीतिसम्भवेन तस्य नानर्थक्यम्।

न च तथापि कदाचित् स्वरूपसम्बन्धरूपजन्यत्वविशिष्टस्य, कदाचित् आद्यक्षणसम्बन्धविशिष्टस्य, कदाचित् प्रागभावप्रतियोगित्वविशिष्टस्य घातपदात् बोधनात् तेषु त्रिष्वपि अर्थेषु घातपदस्य शक्तिस्वीकारआवश्यक इति वाच्यम् । लाघवेन स्वरूपसम्बन्धरूपजन्यत्वविशिष्ट एव घातपदस्य शक्तिस्वीकारात् । इतरधर्मद्वयविशिष्टे घातपदस्य लक्षणया शक्तिभ्रमेण वा बोधोपपादनसम्भवात्।

अथवा धर्मत्रयविशिष्टे घातपदस्य एकशक्तिस्वीकारोऽस्तु तथापि सकृदुच्चरितन्यायेन

 ISSN: 2320-740X

एकपदेन एकधर्मविशिष्टमेव प्रत्याय्यते न तु धर्मत्रयविशिष्टमित्यतः स्वरूपसम्बन्धरूप-जन्यत्वविशिष्टस्यैव घातपदेन बोधात् उत्पत्त्यादिरूपजन्यत्वस्य तत्समभिव्याहृतविपदेनैव बोधनात् विपदस्य न नैरर्थक्यम्। अस्तु वा घातपदस्य उत्पत्तिमदभावबोधकत्वमथापि विपदस्य नानर्थक्यम्। प्रागभावप्रतियोगित्वरूपविशेषार्थबोधकतया विपदं सार्थकतामुपैत्येव । इत्थञ्च विशिष्ट-वाचकपदानामित्यादि नियमोपगमो निर्बीज इति।

अत्रोच्यते – विपदस्य अव्यावर्तकताप्रसङ्गवारणाय उक्त नियमानुसारणमावश्यकं पदार्थान्तरव्यावर्तकतयैव विशेषणवाचकपदस्य प्रयोगात् । अन्यथा प्रकृते घातपदार्थघटकीभूतजन्यत्वविशेषणेनैव प्रागभावादीनां व्यावृत्तिसम्भवेन विशेषणतयोपात्तविपदस्य अव्यावर्तकतापत्तिरस्त्येव । अत एव घातपदस्य विपदरूपविशेषणवाचकपदसमभिव्याहारे सति अभावमात्रपरत्वमुपगन्तव्यम् । यादृशजन्यत्वं घातपदेन प्रतीयते तादृशमेव विपदेनापीत्यस्मात् विशिष्टवाचकेत्यादिनियमस्य सार्थकत्वमुपपद्यते।

अत्र पुनश्चिन्त्यते - उपसर्गाणां द्योतकत्वेन विपदस्य शक्तत्वरूपपदत्वमनुपपन्नम् । यदि विपदद्योत्यस्य न व्यावर्तकत्वमपि तु घातपदार्थघटकीभूतस्य जन्यत्वस्यैव व्यावर्तकत्वमित्येव शङ्का इति उच्यते तदा घातपदस्य विशेष्यमात्रपरत्वमिति सिद्धान्तस्यासङ्गतिः । विपदस्य विशेषणवाचकत्वानुपपत्तेः । यद्यपि उपसर्गाणां वाचकत्वमभ्युपगच्छतां मते नेयमनुपपत्तिस्तथापि उपसर्गाणां द्योतकत्ववादिनां नैय्यायिकानां तु दोषोऽयं दुर्वार एव।

अत्र कैश्चिदेवं समाधीयते - विशब्दो न उपसर्गात्मकः, अपि तु सुबन्तः। तथा हि वात्युत्पद्यत इति विः। "वा गतिगन्धनयोः" इत्यस्माद्धातोः वातेर्डिच्चेत्यौणादिकेन इप्रत्ययेन विशब्दो निष्पन्नः। धातूनामनेकार्थकत्वात् जगदित्यत्र गमेः, संसार इत्यत्र सरतेश्च यथा उत्पत्त्यर्थकत्वमङ्गीकृतं तथा प्रकृतेऽपि गत्यर्थकस्यापि वातेः तादृशार्थकत्वमविरुद्धमेव । तथा चैतादृशतात्पर्यग्राहकोऽयं विशब्द न उपसर्गात्मक इति न दोषः इति।

एतद्बहुतरप्रयाससाध्यमेव । गत्यर्थकधातोः उत्पत्त्यर्थकत्वं न कुत्राप्यनुभवसिद्धम् । विनाशप्रतियोगित्वेनैव जगच्छब्दस्य प्रवृत्तिस्वीकारात् । संसार इत्यत्र उपसर्ग-विशेषवशादेवोत्पत्तिबोधकत्वं सिद्धम्। अत एव संसार इत्यत्र गत्यर्थकपदे उत्पत्त्यर्थकत्वमविरुद्धम्। तत्र हि उपसर्गविशेष एव उत्पत्त्यर्थबोधे नियामकः।

अत्रान्ये केचन प्रकारान्तरेण समादधते - यथा घात इत्यत्र हि कृत्प्रत्ययस्य शब्दसाधुत्वार्थकत्वस्वीकारेण धातुत एव ध्वंसोपस्थितिः । तथा कृदन्तसमुदायतोऽपि ध्वंसस्य कदाचिदुपस्थितिरिष्यते इति कृदन्तसमुदायस्यापि ध्वंसत्वविशिष्टे शक्तिरुपगम्यते। "विघ्नविघाताय"

इति प्रकृतवाक्यघटकस्य कृदन्तसमुदायस्य घातशब्दस्य प्रातिपदिकत्वेन तत्समभिव्याहृतस्य विशब्दस्य नोपसर्गत्वम् अपि तु निपातसंज्ञामात्रम् । "उपसर्गाः क्रियायोगे" इत्यनुशासनेन केवलधात्वर्थयोगे एव उपसर्गसंज्ञाविधानात् । तस्मात् भावकृत्प्रत्ययान्तघातशब्दसमभिव्याहृतस्य विशब्दस्य वाचकत्वमविरुद्धमेव । नैयायिकमते उपसर्गसंज्ञावतः प्रादेरेवावाचकत्वं न तु निपातसंज्ञावतः । यत्र तु केवलं धातोरेव ध्वंसत्वविशिष्ट उपस्थाप्यते तत्र विशब्दस्योपसर्गत्वेन न वाचकत्वमिति । एवं प्रकृतेऽपि विघातपदान्तर्गतविशब्दस्य उपसर्गसंज्ञातिरस्कारे पूर्वोक्तरीत्या तद्द्योत्यार्थप्रतीत्यसम्भवेन तस्याप्यानर्थक्यं स्यादेव ।

तदप्ययुक्तमेव । घञादिभावकृत्प्रत्ययस्य केवलं शब्दसाधुत्वार्थकतया प्रयोगः स्वीकृतः । तादृशप्रत्ययान्तस्य धातोः स्वातिरिक्तार्थबोधकत्वसम्भवेन केवलधातुतो नाधिकं वैलक्षण्यम् । यद्येवं घञादिप्रत्ययान्तधातुसमभिव्याहृतविप्रभृतिशब्दानां उपसर्गत्वं नेष्यते । अत एव निर्मक्षिकम् उपकुम्भम् इत्यादौ निरुपादीनाम् उपसर्गत्वविरहिणां समीपाद्यर्थकत्वकथनं सङ्गच्छते । अनेनैव कारणेन केवलं विपदस्य निपातसंज्ञास्वीकारात् उत्पत्तिरूपविशेषार्थस्य घातपदार्थघटकतयैव लाभेन तस्यानर्थक्यमिति धिया घातपदस्य अभावमात्रपरत्वमुक्तमिति एवं घातपदस्यैव उत्पत्तिमदभावपरत्वमङ्गीकृत्य विशब्दयोगे तस्याभावमात्रपरत्वं न तु हन्धातोरित्युक्तमिति च प्रभामञ्जुषाकारेण स्वव्याख्यानेऽभिहितम् ।

विप्रभृतिशब्दानां शब्दस्वाभाव्यात् धातुयोगे एव विशेषबोधकत्वमनुभवसिद्धं न तु प्रातिपदिकयोगे । विशिष्टजयादितात्पर्येण विजयते वितनोतीति प्रयोग उपपद्यते न तु विशिष्टघटादितात्पर्येण विघटो विपट इत्यादिप्रयोगः । तथा च प्रकृतेऽपि घातशब्दस्य कृत्प्रत्ययान्तत्वात् प्रातिपदिकत्वेऽपि धात्वर्थबोधकतया तत्समभिव्याहृतविशब्दस्य उपसर्गत्वं सिद्धमेव । तस्मात् विशिष्टवाचकेत्यादिनियमानुरोधेन विशब्दस्य सार्थकत्वोपपादनं व्यर्थमेव । ननु विगुणो विफलो विधना इत्यादौ प्रातिपदिकयोगे विशब्दस्य विशेषबोधकत्वस्यानुभाविकत्वेन नेहानुपपत्तिरिति चेत्, न । प्रतियोगिसमभिव्याहृतविपदस्य अभावविशिष्टलक्षणातात्पर्यग्राहकत्वमेव विफलो विजनो विधना इत्यादौ दृश्यते । अत एव "विनीलनवशाकिनी विरलबीजरोमाङ्कुरम्" इति चाटुश्लोके विशिष्टनीलतात्पर्येण प्रयुक्तस्य विनीलशब्दस्य मनीषिणः असाधुत्वमेव मन्यन्ते ।

तथा चात्र धातुतो ध्वंसोपस्थितावेव विशब्दस्य विशेषबोधकत्वमित्येव सयुक्तिकम् । कृदन्तसमुदायस्य शक्तिमङ्गीकृत्य विशब्दस्य उपसर्गत्वविरहोपपादनं न सङ्गच्छते । अस्तु वा यथा कथञ्चिदत्र विशब्दस्य विशेषबोधकत्वं तथापि तत्समभिव्याहृतपदवाच्यतावच्छेदककुक्ष्याप्रविष्टं कञ्चन विशेषं बोधयन्नेव विशब्दः सार्थकतामावहति पन्थानुसरणं युक्तिसिद्धं प्रतिभाति ।


ISSN: 2320-740X

इत्थञ्च विशिष्टवाचकपदानां सति विशेषवाचकपदसमवधाने विशेष्यमात्रपरत्वम् इति नियमः "विघ्नविघाताय" इत्यत्र सञ्चारं नार्हतीति ।

**********

## विभागः

✍ कु. सुनिता भट्टः
शोधच्छात्रा

प्रशस्तपादभाष्ये[1] सामान्यगुणविशेषगुणभेदेन गुणानां द्वैविध्यमुक्तम् । "सङ्ख्यापरिमाण-पृथक्त्व-संयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगाः सामान्यगुणाः, रूपरसगन्धस्पर्शस्नेह-सांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनाशब्दाः वैशेषिकगुणाः" इति । तत्र सामान्यगुणेष्वन्यतमभूतविभागस्य विचारः क्रियते ।

"विभक्तप्रत्ययासाधारणं कारणं विभागः" । विभक्तप्रत्ययो नाम विभक्तव्यवहारः । तथा च विभक्तव्यवहारासाधारणकारणं विभागः इति लभ्यते । व्यवहारं प्रति व्यवहर्तव्यतावच्छेदकस्य कारणत्वात् "अयं घटः ततः विभक्तः", "पर्णं वृक्षात् विभक्तम्" इत्यादिव्यवहारं प्रति व्यवहर्तव्यतावच्छेदकः विभागः कारणं भवतीति लक्षणसमन्वयः ।

विभक्तप्रत्ययकारणत्वमात्रं विभागलक्षणमित्युक्तौ ईश्वरादृष्टकालादिरूपसाधारणकारणेषु अतिव्याप्तिः । अतः असाधारणं कारणमित्युक्तम् । अथापि समवाय्यसमवायिनिमित्तकाराणेषु अतिव्याप्तिः भवत्येव । कथमिति चेत् विभक्तप्रत्ययो नाम "पर्णं वृक्षात् विभक्तम्" इति शब्दप्रयोगः । स च शब्दस्वरूप एव । यदि शब्दप्रयोगः शब्दोच्चारणमित्युच्यते तर्हि तच्च शब्दजनककण्ठताल्वाद्यभिघातः इति तस्य गुरुभूतस्य कार्यकारणभावघटितस्य कार्यतावच्छेदकत्वापत्तिः । अतः "पर्णं वृक्षात् विभक्तम्" इति शब्द एव व्यवहारपदेन विवक्षणीयः । तस्य समवायिकारणमाकाशः, असमवायिकारणं ताल्वाकाशसंयोगः, निमित्तकारणं कण्ठताल्वाद्यभिघातः । इमानि त्रीण्यपि असाधारणकारणानि भवन्तीति त्रिषु अतिव्याप्तिः ।

अतः लक्षणं किञ्चित् परिष्क्रियते – "विभक्तप्रत्ययनिष्ठप्रतिपाद्यतासम्बन्धावच्छिन्नकार्यता-निरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताश्रयत्वम्" इति । समवायेन शब्दं प्रति तादात्म्येन आकाशः, समवायेन ताल्वाकाशसंयोगः, स्वाश्रयावच्छिन्नत्वसम्बन्धेन कण्ठताल्वाद्यभिघातः कारणं भवति । एवं

[1] गुणसाधर्म्यवैधर्म्यप्रकरणम् ।

च समवायि-असमवायि-निमित्तकारणेषु नातिव्याप्तिः । प्रकृतलक्ष्ये विभागे तु न ईदृशं कारणत्वं भवति । प्रतिपाद्यतासम्बन्धेन शब्दं प्रति तादात्म्येन अर्थस्य कारणत्वात् । तथा च विभक्तप्रत्ययनिष्ठप्रतिपाद्यतासम्बन्धावच्छिन्नकार्यता नाम "पर्णं वृक्षात् विभक्तम्" इति शब्दनिष्ठाकार्यता, तादृशकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना कारणता विभागनिष्ठा कारणता, तदाश्रयत्वं – विभागे अस्तीति लक्षणसमन्वयः ।

अयञ्च विभागः त्रिविधः अन्यतरकर्मजन्यः, उभयकर्मजन्यः, विभागजन्यश्चेति । तत्राद्यः अन्यतरकर्मोद्भवः विभागः यथा श्येनपर्वतविभागः, द्वितीयः उभयकर्मोद्भवः विभागः यथा मेषयोर्विभागः, तृतीयः विभागजन्यः विभागः यथा हस्ततरुविभागात् कायतरुविभागः ।

अत्र विभागजविभागे मतभेदः वर्तते । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियायाः तदानारम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वम् इति नियमानङ्गीकारपक्षे विभागजविभागः कारणाकारणविभागजविभाग इत्येकविध एव । तादृशनियमाङ्गीकारपक्षे तु कारणाकारणविभागजविभागः, कारणमात्रविभागजविभागश्चेति द्विविधः ।

**कारणाकारणविभागजविभागः –**

उभयमतसम्मतः कारणाकरणविभागजविभागो नाम कारणाकारणयोः विभागात् उत्पन्नः कार्याकार्ययोर्विभागः । यथा हस्ततरुविभागात् कायतरुविभागः ।

| क्षणः | कार्यम् | कारणम् |
|---|---|---|
| प्रथमः | हस्ते क्रिया | प्रयत्नवदात्मसंयोगः |
| द्वितीयः | हस्ते तरुविभागः, हस्ते आकाशविभागश्च | हस्तगतक्रिया |
| तृतीयः | हस्ते तरुसंयोगनाशः, हस्ते आकाशसंयोगनाशश्च | हस्ततरुविभागः, हस्ताकाशविभागः |
| चतुर्थः | उत्तरदेशसंयोगः, शरीरतरुविभागश्च | पूर्वसंयोगनाशः, हस्ततरुविभागः |
| पञ्चमः | हस्ते क्रियानाशः, शरीरतरुसंयोगनाशश्च | उत्तरदेशसंयोगः, शरीरतरुविभागः |

पक्षद्वयेऽपि क्रियावशात् हस्ततरुविभागस्य उत्पत्तिक्षणे क्रियावशादेव हस्ताकाशादिविभागानामपि उत्पत्तिः सम्भवति । तस्याः क्रियायाः आरम्भक-संयोगनाशकविभागजनकत्वाभावेन अनारम्भकसंयोगनाशकविभागानां बहूनां उत्पादकत्वे बाधकाभावात् । तस्मात् एषा प्रक्रिया पक्षद्वयसाधारणी भवितुमर्हति ।

अत्र चतुर्थक्षणे उत्पन्नः यः शरीरतरुविभागः सः कारणाकारणविभागजन्यः कार्याकार्यविभागः । यतः शरीरस्य कारणं हस्तः भवति, न तु तरुः । तथा च प्रकृते शरीरतरुविभागं


ISSN: 2320-740X

प्रति हस्ततरुविभागः कारणमिति सिद्ध्यति।

न च हस्तगतक्रियया एव शरीरतरुविभागोऽपि भवतु इति वाच्यम्, व्यधिकरणत्वात्। शरीरतरुविभागरूपकार्यं तु शरीरे तरौ च वर्तते, क्रियारूपकारणं तु हस्ते वर्तते इत्यतः तयोः क्रियाविभागयोः सामानाधिकरण्याभावात् कार्यकारणभाव एव न घटते। न च हस्ते विद्यमानक्रिया शरीरगतक्रियैव इति वाच्यम्। अवयविकर्मणः यावदवयकर्मनियततत्वात्।

अतः शरीरतरुविभागं प्रति हस्ततरुविभागः कारणम्। अत्र तु हस्ततरुविभागः शरीरतरुविभागश्च तरौ वर्तते इति तर्वन्तर्भाविन सामानाधिकरण्यं घटते। अतः अत्र हस्ततरुविभागरूपकारणाकारणविभागात् शरीरतरुविभागरूपकार्याकार्यविभागः जायते।

**निरुक्तनियमाङ्गीकारपक्षे कारणमात्रविभागजविभागः –**

कारणमात्रविभागजविभागो नाम सक्रियावयवस्य अवयवान्तरेण विभागात् जायमानः आकाशादिदेशात् विभागः।

| क्षणः | कार्यम् | कारणम् |
|---|---|---|
| प्रथमः | घटावयवभूतकपाले एकत्र कर्म | वह्निसंयोगः |
| द्वितीयः | कपालद्वयविभागः | क्रिया |
| तृतीयः | घटारम्भकसंयोगनाशः | विभागः |
| चतुर्थः | घटनाशः, उत्तरदेशसंयोगश्च | पूर्वसंयोगनाशः, क्रिया च |
| पञ्चमः | कपालाकाशविभागः | कपालद्वयविभागः |
| षष्ठः | कपालाकाशसंयोगनाशः | कपालाकाशविभागः |
| सप्तमः | उत्तरदेशसंयोगः | पूर्वसंयोगनाशः, क्रिया च |
| अष्टमः | कर्मनाशः | उत्तरदेशसंयोगः |

न च प्रथमक्षणे उत्पन्नक्रियायाः पञ्चमक्षणेऽपि सत्त्वात् तयैव क्रियया पञ्चमक्षणे कपालाकाशविभागो भवतु इति वाच्यम्।

द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियायाः तदनारम्भकसंयोगप्रतिद्वन्द्विविभागा-जनकत्वम् इति नियमानुसारं या क्रिया आरम्भकसंयोगप्रतिद्वन्द्विविभागं जनयति सा एव क्रिया अनारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयति इति सिद्ध्यति, तयोः परस्परविरोधात्। तथा च अत्र द्वितीयक्षणे उत्पन्नविभागः आरम्भकसंयोगनाशको भवतीत्यतः अयञ्च विभागः आरम्भकसंयोगप्रतिद्वन्द्विविभागः, किन्तु पञ्चमक्षणोत्पन्नकपालाकाशविभगस्तु आरम्भक-

संयोगनाशको न भवतीत्यतः अयञ्च विभागः न आरम्भकसंयोगप्रतिद्वन्द्विविभागः अपि तु अनारम्भकसंयोगप्रतिद्वन्द्विविभागः। अतः यया क्रियया द्वितीयक्षणे विभागः उत्पन्नः तयैव क्रियया पञ्चमक्षणे विभागो भवतु इति वक्तुं न शक्यते, नियमविरोधात्।

यदि एषः नियमः न स्वीक्रियते तर्हि विकसत्कमलकुड्मलभङ्गप्रसङ्गः। कथमिति चेत् कमले अग्रावच्छेदेनाऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वात् तेन कर्मणा मूलावच्छिन्नारम्भकसंयोगविरोधिविभागोत्पत्तिः तेन च आरम्भकसंयोगनाशः तेन कमलनाशः स्यात्। अतः उक्तनियमः अङ्गीकर्तव्यः।

अस्तु द्वितीयक्षणोत्पन्नकपालद्वयविभागात् एव पञ्चमक्षणे उत्पद्यमान कपालाकाशविभागः। परन्तु द्वितीयक्षणोत्पन्नकपालद्वयविभागेनैव द्रव्यनाशात् पूर्वम् आरम्भकसंयोगनाशक्षणे एव कपालाकाशविभागो भवतु इति चेत्

न, आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात्। यतः द्वितीयक्षणोत्पन्नकपालद्वयविभागानन्तरमेव घटः न नश्यति अपि तु तृतीय-क्षणोत्पन्नारम्भकसंयोगनाशानन्तरमेव चतुर्थक्षणे घटः नश्यति। अतः तृतीयक्षणे अवयविरूपप्रतिबन्धकस्य सत्वात् चतुर्थक्षणे कपालाकाशविभागो न जायते, अपि तु पञ्चमक्षणे एव।

प्रथमपक्षे तु एकैव क्रिया आरम्भकसंयोगप्रतिद्वन्द्विविभागम् अनारम्भक संयोगप्रतिद्वन्द्विविभागञ्च जनयति। तथा च अस्मिन् मते कपालाकाशविभागोत्पत्तिप्रक्रिया एवं भवति।

| क्षणः | क्रिया | कारणम् |
|---|---|---|
| प्रथमः | घटावयवभूतकपाले एकत्र कर्म | वह्निसंयोगः |
| द्वितीयः | कपालद्वयविभागः, कपालाकाशविभागश्च | क्रिया |
| तृतीयः | घटारम्भकसंयोगनाशः, कपालाकाशसंयोगनाशश्च | कपालद्वयविभागः, कपालाकाशविभागः |
| चतुर्थः | घटनाशः, उत्तरदेशसंयोगश्च | घटारम्भकसंयोगनाशः, कपालाकाशसंयोगनाशः |
| पञ्चमः | कर्मनाशः | उत्तरदेशसंयोगः |

अत्र पूर्वोक्तरीत्या आरम्भकसंयोगप्रतिद्वन्द्विविभागवतः अवयवस्य सति द्रव्ये देशान्तरविभागो न सम्भवतीति नियमानुसारं प्रथमक्षणे अवयविरूपप्रतिबन्धकस्य सत्त्वे द्वितीयक्षणे कपालाकाशविभागो न जायते इत्यपि वक्तुं न शक्यते, आरम्भक-


ISSN: 2320-740X

संयोगप्रतिद्वन्द्विविभागविशिष्टस्यैवावयविनः प्रतिबन्धकत्वात् । प्रथमक्षणे आरम्भकसंयोग-प्रतिद्वन्द्विविभागस्य विरहेण तद्विशिष्टावयविरूपप्रतिबन्धकस्याभावात् ।

एवं निरुक्तनियमानङ्गीकारे विकसत्कमलकुड्मलभङ्गप्रसङ्गोऽपि आपादयितुं न शक्यते, यदवच्छेदेन कमलारम्भकसंयोगः तदवच्छेदेन क्रियानुत्पादात् ।

**कारणमात्रविभागजविभाग-कारणाकारणविभागजविभागयोर्भेदः –**

१. कारणमात्रविभागपूर्वको विभागः सक्रियस्यैव भवति । यथा सक्रियकपालस्यैव आकाशादिदेशत् विभागः । कारणाकारणविभागपूर्वको विभागस्तु निष्क्रियस्यैव । यथा हस्ततरुविभागात् शरीरतरुविभागः ।

२. कारणमात्रविभागः शब्दमारभते । यथा वंशे पाट्यमाने दलद्वयविभागजश्चतचटाशब्दः । कारणाकारणविभागः विभागमेवारभते न तु शब्दम् । यथा हस्तपुस्तकविभागात् कायपुस्तकविभागः ।

कारणमात्रविभागपूर्वकविभागस्थले क्रियायाः षट्पञ्चक्षणावस्थायित्वम् । कारणाकारण-विभागपूर्वकविभागस्थले क्रियायाः पञ्चक्षणावस्थायित्वम् ।

**********

## न्यायमतेन जीवस्य शरीराद्यतिरिक्तत्वसाधनम्

✍ **श्री युवराज घिमिरे**

**शोधच्छात्रः**

न्यायदर्शने देहाद्यतिरिक्तः आत्मा स्वीकृतः । अस्मिन् दर्शने [1]"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्ड-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः" इत्यादिना षोडशपदार्थाः निरूपिताः । प्रमेयाश्च द्वादशधा विभक्ताः । [2]"आत्म शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम्" इत्यादिना । द्वादशधा विभक्तेषु तेषु आत्मा प्रथमः परिगृहीतः । स चात्मा शरीरेन्द्रियादिभ्यः विलक्षणः भिन्नश्चेति प्रमाणपुरस्सरमत्र साध्यते ।

[1] न्याय सूत्रम् – १.१.१

[2] न्याय सूत्रम् – १.१.९

ISSN: 2320-740X

आत्मनि प्रमाणविमर्शः – “मानाधीना मेयसिद्धिः” इत्यभियुक्तवचनात् आत्मनि किं प्रमाणम् इति जिज्ञास्यते प्रथमम् । “अहं सुखी” इत्यादिप्रत्यक्षं यद्यपि अस्ति सार्वजनीनम् । अथापि तस्य देहेन्द्रियाद्यतिरिक्त आत्मविषयकत्वं यत्नसाध्यम् । तस्माद् अनुमानमेव शरणं जग्मुः नैयायिकाः । अत एव न्यायसूत्रभाष्ये वात्स्यायनः आह- [1]“तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते” इति । इदं भाष्यवचनं वाचस्पतिमिश्रेण स्वीयतात्पर्यटीकायां एवं व्याख्यातम् - [2] “अहमिति ज्ञानं गौराद्याकारं शरीरावभासकं न शक्यं घटादि ज्ञानवत् दृगात्मनि प्रमाणयितुम्” इति । एवं व्याख्याय “ परदेहवर्त्यात्माभिप्रायं वा” इति पक्षान्तरप्रदर्शनं कृतम् । अनेन आत्मनि प्रत्यक्षमपि प्रमाणं भवितुम् अर्हतीति मिश्राणामभिप्राय इति ज्ञायते । न्यायवार्तिके उद्योतकरः - [3] “आगमेन प्रतिपन्नः आत्मा । तस्यानुमानेन प्रतिसन्धानार्थम्” इति वदन् आगमस्यापि आत्मनि प्रामाण्यमङ्गीकरोति । वैशेषिकसूत्रेषु तु अहं प्रत्ययेन आत्मानं प्रसाध्य तत्र पुनरनुमानं दार्ढ्याय इति प्रथमं प्रतिपादितम् । अथापि - [4]“ अहमिति मुख्ययोगाभ्यां शब्दवत् व्यतिरेकाव्यभिचाराद्विशेषसिद्धेः नागमिकः” इति सूत्रे “शब्दवत्” इति उदाहरणात् यथा शब्दगुणेन आकाशः सिध्यति, तद्वत् अहं प्रत्ययेन आत्मा अनुमीयते इत्येव ज्ञायते । अत्र प्रकरणे प्रशस्तपादभाष्यमपि, इच्छादिगुणेन आत्मानं प्रसाध्य वक्ति “तथा अहं शब्देनापीति”। अयं च भाष्यखण्डः श्रीधरेण कन्दल्यां अनुमानपरतयैव व्याख्यातः – यथा सुखादिभिः आत्मा अनुमीयते तथा अहं शब्देनापि अनुमीयते । अहं शब्दो लोके वेदे च अभियुक्तैः प्रयुज्यमानः न तावन्निरभिधेयः । ......... तस्मात् योऽयिभधेयः स आत्मेति”

यद्यपि “अहं सुखी अहं जानामि” इत्यादि प्रत्ययाः आत्मविषयकाः भवितुमर्हन्ति अथापि “गौरोहम्” इत्यादिप्रयोगात् देहातिरिक्ते एव मुख्यः इति नैव साधयितुं शक्यते । “मम शरीरम्” इतिवत् “मम आत्मा” इत्यप्यस्ति प्रयोगः । अतः अहं शब्दस्य शरीरविषयकत्वेऽपि “राहोः शिरः” इतिवत् “मम शरीरम्” इति प्रयोगः अन्यथापि उपपादयितुं शक्यः । तस्मात् अहं शब्दस्यापि देहातिरिक्तात्मविषयकत्वं उपादानसापेक्षम् । एवमेव चेदं उपपादितं कन्दल्यां – “अहं” प्रत्ययश्च न शरीरावलम्बनः परशरीरे अभावात् । स्वशरीरे एव अयं भवतीति इति चेत् न अविशेषः ।

इत्थं च प्रायः नैयायिकाः आत्मनि न प्रत्यक्षं प्रमाणयन्ति । किन्तु अनुमानमेव । परन्तु प्रत्यक्षेणापि आत्मानं साधयन्तः नैयायकैकदेशिनः सन्तीति जयन्तभट्टः न्यायमञ्जर्यां प्रमेयपरीक्षा

---

[1] न्यायसूत्रभाष्यम् - १.१.९

[2] न्यायवार्तिक-१.१.९

[3] न्यायवार्तिकम्- १.१.९

[4] वैशेषिकसूत्रम्-३.२.१८


ISSN: 2320-740X

प्रकरणे सप्तमान्हिके आह –

[1]तत्र प्रत्यक्षमात्मानं औपवर्षाः प्रपेदिरे ।
अहं प्रत्ययगम्यत्वात्, स्वयूथ्याः अपि केचन ॥

(औपवर्षः मीमांसा वृत्तिकारः) तेषामयम् उपपादनक्रमः – "घटमहं जानामि इति अस्ति सार्वजनीनः प्रत्ययः । तत्र घटमिति विषयभानं जानामीति ज्ञानस्य अहमिति कस्य भानम् ? न तावत् शरीरस्य तस्य जडत्वेन ज्ञानाश्रयत्वाऽभावात् । अतः आत्मैव तद्विषयः ।

ननु यदि आत्मा मनोजन्यप्रत्यक्षविषयः कस्तर्हि ज्ञानस्य कर्ता ? आत्मैवेति ब्रूमः । कथमात्मनः कर्मणः कर्तृत्वम् ? ज्ञानं प्रति हि विषयत्वमेव हि कर्मत्वम् । एवञ्च स्वविषयकज्ञानाश्रयः आत्मा इति न कोपि विरोधः । यदि पुनः कर्तृत्वकर्मत्वविरोधात् नात्मा प्रत्यक्षः स्यात्, तर्हि अनुमानगम्योऽपि न स्यात् ।

[2]आत्मानमात्मनाऽऽत्मैव लिङ्गादनुमिनोतीति हि ।
तत्र नूनमुपेतव्य कर्तृताकर्मताऽपि च ॥

न्यायसूत्रभाष्यकारोऽपि सम्वदतेऽत्र- " एतस्य ज्ञातृज्ञानविशिष्टः पूर्वज्ञातोऽर्थः विषयः" इति । विशिष्ट विषयकत्वं प्रत्यक्षं विना विशेषणविषयकत्वं सम्भवति । तस्मात् प्रत्यक्षः आत्मा । इत्थञ्च आत्मसाधने अनुमानमेव प्रमाणमिति प्रायः सर्वे नैयायिकाः अङ्गीकुर्वन्ति । एकदेशिनस्तु प्रत्यक्षमपि प्रमाणयन्ति । अन्ततो गत्वा आत्मविषयकत्वे उपपादनसापेक्षं प्रत्यक्षम्, अनुमानन्तु नैवमितिविशेषः पर्यवसति । वैशेषिकसूत्रे आत्मसाधकतया दश हेतवो निक्षिप्ताः –

[3] "प्राणपाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्च आत्मनो लिङ्गानि" इति । तत्र प्रथमे कार्यरूपाः सन्तः सोपपत्यर्थं कारणमात्मानमुपापयन्ति अन्त्याः स्वाश्रयत्वेन आत्मानं इति विशेषः । न्यायसूत्रे अन्तिमहेतुषु ज्ञानमन्तर्भाव्य आहत्य षट् हेतवः प्रथमं निर्दिष्टाः -[4]"इच्छा-द्वेष-प्रयत्न-सुख-दुःख-ज्ञानानि आत्मनो लिङ्गम्" इति । इदञ्च न्यायसूत्रं त्रेधा व्याख्यातम् ।

१. अत्र भाष्यवाक्यमेव अस्ति- 'यज्जातीयस्य अर्थस्य सन्निकर्षात् सुखमात्मा उपलब्धवान् तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति सेयम् आदातुमिच्छा एकस्य अनेकार्थदर्शिनः दर्शनप्रतिसन्धानात् भवन्ति लिङ्गमात्मनः' इति । कदाचित् सुखहेतुतया अनुभूतमर्थं कालान्तरे

[1] न्यायमञ्जरि- १.१.९

[2] न्यायमञ्जरी – १.१.९ आत्मपरीक्षाप्रकरणे

[3] वै.सू.३.२.४

[4] न्यायसूत्रम् १.१.१०

ISSN: 2320-740X

दृष्ट्वा तस्मिन् इच्छा उदेति। तेन ज्ञायते पूर्वकालीन एव इदानीमप्यस्तीति। न च देहः तथा। अतः देहतिरिक्तः आत्मा सिद्ध्यति।

२. "देवदत्तस्य रूप- रस- स्पर्शादिविषयकाः प्रत्ययाः एकानेकनिमित्तकाः स्मृताः सः ममेति प्रतिसन्धानात्। अतिरिक्तः आत्मा सिध्यति।" "योऽहं रूपं अद्राक्षं सोऽहं पश्यामि" इत्यनुभवः समेषामस्ति। तेन चाक्षुषस्पार्शनप्रत्यक्षयोः भिन्नेन्द्रियजन्ययोः अनुसन्धाता एक एव स्थिरः आत्मा अस्तीति ज्ञायते। तदिदं तृतीये अध्याये स्पष्टीकृतं सूत्रकारेण। [1]"दर्शन-स्पर्शनाभ्यामेकार्थग्रहणात्" इति।

इच्छादयः गुणाः परतन्त्राः नाश्रयमन्तरेण तिष्ठन्तीति सामान्यतो दृष्टानुमानेन वा आत्मसिद्धिः। कणादोक्तपूर्वहेतुषु "इन्द्रियान्तरीवकारः" इत्ययं गौतमेनापि सङ्गृहीतः। [2]"इन्द्रियान्तरविकारात्" इति तदीयं सूत्रम्। कस्यचित् आम्रफलस्य गृहीततद्रससाहचर्ये रूपे गन्धे वा केनचित् इन्द्रियेण गृह्यमाणे रसनस्य इन्द्रियान्तरस्य विकारः दन्तोदकसंप्लवः गृह्यते। न चान्यदृष्टमन्यः स्मरति। अतः अतिरिक्तः आत्मा अङ्गीकर्तव्यः इति तदर्थः। वैशेषिकसूत्रे दश हेतवः आत्मसाधकत्वेन निर्दिष्टाः। तैः सह भाष्यकारः चेष्टा रूपं हेत्वन्तरमपि व्याख्यातवान् – "शरीरसमवायिनीभ्यां च हिताहितप्राप्तिपरिहार – योग्याभ्यां प्रवृत्ति-निवृत्तिभ्याम् सारथिरिव प्रयत्नवान् विग्रहस्य अधिष्ठाता अनुमीयते" इति। तदयं हेतुः कारिकावल्यां सङ्गृहीतः[3] "रथगत्येव सारथिः" इति।

***********

## शरद्रात्रि बालमनोरमानुरोधेन "इको यणचि" इति सूत्रार्थविचारः

✍ श्रीमती आर्. नागकौमुदी

शोधच्छात्रा

**शरद्रात्रि -** शरद्रात्रिव्याख्याने यण् अचि इत्यत्र ङमुडागमाभावः उपपादितः। यण् अचि इत्यवस्थायां 'ङमो ह्रस्वादचि ङमुण् नित्यम्'[4] इति सूत्रेण ङमुडागमः प्राप्नोति। ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मात् परस्याचो नित्यं ङमुडागमः स्यात् इति तस्य सूत्रस्यार्थः। तत्र नित्यग्रहणमपि वर्तते। तथा च अचि इत्यत्र अकारस्य ङमुडागमे अर्थात् णुडागमे इको यण् अचि इति सूत्रस्य निर्देशः कर्तव्यः

---

[1] न्यायसूत्राम् ३.१.१

[2] न्यायसूत्रम्३.१.१२

[3] कारिकावली ५०

[4] अष्टा.सू.सं ८-३-३२


ISSN: 2320-740X

स्यादिति प्राप्ते संहितायाः अविवक्षितत्वम् इति समाधानम् ।

"संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥"

इत्यनेन वाक्ये संहितायाः विवक्षाधीनत्वस्य उक्तत्वेन प्रकृते च तस्याः अविवक्षया यणचि इति यथाश्रुतं साधितमत्र व्याख्याने । सुधी उपास्यः इत्यत्र स्थानत आन्तर्यात् ईकारस्य यकारः इत्युक्तम् । व्यक्तिपक्षाश्रयणे "अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः" वै.सि.कौ.प्रकरणम् इत्युक्तया रीत्या षट्षष्टेः वर्णानां ग्रहणं प्राप्तम् । यणस्तु चत्वारः अनुनासिकाननुनासिकत्वाभ्यां यवला द्विधा इति अनुनासिकानां ग्रहणेऽपि सप्तैव सम्भवन्ति । एवं च 'यथासङ्ख्यमनुदेशस्समानाम्'[1] इति सूत्रेण निर्वाहः न भवति । उद्देश्यविधेयानाम् इक्-यण्-पदवाच्यानां समसङ्ख्याकत्वाभावात् । 'प्रत्याहारेषु तद्वाच्यवाच्ये निरूढा लक्षणा' इति प्रौढमनोरमायां भट्टोजिदीक्षितैः अभिहितम् । तदेव आश्रित्य प्रकृतेऽपि निर्वाहः कृतः। तत्पङ्क्त्यर्थः अत्र विवृतः- प्रत्याहारोऽत्र इक् , तद्वाच्यः इ उ ऋ लृ, तद्वाच्यः तत्सवर्णाः अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश तस्य दीर्घाभावात् इत्युक्तरीत्या षडधिकषष्टिः। निरूढालक्षणा नाम शक्तितुल्या । इ उ ऋ लृ इति वर्णेषु शक्तिमत्त्वे इक्पदवाच्यत्वेन प्रमाणाभावेन शक्तिर्नोक्ता, किन्तु निरूढा लक्षणा उक्ता । यथासङ्ख्यसूत्रेण निर्वाहे तु यथासङ्ख्येन ईकारस्य स्थाने यकारः इत्येव ब्रूयात् इति स्थानतः आन्तर्यविषयकविचारः प्रस्तुतः शरद्रात्रिव्याख्याने । शब्दानित्यत्वात् उद्भाव्य तत्र च समाधानं अभिहितम् इकः स्थाने यणादेशः इत्युक्ते इकां पूर्वं स्थितिः, ततः तेषां निवृत्तिः, ततः तेषां स्थाने यण्वर्णानामुत्पत्तिः इत्यर्थाश्रयणेन शब्दानामुत्पत्तिः नाशश्च वर्तत इत्यनुपपत्तिः इति चेत् समाधिरुक्तः स्थाने इत्यस्य प्रसङ्गे सति इत्यर्थः इति वा अथवा इग्बुद्धिनाशेन यण्बुद्धिर्जाता इति नाशादिकं बुद्धिगतमेव न तु वर्णगतम् । एवं च शब्दस्य न अनित्यत्वम् ।

**बालमनोरमा -** बालमनोरमाकारैः अत्र सूत्रे वर्णस्य वर्णान्तराधिकरणत्वासम्भवात् अचि इति सतिसप्तमी इति व्याख्यातम् । तथा च 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[2] इति परिभाषया वर्णान्तरे अचि अव्यवहिततया उच्चारिते सति पूर्वस्य इकः स्थाने यण् भवतीत्यस्य तत्फलितार्थकथनम् इकः स्थाने यण् स्यादिति व्याख्यातम् । संहितायाम् इत्यधिकारात् वर्णात् वर्णान्तरोच्चारणे अर्धमात्राधिककालव्यवधाने संहितायाः अभावात् सन्ध्यभावः भवति । महाभाष्ये संहितायां सूत्रे औपश्लेषिकाधिकरणत्वं सप्तम्या बोध्यते । उप समीपे श्लेषः सम्बन्धः उपश्लेषः, तत्कृतमधिकरणम्

---

[1] अष्टा.सू.सं १-३-१०

[2] अष्टा.सू.सं १-१-६६

औपश्लेषिकम् , सामीपिकमिति यावत् । अच्समीपवर्तिनः इकः इत्यर्थः फलति । कालतः वर्णतश्च व्यवधानाभावे सति उपश्लेषः भवति । तथा च ईदृशसामीप्याभावात् असंहितायां यणः प्रवृत्तिर्नेति लभ्यते । सामीपिकमधिकरणत्वं च वर्णस्य वर्णान्तरेण बौद्धं द्रष्टव्यमित्याशयेन औपश्लेषिकाधिकरणत्वं च व्याख्यातम् । स्थाने अन्तरतमः 'यथासङ्ख्यमनुदेशस्समानाम्' [1] इति सूत्रस्थभाष्यानुरोधेन यथासङ्ख्येनापि निर्वाहः सम्भवतीति प्रदर्शितम् । 'यथासङ्ख्यमनुदेशस्समानाम्' इत्यत्र भाष्ये 'किमिहोदाहरणम्' इति प्रश्ने 'इको यणचि' 'दध्यत्र' 'मध्वत्र' इति समाधाय 'नैतदस्ति, स्थानेऽन्तरतमसूत्रेणापि एतत्सिद्धम्' इत्युक्तम् । 'स्थानेऽन्तरतम' इति सूत्रभाष्ये 'किमिहोदाहरणम्' इति प्रश्ने 'इको यणचि' 'दध्यत्र' 'मध्वत्र' इति समाधाय 'नैतदस्ति, सङ्ख्यातानुदेशेनापि एतत्सिद्धमित्युक्तम् । एवं च यथासङ्ख्यसूत्रेणापि प्रकृते निर्वाहः सम्भवतीति भाष्यकृन्मतमुपन्यस्तम् ।

'इक्'शब्देन षट्षष्टिः गृह्यन्ते । 'यण्'शब्देन चत्वारः सप्त वा इति विषमसङ्ख्याकत्वेन कथमत्र यथासङ्ख्यसूत्रप्रवृत्तिः इति चेत् तत्र समाधानमुक्तम् । इक्त्वयण्त्वादिना अनुगतीकृतानाम् इकां यणां च चतुष्ट्वेन यथासङ्ख्यत्वमुपपद्यते । इक्त्वावच्छिन्नस्य यण्त्वावच्छिन्नः आदेशः, तत्रापि इत्वावच्छिन्नस्य यत्वावच्छिन्नः, उत्वावच्छिन्नस्य वत्वावच्छिन्नः, ऋत्वावच्छिन्नस्य रेफत्वावच्छिन्नः, लृत्वावच्छिन्नस्य लत्वावच्छिन्नः आदेशः भवतीति न दोषः। ऋलृवर्णयोः प्रत्येकं त्रिंशतः उपस्थितावपि ऋत्वावच्छिन्नस्य रेफत्वावच्छिन्नः, लृत्वावच्छिन्नस्य लत्वावच्छिन्नः एव आदेशः भवति । न तु लृत्वावच्छिन्नस्य रत्वावच्छिन्नः न वा ऋत्वावच्छिन्नस्य लत्वावच्छिन्नो वा आदेशः। ऋलृवर्णयोः सावर्ण्यकथनेऽपि लृत्वजातेः लृवर्णे , ऋत्वजातेः ऋवर्णे वा अभावात् । लृत्वम् ऋकारे ऋत्वम् लृकारे च आरोप्यते इति तदातिदेशिकम् । लृत्वम् ऋकारे ऋत्वम् लृकारे च वास्तविकम् , अतः श्रुतानुमितयोः इति न्यायवत् ऋकारे लृत्वम् लृकारे ऋत्वं च नाश्रीयत इति बालमनोरमाकाराणामाशयः। तथा च स्थानतः आन्तर्यात् सङ्ख्यातानुदेशेन च प्रकृते निर्वाहः सम्भवतीति नैकत्र पक्षे आग्रहः कर्तव्यः इति तदाशयः।

**समीक्षणम्** – ङमुडागमशङ्का तत्समाधानं च शरद्रात्रिव्याख्याने कृतम् । अयं विषयः बालमनोरमाकृद्भिः अत्र न स्वीकृतः।

- प्रत्याहारग्रहणे तद्वाच्यवाच्ये निरूढा लक्षणा इति व्यक्तिपक्षाश्रयणं , ततः यथासंख्यसूत्रेण अनिर्वाहः इत्ययमंशः उभाभ्यामपि कृतः।

---

[1] अष्टा.सू.सं १-३-१०


ISSN: 2320-740X

- शरद्रात्रिव्याख्याने स्थानत आन्तर्यात् इति दीक्षितमतमेव समर्थितम् । बालमनोरमायान्तु स्थानत आन्तर्येण सिद्ध्यति , यथासंख्यसूत्रेण चापि सिध्यतीति मूलशरद्रात्र्योः अनुक्तोऽप्यंशः विवृतः।
- शब्दानित्यत्वविषयकविचारः शरद्रात्रौ एतत्सूत्रे व्याख्यातः । बालमनोरमायां अत्र सूत्रे न व्याख्यातः ।
- बालमनोरमायाम् अचि इति सप्तमी सतिसप्तमीति औपश्लेषिकाधिकरण-निमित्तकसप्तमी इति द्वेधापि सम्भवतीति प्रदर्शितम् । औपश्लेषिकमधिकरणमिति यथासङ्ख्यसूत्रेण निर्वाहश्च बालमनोरमायां भाष्यस्थपङ्क्त्युल्लेखनपुरस्सरं प्रतिपादितः ।

**********

## एकशः एकैकशः इत्यत्र मतभेदविचारः

**श्रीशशाङ्कतिम्मण्णभट्टः**

**शोधच्छात्रः**

"सुपः"(१.४.१०३) इति सूत्रेण सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः इत्युच्यते । सूत्रेऽस्मिन् "तान्येकवचनद्विवचनबहुवचनान्येकशः" (१.४.१०२) इति कृत्स्नं सूत्रमनुवर्तते ।

अत्र प्रक्रियाकौमुदीकारमतम् - सुपस्त्रीणि त्रीणि वचनान्येकैकशः एकवचन-द्विवचनबहुवचनसंज्ञानि स्युः । एकैकशः इत्यस्य एकमेकमित्यर्थः इति । अयमाशयः – एकमेकमित्यर्थे "नित्यवीप्सयोः"(८.१.४) इति एकशब्दस्य द्वित्वे, "संख्यैकवचनाच्च वीप्सायाम्" (५.४.४३) इति प्रथमान्तात् शस्प्रत्यये एक एक सु शस् इत्यवस्थायां प्रातिपदिकसंज्ञायां सुब्लुकि, एकैकशः इति सिध्यति इति ।

**प्रकाशकारमतम्** – "तान्येकवचनद्विवचनबहुवचनान्येकशः" इत्यत्र एकशः इति सूत्रकारनिर्देशात् "सर्वस्य द्वे" (८.१.१) इत्यत्र "एकैकशः ददाति" इति भाष्यप्रयोगाच्च शस्प्रत्यये एकशब्दस्य द्विर्वचनं विकल्पेन भवति । अतः एकैकशः इत्यप्यत्र साधु इति ।

**दीक्षितमतम्** - सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञकानि भवन्ति। एकशः इत्यस्य एकैकमित्यर्थः। प्रथमान्तैकशब्दात् शसि प्रातिपदिकत्वे, सुब्लुकि एकशः इति सिध्यति। प्रकृते शस्प्रत्ययेनैव वीप्सा उक्ता। अतः पुनः एकशब्दस्य द्विर्वचनं न सम्भवतीति एकैकशः इत्ययुक्तम्।

**विमर्शः** – "संख्यैकवचनाच्च वीप्सायाम्" इति सूत्रेण संख्यावाचिभ्यः प्रातिपदिकेभ्यः एकवचनाच्च वीप्सायां शस्प्रत्ययो विधीयते। द्विशः, त्रिशः, माशषः इत्याद्युदाहरणम्। एकशः इत्यत्रापि अनेनैव शस्प्रत्ययः। अतः अत्र वीप्सा शस्प्रत्ययेनैव उक्ता। तस्मात् "उक्तार्थानामप्रयोगः" इति वचनात् पुनः वीप्सां वक्तुं एकशब्दस्य "नित्यवीप्सयोः" इति द्विर्वचनं न भवति। अन्यथा द्विशः इत्यत्रापि द्विर्वचनापत्तिः। किं च "येन नाप्राप्ते यो विधिरारभ्यते स तस्य अपवादः" इति न्यायेन शस्प्रत्ययः द्विर्वचनस्य अपवादः। यत्कर्तृकावश्यकप्राप्तौ सत्यां यो विधिरारभ्यते स आरभ्यमाणविधिः तस्य अवश्यप्राप्तस्य बाधको भवतीति न्यायस्यार्थः। प्रकृते यत्र वीप्सार्थः बोध्यते तत्र द्विर्वचनस्य अवश्यकप्राप्तौ सत्यां, वीप्सां द्योतयितुं शस्प्रत्ययः विहितः इत्यतः आरभ्यमाणः शस्प्रत्ययविधिः अवश्यप्राप्तस्य द्विर्वचनविधेः बाधको भवतीति शस्प्रत्ययस्य अपवादत्वात् एकशः इत्यत्र प्रथमान्तैकशब्दात् शसि द्विर्वचनं न भवति। अतः अत्र एकैकशः इति द्विर्वचनघटितं रूपमसाधु एव। सूत्रभाष्ययोर्निर्देशात् उभयं साधु इत्यपि वक्तुं न शक्यम्। "सर्वस्य द्वे" इत्यत्रैव भाष्ये "न वा पदाधिकारात्" इति वार्तिके, "पदस्य" इति प्रकृत्य द्विर्वचनं वक्ष्यामि। तच्चावश्यं पदग्रहणं कर्तव्यं, समासनिवृत्यर्थं, तद्धितनिवृत्यर्थं, वाक्यनिवृत्यर्थञ्च इत्युक्तम्। ततः अग्रे "तद्धितनिवृत्यर्थेन चापि नार्थः पदग्रहणेन, तद्धितेनोक्तत्वाद्वीप्साया द्विर्वचनं न भविष्यति। तद्धितः खल्वपि वीप्सायामित्युच्यते। यत्र च तद्धितेन अनुक्ता वीप्सा भवति तत्र द्विर्वचनम्। तद्यथा एकैकशो ददातीति उदाहरणत्वेन प्रदर्शितम्। अस्य आशयं कैयटः इत्थमाह – अल्पार्थकः अपि एकशब्दः वर्तते। तस्मात् वीप्सार्थे "नित्यवीप्सयोः" इति द्विर्वचने, "बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्" (५.४.४२) इति सूत्रेण शस्प्रत्यये एकैकशः इति रूपम्। अस्य अल्पमल्पमित्यर्थः इति। एवञ्च उदाहृतभाष्ये एकैकशः इत्यत्र अल्पार्थकैकशब्दः इत्यतः वीप्सायाः तद्धितेनानुक्तत्वात् द्विर्वचनं सिध्यतीति विषयान्तरमेव। प्रकृतसूत्रे च अयमर्थः न सम्भवति। अतः तद्भाष्यनिर्देशमादाय इह सूत्रे एकैकशः इत्यस्य साधुत्वकथनं न युक्तमिति दीक्षिताभिप्रायः।

ननु अ इ उ ण् सूत्रे भाष्ये "ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्वा तया सर्वे ते सहस्रदक्षिणाः सम्पन्नाः" इति वाक्ये एकैकशः इति प्रयोगः न सङ्गच्छेत इति चेन्न। एकशब्दो हि


ISSN: 2320-740X

बह्वर्थकः। यथा –

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा।
साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते॥ इति।

अत्र भाष्ये प्रथमः एकशब्दः प्रधानार्थकः, सम्बोधनञ्च। द्वितीयश्च शस्प्रत्ययान्तः। एवञ्च अस्य प्रत्येकमित्यर्थात् न दोषः। अथवा स्मृतेः श्रुतेर्वायं प्रयोगः, न तु भाष्यकारस्य। "गौण्यप्युत्तरा संख्या पूर्वां संख्यां बाधते" इति श्रौतव्यवहारः। तस्यैव उदाहरणत्वेन भाष्यकारेण स्वीकृतः। अतः छान्दसत्वात् शस्प्रत्ययेन वीप्सायाः उक्तत्वेऽपि द्विर्वचनं भवति इति शब्दरत्नकाराशयः।

परमत्र नागेशः संख्यार्थे एव शस् प्रत्ययः इत्याह। तथा हि – द्योतकसमुच्चयस्य अन्यत्र दृष्टत्वात् एकशब्दात् संख्यार्थे शस्प्रत्ययो भवति। यथा गार्ग्यायणी, व्यतिलुनीते इत्यादौ। गार्ग्यायणी इत्यत्र गार्ग्यशब्दात् स्त्रियां "प्राचां ष्फ तद्धितः" (४.१.१७) इति ष्फप्रत्ययो विधीयते। पुनः तस्य षित्वात् "षिद्गौरादिभ्यश्च" (४.१.४१) इति स्त्रियामेव ङीष् विधीयते। अत्र ष्फप्रत्ययः, ङीष्प्रत्ययश्च स्त्रीत्वस्यैव द्योतकौ इति द्योतकद्वयस्य समभिव्याहारः दृश्यते। किं च क्रियासमभिव्याहारः यत्र द्योत्यते तत्र "कर्तरि कर्मव्यतिहारे" (१.३.१४) इति आत्मनेपदं विधीयते। व्यतिलुनीते इत्याद्युदाहरणम्। अतः अत्र आत्मनेपदं कर्मव्यतिहारार्थं द्योतयति। वि अति इति उपसर्गावपि तदेव द्योतयतः इत्येवं द्योतकसमुच्चयः दृश्यते। तस्मादेकैकशः इत्यत्रापि शस्प्रत्ययेन वीप्सा द्योत्यते। द्विर्वचनमपि तस्यैव द्योतकः इति संख्यार्थकैकशब्दात् शस्प्रत्यये एकैकशः इति सिध्यति।

**आकरग्रन्थाः**


- सिद्धान्तकौमुदी
- प्रौढमनोरमा
- प्रक्रियाकौमुदी
- महाभाष्यम्
- लघुशब्देन्दुशेखरः


**********

# श्रीमद्भगवद्गीतायां निरूपितः शारीरिकविकासः

✍ कु. प्रियाङ्का चन्द्र
शोधच्छात्रा

श्रीमद्भगवद्गीता आध्यात्मिकज्ञानस्य पृष्ठभूमिरस्तीति सर्वे जानन्ति। तेन सह भगवद्गीता मनोवैज्ञानिकतत्त्वानि दर्शनतत्वानि च प्रतिपादयन्ती सर्वोत्तमः ग्रन्थोऽस्ति । भगवद्गीतायां शारीरिक-मानसिक-आध्यात्मिकविषयाणां परिचर्चा वर्तते । मानवस्य शारीरिकविकासः तस्य व्यक्तित्वं प्रभावयति । शारीरिकविकासं प्रभावयितुं घटकद्वयं प्रधानमस्ति । तद्यथा – आन्तरिकं बाह्यञ्चेति। आन्तरिकतत्वं वंशानुक्रमो भवति। बाह्यतत्वं वातावरणम् इत्युच्यते। शारीरिकविकासे वंशानुक्रमस्य वातावरणस्य च समानः प्रभावो भवति । वंशानुक्रमः शारीरिकविकासं पर्याप्तं प्रभावयति। शरीरसंरचनायां विविधग्रन्थीनां भूमिका महती अस्ति। ग्रन्थीनां सामञ्जस्यं प्रमुखं भवति। एतासु ग्रन्थिषु थाईरयड-पिटुइटरि-अड्रिनाल-जननग्रन्थीनां च भूमिका महत्वपूर्णा वर्तते। यदा एताः ग्रन्थयः समुचितरूपेण कार्यं कुर्वन्ति तदा शरीरे सत्प्रभावं जनयन्ति, परन्तु एतासाम् असमीचीनं कार्यं शरीरे अवाञ्छनीयं प्रभावं जनयन्ति। यथा –

थाईरायडग्रन्थेः न्यूनसक्रियत्वात् मानवः वामनः दुर्बलश्च भवति । किन्तु अतिसक्रियत्वात् शरीरे कम्पनं भवति । उत्तेजनायाः अनुभूतिर्जायते । अस्य ग्रन्थेः यथोचितसक्रियत्वात् मानवस्य स्वास्थ्यम् उत्तमं भवति, बुद्धेः विकासश्च जायते । अस्य ग्रन्थेः अल्पक्षरणात् मानवस्य मनश्शारीरिकविकासश्च अवरुद्धो भवति। मानवः वामनः मन्दबुद्धियुतश्च भवति।

एड्रिनालग्रन्थितः जातस्स्रावः मानवाय शक्तिं प्रददाति। तेन शरीरं विभिन्नक्रियाः कर्तुं सक्षमं भवति । पिट्यूटरिग्रन्थेः अधिकरसक्षरणेन मानवः उन्नतः तथा न्यूनक्षरणेन वामनः भवति बालवद् व्यवहरति च।

मानवस्य शरीरे स्नायुसंस्थानानि, जैविक रसायनिकघटकानि भवन्ति। तेषां प्रभावः स्वभावे बुद्धौ च भवति। वंशानुक्रमः अस्माकं क्षमतायाः सीमानिर्धारणं करोति। वातावरणं च क्षमतायाः विकासं सम्पादयति।

शारीरिकविकासाय एतासां ग्रन्थीनां समुचिता सक्रियता आवश्यकी भवति । एतासां सक्रियतायै पौष्टिकाहारः निद्रा च अपेक्षते। यथा निद्रा अधिका न भवेत् तथैव न्यूनाऽपि न भवेत्। समुचितनिद्रया मनुष्यस्य शारीरिकवृद्धिर्भवति। अधिकनिद्रया मानवेषु आलस्यं वर्धते तथैव निद्रा न्यूना भवति चेत् मानवः अस्वास्थ्यमनुभवति। स्वस्थतायै ६ घण्टात्मिका निद्रा अपेक्षिता।


ISSN: 2320-740X

श्रीमद्भगवद्गीतायां समुचितनिद्राहारादिविषयः निर्दिष्टोऽस्ति । भगवता श्रीकृष्णेनोक्तं सर्वदा युक्ताहारः स्यादिति । युक्ताहारः इत्यस्य सात्विकाहारः इत्यर्थः । आहाराणामपि त्रिधा विभाजनं क्रियते । ते यथा – सात्विकाहारः, राजसिकाहारः, तामसिकाहारश्चेति । सात्विकाहारेण व्यक्तिः योगी भवितुं शक्नोति । सात्विकाहारः आयुर्बुद्धिबलवृद्धिकारकः भवति । सन्तुलिताहारेण शारीरिकविकासः सुलभतया भवति । शरीरस्थानां विभिन्नग्रन्थीनां विकासः सम्यग्रूपेण भवति । तदा शरीरस्थाः विभिन्नग्रन्थयः समीचीनतया कार्यं कुर्वन्ति । तेन शरीरे पुष्टिर्जायते । कटुः, लवणयुक्तः, अत्युष्णः, तीक्ष्णः, दाहकारकाहारः राजसाहार इत्युच्यते । एतेन आहारेण रोगस्योत्पत्तिर्जायते । पुनः अर्धसिद्धं , रसरहितं, दुर्गन्धयुक्तम्, अपवित्रम्, उच्छिष्टादिभोजनं तामसभोजनमित्युच्यते । उक्तञ्च भगवद्गीतायाम् –

[1]युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥
[2]आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥
[3]आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥
[4]कट्वाम्ललवणात्युष्णतीक्ष्णरुक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥
[5]यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥

अतः बाल्यकालादेव भोजने सचेतनता भवेत् । तेन शारीरिकपुष्टिः भवति । सात्विकभोजनेन बुद्धेर्विकासो भवति । बुद्धिः भगवद्प्रणीतः कश्चिद्गुणः । बुद्ध्या मानवस्य व्यक्तित्वं प्रभावितं भवति । अतः गृहे विद्यालये च श्रीमद्भगवद्गीतायाः पठनपाठनमावश्यकम् ।

**********

[1] श्रीमद्भगवद्गीता – ६/१७
[2] श्रीमद्भगवद्गीता – १७/७
[3] श्रीमद्भगवद्गीता – १७/८
[4] श्रीमद्भगवद्गीता – १७/९
[5] श्रीमद्भगवद्गीता – १७/१०

# मीमांसाशास्त्रीयग्रन्थेषु विधिभूषणस्य वैशिष्ट्यम्

✍ श्रीप्रशान्तगाँव्करः

शोधच्छात्रः

**जैमिनिं सूत्रकारं हि भाष्यकृच्छबरञ्च तम् । वार्त्तिकस्य प्रणेतारं प्रणमामि पुनः पुनः ॥**

सर्वविदितमेवैतद्यद्धर्ममनुतिष्ठन् पुरुष इहामुत्र सुखमश्नुते, अधर्ममनुतिष्ठन् दुःखमिति । परं को नाम धर्मः कश्चाधर्म इति विविच्य न विदन्ति संसारिणः । नात्र केवलं नरापराधः कारणं परन्तु धर्माधर्मयोः दुर्ज्ञेयत्वमपि । अत एवोक्तं महर्षिणाऽऽपस्तम्बेन **"न धर्माधर्मौ चरत आवां स्व इति न देवगन्धर्वा न पितर इत्याचक्षतेऽयं धर्मोऽयमधर्म"**[1] इति । यदि प्रत्यक्षं लोके सञ्चरेतां धर्माधर्मौ तदा धर्ममुपकारकं मन्यमानाः तमुपसरेयुः, तद्विपरीतमधर्मं परिहरेयुः । न तथा लोके अनुभवोऽस्ति । तथापि धर्माधर्माविति व्यवहारस्तु नितरां प्रसिद्धः । परन्तु अधिगतपरमार्थास्त्वल्पीयांसः, भूयांसस्त्वनधिगत-परमार्था एव । तथा चोक्तं मीमांसाभाष्यकृता भगवता शबरस्वामिना **"धर्मं प्रति हि विप्रतिपन्ना बहुविदः, केचिदन्यं धर्ममाहुः, केचिदन्यम् । सोऽयमविचार्य प्रवर्तमानः कञ्चिदेवोपाददानो विहन्येत, अनर्थं च ऋच्छेत् । तस्माद्धर्मो जिज्ञासितव्य"**[2] इति । एतदेवाभिप्रेत्य भगवान् जैमिनिमहर्षिः असन्दिग्धाविपर्यस्तधर्मस्वरूपनिर्धारणाय द्वादशलक्षणीम् अभ्यर्हितविद्यां मीमांसां प्रणिनाय । ताञ्च विस्तारयामासुः मान्याः शबरस्वामिकुमारिलभट्टपादप्रभाकरमिश्रप्रभृतयो दार्शनिकाः धार्मिकलोकस्य हितं चिकीर्षवः । वेदबोधितोऽपि स्मृतिपुराणेतिहासादिभिः उपबृंहितोऽपि विचारसरणिमापाद्य निर्णीतोऽपि दुरधिगम्योऽयं धर्मो मन्दमतीनाम् । तादृशान् मन्दमतीनुद्दिधीर्षवः परहितपरायणाः शास्त्रेषु निहितरहस्यतत्त्वान्युद्घाटयितुकामाः दार्शनिकाः शास्त्रीयान् विविधान् ग्रन्थान् प्राणैषुः । तत्रैकः विशिष्टः ग्रन्थः श्रीमद्वेङ्कटनारायणविरचितः विधिभूषणाख्यः ।

**"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्"**[3] इत्येवं प्रवृत्तेऽस्मिन् शास्त्रे निखिलजगत्प्रतिष्ठाहेतोः धर्मस्य प्रामाण्यस्थापनार्थं वेदस्य प्रामाण्यकथनसौकर्याय अनुष्ठान-व्यवस्थार्थञ्च विधिमन्त्रनामधेयनिषेधार्थवादात्मना पञ्चधा विभागः मीमांसकैः प्राकल्पि । **"विधिना त्वेकवाक्यत्वात्......"**[4] इत्यादिसूत्रेण अर्थवादादीनां सर्वेषां विध्यन्तर्भावः विधिमूलकत्वेन प्रामाण्यञ्च स्वीकृतम् । तत्र "विधानं विधिः" इति भावव्युत्पत्त्या प्रवृत्त्यनुकूलः व्यापारः प्रधानतया विधिशब्देन

---

[1]. आ.श्रौ.सू. १.२०.११

[2] मी.शा.भा.

[3]. श्लो.वा.प्र.सू.

[4]. जै.सू. १-२-७

उच्यते । **"यजेत स्वर्गकामः"** इत्यादिवाक्यानि विधिशब्देन व्यवह्रियन्ते । वेदे विधयः अज्ञातमेवार्थं बोधयन्ति । अन्यथा तेषामप्रामाण्यं स्यात् । अनधिगताबाधितार्थकत्वं हि प्रामाण्यम् । अतः अज्ञातमेवार्थं विधिवाक्यानि प्रतिपादयन्ति । अयं च विधिस्त्रिविधः – अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति । एतेषां लक्षणान्युक्तानि वार्तिककारैः भट्टपादैर्यथा –

**विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।**

**तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥**[1] इति ।

त्रिविधविधीनां वार्तिकोक्तलक्षणप्रपञ्चनपूर्वकं सम्भावितदोषनिरासद्वारा श्रीमद्वेङ्कट-नारायणविरचितः **"विधिभूषणम्"** इति विशिष्टः ग्रन्थः मीमांसाशास्त्राध्येतृणां नूनमेवोपयोगाय वर्तते ।

वार्तिकोक्तं विधित्रयलक्षणं नानोदाहरणप्रदर्शनपूर्वकं स्फुटं परिष्कृत्य व्यवस्थापयति विधिरसायने दार्शनिकशिरोमणिः सकलशास्त्रमर्मज्ञः पूर्वोत्तरमीमांसापारावारपारीणः श्रीमानप्पय्यदीक्षितः । तथापि विधिरसायने क्वचिल्लक्षणेषु भ्रमवशात् साङ्कर्यप्रत्ययः जायते । परं विधिरसायनोक्तान् आक्षेपान् परिहृत्य साङ्कर्यञ्च अपाकृत्य सम्भावितदोषनिरासपूर्वकं वार्तिकोक्तं विधिभेदलक्षणं निष्कृष्टमुपस्थापयत्ययं श्रीमद्वेङ्कटनारायणविरचितः **"विधिभूषणम्"** इति ग्रन्थः । ग्रन्थेऽस्मिन् अव्याप्त्यादिदोषानुद्भाव्य तेषां परिहारश्च यथासम्भवमुपपाद्य लक्षणोदाहरणव्याजेन नैकेषां मीमांसाशास्त्राधिकरणस्थानां विषयाणां चालिनीन्यायेन विवेचनं कृत्वा वार्तिकोक्त-विधित्रैविध्यलक्षणम् अतिमनोज्ञया शैल्या प्रपञ्चितम् । सार्थवादविधीनां निरर्थवादविधीनां च कथम् अपूर्वादिविधिलक्षणलक्ष्यत्वमिति पूर्वपक्षोत्थापिताक्षेपपरिहारपूर्वकं विषदतया निरूपितो वर्तते । यद्यपि मीमांसाशास्त्रे "**चोदनालक्षणोऽर्थो धर्मः**"[2] इति कथयता सूत्रकारेण चोदनापरपर्यायस्य विधेरेव धर्मे प्रामाण्यं प्रदर्शितम् । परं केवलं विधिप्रमाणप्रतिपादकाः ग्रन्थाः शास्त्रेऽस्मिन् अङ्गुलिगणनीयाः एव सन्ति ।

सरलया सुमनोहरया च शैल्या उदाहरणपुरःसरम् अपूर्वनियमपरिसंख्याविधीनां लक्षणं निरूपितम् अस्मिन् ग्रन्थे । विधिलक्षणलक्ष्यं किमिति विचार्यमाणे समये प्रकारान्तरविधिलक्षणवादिनं समाधत्ते श्रीमद्वेङ्कटनारायणः यथा – **"न च तवैव वा कथं तत्र तत् परिहार इति वाच्यम्, सार्थवादस्यैव विधेर्लक्ष्यत्वस्वीकारेण परिहारात्; निरर्थवादस्थले च निरर्थवादस्यैव लक्ष्यत्वात् । न चैवमननुगमः, सार्थवादं निरर्थवादं वा यावदेवाम्नानात्स्वविषयप्रवर्तनाक्षमं तावल्लक्ष्यमित्यनुगमसंभवात् । तत्परोक्तमपूर्वविधिलक्षणमसमञ्जसमेव । एवं नियमपरिसंख्यालक्षणयोरपि परोक्तयोर्दोषा ऊह्याः ।"**

---

[1]. श्लो.वा.

[2] जै.सू. १-१-२

**“अथ तत्रभवन्तो भट्टपादाः ‘विधिर्वा स्यादपूर्वत्वात्; नियमार्थो वा पुनःश्रुतिः; परिसंख्या वा’ स्यादित्यादिसूत्रेषु प्रसिद्धानामपूर्वनियमपरिसंख्यानां लक्षणानि बालव्युत्पिपादयिषया एकस्यां कारिकायां संचिक्षिपुः। यथा –**

**विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।**
**तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥**

**सेयं कारिका सोदाहरणा संभवितानुपपत्तिनिरासपूर्वकं संक्षेपात् व्याख्यायते। अत्र च पूर्वार्धे अपूर्वनियमविधिलक्षणार्थे द्वे वाक्ये। पश्चार्धं तु परिसंख्यालक्षणार्थमेकं वाक्यम्।”** इत्येवं रीत्या शास्त्राध्येतृणां सुखबोधाय सरलया शैल्या सोदाहरणं विधिलक्षणानि प्रतिपादितानि अस्मिन् ग्रन्थे। अतः एतादृशः विधिप्रमाणप्रतिपादकः मनोहरः ग्रन्थः शास्त्रेऽस्मिन् वैशिष्ट्यं भजते।

**********

## माध्यमिकविद्यालयीयानाम् अध्यापकानां कार्यभारः परिहारोपायाश्च

✍ **श्रीश्रीकरः वि.**
शोधच्छात्रः

अद्यत्वे मानसिकभारः (stress) नागरिकसमाजे सर्वैरनुभूतः कश्चित् सामन्यविचारः। एतस्य कारणं वैश्वीकरणं (globalization) उदारीकरणञ्च (liberalisation) भवति। मानसिकोद्वेगानां सहनाशक्तिः इतरप्राणिनामपेक्षया मानवेषु अधिकास्ति। परन्तु मानसिकभारम् असहमानः मानवः शीघ्रं मानसिकदैहिकरोगग्रस्तः भवति इति (**Kulandaivel 2006** ) कुलन्दवेल् सप्रमाणं प्रतिपादयति । सर्वत्र अध्यापकानामनुभवेन इदं ज्ञायते यत् सर्वे अध्यापकाः उद्योग-सम्बद्धमानसिकभारवन्तः सन्ति इति। अध्यापनवृत्तिः एतादृशी वर्तते यत्र न केवलं अध्यापनम् अपि च प्रबन्धनम्, मूल्याङ्कनम्, व्यवस्थापनम्, निरीक्षणम् इत्यादिबहुकार्याण्यन्तर्भवन्ति। अध्यापकस्योपरि समाजस्य उत अभिभावकानां तीव्राऽपेक्षाभवति। अत एव अध्यापकेषु मानसिकभारः वर्धते।

**अध्यापककार्यभारस्य (Job Stress) इमानि कारणानि भवितुमर्हन्ति-**

- कक्ष्यायां शिक्षणाधिगमवातावरणस्याभावः(उदाहरणार्थम्- लघुप्रकोष्ठः अधिकाः छात्राः)
- विद्यालये पूरकवातावरणस्याभावः । (उदाहरणार्थम्-औष्ण्यम्, शैत्यम्, प्रकाशः, शब्दः, कक्ष्यायाः संरचना)


ISSN: 2320-740X

- अध्यापकस्य स्थायिनियुक्तिः (Job security)
- अध्यापकस्य स्थानान्तरणम् ।
- न्यूनवेतनम् । (Low salary)
- पदोन्नत्यर्थम् अवसरस्य अभावः ।
- प्रतिवर्षम् आजीविकायाम् अल्पवृध्दिः ।
- पाठनसमये मध्ये बाधाः ।
- समयपाठचर्याविषययोः सङ्घर्षः ।
- अध्यापकस्य विविधपात्राणि (अध्यापकरूपेण वा, अभिभावकरूपेण वा, सहायकरूपेण वा मार्गदर्शकरूपेण वा इत्यादि ) ।
- अधिककार्यभारात् विश्रान्तेरभावः ।
- विद्यालयस्य कार्याणि गृहं प्रति नीत्वाऽपि साधयितुं समयाभावः ।
- छात्राणाम् उत्तरपत्रिकाणाम् उत प्रदत्तकार्याणां वा (answer sheets and assessment) मूल्याङ्कनाय समयाभावः ।
- शैक्षिकसंस्थायाः प्राशासनिकदायित्वानां निर्वहणम्, कार्यनीतीनाम् व्यवस्थापनम् ।
- सर्वकार-संस्था-छात्र- अभिभावकेषु समन्वयस्थापनम् ।
- छात्रपक्षतः मानसिकहानिः अथवा दैहिकहानिः ।

**अध्यापकानां कार्यभारस्य परिहारोपायाः-**

- माध्यमिकविद्यालयेषु सर्वकारस्य पक्षतः उत असर्वकारीयविद्यालयेषु प्रबन्धकसमितेः पक्षतः वा शिक्षकेभ्यः समुचितप्रेरणास्पदस्य वातावरणस्य निर्माणं कुर्यात् । नूतनविधीनां प्रयोगे नवाचारस्य आचरणे स्वातन्त्र्यं स्यात् । मनसः आह्लादाय योगाभ्यासस्य ध्यानस्य चावसरं प्रकल्पयेत् । मनोरञ्जनाय तदा तदा विविधाः कार्यक्रमाः आयोजनीयाः । येन अध्यापकाः विश्रान्तिमनुभवन्ति ।
- विद्यालयेषु अध्यापकानामन्तर्वैय्यक्तिकसम्बन्धः उत्तमः न भवति चेत् अध्यापकेषु मानसिकभारः वर्धते । तदर्थं परस्परवार्तालापमाध्यमेन समस्यायाः समाधानं अन्विष्येत् । येषु माध्यमिकविद्यालयेषु शिक्षकप्रधानाध्यापकयोः मध्ये पारस्परिकसहयोगस्य मित्रतायाः भावना वर्तते, तेषु च स्नेह-सहानुभूतिः वर्तते । ते च परस्परमाश्रिताः उत्तरदायित्वं च जानन्तः मिलित्वा कार्यं कुर्वन्ति ।
- विशेषतया ग्रामीणप्रदेशस्य अध्यापकानां कृते वाहनगृहादीनां व्यवस्थाः प्रकल्पनीयाः ।

केषुचित् ग्रामेषु विद्यालये प्रकोष्ठस्य पीठोपकरणानाम् अध्यापनसंबद्धसामग्रीणां शौचालयस्य च व्यवस्था न भवति। अतः एतेषां सुष्टुव्यवस्थापनं कुर्यात्।

- सर्वकारस्य पक्षतः अध्यापकेभ्यः मानसिकभारस्य निवारणर्थम् उपयुज्यमानानाम् उपायानां विषये कालेकाले कार्यशालासंगोष्ठी च सर्वत्र आयोजनीया। अत्र प्राप्तसफलाः पदोन्नत्या पुरस्कारेण वा सम्माननीयाः।
- सम्प्रति अध्यापक-छात्रानुपातः 1:40 इति अस्ति। अनेनैव कारणेन अध्यापकानां कार्यभारः अधिकः भवति। सर्वकारः एनम् अनुपातम् अनिवार्यरूपेण 1:25 करोति चेत्सुविधा भवति।
- माध्यमिकविद्यालयेषु अध्यापक - अभिभावकयोः मेलनं प्रत्येकस्मिन्मासे आयोजनीयम्। तत्र अध्यापकाः स्वीयसमस्यायाः प्रस्तुतीकरणम् उन्मुक्तरूपेणकरणीयम्। तेन ४०% अध्यापकसमस्याः दूरीभवन्ति। उत्तमकार्यकर्तृभ्यः अध्यापकेभ्यः प्रतिवर्षंपारितोषकः प्रदातव्यः, येन शिक्षकः स्वकार्यस्य प्रतिपुष्टिं प्राप्नोति।
- एवं प्रकारेण सर्वकारः योजनानां निर्माणं कृत्वा कार्यन्वयनं करोति चेत् माध्यमिकविद्यालयीय प्राध्यापकाः लाभान्विताः भवन्ति।

**********

## ग्रहाणां स्वरुपं स्थितिश्च

✍ **श्रीकुलदीपः**
शोधच्छात्रः

सुविदितमेव एतत् अत्र भवतां निखिल-निगमागम-विधूतचेतसां विपश्चितां यद् इह जगति जन्मवतां सर्वतः श्रेयोमार्गप्रदर्शको वेद एव। नात्र कश्चिदपि विषयोऽनुपलभ्यो यथातथ्येनान्वेषयतां सताम्। वेदस्य षडङ्गभूतानि शिक्षा-कल्प-शब्द-ज्यौतिष-निरुक्त-छन्दःशास्त्राणि प्रचक्ष्यन्ते यथा चाह भास्कराचार्यः –

शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ।
या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः॥

तेषु षड्ङ्गेषु तावत् ज्यौतिषशास्त्रमेव दिग्देशकालव्यञ्जकत्वेन यज्ञतपोदान-व्रतोपवासादीनामादिबीजम्। तत्रापि-

ज्यौतिषशास्त्रफलं पुराणगणकैरादेश उच्यते।


ISSN: 2320-740X

नूनं लग्नबलाश्रितः पुनरयं तत् स्पष्टखेटाश्रयम् ॥

इत्यादिवाक्यैः प्रत्यक्षदृष्ट्या वा फलोत्पत्तौ ग्रहाणां विशिष्टहेतुत्वं पृथिव्यायामुपरि ग्रहाणां प्रत्यक्षप्रभावः "ग्रहाधीनम् जगत्सर्वम्", "ग्रहास्ते देवतांशकाः"। इत्यादि वचनैश्च ग्रहाणां स्थानं समस्तब्रह्माण्डे वैशिष्ट्यं बिभर्ति । मानवजीवनस्य अनेकक्षेत्रेषु ग्रहाणां फलं दृष्ट्वैव ग्रहाणां दृग्गणितैक्यानयनार्थं प्रयासाः प्राचीनज्योतिर्विद्भिः कृता उक्ताश्च-

यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम् ।

स्यात्प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या ॥

इत्थं ज्यौतिषशास्त्रस्याचार्यैः ग्रहाणां महत्वं स्वीकृत्येव नभोमण्डले तेषां स्थितिः, गतिः, स्वरूपं च सम्यक् विचारितम् । भारतीयज्यौतिषशास्त्रे समस्तब्रह्माण्डस्य मध्ये भूमण्डलस्य स्थितिं स्वीकृत्य ग्रहकक्षाः निर्धारिताः यथा –

मन्दामरेज्य-भूपुत्र-सूर्य-शुक्रेन्दुजेन्दवः ।

परिभ्रमन्त्यधोऽधःस्थाः सिद्धा विद्याधरा घनाः ॥

मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति ।

बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् ॥

एवं भारतीयज्यौतिषशास्त्रे सूर्यग्रहं स्वीकृत्य सूर्यतः शनिपर्यन्तानां सप्तग्रहानां कक्षाभूमेः उपरि-उपरि अथवा शनितः अधो अधः निर्धारिता याः कक्षाः अधुनापि वैज्ञानिकै स्वीक्रियन्ते तत्र नास्ति अन्तरं । केवलमन्तरम् एतावदेव यत् पाश्चात्यज्यौतिषानुसारं ग्रहाणां तिथिविचारप्रसङ्गे चन्द्रः पृथिवीम्परिभ्रमति, तद् अतिरिच्य अन्ये ग्रहाः सूर्यं परिक्रामन्ति । पृथ्वी स्वयमपि सूर्यं प्रदक्षिणीकरोति इति । सापि ग्रहत्वेन स्वीकृता पृथ्व्याः ग्रहत्वसिद्धान्तोऽयं नूतनः सार्ध चतुःशतवर्षेभ्यः प्राक् कोपर्निकसमहोदयेन विज्ञातः । एकोनविंशे, विंशे च क्रिस्तशताब्दसमये पाश्चात्यदेशेषु वेधयन्त्राणां साहाय्येन नूतनान्वेषणानि जातानि तथा च प्रागन्विष्टानां ग्रहाणां संख्या वृद्धिमुपगता । तत्र यूरेनस् , नेप्च्यून, प्लूटोसंज्ञकाः ग्रहाः विज्ञाताः ।

भारतीयज्यौतिषे ते पिण्डाः बिन्दवश्च ग्रहतया स्वीकृताः क्रियन्ते ये राशिषु भ्रमन्ति इति सिद्धान्तेन बिन्दुरूपौ राहुकेतु अपि ग्रहसंख्यायां समावेशितौ । ग्रहाः स्वगत्या पूर्वदिशि चलन्ति, नक्षत्राणि च प्रवहवायुवशात् पश्चिमदिशि गच्छन्तः अनुभूयन्ते न तत्र तेषां प्रत्यक्षमतित्वं अत एव निर्दिष्टम्-

पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः ।

जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः ॥

प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः।
परिणाहवशाद् भिन्ना तद्वशाद् भानि भुञ्जते॥

साम्प्रतं तु भ्रमणशीलार्थकस्य प्लानेट् इत्यस्यार्थ ग्रहशब्दव्यवहारः प्रवर्तते। अतः बिन्दुरूपौ राहुकेतू तत्र ग्रहत्वेन न स्वीक्रियेते। तारकाः नभसि जटिता इव प्रतीयन्ते। ताः स्वस्थानाच्चलन्तो न प्रतीयन्ते परन्तु ग्रहाः नैकत्र तिष्ठन्ति। सामान्यतो भ्रमता येषां सप्तपिण्डेषु सूर्य चन्द्र-भौम-बुध-गुरु-शुक्र-शनिषु, मङ्गलबृहस्पत्योर्मध्ये लघव महान्तश्च सहस्रसंख्याकाः पिण्डाः सन्ति । तेषां दूरवीक्षणद्वारा दर्शनेनेदम् अनुमीयते यत् कश्चन् महान् ग्रहः केनापि प्रकारेण खण्डाः सम्मिलिताः न जाताः।

ग्रहाणां गतिविधौ सूक्ष्मनिरीक्षणेनेवेदं स्पष्टं प्रतिभाति यत् ग्रहाः अनियन्त्रिताः न सन्ति , अपितु निश्चितमत्या परिभ्रमन्ति । अद्य ग्रहाः यत्र स्थिताः सन्ति कियता कालेन पुनरपि तत्रैव प्राप्नुवन्ति। राहुकेत्वोरपि सुनिश्चितगतिक्रमः विद्यते अतः तयोः स्थितिं प्रभावञ्च दैवज्ञाः निश्चिन्वन्तः येन मार्गेण पृथिवी सूर्यं परिक्रामति अथवा सूर्यः पृथ्वीम्परिक्रमति तत् क्रान्तिवृतं चन्द्रः यत्र भ्रमति ततद्विमण्डलम् एवं "विमण्डले भवृत्तस्य सम्पातः पात उच्यते।" तत्र वृत्तद्वयस्य सम्पात् अपि स्थानद्वये भवति तयोः प्रथमः राहुः द्वितीयश्च केतु तयोः अपि गतिः।

पराशरेण प्रतिपादितमस्ति यद्रामकृष्णादयोऽवताराः अपि ग्रहेभ्य एव सञ्जाताः पुनस्तत्रैव विलीनताम् अभ्युपगताः। उक्तमपि-

अवताराण्यनेकानि ह्यजस्य परमात्मनः। जीवानां कर्मफलदो ग्रहरूपी जनार्दनः॥
दैत्यानां बलनाशाय देवानां बलवृद्धये। धर्मसंस्थापनार्थाय ग्रहाज्जाता शुभा क्रमात्॥
रामोऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः। नृसिंहो भूमिपुत्रस्य बुधः सोमसुतस्य च॥
वामनो विबुधेज्यस्य भार्गवो भार्गवस्य च। कूर्मो भास्करपुत्रस्य सैंहिकेयस्य सूकरः॥
केतोर्मीनावतारश्च ये चान्ये तेऽपि खेटजाः। परमात्मांशोऽधिको येषु ते सर्वे खेचराभिधाः॥
जीवांशो ह्यधिको येषु जीवास्ते वै प्रकीर्तिताः। सूर्यादिभ्यो ग्रहेभ्यश्च परमात्मांशनिः सृताः॥
रामकृष्णादयः सर्वे ह्यवतारा भवन्ति वै। तत्रैव ते विलीयन्ते पुनः कार्योत्तरे सदा॥

एवम्भूताः ये ग्रहाः सन्ति येभ्यः विशिष्टशक्तिसम्पन्नाः भारतीयधर्मप्राणजनतायाः प्राणभूताः अवताराः पृथ्व्यामवतरन्ति तेषां महत्वं न केवलं ज्यौतिषशास्त्रेऽपितु सर्वत्र वर्तते । यद्यपि आधुनिकवैज्ञानिकतत्त्वैः प्रभाविताः जनाः केवलं भौतिकमहत्त्वं स्वीकुर्वन्ति तथा च पृथिव्यां ग्रहाणां केवलं भौतिकं प्रभावमेवान्वेषयन्ति परन्तु यदि वयम् आध्यात्मिकप्रभावं स्वीकुर्मः तथा च पृथिव्यां सर्वत्र प्राणिषु वा चेतनतत्त्वयो यदि प्रथमतया ग्रहप्रभावं पश्यामस्तर्हि सर्वत्र ग्रहप्रभावः ज्यौतिषशास्त्रे


ISSN: 2320-740X

विवेचितोऽस्ति । अनुभवेनापि दृष्टिपथमायाति एतद्दृष्ट्या एव ग्रहस्वरूपम् अपि विवेचितमस्ति । तत्स्वरूपं वस्तुतः भारतीयज्योतिषशास्त्रस्य परमोत्कर्षत्वं प्रकटीकरोति , आवश्यकता वर्तते तत्रानुसन्धानस्य । यथा –

कालात्मा दिनकृन्मनश्चहिमगुः सत्वं कुजो ज्ञो वचो ।
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ॥

अत्राध्ययनेनेदं स्पष्टं भवति यत् पृथिव्यां समस्तप्राणिनाम् आत्मा सूर्यः, चन्द्रमा मनः, सत्वं कुजः, वाणी बुधः, ज्ञानं सुखञ्च गुरुः, वीर्यः शुक्रः, दुःखं च शनिः वर्तते । एतत्सर्वं यदि वयं पश्यामस्तर्हि एष ग्रहाणामाध्यात्मिक प्रभाव एव । वराहेण ग्रहाणां प्रभावविषये स्पष्टमुक्तं यत् "एते ग्रहाः बलिष्ठाः नृणां स्वमूर्ति-समत्वमुत्पादयन्ति" । एवमेव फलितशास्त्रे-

रविचन्द्रौ तु राजानौ नेता ज्ञेयो धरात्मजः ।
बुधो राजकुमारश्च सचिवौ गुरुभार्गवौ ॥
प्रेष्यको रविपुत्रश्च सेना स्वर्भानुपुच्छकौ ।
रक्तश्यामो दिवाधीशो गौरगात्रो निशाकरः॥
नात्युच्चाङ्गोकुजो रक्तो दूर्वाश्यामः बुधस्तथा ॥
गौरगात्रो गुरुर्ज्ञेयः शुक्रः श्यामस्तथैव च ।
कृष्णदेवो रवेः पुत्रो जायते द्विजसत्तम् ॥

अत्रास्माभिः दृश्यते यत् प्राणिषु राजासचिवराजकुमार प्रेष्यत्वादि भावोत्पादकाः बुद्धिप्रदायकाः ग्रहा एव, प्राणिषु वर्णप्रदातारोऽपि । एते ग्रहा एव मूलभूताः तथा च भौतिकदृष्ट्या मानवशरीरे समस्तभूमण्डले च पञ्चमहाभूतानि पृथक्-पृथक् ग्रहप्रभावितानि भवन्ति इति नास्ति अत्र सन्देहः फलितशास्त्रेषु अपि च वैज्ञानिकेष्वपि –

अग्निभूमि नभस्तोय वायवः क्रमशो द्विज ।
भौमादीनां ग्रहाणां च तत्वानीति यथाक्रमं ॥

अत्रास्ति भौतिकदृष्ट्या पृथिव्यां ग्रहाणां प्रभावोत्पादकत्वे वैशिष्ट्यं, यतो हि इमानि पञ्चमहाभूतानि यद्यपि सर्वत्र ब्रह्माण्डे ग्रहपिण्डेषु वा व्याप्तानि सन्ति तथापि पृथक्-पृथक् तत्त्वेषु ग्रहाणां विशेषप्रभाववर्णनप्रसङ्गे एव ज्यौतिषशास्त्राचार्यैः एतत् ग्रहाणां पञ्चमहाभूतत्वं प्रोक्तं यद् भौम-बुध-गुरु-शुक्र-शनयः क्रमेणाग्निभूम्याकाशजलवायुतत्त्वेषु विशेषप्रभावमुत्पादयन्ति । सूर्यचन्द्रमसोः पृथिव्यां स्पष्टप्रत्यक्षप्रभावं वयं समुद्रे जलप्लवप्रसङ्गे पश्यामः, तर्कवादिनोऽपि तं प्रभावं स्वीकुर्वन्ति सर्वे जनाः प्रत्यक्षं पश्यन्ति च । एतत् सर्वं आकल्प्यैव फलितशास्त्रे ग्रहाणां

विशिष्टफलं प्राणिनामुपरि, संहिताशास्त्रे च समस्तभूमण्डलोपरि निर्धारितम् । सर्वत्र विकीर्णं यदस्ति वनस्पति जगत् तस्योत्पत्तावपि ग्रहाः एव कारणभूताः इति ज्ञात्वा एव उक्तं-

सूर्योजनयति स्थूलान् दुर्भगान् सूर्यपुत्रकः ।
क्षीरोपेतास्तथा चन्द्र कटुकाद्यान् धरासुतः ॥
पुष्पवृक्षम् भृगोःपुत्रो गुरुज्ञौ सफला फलौ ।
नीरसान् सूर्यपुत्रश्च एव ज्ञेयाः खगा द्विज ॥

इत्थं चेतनाचेतनतत्त्वेषु सर्वत्र ग्रहप्रभावं धरायां ब्रह्माण्डे, प्राणिषु च सूक्ष्मतया सम्यक् परीक्ष्य ज्यौतिषशास्त्रप्रवर्तकैः ग्रहाणां स्वरुपादयो निर्धारिताः ।

***********

## बुद्धोपदेशवेदान्तोपदेशयोः समन्वयात्मको निबन्धः

✍ **श्रीनिरञ्जनभट्टः**

**शोधच्छात्रः**

समेषामपि शास्त्रविदां सुविदितमेवैतत् दर्शनप्रपञ्चस्यास्तिकनास्तिकभेदेन द्विधा विभज्य बौद्ध -दर्शनम् । नास्तिके वेदान्तदर्शनमास्तिके संयोजितमिति । किञ्चान्यदपि प्रायः ज्ञातमेव यत् बौद्धवेदान्तसिद्धान्तयोः क्वचित् साम्यमपि दृश्यते इति । दर्शनशास्त्रं तु दुःखरुपसंसारसागरे निमग्नानां जीवानां तत्त्वदर्शनमुखेन उद्दिधीर्षयैव प्रवृत्तमिति न पृथग् वक्तव्यमस्ति । वेदान्ते तु वेदस्यैव परम-प्रामाण्यमङ्गीकृत्य उपनिषत्प्रतिपादिताद्वितीयसच्चिदानन्दस्वरूप-परमात्मज्ञानप्राप्तिद्वारा मिथ्याभूत-प्रपञ्चस्य निवृत्तिपूर्वकनिरतिशयब्रह्मभावापत्तिः विचार्यते । किन्तु बौद्धदर्शने तावत् प्रपञ्चस्य नित्यत्वाभावाङ्गीकारेऽपि माध्यमिकवैभाषिकादिमतचतुष्टयवशात् शून्यक्षणिकविज्ञानादिविचाराः विचार्यन्ते । अत्र बौद्धानामभिप्रायं विहाय केवलं मूलपुरुषस्य भगवतो बुद्धस्य उपदेशवचनानि यदि पश्यामः तदा तानि वेदान्तवक्यान्येव अनुवदन्तीव भान्ति । बुद्धस्य उपदेशानां सङ्ग्रहः “त्रिपिटकम्” इति नाम्ना प्रसिद्धः इति तु जानन्त्येव । पालीलिप्यां निबद्धेऽस्मिन् ग्रन्थे “सुत्तपिटकम्” “विनयपिटकम्” “अभिधम्मपिटकम्” इति विभागत्रयं विद्यते । प्रथमे सुत्तपिटके (सूत्रपिटकम्) “खुद्दनिकाय”(क्षुद्रनिकाय) इत्यस्मिन् विभागे कश्चन ग्रन्थभागः भवति “धम्मपदम्” इति । षड्विंशत्यध्यायात्मकोऽयं “बुद्धगीता” इति नामधेयमोढुं योग्यः इति श्रीमन्तः “अश्वत्थनारायणशास्त्रिणः” स्वीये अनुवादग्रन्थे प्रतिपादयन्ति । बौद्धा अपि अमुं ग्रन्थमत्यन्तमादरेण


ISSN: 2320-740X

सम्मानयन्ति। अस्मिन् ग्रन्थे उपदिष्टाः विषयाः उपनिषत्प्रतिपाद्या एव इति यः कोऽपि अध्येता अवश्यं वदत्येव। तस्मादत्रैव ग्रन्थभागे बुद्धोपदेशानां वेदान्तोपदेशानां च समन्वयं प्रदर्शयितुं कश्चन प्रयासः क्रियते।

भगवान् बुद्धः रागद्वेषौ एव दुःखस्य मूलमिति उपदिशन् ताभ्यां निवृत्तिरेव निर्वाणस्य द्वारमिति प्रतिपादयति। "धम्म"पदस्य प्रथमेऽध्याये "यमकवर्गे" अशुद्धमनस एव दुःखकारणत्वं प्रतिपादयन् रागद्वेषरहितस्य मनसः निगृहीतमनसो वा दुःखनिवारकत्वं ज्ञापयति। तद्यथा –

मनो पुब्बंगमा धम्मा मनोसेट्ठा मनोमया
मनसा चे पसन्नेन भासति वा करोति वा;
ततो नङ् सुखं अन्वेति छाया व अनपायिनी॥ इति।

अप्पं पि चे साहितेङ् भासमानो धम्मस्स होति अनुधम्मच्चारी।
रागं च दोसं च पहाय मोहङ् सम्मप्पजानो सुविमुत्तचित्तो।
अनुपादियानो इध वा हुरङ् वा सा भागवा सामञ्ञस्स होति॥ इति च।

अयमेव वेदान्ते -

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः"

"काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विध्येनमिह वैरिणम्॥" "शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्। कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥" "यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः। विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥" इत्यादिना रागद्वेषादीनां वियोगेनैव निगृहीतमनसो वा दुःखस्य बन्धस्य निवारकत्वं प्रतिपादितम्।

एवमेव बुद्धोऽपि निर्वाणं प्राप्तुं वैराग्यस्य अभ्यासः अनिवार्यतया कर्तव्य एव इति बहुत्र उपदिशति। तदर्थं तेन पापवर्गः, जरावर्गः, दण्डवर्गः इत्येवं बहुषु अध्यायेषु वैराग्योद्दीपनायैव सरलसुन्दरशैल्या उपदेशः रमणीयदृष्टान्तोदाहरणमुखेन कृतः।

वेदान्ते तु वैराग्यस्य महत्त्वं न पुनर्विशदीकर्तव्यमस्ति। साधनचतुष्टये तावत् वैराग्यं द्वितीयमेव सोपानं भवति।

श्रद्धा, शीलं, वीर्यं, समाधिः, धर्मविनिश्चयः एतैर्युक्तः विद्याचारौ च सम्प्राप्य स्मृतिं लब्ध्वा संसारान्मुच्यते इति बुद्धोपदेशः। तथैव श्रद्धायमनियमब्रह्मचर्यसमाधिज्ञानानि मोक्षस्य सोपानानि इति तूपनिषदामुपदेशः संस्मरणीय एव।

क्रोधाभिमानौ निर्जित्य नामरूपादिषु अनासक्तस्य दुःखं न किञ्चिदपि भवति। तथैव पापपुण्ये विहाय ब्रह्मचारी ज्ञानवान् योऽस्मिन् लोके प्रव्रजति स एव भिक्खु (भिक्षुः) इति कथ्यते इति

भगवतो बुद्धस्य वचनम्। तद्यथा –

योध पुण्णं च पापं च बहेत्वा ब्रह्मचरिय वा।
संखाय लोके चरति स वे भिक्खू ति वुच्चति॥ इति।

कामक्रोधादिषड्शत्रुजयेनैव चित्तशुद्धिः भवति। चित्तशुद्धौ सत्यां आत्मज्ञानप्रकाशद्वारा सर्वकर्मणां नाशः इति उपनिषदुद्घोषः। तदित्थम् –

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे"॥

"तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति"॥ इति।

महाभारते उपदिष्टान्येव नीतिबोधकानि तत्त्वबोधकानि च वाक्यानि "धम्मपदे" बहुत्र अनूदितानीव दृश्यन्ते। यथा –

अत्ता हि अत्तनो नाथो अत्ता हि अत्तनो गति।
तस्मा सञ्ञमयत्तानं अश्वं भद्रंऽव वाणिजो॥ इति।

तदेव गीतायाम् –

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ इति।

एवमेव वनपर्वणि अष्टाङ्गमार्गेण संसारजयः प्राप्तुं शक्यते इत्युक्तम् –

अष्टाङ्गेनैव मार्गेण विशुद्धात्मा समाचरेत्।
सम्यक्सङ्कल्पसंबन्धात् सम्यक्चेन्द्रियनिग्रहात्॥ इत्यारभ्य
एवं कर्माणि कुर्वन्ति संसारविजिगीषवः॥ इत्यन्तम्।

तदेव बुद्धोपदेशे अनूद्यते यथा –

दुक्खं दुक्खसमुप्पादं दुक्खस्स च अतिक्कमम्।
अरियञ्चऽट्ठाङ्गिकं मग्गं दुक्खोपसमगामिनम्॥ इति।

सम्यग्दृष्टिः, सम्यक्सङ्कल्पः, सम्यग्वाचा, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः सम्यक्स्मृतिः, सम्यक्समाधिः इति बौद्धाः अष्टाङ्गिकमार्गेण दुःखनिवृत्तिः भवति। तेन परमानन्दमयनिर्वाणः सिद्ध्यति इति वदन्ति। अयं च किञ्चित् व्यात्यासेन महाभारतोक्ताष्टाङ्गिकमार्गमेव अनुवदतीव भाति।

एवं बहुधा साम्यमनयोः दर्शयितुं शक्यते चेदपि अत्र विस्तरभयात् किञ्चिदेव प्रदर्शनार्थं प्रयत्नः कृतः। बौद्धानां वेदान्तिनां सिद्धान्तभेदः विद्यते चेदपि बुद्धस्तु वेदान्ततत्त्वमेव तत्कालीनव्यावहारिकभाषायां तन्नाम पालीभाषया सामान्यजनानां सुलभेनावगमनायोपदिदेशेति


ISSN: 2320-740X

केषाञ्चन अभिप्रायः तत्र तत्र श्रूयते । विषयेऽस्मिन्नितोऽप्यधिकाध्ययनस्यापेक्षा यद्यप्यस्ति तथापि धम्मपदग्रन्थाध्ययनेन ज्ञातं किञ्चिदत्र प्रस्तूयते । बुद्धस्योपदेशेन सः प्राधान्येन पुरुषप्रयत्नमेव अङ्गीकरोतीत्यभिप्रेतुं शक्यते । यदि तस्योपदेशाः वेदान्तप्रतिपाद्या एवेति अभिप्रेयन्ते तर्हि दुःखनिवृत्त्यर्थमनुष्ठानमपेक्षते न तु वादादिकमिति तस्याभिप्रायः स्पष्टः । किन्तु तस्य निर्वाणानन्तरं वादस्यैव प्रामुख्यमभवदिति ज्ञातुं शक्यते ।

निर्वाणप्राप्तये "विपश्श्यना" इति साधनाविधानं सः पुनः शोधितवानिति बौद्धग्रन्थेषु दृश्यते । तच्च काश्मीरदेशे प्रसिद्धस्य शैवसिद्धान्तस्य अनेकविधध्यानप्रकारेषु अन्यतमम् । स एव ध्यानप्रकारः पुनः प्रसिद्धिमाप्नोदिति काश्मीरशैव-बौद्धग्रन्थादिभ्यः अवगन्तुं शक्यते । तथैव "अत्ता धम्मो, अत्ता शरणम्" (आत्मा धर्मः, आत्मा शरणम्) इति बुद्धवाक्यात् "यमेवैष वृणुते तेन लभ्यः, तस्यैष आत्मा वृणुते तनूं स्वाम्" इति उपनिषद्वाक्यमेव विभाति इति मे मतिः । संस्काराः मनसि रागद्वेषादीनामुत्पत्तौ कारणानि भवन्ति । रागादिविकाराणामुत्पत्तिसन्दर्भे देहे संवेदनान्युत्पद्यन्ते । तेषां संवेदनानां साक्षीभावेन दर्शनमुखेन सर्वसंस्कारनिवृत्तिं प्राप्य शुद्धमनस्को दुःखैर्निर्मुक्तो भूत्वा निर्वाणसुखमनुभवति इति भगवतो बुद्धस्योपदेशः । इदमेव "विपश्श्यनाध्यानम्" इत्युच्यते । अयं विचारमार्गः (ज्ञानमार्गः) इत्यपि कथ्यते । पुराणेतिहासादिषु भगवतो नारायणस्यावतारत्वेन प्रस्तुतः बुद्धः वेदान्तमार्गमेव उपपादितवान्, किन्तु अग्रे अपार्थत्वेन गृहीतं स्यादिति केषाञ्चन अभिप्रायः । अत्र मन्मतिगृहीतो विषयः कश्चन अभिप्रायरूपेण निबद्धः, न तु सिद्धान्तरूपेण । यदि अनुष्ठानात्मकदृष्ट्या पश्यामश्चेत् बुद्धोपदिष्टमार्गस्य गम्यस्थानं वेदान्तानुमतमेव सर्वसंसारदोषशून्य-निरतिशयानन्दस्वरूपब्रह्म इत्यवगन्तुं शक्यते ।

**********

## मीमांसावगमने ज्यौतिषम्

✍ **श्रीनागपतिः हेगडे**

शोधच्छात्रः

**"जन्तूनां नरजन्मदुर्लभम्"** इति प्राज्ञोक्तिः । आहारनिद्रादिषु पशुवत् मानवस्य साम्यत्वेऽपि पूर्वोक्तप्राज्ञोक्तेः किं वा औचित्यमिति विचारे सति धर्म एव मनुष्याणां वैशिष्ट्यम् । धर्मेण हीनाः मानवाः पशुभिस्तुल्याः । तदेवोक्तं-

**"आहारनिद्राभयमैथुनञ्च समानमेतत् पशुभिर्नराणाम् ।**

**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिस्समानाः" ॥**

इति । तर्हि कोऽयं धर्मः? वेदेनप्रयोजनमुद्दिश्य विधीयमानोऽर्थः धर्म इत्याहुः मीमांसकाः । अतः धर्मज्ञानाय वेदावगम अपेक्षितः । तादृशस्य वेदस्य याथार्थ्यज्ञानार्थं वेदाङ्गानि शास्त्राणि दर्शनानि चानिवार्यतया ज्ञातव्यानि । तत्रैकस्य वेदाङ्गस्य शास्त्रस्य वा ज्ञानं न केवलं तच्छास्त्रावगमात् किन्तु शास्त्रान्तराणामपि ज्ञानमनिवार्यम् । सर्वमिदं हृदये निदधानो "मीमांसावगमने ज्यौतिषम्" इतीदं विषयमधिकृत्य मामकीनं विषयं प्रस्तौमि ।

वेदैः प्राधान्येन यज्ञाः विहिताः । यज्ञविचारः मीमांसायां विचारितः । किन्तु तस्य कालस्तु ज्यौतिषादेव ज्ञायते । अतः मीमांसायां ज्यौतिषस्य प्रसक्तिरस्त्येव ।

**"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"** ।

इति वाक्यविहितदर्शपूर्णमासेष्टौ षट्प्रधानयागाः । तत्र दर्शे त्रयः प्रमुखाः । आग्नेययागः, ऐन्द्रदधियागः, ऐन्द्रपयोयागश्च । पौर्णमास्यायाञ्च त्रयः प्रधानाः । आग्नेययागः, उपांशुयागः, आग्नीषोमीयपुरोडाशश्च । तत्राग्नेययागविधायकं वाक्यं-

**"यदाग्नेयोष्टाकपालोऽमावास्यायां पूर्णमास्यां चाच्युतो भवति"**

इति । एतद्वाक्यानुसारेणाग्नेययागः दर्शे पूर्णमास्याञ्च विहितः । **"दर्शः सूर्येन्दुसङ्गम"** इति वयं जानीमः । सूर्येन्दुसङ्गमः कदा भवति ? कथं भवति ? इति जिज्ञासा सहजा एव । यतो हि एकस्मिन् स्थाने तौ द्वौ ग्रहौ कथं वा भवत इति संशये उच्यते । सूर्य ऊर्ध्वकक्षायां सञ्चरति चन्द्रस्तु अधःकक्षायाम् । एवं सूर्यचन्द्रयो ऊर्ध्वाधरान्तरं भवति तथा दक्षिणोत्तरान्तरमपि भवितुमर्हति । किन्तु यदा तयोः पूर्वापरान्तराभावः भवति तदा तौ द्वौ ग्रहौ राश्यंशकलामानेन लुल्यौ भवतः । तदा तौ भूमिस्थदृष्टृभिः एकस्थानगतौ दृश्येते इति दर्शसंज्ञा । तदामातिथ्यन्तः कालो वेद्यः । तिथिर्नाम सूर्यचन्द्रयोरन्तरम् । अर्थात् सूर्यचन्द्रयोः द्वादशांशान्तरे एका तिथिः । अतः तयोरन्तरं शून्यतः द्वादशांशं यावत् प्रतिपत् । ततः चतुर्विंशांशपर्यन्तं द्वितीया । ततः षड्त्रिंशं अंशान् यावत् तृतीया | एवमेवाष्टषष्ट्यधिकशतांशत अशीत्यधिकशतांशं यावत् पूर्णिमा । तथाष्टचत्वारिंशदधिकत्रिशतांशतः षष्ट्यधिकत्रिशतांशपर्यन्तं दर्शः । एतत्तिथिभिरेव चान्द्रमानगणना प्रचलतीत्यन्यो विषयः ।

मीमांसायां दिनविशेषात् यागविभागः कृतः । तद्यथा एकदिनसाध्यः कर्मविशेष "एकाहः" । द्विरात्रादारभ्य एकादशरात्रान्त "अहीनः" । त्रयोदशरात्र्यादिषु सत्रमिति व्यवहारः । अत्र दिनगणना कथमिति विचारे सति सवनसम्बध्दं सावनमिति व्युत्पत्या सावनमानादेव । सावनमानगणना इत्थं प्रतिपादिता सूर्यसिध्दान्ते-

**"उदयादुदयं भानोर्भूमिसावनवासरः"** इति ।


ISSN: 2320-740X

**"इनोदयद्वयान्तरं तदर्कसावनं दिनं तदेव मेदिनीदिनम्" ।**

इति तु भास्करोक्तिः । अर्थात् सूर्योदयादन्यसूर्योदयं यावत् सावनं दिनमिति ।

मीमांसायां पशुपुरोडाशप्रकरणे सवनत्रयं प्रतिपादितम् । प्रातःसवनम् । माध्यन्दिनसवनम् । तृतीयसवनञ्चेति । अत्र प्रातःसवनम् प्रातःकाले माध्यन्दिनसवनं मध्यान्हे च कर्तव्यम् । दिनमानं पञ्चधा विभज्य तत्र क्रमेण प्रातः सङ्गवः मध्यान्हः अपरान्हः सायान्हः इति कालसंज्ञा दत्ता । अत्र समयनिर्धारणं तु ज्यौतिष्यादेव ।

अग्निहोत्रादि यागानुष्टानार्थं गृहस्थैः अग्न्याधानं कर्तव्यम् । अग्न्याधानकालश्च विहितः यथा- **"वसन्ते ब्राह्मणो अग्नीनादधीत । ग्रीष्मे राजन्यः । शरदि वैश्यः ।"**

इत्यादिना । ते च वसन्तादय ऋतवः ज्योतिषेणैव वेद्याः । तद्यथा-

**"द्विराशिनाथा ऋतवः तथापि शिशिरादयः"**

इति सूर्यसिद्धान्ते । तत्र सूर्यस्य मकरकुम्भयोस्थितौ शिशिरऋतुः । मीनमेषयोर्वसन्तः । वृषभमिथुनयोर्ग्रीष्मः । इत्यादि प्रकारेण ऋतवो वेद्याः | यद्यपि जिज्ञासितोयं विषयः यत्-

**"मधुश्च माधवश्च वासन्तिका ऋतू......"**

इत्यादिभिः श्रुतिवाक्यैः चैत्रादिभ्यां द्वाभ्यां द्वाभ्यां चान्द्रमासाभ्यां वसन्तादय ऋतवः निर्दिष्टाः ।

**"द्वौ द्वौ मार्गादिमासौ स्यात् ऋतुः"**

इत्यमरसिंहोऽपि पूर्वोक्तमेव उद्घुघोष । किन्त्वार्षे सूर्यसिद्धान्ते सौरमासाधारेण ऋतवः प्रोक्ताः । कतरोऽत्र स्वीकार्य इत्यत्र विद्वांसः प्रमाणमिति ।

एवञ्च ज्ञायते यत् शास्त्रस्यैकस्य ज्ञानार्थं शास्त्रान्तरस्यापि ज्ञानमनिवार्यमिति । अतः सर्वेषां शास्त्राणां ज्ञानसम्पादनपूर्वकं वेदोक्तज्ञानमार्गे गत्वा मानवजीवनस्य साफल्यमनुभवामः ।

***********

## अमेरिकायाः भगिन्यः भ्रातरश्च

✍ **श्री उमामहेश्वरः एन्.**

शोधच्छात्रः

११-०९-१८९३ तमे दिनाङ्के शिकोगास्थे Art of Gallery इत्यत्र जाते विश्वधर्मसम्मेलने विवेकानन्देन कृतस्य भाषणस्य संस्कृतानुवादः ।

भवद्भिः अस्मभ्यं प्रीतिपुरस्सरं कल्पितं स्वागतं प्रति उत्तरं प्राप्तव्यमिति इष्टवतो मम हृदयम्

ISSN: 2320-740X

अवर्णनीयेन आनन्देन नितान्तं सन्तुष्यति। समग्रेऽस्मिन् जगति अत्यन्तं प्राचीनतमस्य सन्यासिनां समूहस्य पक्षतया अहं भवद्भ्यः कार्तज्ञ्यमर्पयामि। नानासम्प्रदायजनजातिमतबद्धानां कोट्यधिकभारतीयानां पक्षतयापि अहं भवद्भ्यः कार्तज्ञमर्पयामि।

अनया वेदिकया प्रतिनिधिभूतान् पौरस्त्यदेशीयान् उद्दिश्य, दविष्ठेभ्यः देशेभ्यः आगता इमे महनीयाः सहानुभूतेः भावनाः स्वदेशान् प्रति नयनेन गौरवम् आवहन्तीति परिचितवद्भ्योऽपि मम कार्तज्ञम्। निखिलेऽस्मिन् जगति धार्मिकसहानुभूतिं सार्वत्रिकाङ्गीकारतत्त्वं प्रबोधितवतः धर्मस्य प्रतिनिधिरहम् इति आत्मानमभिमन्ये।

न हि वयं केवलं विश्वसहानुभूतिम् अङ्गीकुर्महे तया सह सर्वधर्माः। सत्यस्य प्रतीकभूता इति भृशं विश्वसिमः। सकलजातिपरम्परासु धार्मिकपरम्परासु ये कष्टकोटिमनुभवन्तः निराश्रिताः सञ्जाताः तेषामाश्रयदातुः देशस्य प्रतिनिधिरिति पुनरभिमन्ये। यस्मिन् वर्षे रोमन् चक्राधिपत्यस्य दौर्जन्येन यहूद्यानां पवित्रदेवालयः मशकनाशं नष्टः तस्मिन्नेव वर्षे भारतस्य दक्षिणदिशि ते आश्रयमवापुः। तान् अपि वयमस्मद्दृष्ट्या अनन्यान् अकुर्वाम इति ख्यापयितुमपि पुनस्तोषः। पुरा प्रख्यातिं गतस्य जरातुष्टजनाङ्गस्यापि संस्थितये पारसिमतस्य आश्रयः आसीदेव। सम्प्रत्यपि तस्य पोषणे निरतस्य धर्मस्य अङ्गभूतः इति जेगदितुं पुनः हृष्यामि। अयि सोदराः बाल्यादारभ्य अस्माभिः पठ्यमानः श्लोकः उदाह्रियते।

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥

विभिन्नेषु स्थानेषु जनिं प्राप्य यथा नद्यः सर्वाः सागरं प्राप्नुवन्ति तथा हे भगवन् मानवैः स्वेषां संस्कारानुसारमाश्रीयमाणा मार्गाः साक्षाद् वा परम्परया वा त्वाम् अधिगच्छन्ति।

जगतः ऐतिह्ये श्रेष्ठासु सभासु इयमप्यन्यतमा। गीतायामुक्तरीत्या –

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥

"ये केऽपि वा स्युः, यङ्कञ्चिदाकारं वा पूजयित्वा मां प्राप्नुवन्ति चेद् अहं तान् तथैव अनुगृह्णामि। अन्ततो गत्वा नैकेभ्यः मार्गेभ्यः समेऽपि मामेव प्राप्तुं यतमाना भवन्" इति सन्देशस्य प्रसारणाय इयमेका सभा पर्याप्यते। स्वमताभिमानः अन्यमतद्वेषः इत्येताभ्याम् उत्पद्यमानौ घोरधर्मः दुरभिमानः च एतत् सुन्दरं जगत् आबहोः कालत अवाप्नुतः। एतौ समग्रं जगत् हिंसया आवृतवन्तौ।


ISSN: 2320-740X

बहुधा जगदिदं नररक्तेन विप्लावितवन्तौ । संस्कृतीः नाशितवन्तौ । बहून् देशान् निराशाकूपं पातितवन्तौ । यदि एतादृशौ उग्रदैत्यौ नाभविष्यतां तर्हि मानवपरम्परा इतोऽपि पुरोगतिं प्राप्तुमशक्ष्यत् । परन्तु तयोरन्त्यकालः सन्निहितः । एतस्य समारम्भस्य आदौ कृतः मङ्गलनादः खड्गद्वारा वा लेखनीद्वारा वा मतान्धबुद्ध्या वा अन्यमतहिंसया वा किञ्च एकमेव लक्ष्यमादृत्य प्रवर्तमानेषु मार्गेषु जातानां मनस्तापानां वा अन्त्यक्रियासूचकध्वनिः भूयादिति मे सदाशयः ।

***********

## ग्रहस्फुटीकरणविधिः

✍गणेशकृष्णभट्टः

शोधच्छात्रः

इदं तावत् विदितमेव विदुषां यत् ज्योतिःशास्त्रे सिद्धान्तस्कन्धः कालपरिभाषाग्रहस्फुटीकरण ग्रहणगणितादीन् विधीन् अभिदधातीति । तत्र च ग्रहणग्रहयुतिपातशृङ्गोन्नत्यादीनाम् उपजीव्यमिति हेतोः ग्रहस्फुटीकरणमादौ जगृहे । अथ च शास्त्रेऽस्मिन् युगाद्यहर्गणं ग्रहभगणांश्चाधृत्य त्रैराशिकविधिना आदौ मध्यमग्रहं संसाध्य ततः संस्कारविशेषैः तत् स्फुटीकरणमिति सोपानद्वयं परिकल्पितम् । अथ सिद्धान्तग्रन्थेषु सर्वत्रापि आदौ मध्यमाधिकारः, ततः स्पष्टाधिकारः इति क्रम उपात्तः ।

अत्रादौ प्रसृजति स्फुटीकरण शब्दार्थजिज्ञासा । सा च समाहिता भास्करेण यथा – “स्फुटक्रिया दृग्गणितैक्यकृद्या” इति । या दृग्गणितैक्यकृत् सा स्फुटक्रिया इत्यन्वयः । दृक्शब्दस्य दृगुपलब्धः ग्रह इति गणितशब्दस्य गणितागतग्रह इति च अर्थः । तथा च या क्रिया दृगुपलब्ध गणितागतयोः ग्रहयोः साम्यं सम्पादयति सा स्फुटक्रिया इत्यर्थः ।

अथ मध्यमग्रह एव स्फुटः कुतो न भवतीत्यस्ति जिज्ञासाप्रसक्तिः । सा च समाहिता सूर्यसिद्धान्ते यथा – शीघ्रमन्दोच्चपातख्या अदृश्यरूपाः कालस्य मूर्तयः ग्रहाणां गतिविपरिणामे हेतवो भवन्ति । तद्वातरश्मिभिः बद्धाः ग्रहाः प्राक् पश्चाच्चापकृष्यन्ते इति ।

तत्र च मध्यमानां ग्रहाणां स्फुटीकरणार्थं संस्कारविशेषः कथ्यते यथा -

**मान्दं कर्मैकमर्केन्द्वोर्भौमादीनामथोच्यते ।**

**शैघ्र्यं मान्दं पुनर्मान्दं शैघ्र्यं चत्वार्यनुक्रमात् ॥** इति ।

तथा च रविचन्द्रौ मन्दफलसंस्कारमात्रेण स्फुटौ भवतः । कुजादयस्तु मन्दशीघ्रफलयोर्भुजयोः संस्कारेण स्फुटतामुपयाति इति भावः।

ननु देशान्तरभुजान्तराख्यावन्यावपि संस्कारौ ग्रहाणां गदितौ तस्मात् पूर्वोक्तमयुक्तमिति न वाच्यम्। यतो हि लङ्कायां रव्युदये प्राप्तानां ग्रहाणां स्वदेशीयरव्युदये प्रापणार्थं देशान्तरसंस्कारः। अथ च मध्यमरव्युदयकाले प्राप्तानां मध्यमग्रहाणां स्फुटार्कोदयकालिकीकरणार्थं भुजान्तरसंस्कारः। एवं मध्यमग्रहाणामेव स्वेदेशे स्पष्टार्कोदयकाले सम्पादनार्थमेतौ संस्कारौ। अथ च देशान्तरसंस्कारो द्विविध इति, भास्करेण उदयान्तराख्यः संस्कारविशेषः अत्रैव प्रकल्पित इति विशेषाववधेयौ।

अत्र कुजादीनां फलसंस्कारेऽप्यस्ति विशेषः। तद्यथा –

**मध्ये शीघ्रफलस्यार्थं मान्दमर्धफलं तथा।**

**मध्यग्रहे मन्दफलं सकलं शैध्र्यमेव च॥** इति।

अथ नव्यानां विधिं पश्यामः। ते तु ग्रहकक्षावृत्तानां सूर्यकेन्द्रकत्वं दीर्घवृत्ताकारत्वं चेत्यादीनि नूतनतयोपज्ञातानि तथ्यानि अङ्गीकृत्य ग्रहस्फुटीकरणे अन्यानपि कांश्चन संस्कारानचीक्लृपन्। विशेषतः केतकीकारेण चन्द्रस्फुटीकरणे कर्षः, च्युतिः, तिथिश्चेति नूतनाः संस्काराः अभ्युपगताः। अमीभिः संस्कारैः संस्कृतश्चन्द्रः स्वविक्षेपवृत्ते उपलभ्यते। ततस्तस्य राहुसंस्कारेण क्रान्तिवृत्तीयतासम्पादनमिति विशेषः।

अत्र कैश्चिदाशङ्क्यते यदार्षग्रन्थेषु अविद्यमानौ च्युतितिथिसंस्कारौ नव्यैर्गृहीतौ। अनेन च मान्दं कर्मैकमर्केन्द्वोरिति प्रतिज्ञा भज्यते। तस्मात्तदयुक्तमिति। तदित्थं समाधीयते -

ग्रहगतिः न सर्वदापि समाना। "कालभेदाद् वृत्तभेदः। वृत्तभेदाद् गतिभेदः। गतिभेदात् स्थितिभेदः - इत्येष शास्त्रसम्प्रदायः। तस्मादार्षेण सूर्यसिद्धान्तेनापि साधिता ग्रहाः तस्मिन् काले दृक्साम्यं भजन्ते स्म न त्वधुना। ग्रहाणां दृग्गणितैक्यकरणमेव स्फुटीकरणमिति सर्वैरभ्युपेतम्। अतो यावत् दृक्प्रतीतिर्न सिध्यति तावद् ग्रहस्फुटीकरणमपि पूर्णतामुपयाति। अयं च सिद्धान्तः ब्रह्मगुप्तादिभिः सर्वैरपि स्वीकृतः समर्थितश्च। सर्वत्रापि उपपत्तिं परीक्षमाणो भास्करोऽपि ब्रह्मगुप्तोक्तं तिथेर्नतकर्म उपपादयन् "यदुपलभ्यते तत्कुतो नाङ्गीकार्यम् ?" इति उपलब्धेः प्राधान्यं प्रपञ्चयति। एवं दृक्साम्यसिद्ध्यर्थम् उपपत्तिविरहिताः बीजाख्यक्रियाविशेषाः स्वीकृताः दरीदृश्यन्ते। बीजेषु तस्मादुपपत्ति रहितानां बीजानां ग्रहणात् नव्यैः स्वीकृतयोः सोपपत्तिकयोः च्युतितिथिसंस्कारयोः ग्रहणं वरमिति। इदमपि प्रागेव समर्थितमाचार्यभास्करेण यथा –

"यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा मतिमन्तो ब्रह्मगुप्तादीनां समानधर्मा एव उत्पद्यन्ते। ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति" इति।


ISSN: 2320-740X

गणकवरेण्यस्य परमेश्वरस्य भणितिरप्यत्र मनोहरी। सा च यथा –

"कालान्तरे तु संस्कारश्चिन्त्यतां गणकोत्तमैः" इति। एवं च येषु संस्कारेषु विहितेषु ग्रहस्य दृक्समत्वं सिद्ध्यति। ते सर्वेऽपि संस्काराः अङ्गीकार्याः। अत्र च उपलब्धिरेव प्रमाणम्। तदपेक्षिताः संस्काराः आर्षमानुषभेदं परित्यज्य स्वीकार्या इति शम्।

**********

## काव्यप्रयोजनम्

✍ कु. अमिर बाग्
आचार्यद्वितीयवर्षम्

विश्वेस्मिन् सर्वे मानवाः सांसारिकजीवने कस्मिन्नपि कर्मणि प्रवृत्ता भवन्ति चेत् किञ्चन प्रयोजनम् अस्ति एव। एकम् आभाणकं वर्तते तद्यथा –

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति।

वाचस्पत्यमित्यस्मिन् ग्रन्ते स्पष्टीकृतं यत् ज्ञानार्थं ज्ञातसम्बन्धं श्रोतं श्रोता प्रवर्तते।

ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ इति

कुमारिलभट्टाचार्येणाऽपि उक्तम् -

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्।

यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते॥ इति॥

एवमेव अस्माकं संस्कृतसाहित्यकाव्यजगति भव्यतरस्य सारस्वतकल्पविभवस्य काव्यस्य विरचनायां कवेः अध्ययनाध्यापनात् काव्यास्वादतत्पराणां कतिपयसहृदयानां काव्यास्वादने किमपि विशिष्टं प्रयोजनं नूनमेव स्यात्। यतो हि काव्यसमालोचकैः आलङ्कारिकाः ग्रन्थग्रथनावसरे अनुबन्धचतुष्टयरीतिमनुसृत्य
काव्यप्रयोजनं ग्रन्थप्रयोजनं च यथामति यथारीति प्रतिपादयामासुः। अस्माकम् आलङ्कारिकपरम्परानुसारं प्राचीनेन आलङ्कारिकेन भरतमुनिना गदितम् –

दुःखार्त्तानां श्रमार्त्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं लोके नाट्यमेतद्भविष्यति॥
धर्म्यं यसस्यमायुष्यं हितं बुध्दिविवर्ध्दनम्।
लोकोपदेशजननं नाट्यमेतद्भविष्यति॥

वेद्विद्येतिहासानामाख्यानपरिकल्पनम् ।
विनोदजनजे काले नाट्यमेद्भविष्यति ॥

अत्र नाटकस्य प्रयोजनमुक्तं वर्तते । अभिनयः काव्यस्येको विभागः । यथोक्तं विश्वनाथेन -

"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्" इति ।

अतः अभिनयाख्यस्य काव्यस्य प्रयोजनानि भवन्ति - दुःखसन्तप्तानां, श्रमकातराणां, शोकपीडितानां, तपस्विनां च जनानां विश्रान्तिजनकत्वं, धर्मसंपादकत्वं, यशसः विस्तारः, आयुर्विवर्धनम्, हितसाधनम्, बुध्दिविकसनम्, लोकोपदेशप्रदानम्, विश्रान्तिजननम्, वेदविद्येतिहासानामाख्यानपरिकल्पनञ्च ।

अत्र पुनः भामहाचार्यस्य काव्यप्रयोजनम्-

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम् ॥

धनञ्जयाचार्येण उक्तम् –

निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्क तम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥

मम्मटाचार्यः वदति –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मितयोपदेशयुजे ॥

काव्यात् कालिदास-श्रीहर्षादीनां यशप्राप्तये कञ्चन विशाखादत्तधावकादीनामिव अर्थप्राप्तये, व्यवहारं वेत्ति इति व्यवहारवित्, तस्मै व्यवहारज्ञानाय, यथा रामादिवत् प्रवर्तितव्यं न रावणादिवत् इति, शिवेतर अर्थात् अमङ्गलनाशाय, यथा-अमरुकविः "सूर्यशतकम्" विरचनेन कृष्णरोगात् विमुक्तः ।

काव्यपठनसमनन्तरमेव विगलिवेद्यान्तरानन्दानुभवाय, कान्तासंहितोपदेशद्वारा उत्तमजीवनगृह्स्य जीवनाय काव्यपठनेन लभ्यते इति ॥

अत्र प्रश्नः उदेति यत् - सत्सु वेदोपनिषत्पुराणधर्मशास्त्रादिषु काव्ये कुतः प्रयत्नः करणीयः ?

अत्र समाधानं क्रियते साहित्यदर्पणकारोक्तदिशा यत् "कटुकोषधोपशमनीयस्य रोगस्य शितशर्करोपसमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात् ?" इति धर्मादिशास्त्रेषु परिणतबुद्धीनामेव तस्मिन् विषये प्रवृत्तिः जायते न तु अल्पमतीनां तत्र प्रवृत्तिः । परन्तु काव्यशास्त्रेषु अनायासेन सुललिततया काव्यपठनपाठनकर्मणि प्रवर्तनीयं भवति । एवं काव्यप्रयोजनं

 ISSN: 2320-740X

महत् वर्तते।

अतः- एवं संक्षेपतो वक्तुं शक्यते सारवन्मतम् ।
अभीष्टफलकं काव्यं नूनं कल्पद्रुमायते ॥ (काव्यविच्छित्तिमीमांसा)

**********

## न्यायनये शाब्दबोधः

✍ कु. वाणीमञ्जुनाथहेगडे
आचार्यद्वितीयवर्षम्

प्रत्यक्षानुमितिशाब्दस्मरणभेदेन पञ्चधा ज्ञानानां विभागः नैय्यायिकमते समाद्रीयते । तत्र शाब्दबोधः पदज्ञानकरणकः पदार्थोपस्थितिव्यापारकः वैशेषिकव्यतिरिक्तैः सर्वैरपि आस्तिक-दार्शनिकैः बौद्धजैनैश्च विलक्षणप्रमात्वेन अङ्गीक्रियते । तत्र शाब्दबोधे भासमान पदार्थेषु प्रायः प्रथमान्तार्थस्य मुख्यविशेष्यत्वं नैय्यायिकाः युक्त्या संसाधयन्ति । तस्य शाब्दबोधस्य वर्णनप्रकारः न्यायनयरीत्या ईषदत्र प्रस्तूयते।

चैत्रः गां दोग्धि पयः इत्यत्र दुह् धातोः विभागजनकक्षरणानुकूलव्यापारोऽर्थः। गोपदोत्तरद्वितीयायाःआधेयत्वमर्थः । प्रकृत्यर्थः गौःआधेयतायां निरुपितत्वसबन्धेन, तस्य विभागे अन्वयः। पयः पदोत्तरद्वितीयार्थस्य आधेयत्वस्य धात्वर्थ क्षरणे अन्वयः। बोधस्तु "गोनिष्ठविभागजन कक्षरणानुकूलव्यापारानुकूलकृतिमांश्चैत्रः "इति।

शिष्यः गुरुं पृच्छति इत्यत्र पृच्छधातोः जिज्ञासाज्ञानोद्देश्यक-प्रवृत्यधीनशब्दःइत्यर्थः । ज्ञाने द्वितीयान्तगुरुपदार्थस्य गुरुवृत्तित्वस्यान्वयः । अपरद्वितीयान्तार्थस्य धर्मविषयकत्वस्य धात्वर्थैकदेशे शब्दे अन्वयः । तथा च "गुरुवृत्तिज्ञानोद्देश्यक-प्रवृत्यधीनधर्मविषयकशब्दानुकूल कृतिमान् शिष्यः " इति बोधः।

शिष्यं धर्मं ब्रूते गुरुः इत्यत्र ब्रूञ् धातोः ज्ञानोद्देश्यक-प्रवृत्यधीनशब्दः इत्यर्थः। शिष्यमिति द्वितीयान्तार्थस्य शिष्यवृत्तित्वस्य धात्वर्थैकादेशे ज्ञाने अन्वयः।अपर द्वितीयान्तर्थस्य धर्मविषयकत्वस्य धात्वर्थैकदेशे शब्दे अन्वयः । कृतिः प्रथमान्तार्थे गुरौ समवायसम्बन्धेन अन्वेति । तथा च "शिष्यवृत्तिज्ञानोद्देश्यकप्रवृत्यधीनधर्मविषयक-शब्दानुकूलकृतिमान् गुरुः" इति बोधः । अजां ग्रामं नयति इत्यत्र धात्वर्थः उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापाररूपं प्रापणमिति। तत्र प्रथमव्यापारे द्वितीयान्तार्थस्य अजानिरूपितवृत्तित्वस्य अन्वयः। संयोगरूपफले ग्रामवृत्तित्वस्य अन्वयः। तथा च

"ग्रामवृत्तिसंयोगानुकूलाजादिवृत्ति-व्यापारानुकूलव्यापारानुकूलकृतिमान् देवदत्तः" इति बोधः।

तण्डुलं पचति चैत्रः इत्यत्र रूपरसादिपरावृत्तिजनकः तेजसंयोगः पच् धातोरर्थः। द्वितीयायाः आधेयत्वमर्थः । प्रकृत्यर्थः तण्डुलः आधेयतायां निरूपितत्वसम्बन्धेन, आधेयताया च रूपादिपरावृत्तिरूपे धात्वर्थतावच्छेदके फले स्वरूपसम्बन्धेन, कृतिः प्रथमान्तार्थे चैत्रे समवायसम्बन्धेन अन्वेति । तथा च "तण्डुलवृत्तिरूपादिपरावृत्तिजनक-तेजःसंयोगानुकूलकृतिमान् चैत्रः" इति बोधः । वैशेषिकमते तण्डुलपदस्य तण्डुलारम्भकपरमाणौ लक्षणा । तथा च "तण्डुलारम्भकपरमाणुवृत्तिरूपादिपरावृत्ति-जनकतेजःसंयोगानुकूलकृतिमान् चैत्रः" इति बोधः।

पौरवं गां याचते विप्रः इत्यत्र याचधातोः स्वोद्धेश्यकदानेच्छा इत्यर्थः। प्रकृत्यर्थः पौरवः द्वितीयार्थाधेयतायां निरूपितत्वसम्बन्धेन , पौरवपदोत्तर द्वितीयार्थाधेयत्वस्य धात्वर्थ-तावच्छेदके दाने स्वरूपसम्बन्धेन अन्वेति। गोपदोत्तर द्वितीयायाः विषयत्वमर्थः। तत्र आधेयतासम्बन्धेन गोरन्वयः। विषयत्वस्य निरूपकत्वसम्बन्धेन धात्वर्थतावच्छेदक-दानरूपेच्छायामन्वयः। तथा च "पौरवनिष्ठा या गोविषयकदानरूपेच्छा तदनुकूलेच्छाश्रयः विप्रः" इति बोधः।

चैत्रः गां व्रजं रुणध्दि इत्यत्र रुधधातोः देशान्तरसञ्चारविरोधिव्यापारोऽर्थः। सञ्चारविरोधित्वं सञ्चारानुत्पादप्रयोजकत्वम् । अनुत्पादे द्वितीयान्तगोपदार्थस्य गोवृत्तित्वस्यान्वयः । व्रजमित्यत्र द्वितीयायाः प्रतियोगित्वमर्थः । तत्र आधेयतासम्बन्धेन व्रजस्यान्वयः । प्रतियोगितायाः निरूपकतासम्बन्धेन अन्यपदार्थभेदवदेकदेशे भेदे अन्वयः । तथा च "गोवृत्तिः यः व्रजनिष्ठप्रतियोगितानिरूपकभेदवद्देश-सञ्चारप्रागभावः तत्प्रयोजकव्यापारानुकूलकृतिमान् चैत्रः" इति बोधः।

चैत्रः अजं ग्रामं यापयति इत्यत्र या धातोः उत्तरदेशसंयोगानुकूलव्यापाररूपं गमनमर्थः । तदुत्तरणिच् प्रत्ययस्य अनुकूलव्यापारोऽर्थः । अजापदोत्तरद्वितीयायाः कर्तृत्वमर्थः तच्च आश्रयत्वरूपम् । तत्र प्रकृत्यर्थस्य अजायाः आधेयत्वसम्बन्धेन, कर्तृत्वस्य याधात्वर्थगमने निरूपकत्वसम्बन्धेन, गमनस्य णिजर्थे व्यापारे अनुकूलत्वसम्बन्धेन च अन्वयः । गमनं नाम संयोगानुकूलव्यापारः। संयोगे ग्रामवृत्तित्वस्यान्वयः। आख्यातस्य आश्रयतायां णिजर्थ-व्यापारस्य निरूपितत्वसम्बन्धेन, आश्रयत्वस्य प्रथमान्तार्थे चैत्रे स्वरूपसम्बन्धेन अन्वयः । तथा च "अजानिष्ठकर्तृतानिरूपकः यः ग्रामवृत्तिसंयोगानुकूलो व्यापारः तदनुकूल-व्यापाराश्रयश्चैत्रः इति बोधः।

चैत्रः शिष्यं शास्त्रं ज्ञापयति इत्यत्र शिष्यपदोत्तरद्वितीयार्थाधेयतायां प्रकृत्यर्थः शिष्यः निरूपितत्वसम्बन्धेन, शास्त्रपदोत्तरद्वितीयार्थविषयत्वे प्रकृत्यर्थः शास्त्रं निरूपितत्वसम्बन्धेन ,


ISSN: 2320-740X

आधेयत्वविषयत्वयोः उभयोः ज्ञाधात्वर्थज्ञाने निरूपकत्वसम्बन्धेन, धात्वर्थ ज्ञानं णिजर्थे अनुकूलव्यापारे अनुकूलत्वसम्बन्धेन अन्वेति । तथा च "शिष्यवृत्तिशास्त्रविषयक-ज्ञानानुकूलव्यापाराश्रयः चैत्रः" इति बोधः।

ओदनं भुङ्क्ते चैत्रः इत्यत्र भुजधातोः गलाधस्संयोगानुकूलक्रियानुकूलव्यापाररूपं गलधोनयनमर्थः। क्रियारूपे फले द्वितीयान्तार्थस्य ओदनवृत्तित्वस्यान्वयः। तथा च "ओदनवृत्तिर्या गलाधस्संयोगानुकूला क्रिया तदनुकूलव्यापार-निरूपिताश्रयतावान् चैत्रः" इति बोधः।

चैत्रः ब्राह्मणं अन्नं भोजयति इत्यत्र गलाधस्संयोगानुकूलव्यापारो भुजधात्वर्थः । ब्राह्मणपदोत्तरद्वितीयायाः कृतिजन्यत्वमर्थः । कृतौ ब्राह्मणस्य आधेयतासम्बन्धेन अन्वयः । अन्नपदोत्तरद्वितीयार्थाधेयत्वस्य धात्वर्थे व्यापारे अन्वयः । कृतिजन्यत्वस्य व्यापारे अन्वयः ।तस्य णिजर्थव्यापारे अनुकूलतासम्बन्धेन अन्वयः । तथा च "अन्नवृत्तिः यः ब्राह्मणनिष्ठ-कृतिजन्यः गलाधस्संयोगानुकूलव्यापारानुकूलव्यापारस्तदनुकूलकृतिमान् चैत्रः" इति बोधः।

चैत्रः यजमानं मन्त्रं पाठयति इत्यत्र पठधातोः कण्ठताल्वाद्यभिघातोऽर्थः । कण्ठताल्वादिसंयोगानुकूला क्रिया इति यावत् । यजमानपदोत्तरद्वितीयार्थकृतिजन्यत्वे प्रकृत्यर्थः यजमानः आधेयतासम्बन्धेन, मन्त्रपदोत्तरद्वितीयार्थाधेयत्वे प्रकृत्यर्थः मन्त्रः निरूपितत्वसम्बन्धेन अन्वेति । कृतिजन्यत्वाधेयत्वेतत् उभयोः पठधात्वर्थे कण्ठताल्वादि-संयोगानुकूलव्यापारे अन्वयः । तथा च "यजमाननिष्ठकृतिजन्यो यः मन्त्रजनककण्ठताल्वादिसंयोगानुकूलव्यापारः तदनुकूल-व्यापाराश्रयश्चैत्रः" इति बोधः।

चैत्रः घटं जनयति इत्यत्र घटपदोत्तरद्वितीयार्थाधेयतायां प्रकृत्यर्थः घटः निरूपितत्वसम्बन्धेन , आधेयत्वं धात्वर्थ उत्पत्तौ स्वरूपसम्बन्धेन, धात्वर्थः णिजर्थे अनुकूलव्यापारे स्वरूपसम्बन्धेन अन्वेति। तथा च "घटनिष्ठोत्प्यनुकूलव्यापारनिरूपिताश्रयतावान् चैत्रः" इति बोधः।

चैत्रः घटं नाशयति इत्यत्र घटपदोत्तरद्वितीयार्थप्रतियोगित्वे प्रकृत्यर्थः घटः आधेयतासम्बन्धेन, प्रतियोगित्वं धात्वर्थे नाशे निरूपकत्वसम्बन्धेन अन्वेति । तथा च "घटनिष्ठप्रतियोगिता-निरूपकनाशानुकूलव्यापारनिरूपिताश्रयतावान् चैत्रः" इति बोधः।

पाकं चिकीर्षति देवदत्तः इत्यत्र धात्वर्थपाकस्य द्वितीयार्थ विशेष्यतायां आधेयता-सम्बन्धेन अन्वयः । क्रीञ्धातोरर्थः कृतिः सन्नर्थेच्छायां निरूपकत्वसम्बन्धेनअन्वेति । तथा च "पाकनिष्ठविशेष्यतानिरूपककृतिनिष्ठप्रकारतानिरूपके-च्छानिरूपिताश्रयतावान् देवदत्तः" इति बोधः। पुत्रयति देवदत्तः इत्यत्र पुत्रपदार्थः पुत्रः क्यजर्थेच्छायां स्वविषयकत्वसम्बन्धेन अन्वेति। तथा च "पुत्रविषयकेच्छानिरूपिताश्रयतावान् देवदत्तः" इति बोधः।

पुत्रकाम्यति देवदत्तः इत्यत्र पुत्रपदार्थः पुत्रः काम्यजर्थे इच्छायां स्वविषयकत्वसम्बन्धेन अन्वेति। तथा च "पुत्रविषयकेच्छानिरूपिताश्रयतावान् देवदत्तः" इति बोधः।

भृत्यं पुत्रीयति यज्ञदत्तः इत्यत्र क्यजर्थः आचारसदृशाचारः। स च व्यवहाररूपः। तथा च पुत्रपदार्थः पुत्रः क्यजर्थैकदेशे प्रथमाचारे स्वकर्मकत्वसम्बन्धेन, प्रकृत्यर्थः भृत्यः द्वितीयार्थकर्मत्वे आधेयतासम्बन्धेन अन्वेति। द्वितीयान्तार्थस्य च क्यजर्थैकदेशे द्वितीयाचारे निरूपकतासम्बन्धेन अन्वेति। आचारः आख्यातार्थ आश्रयतारूपकर्तृत्वे निरूपितत्वसम्बन्धेन अन्वेति। तथा च "पुत्रकर्मकाचारसदृशभृत्यनिष्ठकर्मतानिरूपकाचार-निरूपिताश्रयतावान् यज्ञदत्तः" इति बोधः।

कुट्यां प्रासादीयति भिक्षुः इत्यत्र क्यजर्थः आचारसदृशाचारः। स च अवस्थानरूपः। प्रकृत्यर्थः प्रासादः क्यजर्थैकदेशे प्रथमावस्थाने स्वाधिकरणताकत्वसम्बन्धेन अन्वेति। प्रकृत्यर्थः कुटी सप्तम्यर्थाधिकरणतायां आधेयतासम्बन्धेन, सप्तम्यर्थाधिकरणता च क्यजर्थैकदेशे द्वितीयावस्थाने निरूपकत्वसम्बन्धेन अन्वेति। तथा च "प्रासादाधिकरणकावस्थानसदृशकुट्यधिकरणकावस्थान-निरूपिताश्रयतावान् भिक्षुः" इति बोधः।

हंसायते बालिका इत्यत्र प्रकृत्यर्थः हंसः क्यङर्थः आचारसदृशाचारः। प्रकृत्यर्थः हंसः क्यङर्थैकदेशे प्रथमाचारे स्वकर्तृकत्वसम्बन्धेन, क्यङर्थः आख्यातार्थ कृतौ अनुकूलत्वसम्बन्धेन, कृतिः प्रथमान्तार्थ बालिकायासमवायसम्बन्धेन अन्वेति। तथा च "हंसकर्तृकाचारसदृशाचारानुकूल-कृतिमती बालिका" इति बोधः।

पार्थ एव धनुर्धरः इत्यत्र पार्थान्यस्मिन् धनुर्धरत्वयोगो व्यवच्छिद्यते। तत्र अन्यस्मिन् योगे व्यवच्छेदे च पृथगेवैवकारस्य शक्तिः। अन्यरूपार्थस्तु पार्थांशे विशेष्यविधया भासते। सम्बन्धरूपयोगे धनुर्धरत्वस्य प्रतियोगित्वेनान्वयः। तादृशयोगस्याभावरुपव्यवच्छेदे प्रतियोगिविधया अन्वयः। अभावश्चान्यस्मिन् प्रकारविधया भासते। तथा च "पार्थः धनुर्धराभिन्नः पार्थान्यः धनुर्धरत्वसम्बन्धाभाववांश्च" इत्याकारकः शाब्दबोधो भवति।

**********

## संस्कृतकाव्येषु पुत्रोत्सवः

✍ **कु. सूर्यहेब्बारः ए.**

आचार्यद्वितीयवर्षम्

भारतीयसामाजिकव्यवस्थायां गृहस्थाश्रमस्य विशिष्टं स्थानं वर्तते। गृहस्थाश्रमे मानवः पुत्रं


ISSN: 2320-740X

प्राप्य पितृणात् मुक्तः भवति । "अपुत्रस्य गतिर्नास्ति" इति वचनात् पुत्रप्राप्तेः महत्त्वं ज्ञातुं शक्यते । "पुन्नामनरकाद्यस्मात् त्रायते पितरं सुतः । तस्मात् पुत्र इति प्रोक्तः" इत्युक्तदिशा पुत्रप्राप्तिः अनिवार्या । तस्मादेव पुत्रजन्म उत्सवत्वेन आचरन्ति भारतीयाः । संस्कृतकाव्येषु अपि बहुत्र पुत्रोत्सवः समुपवर्णितः दरीदृश्यते । पार्वती पुत्रान् प्राप्तुं न शक्तवती, तस्य हेतुः देवाः इति मत्वा सा पुत्रोत्सववञ्चिता सती देवान् शपति इति रामायणे वर्णितम् । तद्यथा

समन्युरशपत् सर्वान् क्रोधसंरक्तलोचना ।
यस्मान्निवारिता चाहं सङ्गता पुत्रकाम्यया ॥

अपत्यं स्वेषु दारेषु नोत्पादयितुमर्हत ।

अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥ (वाल्मीकीयरामायणम् बा.कां.३६स,श्लो.सं २१,२२)इत्थं पार्वती पुत्रोत्सववञ्चिता देवान् शपति । रघुवंशीयः राजा दशरथः पुत्रप्राप्तिलाभनिश्चयः शापमपि वरत्वेन मनुते । दशरथः मृगयावसरे तमसायां नद्यां जलं पूरयन्तं मुनिकुमारं गजशङ्कया शब्दपातिनं इषुं विसृज्य हन्ति । तदानीम्मुनिकुमारस्य पिता दुःखितः सन् त्वमपि पुत्रशोकेन म्रियस्व इति शपति । शप्तोऽपि दशरथः मम पुत्रोत्सवः भविष्यतीति मत्वा मुदितः मुनिं इत्थं वदति –

शापोऽप्यदृष्टतनयाननपद्मशोभे
सानुगृहो भगवता मयि पातितोयम् ।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो
बीजप्ररोहजननीज्ज्वलनः करोति ॥ (रघु ९.८०)

ततः कालान्तरे दशरथः पुत्रान् प्राप्नोति । तदानीन्दशरथस्तु पुत्रोत्सवेन भृशं तोषमाप्नोति, देवता अपि दशरथस्य पुत्रोत्सवम् आचरन्तीति रघुवंशे वर्णितम् ।

पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः।
आरम्भं प्रथमं चक्रुः देवदुन्दुभयो दिवि ॥
सन्तानकमयी वृष्टिर्भवने चास्य पेतुषी ।
सन्मङ्गलोपचाराणां सैवादिरचनाऽभवत् ॥ (रघु १०.७६,७७)

रघुवंशे अपरस्य राज्ञः दिलीपस्य अपि पुत्रोत्सवः वर्णितः । रघोः जन्म यदा अजायत तदा राजा दिलीपः हृष्टस्सन् सर्वस्वं पुत्रजननवार्ताश्रावकाय दातुम् उद्युक्तः । यथा -

जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसम्मिताक्षरम् ।
अदेयमासीत् त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥ (रघु ३.१६)

दिलीपः पुत्रप्राप्तिः भविष्यतीति पूर्वमेव तुष्टः आसीत् ।

कुमारवृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथगर्भकर्मणि ।

पीतः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवसाश्रितामिव ॥ (रघु ३.१२)

पुत्रप्राप्तेः अनन्तरं पुत्रं दृष्ट्वा स हर्षः पुनः प्रवृद्धः ।

निवातपद्मस्तिमितेन चक्षुषा

नृपस्य कान्तं पिबतस्सुताननम् ।

महोदधे पूर इवेन्दुदर्शनात्

गुरुः प्रहर्षः प्रबभूव नात्मनि ॥ (रघु ३.१७)

यथा पिता पुत्रोत्सवं अनुभवति तद्वत् मातापि ।

कार्त्तिकेयं दर्शयन् शिवः अयं कार्त्तिकेयः आवयोः पुत्रः इति वदति तदा पार्वत्यपि पुत्रोत्सवेन पुलकिता भवति । सा पुत्रं कार्त्तिकेयं ग्रहीत्वा तमेव पश्यन् पुत्रोत्सवे निमज्जति ।

स्वर्गापगापावककृत्तिकादीन् कृताञ्जलीनानमतोऽपि भूयः ।

हित्वोत्सुका तं सुतमाससाद पुत्रोत्सवे माद्यति को न हस्तात् ॥ (कु.सं.११.१७)

तमीक्षमाणाक्षणमीक्षणानां सहस्रमाप्तुं विनिमेषमैच्छत् ।

सा नन्दनालोकनमङ्गलेषु क्षणं क्षणं तृप्यति कस्य चेतः ॥ (कु.सं.११.२०)

शिवः "पुत्रोत्सवः आचर्यताम्" इति प्रमथगणम् आदिशति । एवं शिवपार्वत्योः पुत्रोत्सवं देव-गन्धर्व-यक्ष-विद्याधराः आचरन्ति ।

महोत्सवे तत्र समागतानां गन्धर्वविद्याधरसुन्दरीणाम् ।

सम्भावितानां गिरिराजपुत्र्या गृहेऽभवन्मङ्गलगीतकानि ॥ (कु.सं.११.३४)

पुत्रोत्सववर्णनं न केवलं कालिदासकाव्येषु अपि तु अन्येषामपि कवीनां काव्येषु दृश्यते । बाणभट्टः कादम्बर्यां पुत्रोत्सवं एवं वर्णयति ।

उत्थाय च तथैव तेन चरण-विघट्टन-क्वणित-नूपुर-सहस्र-मुखरित-दिगन्तरेण, सरभसोत्क्षेप-चलित-मणिवलयावली-वाचालित-भुजलतेन, ऊर्ध्वीकृतैः उत्तानतलैः करपुटैः अनिललुलिताम् आकाशगङ्गा-कमलिनीमिव दर्शयता, पर्यस्त-मृदित, कर्णपल्लवेन, वीणा-वेणु-मुरज-कांस्य-तालमयानुगतेन, कलमधुरमुद्गायता, हर्षनिर्भरतया मत्तेनेव उन्मत्तेनेव गृहग्रहीतेनेव व्यपगत-वाच्यावाच्यविवेकेन नृत्य-गीत-क्रीडा-प्रसक्तेनान्तःपुरिकाजनेन, चरणसन्निपातैः दारयतेव वसुधां राजपरिजनेन विविध-मुखवाद्य-कृतकोलाहलेन, पठता गायता वल्गता चानुगम्यमानः शुकनासभवनं गत्वा द्विगुणितरम् उत्सवम् अकारयत् ।

**********


ISSN: 2320-740X

# कुन्तकानुसारेण काव्यमार्गाः

✍ कु. अभिषेक परगाँई
शिक्षाशास्त्रिद्वितीयवर्षम्

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥

काव्यस्य सामान्यलक्षणानां प्रतिपादनानन्तरं आचार्यकुन्तकेन काव्यस्य विशेषलक्षणानां प्रदर्शनपुरस्सरं काव्यमार्गाणां त्रिधा विभाजनं कृतमस्ति। तद्यथा-

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥(वक्रो १.२४)

आचार्यकुन्तकस्य मतानुसारेण यथा सप्त स्वराः नियताः भवन्ति तयोर्मध्ये न्यूनाधिक्यं भवितुं न शक्नोति तथैव काव्यमार्गाणां संख्याऽपि काव्यतत्वविद्भिः त्रिधा स्वीकृतमस्ति । तत्र न्यूनाधिक्यं भवितुं न शक्नोति । यथा (तत्र तस्मिन् काव्ये मार्गाः पन्थानस्त्रयः सम्भवन्ति । न द्वौ न चत्वारः स्वरादिसंख्यावत् तावतामेव वस्तुतस्तज्ज्ञैरुपलम्भात् ) । काव्यशास्त्रे वस्तुतः रीति-वृत्ति-मार्ग शब्दाः प्रायः समानार्थबोधका इति मन्यन्ते । यथा कुन्तकाचार्याणां मतानुसारेण मार्गाः भवन्ति तथैव आचार्यवामनस्य मते रीतिः भवति । तच्च-(रीतिरात्मा काव्यस्य -का०सू०वृत्तिग्रन्थे १.२.६) रीतिरपि त्रिधा । परं वामनेन रीतीनां मध्ये वैदर्भी एव श्रेष्ठा इति उक्तमस्ति । काव्यादिषु सा एव आश्रयणीया इति उक्तमस्ति । (तासां पूर्वा ग्राह्या गुणसाकल्यात् न पुनरितरे स्तोकगुणत्वात्)। कुन्तकेन वामनस्य अस्मिन् कथनेऽपि आक्षेपः कृतः अस्ति।

स्वमार्गविषयककथनादिषु आगच्छन्तीनां विप्रतिपत्तीनां विषये उक्तमस्ति यस्माच्चिरन्तनैर्विदर्भादिदेशविशेषसमाश्रयणेन वैदर्भीप्रभृतयो रीतयस्त्रिस्रः समाम्नाताः । तासां चोत्तममध्यमत्ववैचित्र्येण त्रैविध्यम् । (कारिका-१.२४,वृत्ति) । प्रसङ्गेस्मिन् आचार्यकुन्तकेन दण्डिनः आलोचनाऽपि कृताऽस्ति। दण्डिनः मतानुसारेणापि रीतिद्वयमेव भवति-

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।
तत्र वैदर्भगौडीयो वर्ण्येते प्रस्फुटान्तरौ॥(काव्यादर्श-१.४०)

अस्मिन् प्रसङ्गेऽपि कुन्तकेन उक्तमस्ति- न च विशिष्टरीतियुक्तत्वेन काव्यकरणं मातुलेयभगिनीविवाहवद्द देशधर्मतया व्यवस्थापयितुं शक्यम् । देशधर्मो हि वृद्धव्यवहारपरम्परामात्रशरणः शक्यानुष्ठानतां नातिवर्तते । तथाविधकाव्यकरणं पुनः

ISSN: 2320-740X

शक्त्यादिकारणकलापसाकल्यम् अपेक्ष्यमाणं न शक्यते यथा कथञ्चिदनुष्ठातुम् । एवं रूपेण आचार्यकुन्तकेन वामनदण्ड्यादीनां मतानां खण्डनानन्तरं स्वमार्गविषयकविचाराणां स्थापना कृताऽस्ति । कविस्वभावस्य भेदाधारेण काव्यमार्गस्य अनुसरणमेव उचितम् (कविस्वभाव-भेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते) । कविस्वभावानुगुणं कुन्तकेन त्रिधा इत्थं विभक्ताः सन्ति काव्यमार्गाः ।

१. सुकुमारमार्गः- मार्गोऽयं कवेः स्फुरितप्रतिभायाः उद्भवे मृदु-अर्थ-मनोहारी-स्वाभाविक-अलङ्कारैः युक्तं भवति । सुकुमारमार्गस्य गुणाः-अस्य प्रथमगुणः माधुर्यं वर्तते । समाहितमनोहारी पदमेव अस्य गुणस्य आत्मा वर्तते-

असमस्तमनोहारिपदविन्यासजीवितम् ।
माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः ॥(वक्रो-१.३०)

अस्य मार्गस्य द्वितीयः गुणः भवति प्रसादः-

अक्लेशव्यञ्जिताकूतं झटित्यर्थसमर्पणम् ।
रसवक्रोक्तिविषयकं यत्प्रसादः स कथ्यते ॥(वक्रो-१.३१)

कुन्तकेन एवमपि उक्तमस्ति यत् –(अत्र पदानामसमस्तत्वं प्रसिद्धाभिधानत्वं अव्यवहितसम्बन्धत्वं समाससद्भावेऽपि गमकसमासयुक्तता च परमार्थः) ।

तृतीयगुणः भवति लावण्यम् -

वर्णविन्यासविच्छित्तिपदसन्धानसम्पदा ।
स्वल्पया बन्धसौन्दर्यं लावण्यमभिधीयते ॥(वक्रो-१.३२)

लावण्यस्य सामान्यतात्पर्यं एवमस्ति- ( शब्दार्थसौकुमार्यसुभगः सन्निवेशमहिमा लावण्याख्यो गुणः कथ्यते ) ।

अस्य चतुर्थः गुणः भवति आभिजात्यम् । “आभिजात्यम्” इत्युक्ते श्रवणे रमणीयः चित्ते सुखदः आनन्ददायकः मनोहारिगुण एव अभिजात्यमिति कथ्यते ।

श्रुतिपेशलताशालिसुस्पर्शमिव चेतसा ।
स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते ॥(वक्रो-१.३३)

लावण्य–आभिजात्यं गुण इति कोऽपि प्रश्नं पृच्छेत् द्वौ अपि तरुणीनाम् अलौकिकसौन्दर्यरूपधर्मवस्तुधर्मे प्रसिद्धे स्तः । तदर्थं कुन्तकेन अपूर्वा व्याख्या शङ्कयित्वा कृता अस्ति- (यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति, लावण्यं पुनस्तासामेव सत्कविगिरामिव सौन्दर्यं सकललोकगोचरतामायातीत्युक्तम् ।


ISSN: 2320-740X

२. विचित्रमार्गः- मार्गेऽस्मिन् कविप्रतिभायाः प्रथमाविर्भावस्य समये शब्दार्थयोर्मध्ये वक्रतायाः परिस्फुरणनं प्रतीयते। अत्र कुन्तकेन स्वाभाविकालङ्काराणां प्रयोग एव समर्थितः वर्तते-

अलङ्कारस्य कवयो यत्रालङ्करणान्तरम्।
असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्॥
रत्नरश्मिच्छटोत्सेकभासुरैर्भूषणैर्यथा।
कान्ताशरीरमाच्छाद्य भूषायै परिकल्प्यते॥
यत्र तद्वदलङ्कारैर्भ्राजमानैर्निजात्मना।
स्वशोभातिशयान्तःस्थमलङ्कार्यं प्रकाश्यते॥

३. मध्यममार्गः-माधुर्य-लावण्य-प्रसाद-अभिजात्यगुणानां मध्यमवृत्तेः आश्रयेण रचना सौन्दर्यस्य अपूर्वविशेषतां यः पोषयति सः मध्यममार्ग इत्युच्यते। कुन्तकेन अस्य कृते "नानारुचिमनोहर"इति उक्तमस्ति। तेषामनुसारेण सुकुमाराः एव विचित्रमार्गाणां सम्पत्तयः मिश्रीभूत्वा शोभां वर्धयन्ति।

वैचित्र्यं सौकुमार्यं च यत्र सङ्कीर्णतां गते।
भ्राजते सहजाहार्यशोभातिशयशालिनी॥
माधुर्यादिगुणग्रामो वृत्तिमाश्रित्य मध्यमाम्।
यत्र कामपि पुष्णाति बन्धेच्छायातिरिक्तताम्॥
मार्गोऽसौ मध्यमो नाम नानारुचिमनोहरः।
स्पर्धया यत्र वर्तन्ते मार्गाद्वितयसम्पदः॥ (वक्रो. १.४९-५.१)

त्रिष्वपि मार्गेषु कुन्तकेन माधुर्य-प्रसाद-लावण्यानाम् आभिजात्यगुणानां च उल्लेखः कृतोऽस्ति। एतद् अतिरिच्याऽपि कुन्तकेन औचित्य-सौभाग्यनामकौ द्वौ साधारणौ गुणौ उल्लिखितौ स्तः।

आञ्जसेन स्वभावस्य महत्वं येन पोष्यते।
प्रकारेण तदौचित्यमुचिताख्यानजीवितम्॥ (वक्रो. १.५३)

एवम् आचार्यकुन्तकेन काव्यमार्गाणां व्युत्पत्तिपुरस्सरं स्पष्टं कृतमस्ति यत् काव्यादिषु मार्गाणां संख्या ३ एव भवति॥

**********

ISSN: 2320-740X

# स्त्रीशिक्षायाः महत्त्वम्

✍ कु. बिप्लबरायः
शिक्षाशास्त्रिद्वितीयवर्षम्

प्राचीनकालेऽपि स्त्रियः शिक्षां प्राप्नुवन्ति स्म। ताः स्वस्याः वैदुष्येण संस्कृत्या च बहु प्रसिद्धिं यशश्च प्राप्नुवन्ति स्म । परन्तु गच्छता समयेन समाजे पुरुषवादिमानसिकतायाः स्ववर्चस्वात्स्त्रीणामुपरि कठोराघातः जातः।

विगतवर्षेषु समाजे एकं चिन्तनम् उद्भूतमस्ति । वैचारिकस्वतन्त्रतायाः कारणात् सामाजिकपुरुषवादिचिन्तनस्य निर्मूलनं सञ्जातम् । एवञ्च इदानीञ्जनाः स्त्रीशिक्षायाः महत्त्वमपि अवगच्छन्ति। यद्यपि अधुनापि केचन जनाः सन्ति ते मन्यन्ते यत् स्त्रीणां कार्यक्षेत्रं गृहस्य अन्तः एव भवितव्यम् एवञ्च स्त्रीणां शिक्षणेन अधिकाः हानयः भवन्ति। तथापि एतानि नकारात्मकचिन्तनानि पृथक्कृत्वा स्त्री शिक्षायाः मूल्यं प्रतिदिनं वर्धते। सहशिक्षया साकं सम्पूर्णदेशे बालिकानां शिक्षायै सहस्राधिकाः पृथक्-विद्यालयाः तथा महाविद्यालयाः अपि उद्घाटिताः सन्ति, यत्र सहस्राधिकाः बालिकाः पठन्ति।

अतः कथ्यते यत् एकस्य पुरुषस्य पठनेन एकैकः मानवः शिक्षितः भवति, यदि एका स्त्री शिक्षां प्राप्नोति तर्हि सम्पूर्णपरिवारः शिक्षितः भवति। स्त्री परिवारस्य आधारः वर्तते। सा माता भवति। सा एका शिक्षिता सती स्वस्य बालेषु शिक्षां तथा संस्कारं तु ददाति एव, तेषां स्वास्थ्यस्योपरि अपरिमितं ध्यानं ददाति। शिक्षिता स्त्री गृह-परिवारस्य प्रबन्धनम् अत्यधिकं कुशलतापूर्वकं कर्तुं शक्नोति, धनोपार्जनं तथा अन्येषु कार्येषु पत्युः सहयोगं आचरति। सा स्वस्य अधिकारान् दायित्त्वानि च सुष्ठुरूपेणावगच्छति तथा समाजे प्रसारितानां कतिपयदुष्प्रवृत्तीनां विरोधं प्रकटयितुं पुरतः आगन्तुं शक्नोति।

अधुना कश्चन प्रश्नः उद्भवति यत् तासां कृते सहशिक्षायाः वातावरणं समीचीनं भवति उत भिन्नशिक्षायाः । अनेके अभिभावकाः सहशिक्षायाः विरोधं कुर्वन्ति । ते वदन्ति यत् बालिकानां बालकैः साकं मिलित्वा पठनं सम्यक् नास्ति। ताः स्वस्थाने सम्यक् भवितुं शक्नुवन्ति, किन्तु अधुना सः समयः न, यत् यदा बालिकाभिः गृहस्य अन्तः एव स्थातव्यम्। अधुना ताभिः किमपि कार्यार्थं बहिः तु आगन्तव्यमेव। एवं रीत्या बालकैः साकं मेलनं तु कुत्रापि भवितुं शक्नोति। यदि बाल्यकालात् एव ताः बालकेभ्यः दूरे स्थाप्यन्ते चेत् ताः अव्यावहारिकाः अतिसंवेदनशीलाः आत्मविश्वासहीनाः च भविष्यन्ति। एतत् विहाय, बालकानां प्रकृत्याः विषये तासां अभिज्ञानं न भविष्यति, यत् ताभ्यः


ISSN: 2320-740X

हानिकारकं सिद्ध्यति।

सहशिक्षया बालकैस्सह सकारात्मकव्यवहारकरणं जानन्ति। तेन साकमेव तासु बालकेभ्यः प्रतियोगितायाः तथा मित्रतायाः भावनामपि जागरयति। अत्यधिकः सङ्कोचः शङ्काश्च सम्मार्ज्य जीवने उन्मुक्तं कृत्वा अग्रे गन्तुं प्रभावयति।

यथा बालकानां तथैव बालिकानां कृते अपि सर्वाः शिक्षाः प्रदेयाः। सा शिक्षा यत्र तस्याः रुचिः स्यात्, यया तासां भाविजीवनार्थं नवीनं मार्गमुद्घाटयेत्, ताभ्यः तैः साकमेव, स्वस्याधिकाराणां तथा कर्तव्यानां ज्ञानं दद्यात्। यत् ताभ्यः मानवतायाः रक्षार्थं नैतिकं साहसं दद्यात्। स्वकीयां भावानां प्रकटनाय भाषां शिक्षयेत् एवञ्च स्वस्य तथा स्वपरिवारस्य समाजस्य च कल्याणाय विज्ञानमपि अवगच्छेयुः।

एतत् विहाय आवश्यकं वर्तते यत् तस्यां शिक्षायां शारीरिकशिक्षा तथा आत्मरक्षायाः गुणाः अपि स्युः।

समाजः स्त्रीपुरुषयोः मिलित्वा निर्मितः भवति। यावत् पर्यन्तं तयोः समानशिक्षायाः अवसरः न दीयते तावत्पर्यन्तं समाजे सन्तुलनं स्थिरं न स्थास्यति, एवञ्च सम्यक्तया विकासोऽपि न भवितुं शक्यते। द्वयोः पक्षयोः दार्ढ्यमेव समाजे वास्तविकं दार्ढ्यमानेतुं शक्नोतीति।

***********

## अलौकिकसन्निकर्षविचारः

✍ कु. ब्रह्मानन्दः

शिक्षाशास्त्रिद्वितीयबर्षम्

प्रत्यक्षं लौकिकमलौकिकं चेति द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः। अलौकिकप्रत्यक्षहेतुभूतः अलौकिकसन्निकर्षः त्रिविधः। सामान्यलक्षणः, ज्ञानलक्षणः, योगजश्चेति। तदेव उक्तं कारिकावल्याम्-

**अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।**
**सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥**

**सामान्यलक्षणसन्निकर्षः-**

तत्र महानसचत्वरादौ धूमदर्शनेन धूमः इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते। तत्रापि इन्द्रियं करणम्। सामान्यलक्षणः सन्निकर्षः। प्राचीनमतानुसारेण लक्षणशब्दस्य स्वरूपार्थकत्वात्

सामान्यं लक्षणं स्वरूपं यस्य सः इति विग्रहेण सामान्यस्वरूपा प्रत्यसत्तिरित्यर्थो लभ्यते। प्रत्यासत्तिः सन्निकर्षः। तच्च सामान्यं इन्द्रियसम्बन्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम्। इन्द्रियसम्बद्धः धूमः, तद्विशेष्यकं धूम इति ज्ञानं, तत्र प्रकारीभूतं धूमत्वं, तेन सन्निकर्षेण सकलधूमविषयकं धूमः इत्येवं ज्ञानं जायते। इदमेवालौकिकप्रत्यक्षे फलम्। अत्र इन्द्रियसम्बन्धं सामान्यं प्रत्यासत्तिः इत्येव चेदुच्यते तदा धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात्, तत्र धूमत्वेन सह इन्द्रियसम्बन्धाभावात्। पूर्वोक्तरीत्यनुसारेण तु इन्द्रियसम्बन्धं धूलीपटलं तद्विशेष्यके धूम इति ज्ञाने प्रकरीभूतं धूमत्वं सन्निकर्षः भवति। अत्र इन्द्रियसम्बन्धः लौकिकः बोध्यः। इदं च बहिरिन्द्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यमात्रं प्रत्यासत्तिः। अत्र सामान्यपदेन समानानां भावः सामान्यमिति व्युत्पत्या धर्ममात्रं ग्रह्यते, न तु जातिमात्रम्। धूमत्वं नित्यसामान्यम्। घटादिकम् अनित्यसामान्यम्। संयागेन भूतले, समवायेन कपाले वा यत्र एको घटः ज्ञातः ततः इन्द्रियसम्बन्धविशेष्यकज्ञानप्रकारीभूतेन तद्घटरूपसामान्येन सर्वेषां तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति। तत्रेदमनित्यसामान्यं बोध्यम्।

ननु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणसन्निकर्षेण सर्वेषां तद्घटवतां स्मरणं न स्यात्, घटरूपस्य सामान्यरूपस्य तदानीमभावात्। किञ्च यत्र अद्य इन्द्रियसम्बन्धविषयकं घट इति ज्ञानं जातम्। श्वः तत्र इन्द्रियसम्बन्धं विनऽपि इन्द्रियसम्बन्धविशेष्यकज्ञानप्रकारीभूतसामान्यस्य सत्वात् घटत्वप्रकारकसर्वघटविशेष्यकम् अलौकिक-प्रत्यक्षं कुतो न जन्यते इति चेन्न, सामान्यलक्षणः इत्यत्र लक्षणशब्दस्य विषयोऽर्थः सामान्यं लक्षणं विषयो यस्य ज्ञानस्य सः सामान्यलक्षणः इति स्वीकारेण सामान्यज्ञानरूपप्रत्यासत्तेर्लाभेन घटरूपसामान्यस्याभावेऽपि तज्ज्ञानरूपप्रत्यासत्तेः सत्वेन अदोषात्। एवं इन्द्रियसम्बन्धविशेष्यकज्ञानप्रकारीभूतघटत्वरूपसामान्यसत्वेऽपि तज्ज्ञानाभावात् न परदिने घटविषयकालौकिकप्रत्यक्षमिति। परन्तु चक्षुस्संयोगं विना अनुमानादिना सामान्यज्ञानसत्वे समस्तघटालौकिकचाक्षुषप्रत्यक्षस्याभावात् यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किञ्चिद्धर्मि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्री अपेक्षिता। सा च सामग्री चक्षुस्संयोगालोकसंयोगादिरूपा। अत एव सामान्यज्ञानसत्वेऽपि अन्धकारादौ चक्षुषा अलौकिकसन्निकर्षजन्यं समस्तघटविषयकं चाक्षुषज्ञानं न जायते।

**ज्ञानलक्षणसन्निकर्षः -**

कारिकायामुच्यते-

**"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।"**


ISSN: 2320-740X

सुरभि चन्दनमित्यत्र यस्य-सौरभस्य, विषयी-ज्ञानं, तस्यैव-सौरभस्यैव, व्यापारः-सन्निकर्षः, ज्ञानलक्षणः इति।

प्रथमदिवसे चन्दनं घ्रात्वा **"सुरभि चन्दनमिति"** निश्चित्य दिवसान्तरेऽघ्रात्वैव दूरतश्चन्दनदर्शनमात्रेण **"सुरभि चन्दनमिति"** अन्यस्मै जिज्ञासमानाय वदति तदेतद्दिवसान्तरीये **"सुरभि चन्दनमिति"** ज्ञाने सौरभं, चन्दनं, चन्दनत्वं चेति भासते । तत्र चक्षुस्संयोगेन चन्दनज्ञानं, चक्षुस्संयुक्तसमवायेन चन्दनत्वज्ञानं लौकिकसन्निकर्षजन्यत्वात् लौकिकसन्निकर्षमुच्यते । परन्तु घ्राणसम्बन्धं बिनापि सौरभज्ञानं यत् जातं तत्तु चक्षुस्संयुक्तमनसंयुक्तात्समवेतज्ञानाख्येन सन्निकर्षेण संस्कारद्वारा जनितमलौकिकमेव प्रत्यक्षमिति।

सौरभस्याऽलौकिकभानं सौरभत्वात्मकसामान्यप्रत्यासत्त्या भवत्येव तथा च ज्ञानलक्षणा निरर्थिका इति चेत् न, समाधत्ते जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमेन सौरभत्वजातौ तु केनापि धर्मेण ज्ञानानुत्पादनात् सौरभत्वस्य स्वरूपतोऽलौकिकमानसः साक्षात्कारो ज्ञानलक्षणाजन्य एव भवतीति तदर्थं ज्ञानलक्षणायाः आवश्यकत्वात्।

ननु यदि सामान्यलक्षणाप्रत्यासत्तिर्ज्ञानरूपा ज्ञानलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यात् इति चेन्न, सामान्यलक्षणाप्रत्यासत्तिर्हि यद्विषयकं ज्ञानं तदाश्रयस्य ज्ञानं जनयति, ज्ञानलक्षणा तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति तयोर्भेदात्।

**योगजसन्निकर्षः -**

योगाभ्यासजनितः श्रुतिपुराणादिप्रतिपाद्यः धर्मविशेषः एव योगजस्न्निकर्षः। सः द्विविधः-

**१) युक्तयोगिसन्निकर्षः**

**२) युञ्जानयोगिसन्निकर्षश्चेति।**

युक्तः सिद्धः, युञ्जानः साधकः । योगास्थः, आरुरुक्षुः इति गीतायामुक्तः । तत्र युक्तयोगी तावद् योगजधर्मरूपसन्निकर्षसाहाय्येन आकाशपरमाण्वादिनिखिलपदार्थजातं सर्वदा साक्षात्कर्तुमर्हति । युञ्जानयोगी तु चिन्ताविशेषसहकृतयोगजधर्मसहकारेण तत् पदार्थजातं साक्षात्कर्तुमर्हतीति। उक्तं च कारिकायां-

**योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।**
**युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः॥**

***********

# सत्सङ्गतिः

(सत्सङ्गतिः कथय किं न करोति पुंसां संसर्गजा दोषगुणा भवन्ति)

✍ कु. रजत् सुयालः
शिक्षाशास्त्रिद्वितीयवर्षम्

सतां सज्जनानां या सङ्गतिः सत्सङ्गतिरुच्यते। मानवजीवने सत्सङ्गत्याः प्रभावः परिलक्ष्यते। सद्भिर्जनैः सह उषित्वा मनुष्यः स्वयं सद्गुणोपेतः प्रकृतिसरलः उदात्तभावभरितश्च भवति। सत्सङ्गत्यां मनुष्यः परमोन्नतिं प्राप्नोति, तस्य प्रतिष्ठा, प्रभावः, कीर्तिश्च वर्धते। अत एवोक्तम् -

"सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥"

मनुष्यः यादृशानां जनानां सङ्गतौ वसति सः तादृश एव सञ्जायते। सत्सङ्गत्या सः सज्जनः शिष्टः विनीतः व्यवहारकुशलश्च भवति। दुर्जनसङ्गाच्च मनुष्यः स्वयं दुर्जनः दुर्गुणोपेतः दुश्चरित्रः दुर्गतिश्च जायते। अत एव- "संसर्गजा दोषगुणा भवन्ति" इत्याभाणकं प्रसिद्धमेव, असतां सङ्गं सर्वथा परित्यज्य वयं सर्वदा सतां सङ्गतिं कुर्याम।

सत्सङ्गतिप्रभावेण क्षुद्रोऽपि जनः समुन्नतिं याति प्रतिष्ठां च लभते। तथा हि-

"काचः काञ्चनसंसर्गात् धत्ते मारकतिं द्युतिम्।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम्॥"

अपि च-

"यथोदयगिरेर्द्रव्यं सन्निकर्षेण दीप्यते।
तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते॥"

सत्सङ्गतिप्रभावाद् दुष्टोऽपि साधुर्भवति, मूर्खोऽपि प्रवीणतां याति। वाल्मीकेर्नाम को न जानाति, ऋषीणां सङ्गत्या स्वकीयं लुण्ठनवृत्तिं परित्यज्य कालान्तरे महर्षिपदवीम्प्राप्तवान्। काचः काञ्चन संसर्गात् मारकतिं द्युतिं बिभर्ति। कीटोऽपि सुमनसङ्गत् सतां नृपतीनां देवानां वा शिर आरोहति। अत एवोच्यते-

"कीटोऽपि सुमनस्सङ्गादारोहति सतां शिरः।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥"

सत्सङ्गतिः अस्माकं सर्वार्थसाधिका विद्यते। सा तु दुर्गुणान् पापान् च दूरीकरोति, धियः जडतां कौमत्यञ्च नाशयति, चेतः प्रसादयति, अन्तःकरणं विमलीकरोति, वाचि सत्यं सिञ्चति, कीर्तिञ्च


ISSN: 2320-740X

दिक्षु वितनोति। अत एव सत्सङ्गतिः किं भद्रं न वितनुते। उक्तं च--

"जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्सङ्गतिं कथय किं न करोति पुंसाम्॥"

***********

## विद्यावतां भागवते परीक्षा

✍ कु. राजेशभट्टः
शिक्षाशास्त्रिद्वितीयवर्षम्

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसम्मितम्।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥

भागवतपुराणस्य स्वरूपम् =>(भगवतः भगवत्या वा इदं, साऽस्य देवता इति वा अण्) श्रीमद् भागवतमहापुराणं नाम श्रीमद्व्यासरचितं प्रथिततमं पुराणम् । विद्यावतां भागवते परीक्षा इत्युक्तेर्भागवतस्य काठिन्यं श्रुतवरम्। एतद् भागवतं नाम परमं ज्योतिः। प्रकाशयति च एतद् ज्योतिः सचेतसां चेतांसि। मलिनात्मनां मलम् अपहरति ,अध्यात्मदहनं जागरयति ,विवेकं प्रबोधयति ,स्वान्तं शोधयत,पातयति,रोधयति,दर्शनतत्त्वम् अवगमयत, दुर्मतिं विगमयति, सद्भावसरणिं च सङ्गमयति। धार्मिकदृष्ट्या समाजे अद्यापि अस्य पुराणस्य महत्वं सर्वाधिकं विद्यते। अस्य भागवतस्य पुराणत्वे लोकाः सन्दिहते । ते हि देवीभागवतमेवाष्टादशपुराणान्तर्गतं मन्यते, त्रयोदशशतकोत्पले वोपदेवनामा वङ्गीयो विद्वान् श्रीमद्भागवतं प्रणीतवान् इति कथनमपि श्रीमद्भागवतस्य पुराणत्वं सन्देहे पातयतां केषाञ्चनावतुत्त्वविदमेव।

वस्तुतस्तु पुराणेषु अपेक्षितस्य ग्रन्थविस्तरस्य पुराणं

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्च लक्षणम्॥(वि. पु)

"पञ्चलक्षणम्" इत्यस्य स्वरूपनिर्देशस्य च भागवते सत्वेन तदयं महापुराणत्वं न सन्देहदोलाधिरुदं श्रीमद्भागवतं गायत्री मन्त्रेणारभ्यते तेनैव च समाप्तिमाप्नोति मन्ये महामन्त्रसम्पुटितमिदं न केवलं पुराणमेवापि तु महापुराणम् । अष्टादशपुराणेषु गणनाऽपि

भागवतशब्दसाधारण्यादुभयोः प्राप्नोति । तत्र श्रीमद्भागवतम् उत्कृष्टगुणशालितया प्राथम्यमर्हति । श्रीमद्भागवतपुराणानुसारं पुराणानां दश लक्षणानि सन्ति । महापुराणेषु दश लक्षणानि लघुषु च पुराणेषु केवलं पञ्च लक्षणानि भवन्ति। यथा उक्तं भागवतपुराणे-

दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया ॥(भा. पु. १२/७/२०)

सर्गः-(सृज+घञ्) श्रीमद्भागवतपुराणानुसारं सर्गस्य स्वरूपं निरुप्यते यत्-

अव्याकृत-गुणक्षोभान्महतस्त्रिवृत्तो इमे।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते॥(भा. पु. १२/७/११)

भागवतपुराणस्य महत्वम् - पुराणसाहित्ये "श्रीमद्भागवतम्" इत्यस्य पद्येषु गद्येष्वपि तादृशं चमत्कारं सौष्टवं प्रसादजननं विवेकालोकप्रसारकं च प्राप्यते यत् तेन विदुषां मनांसि हठादाकृष्यन्ते। नवेषु काव्येषु जातेष्वपि भागवतगता काव्यमाधुरी नापकृष्टतां गता । तत्पठतां मनांसि भागवतं काव्यमेव प्रथमं मन्यते ततोऽनन्तरं पुराणादि किञ्चिदन्यत्र । भागवतं हि ज्ञान-विभा-प्रसार समकालमेवाध्यात्मरतिं ब्रह्मनिष्ठां भगवद्भक्तिं सदाचारसरणिं च प्रस्तावीदिति धर्मार्थकाममोक्षात्मकस्य चतुर्वर्गस्य साधकमपि निर्णीयते । भगवद्भक्तिम् आश्रित्य कथं जीवनस्य त्राणम् अपवर्गावाप्तिश्चेति अत्रोपदिश्यते।

अत्र वेदान्ताभिमतस्य त्रिगुणातीतस्य ब्रह्मणो वर्णनम्। एवं विवेचनेन भागवतस्य गुणगौरवं भावोत्कर्षत्वं च नितरां प्रतीयते।

सत्यमिदं वचनम् -

श्रीमद्भागवतं पुराणममलं यद् वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
यत्र ज्ञान-विराग-भक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन् विपठनविचारणपरो भक्त्या विमुच्येन्नरः॥

उपसंहारः- श्रीमद्भागवतोक्तविषयेऽपि विदुषामियं सूक्तिः यद्-"विद्यावतां भागवते परीक्षा" इति । श्रीमद्भागवतमहापुराणे बहवः गूढार्थकाः क्लिष्टार्थकाश्च श्लोकाः वर्तन्ते येषां निर्धारणं सामान्यजनानां कृते दुष्करम्। विशिष्टज्ञानयुक्तप्रज्ञाः पण्डिताः एव तेषमर्थज्ञानं कर्तुं समर्थाः भवन्ति ये पण्डिताः सर्वशास्त्रे प्रवीणाः भवन्ति ते एव भागवतस्य यथार्थनिर्धारणं कर्तुं शक्नुवन्ति अन्ये तु न। अतः सत्यमेवोक्तम् – विद्यावतां भागवते परीक्षा इति।

**********


ISSN: 2320-740X

# सूक्ष्मशिक्षणम् (Micro Teaching)

✍ कु. सजीवचन्द्रराय:
शिक्षाशास्त्रिद्वितीयवर्षम्

**भूमिका-**

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः॥**

इत्येवं समेषामादर्शपूर्णः मार्गप्रदर्शकः उत्तमप्रेरकश्च गुरुरिति सर्वैः सुगद्यते। तथैव उच्यते –

**एकमेवाऽक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।**
**पृथिव्यां नास्ति तद्द्रव्यं यद् दत्त्वा चाऽनृणी भवेत्॥**

अध्यापकाः एव देशस्य निर्मातारः भवन्ति। अनेनाध्यापकेनैव कक्ष्याप्रकोष्ठेषु संस्कृतोन्नतिः चारित्र्यनिर्माणञ्च क्रियते इति शिक्षाविदः ब्रुवन्ति। समाजस्य देशस्य विश्वस्य च निर्माणे अध्यापकानां योगदानं महती महत्त्वपूर्णमस्ति। इत्थं देशस्य निर्माणे विकासे च अध्यापकेषु धैर्यं, सदसि वाक्पटुता, अभ्युदये क्षमा इत्यादयः गुणाः अपेक्षन्ते। अत एव उच्यते –

**"विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः"।**

एते गुणाः परिपूर्णपूर्वकं योग्याः अध्यापकाः आवश्यकाः भवेयुः तर्हि अध्यापकेभ्यः शिक्षणमेकं विशिष्टं कौशलं भवति। शिक्षणमिदं न सर्वजनसुलभसाध्यम्। यतो हि बहूनां कौशलानां समूहेनैव शिक्षणमिदं प्रचलति। तत्कौशलयुक्तयोग्यच्छात्राध्यापकानां निर्माणं शिक्षक-प्रशिक्षणकार्यक्रमेणैव सम्पाद्यते। छात्राध्यापकाः अध्यापनाय गमनात्पूर्वं एतेषु विशिष्ट-शिक्षणकौशलेषु अधिकाराः अनेन शिक्षकप्रशिक्षणकार्यक्रमेण अध्यापकेन सम्पादनीयः वर्तते। शिक्षकेण विशिष्टशिक्षणकौशलेषु अधिकारः सम्पादनीयश्चेत् अध्यापकैः शिक्षणप्रशिक्षणकार्यक्रमेषु नूतनमत्यन्तमुद्दिष्टञ्च उपयुज्यमानेषु शिक्षणकौशलेषु "सूक्ष्मशिक्षण" चयनीयम्।

**सूक्ष्मशिक्षणस्य पृष्टभूमिः -** शिक्षणं किञ्चन कौशलम्। यानि विशिष्टशिक्षणकौशलानि विद्यन्ते तेषां विशिष्टाभ्यासाय शिक्षाशास्त्रिणः बहुकालात् विचारयन्तः वर्तन्ते। छात्राध्यापकानां शिक्षणप्रशिक्षणाभ्यासाय त्रिंशत् चत्वारिंशत् पाठाः शिक्षकैः प्रदत्ता वर्तन्ते। एतेषु पाठेषु छात्राध्यापकाः अनेकान् विषयान् पाठयन्तः प्रायोगिकशिक्षणं प्राप्नुवन्ति। परन्तु अनेन लक्षितोद्देश्यं सम्पूर्णतया अधिगन्तुं न शक्यते।

क्रमेऽस्मिन् १९६१ तमे वत्सरे अमेरिकादेशस्य स्टेनफोर्डविश्वविद्यालये एकः उपक्रमः समारब्धः।

एलिनवर्यस्य च मार्गदर्शने कैथ एचिसन्नामकः कश्चन शोधच्छात्रः अनुसन्धानं कुर्वन् आसीत् । १९६३ तमे वत्सरे अस्य नामकरणं सूक्ष्मशिक्षणमिति सञ्जातम् । क्रमशः एतेन विविधविशेषेण शिक्षकप्रशिक्षणमहाविद्यालयेषु स्थानमवाप । इत्थं प्रकारेण अस्य भारते प्रवेशः १९७० तमे वत्सरे सञ्जातः । मद्रास्, कलकत्ताचण्डीगडनगरेषु शिक्षाशास्त्रिभिः अस्योपयोगः प्रायोगिकरूपेण कृतो वर्तते । एवं संस्कृतशिक्षाक्षेत्रे शिक्षाशास्त्रिणः अस्योपयोगं प्रायोगिकरूपेण कुर्वन्तः सन्ति इति तु इदानीन्तन काले दरीदृश्यते ।

**सूक्ष्मशिक्षणस्यार्थः परिभाषा च -** सूक्ष्मशिक्षणं प्रशिक्षणस्य काचित् प्रक्रिया । एतस्य उद्देश्यं नियमिताध्यापनप्रक्रियास्तु काठिन्यस्य सरलीकरणम् । इदं सूक्ष्मशिक्षणं शिक्षणप्रशिक्षणकार्यक्रमे उपयुज्यमानेषु विधानेषु अत्यन्तं विशिष्टं नूतनञ्च कौशलं वर्तते । अयं तु न केवलं अध्यापनविधिः प्रशिक्षणतन्त्रमित्यपि वक्तुं शक्यते । सूक्ष्मशिक्षणमिदमाङ्ग्लभाषायां Micro Teaching इति उच्यते । Micro इति पदं लघु इत्यर्थे स्वीक्रियते । अथवा सूक्ष्मीकृतकक्ष्याशिक्षणमिति कथ्यते । सूक्ष्मशिक्षणे पाठस्य मापदण्डः ५-१० निमेषपर्यन्तं निर्धारितः भवति । अध्यापनकौशलानां प्रशिक्षणार्थं सूक्ष्मशिक्षणमेका परिकल्पिता सरला प्रशिक्षणव्यवस्था इति सुगद्यते । विषयेऽस्मिन् Allen and Eve महोदयौ इत्थमवदतां यत् – सूक्ष्मशिक्षणमेका नियन्त्रिताभ्यासपद्धतिः यत्र नियन्त्रितपरिस्थितिषु शिक्षणाभ्यासं कर्तुञ्चानुकूल्यं कल्पयति इति ।

सूक्ष्मशिक्षणस्यार्थः प्रतिस्फुटयितुं केषाञ्चन शिक्षाविदां विचाराः परिभाषात्वेन अत्र प्रस्तूयन्ते-

१. **एलेन् (Dwight Allen) वर्यानुसारं “सूक्ष्मशिक्षणमेका व्यवस्थितशिक्षणं, येन कक्षायाः आकारः समयसीमा च मापयितुं शक्यते”।**
२. **बी. एम्. शोर् (B. M. Shore) महोदयानुसारं “सूक्ष्मशिक्षणम् अल्पसमयात्मकः, अल्पच्छात्रात्मकः, अल्पक्रियाकलापात्मकश्च कश्चन समुचितशिक्षणप्रविधिः”।**
३. **प्रो. बी. के. पासी (Prof. B. K. Passi ) महोदयः निगदति यत् “सूक्ष्मशिक्षणं कश्चन प्रशिक्षणविधिः यत्र छात्राध्यापकः किञ्चन एकं शिक्षणकौशलं प्रयुञ्जानः अल्पावधौ लघुछात्रसमूहं कञ्चित् एकं सम्प्रत्ययं पाठयति”।**
४. **“पाठ्यांशमपि सूक्ष्मीकृत्य क्रमेण एकैकस्य शिक्षणकौशलस्य अभ्यासः भवति”।**

**सूक्ष्मशिक्षणस्य आधारभूतसिद्धान्तः**

१. शिक्षणमेका सङ्कीर्णप्रक्रिया । प्रक्रियैषा सरलीकरणीया ।
२. शिक्षणकौशलाधिगमे क्रमबद्धः प्रतिपुष्टियुताभ्यासः सहायको भवति ।


ISSN: 2320-740X

३. सूक्ष्मशिक्षणे कक्ष्याशिक्षणस्य सङ्कीर्णतात्मकाकारः सरलीकरणीयः।

४. कौशलानि सूक्ष्मीकृतशिक्षणपरिस्थितिषु पुनः पुनः अभ्यासपूर्वकं सञ्चालनीयानि।

**सूक्ष्मशिक्षणस्य प्रक्रिया -** आदौ अस्यां प्रक्रियायां छात्राः चीयन्ते ततः परं कौशलेषु एकं कौशलं कृत्वा सरलविषयमपि चित्वा प्राप्तशिक्षणानुगुणं लघुसमूहेषु अध्यापयन्ति अध्यापकाः। अत्र शिक्षणं चक्ररूपेण प्रदीयते। अत एव सूक्ष्मशिक्षणस्य अपरं नाम सूक्ष्मशिक्षणचक्रमिति (Teach reteach cycle of toining) उच्यते। सूक्ष्मशिक्षणचक्रमिदं निर्दिष्टसमयानुसारं षट्सु भागेषु विभज्यते। ते –

**१. योजना (Plan) = ६ निमेषाः**

**२. शिक्षणम् (Teaching) = ६ निमेषाः**

**३. प्रतिपुष्टिः (Feed back) = ६निमेषाः**

**४. पुनर्योजना (Re plan) = १२ निमेषाः**

**५. पुनश्शिक्षणम् (Re teaching) = ६ निमेषाः**

**६. पुनः प्रतिपुष्टिः (Re feed back) = ६ निमेषाः**

सम्पूर्णरूपेण ३६ निमेषाः अस्यां प्रक्रियायां स्वीक्रियन्ते।

**शिक्षणकौशलानि -** सूक्ष्मशिक्षणस्य कानिचन शिक्षणकौशलानि इत्थं प्रतिपाद्यन्ते –

**१.विषयव्यवस्थापनम्, २. शिक्षणोद्देश्यलेखनम्, ३. पाठप्रस्तुत्यै सन्नद्धीकरणम्, ४. पाठप्रस्तुतिकरणम्, ५. प्रतिपुष्टिः प्रस्तुतिः, ६. पुरस्कारदण्डप्रयोगः, ७. प्रश्नकरणम्, ८. व्याख्यानम्, ९. शिक्षणोपकरणप्रयोगः, १०. प्रेरकवैविध्यम्, ११. पुनर्बलनम्, १२. प्रतिक्रियानिर्वहणम्, १३. शाब्दिकाशाब्दिकसङ्केतप्रयोगः, १४. श्यामपट्टप्रयोगः** च इत्यादीनि।

निष्कर्षरूपेण एवं वक्तुं शक्नुमः शिक्षाक्षेत्रे विद्याकार्यक्रमेषु उत्तमोत्तमशिक्षणाय प्रशिक्षिताः उत्तमोत्तमाः अध्यापकाः एव भवेयुः। समेभ्यः अध्यापकेभ्यः अनेन प्रशिक्षणेन बहूपयोगाय कल्पयतीति तु कथने बाधः नास्ति। यत्र गुणाः तत्र दोषाः अपि विद्यन्ते। कतिपयन्यूनताः सन्त्यपि गुणाधिक्येन अस्योपयोगः करणीयः। अतः विषयेऽस्मिन् सर्वैः अध्यापकशिक्षणमहाविद्यालयैः तत्सम्बन्धाध्यापकैश्च दृष्टिः प्रसारणीया इति।

**********

# व्याकरणशिक्षणे प्रणाल्यः युक्तयश्च

✍ कु. संजयदत्तभट्टः
शिक्षाशास्त्रिद्वितीयवर्षम्

रुचिकरं योजनाबध्दं क्रमबध्दं च शिक्षणमेवाधिगमं जनयेत् । तदर्थं विभिन्नाः विधयः परिकल्पिताः परिवर्तिताश्च सन्ति । तत्र साहाय्यमाचरन्ति प्रणाल्यः युक्तयश्च । अधिगमस्य कारणभूतं , सहायकम् , अभिवर्धकञ्च यद् भवति तदेव सार्थकशिक्षणम् । तच्च एताभिः प्रणालीभिः , युक्तिभिश्च परिष्कृतं भवति । Garlick महोदयः कथयति- 'एतानि अध्यापकस्य साधनानि भवन्ति । एतेषां समुचितप्रयोगेण अध्यापनं सफलं भवति । यतः किं पठनीयम् ? कया व्यवस्थया ? कथम् ? इति विचिकित्सायां प्रणाल्यः प्रमुखं स्थानं भजन्ते । किमर्थं प्रणाल्यः इत्यत्र पञ्चधा कारणानि प्रतिपादयति – John Mander महोदयः-

१. अल्पीयसि काले विषयवस्तुनः प्रतिपादने उपकुर्वन्ति ।
२. छात्राः प्रणालीनामुपयोगेन प्रभाविताः भवन्ति , तेषां मनसि विषयवस्तु च चिरं तिष्ठति ।
३. रुचिमुत्पादयन्ति अभिवर्धयन्ति च ।
४. अनुभूतिमाधारीकृत्य विषयवस्तूनि अवगमयन्ति ।
५. प्रकृतविषयं विविधविषयैः सह समायोजयन्ति । विषयः प्रणालीभिः संयुक्ता एव पूर्णाः भवन्ति । यदि विधिः अवयवी, तत्र प्रणाल्यः अवयवाः । अवयवैर्विनाऽवयविनोऽसत्वात् । एवं शिक्षणे विविधाः प्रणाल्यः प्रामुख्यं भजन्ते । बह्व्यः प्रणाल्यः वर्तन्ते । तत्र प्रमुखप्रणाल्यः -

१. व्याख्याप्रणाली,
२. स्पष्टीकरणप्रणाली ,
३. वर्णन–विवरणप्रणाल्यौ च वर्तेते ।

(क) **व्याख्याप्रणाली-** "पदार्थज्ञानपूर्वकम् उदाहरणप्रत्युदाहरणानि प्रदाय, आक्षेपादिकं विधाय सिध्दान्तस्थापनमेव व्याख्या" इति । व्याख्यायां मूलभावानां विचाराणां च समुचितं सन्तुलितं च विवेचनं भवेत् । प्रसंगनिर्देशनं व्याख्यायाः प्रमुखं अनिवार्यम् अङ्गं भवति । A. H. Garlick महोदयः कथयति कस्यापि पदस्य पदसमूहस्य वा जटिलतायाः दूरीकरणाय या प्रक्रिया अनुसृज्यते सैव व्याख्या " इति । अर्थात् काठिन्यनिवारणं , स्पष्टप्रतिपत्तिश्चोद्देश्यं व्याख्यायाः , अस्याः प्रयोगः सर्वत्र भवितुमर्हति । साहित्यम् , इतिहासः, भूगोलशास्त्रम्, विज्ञानं, व्याकरणमित्यादिषु । इयं प्रणाली अव्याप्त्यतिव्याप्तिदोषमुक्तं तत्वमवगमयति । यथा- अस्माकं शास्त्रेषु प्रतिपदमादाय

तदर्थप्रतिपादनपूर्वकं व्याख्यानं क्रियते । व्याख्यायाः उद्देश्यं बौध्दिकाभिरुचेः ग्रहणशक्तेः अवगमनशक्तेश्च अभिवर्धनमेव। व्याख्या कमपि विषयं आधारीकृत्य पूर्णा पाक्षिकी वा भवितुमर्हति। परन्तु सर्वदा पूर्णव्याख्यानमावश्यकम्। अर्धमध्यापकः व्याख्याति अर्धञ्च बालः स्वबुध्याऽवगच्छेत्। अध्यापकः विभिन्नप्रकारैः छात्राणाम् अवधानमाकृष्य व्याख्याति। अस्मिन् प्रसङ्गे Pauton महोदयः मार्गं प्रदर्शयति । व्याख्यानप्रक्रियायां अध्यापकः छात्रैः सह मानसिकं सम्बन्धं स्थापयेत् , तेषां चिन्तनमुत्तेजयेत् , तान् प्रश्नान् पृच्छेत् , शङ्कां समाधेयात् , समस्यां मुक्तरूपेण विचारयेत् , अन्ते मूल्याङ्कनञ्च कुर्यात्" इति। व्याख्या छात्राध्यापकयोर्मध्ये सम्पर्कं स्थापयति। व्याख्यानावसरे विभिन्नाः युक्तयश्च प्रयुक्ताः भवन्ति।

(ख)- **शिक्षकै ध्यातव्याः विषयाः –**

१. व्याख्यानं सोद्देश्यं ,सरलं , शुद्धं ,स्पष्टं च भवेत्।
२. व्याख्यानं स्तरानुगुणं स्यात्।
३. व्याख्यानं जटिलं न भवेत् यतः जटिलतायाः दूरीकरणमेव अस्योद्देश्यं भवति।
४. प्रेरकप्रोत्साहनं च स्यात्।
५. व्याख्यानं सामयिकं तर्कसङ्गतञ्च स्यात्।
६. यथोचितं उपकरणैः सम्पुष्टं भवेत्।
७. व्यावहारिकोदाहरणैः सम्पुष्टं सत् जीवनेन सम्बन्धं स्थापयेत्।
८. व्याख्यानं रुच्युत्पादकं स्यात्।

**(ग) स्पष्टीकरणप्रणाली-** स्पष्टन्नाम विकसितं रूपं स्फुटम् । तत्त्वानामुचितरूपेण अभिव्यक्तिरेव स्पष्टीकरणमिति। H. Garlick महोदयः कथयति सपष्टीकरणं कमपि भावार्थं वा स्यम्यगुद्घाटयति। विचाराणां सरलरीत्या आविष्कारः एव स्पष्टीकरणम् इति । S.k. Kacharv महोदयः कथयति नूतनतत्त्वानां स्पष्टरूपेण बोधनमेव स्पष्टीकरणम् इति । तच्च कक्षायाः स्तरानुगुणं भवेत् । स्पष्टीकरणावसरे ध्यातव्यः-

१. स्पष्टीकरणं सुबोधं सुनिश्चितं च भवेत्।
२. भाषा स्वाभाविकी, छात्रैरवगम्या च स्यात्।
३. उचितगत्या स्पष्टीकरणं कुर्यात् शिक्षकः।
४. स्पष्टीकरणावसरे शिक्षकः स्वयं च प्रश्नान् पृच्छेत् छात्रान् च प्रोत्साहयेत्।
५. स्पष्टीकरणात्पूर्वं क्रियमाणः प्रस्तावः संक्षिप्तः स्यात्।
६. विषयवस्तुनः संक्षिप्तपरिचयः श्यामपट्टे लेख्यः।

७. अध्यापकः पाठ्यांशं यथोचितं विभज्य सम्बन्धस्थापनपूर्वकं स्पष्टीकरणं कुर्यात्।

**(घ) वर्णन-विवरणप्रणाल्यौ-** वर्णनन्नाम कस्यापि वस्तुनः शाब्दिकं विवरणम्। अत्र A.K. Garlick महोदयः स्पष्टयति-"कस्यापि वस्तुनः शब्दैः, सङ्केतैः, उभयथाऽपि वा प्रतिपादनं वर्णनम्। इदं वस्तुनः शब्दचित्रमेव" इति। वस्तुतः वर्णनं स्पष्टीकरणस्यैव परिवर्तितं रूपं भवति। परन्तु स्पष्टीकरणं व्यापकं, वर्णनमांशिकं च वर्तते। कस्यचित् वस्तुनः स्पष्टीकरणकाले तदंशस्य वर्णनमपि विधीयते। अस्योपयोगः इतिहासः साहित्यम् इत्यादिषु विषयेषु भवति। गणितं व्याकरणम् इत्यादिषु तथाऽस्योपयोगः न दृश्यते। विवरणमप्येतादृशमेव विवरणे काचन घटना वर्ण्यते। वर्णनं किमपि वस्तु आधारीकृत्य प्रवर्तते। विवरणं कामपि घटनामाधारीकृत्य विषयमुपस्थापयति। Geeen Birchenough महोदयौ कथयतः विवरणं नाम क्रमबद्धघटनायाः वर्णनम् इति। विवरणप्रणाली कामपि घटनां छात्राणां मनसि सुदृढं व्यवस्थापयति।

**(ङ) अत्र अवधेयांशाः –**

१. प्रयोगकाले भाषा सरला स्पष्टा च स्यात्।
२. यस्य वस्तुनः विषयस्य वा वर्णनं विवरणं वा स्यात्।
३. चिकीर्षत्यध्यापकः तद्विषये सुस्पष्टं व्याख्यानम्।
४. साभिनयं ससंकेतं वर्णनं कुर्यात् अध्यापकः।
५. छात्राणां रुचिः वयः अनुभवः इत्यादि विषयान् विज्ञाय तदनुकूलम् एते प्रणाल्यौ भवेताम्।

**(च) शिक्षणे युक्तयः -** प्रणाल्यः यदि मौखिकाः भवेयुः तर्हि नीरसतामुत्पादयेयुः अतः प्रणालीनां प्रयोगावसरे विविधयुक्तयः अस्माभिः प्रयोक्तव्यम्। युक्तयः विषयवस्तु स्पष्टयन्ति कठिनमपि विषयं अल्पीयसि काले प्रतिपादयन्ति च। युक्तयः बह्व्यो वर्तन्ते। तत्र प्रमुखाः – अनुवादः, अभिनयः, पर्यायः, तुलना, विग्रहः, व्युत्पत्तिः, विश्लेषणम् इत्यादि।

१. **अनुवादः**- भाषाशिक्षणे कस्यापि शब्दस्य विषयस्य वा प्रतिपादनार्थं युक्तिरियम् आश्रियते। अत्र छात्रः स्वमातृभाषामाध्यमेन विषयं झटिति अवगच्छति। चार्लेस् वुड्स् घोषणा पत्रादारभ्य १९८६ गत नूतनशिक्षनीतिपर्यन्तं प्रादेशिकभाषा एव शिक्षणमाध्यमभाषा स्यात् इति स्पष्टम् उद्घोषितवन्तः। अनेन अनुवादयुक्तीनां कृते सर्वोच्चस्थानं लब्धम्।
२. **अभिनयः**- अध्यापकः कमपि शब्दमभिनयद्वारा बोधयति। अत्र प्रत्यक्षरूपेणार्थस्यावगमनं भवति। यथा-गच्छति, हसति, इति पदानां बोधनमभिनयद्वारा सुलभसाध्यं भवति।


ISSN: 2320-740X

३. **पर्यायः**- कठिनशब्दस्य अपरिचितस्य नवशब्दस्य वा तत्पर्यायशब्देन बोधनमेव पर्याययुक्तिः। यथा-भुजङ्गमः इत्यस्य सर्पः इति पर्यायेण बोधः सुलभतया भवेत्।

४. **तुलना**-विषयद्वयस्य तुलनापूर्वकं विषयज्ञानस्य दृढीकरणं अनया युक्त्या कार्यते। कमपि शब्दं तत्समानेनासमानेन वा शब्देन तुलनां विधाय स्पष्टयितुं शक्नोति शिक्षकः।

५. **विग्रहः**- विग्रहः वाक्यद्वारा शब्दस्यार्थबोधः कार्यते। यथा-दाशरथिः इत्यस्य" दशरथस्य पुत्रः" इति विग्रहस्य कथनेन छात्राः दाशरथिः- रामः इत्यवगच्छेयुः।

६. **विश्लेषणम्**- शब्दस्य अर्थस्य वा विश्लेषणं विधायार्थस्य प्रतिपादनं क्रियते।सन्दिग्धानां समस्तानां च पदानां व्याख्यानावसरे इयं युक्तिः बहूपकरोति।

७. **उपकरणप्रदर्शनम्**-विविधोपकरणानां माध्यमेन शाब्दबोधं जनयत्यधापकः। रेखाचित्रं, चित्रं, वस्तु, प्रतिकृतिः, इतराणि दृश्याणि श्रव्याणि च उपकरणानि अत्र प्रदर्शितानि भवन्ति।

**(छ)-व्याकरणशिक्षणस्य विभिन्नाः प्रणाल्यः** - अनौपचारिकप्रणाली- शिक्षकः वर्णोच्चारणे,साधुशब्दप्रयोगे च जागरूकः स्यात्। व्याकरणस्य साधारणनियमैः छात्राः क्रमेण अवगताः स्युः। प्रारम्भिकस्तरे भाषाध्यापने इयं प्रणाली उपयुक्ता स्यात्। शुद्धोच्चारणं साधुशब्दज्ञानं पुरुष-लिङ्ग-विभक्ति-वचनानां प्रयोगश्च भाषाद्वारा अध्याप्यते। संस्कृतभाषायाः विस्तृतशब्दसमूहस्य साधुत्वं व्याकरणज्ञानं विना न सम्भवति।

१. प्रयोगप्रणाली- इयं प्रणाली अनौपचारिकप्रणाल्याः विस्तृतं रूपं विद्यते। व्याकरणनियमानां भाषायां प्रयोगद्वारा व्याकरणशिक्षणं सम्पाद्यते। कारक-विभक्तीमुपपदविभक्तीनां च प्रयोगः पाठेषु विन्यस्तो भवति। अनुवादे वाक्यरचनायाञ्च तेषां प्रयोगानां अभ्यासाय प्राध्यान्यं दीयते। सन्धिसमासादिविषयेऽपि बहूनामुदाहरणानां सङ्कलनेन अभ्यासः कार्यते। अत्र सरलात् कठिनं प्रति इत्याद्यधिगमनियमानां प्रयोगो भवति।

२. सहयोगप्रणाली- भाषायाः साहित्यस्य च अध्ययने व्याकरणमुपकारकं भवति। संस्कृतसाहित्याध्ययने तु व्याकरणज्ञानमपहार्यं भवति। साहित्यस्य सूक्ष्मांशानां विश्लेषणं व्याकरणं आदृत्य क्रियते। व्याकरणज्ञानं विना संस्कृतकाव्यानामध्ययनं रसास्वादञ्च न सम्भवति। एवं साहित्येन व्याकरणस्य बोधनमेव सप्रयोगप्रणाली इत्युच्यते।

३. प्राचीनप्रणाली - प्राचीनकालादारभ्य भारते व्याकणाध्यापने आश्रीयमाणैषा प्रणाली कश्चित् सूत्रप्रणाली, सिद्धान्तप्रणाली इत्यपि व्यवह्नियते। अस्यां प्रणाल्यां व्याकणाध्यापनाय कश्चन

व्याकणग्रन्थः पाठ्यपुस्तकरूपेण उपयुज्यते । संज्ञानां परिभाषाणाञ्च साहाय्येन विधिसूत्राणां व्याख्यानम्, उदाहरणानि, प्रत्युदाहरणानि विमर्शः समीक्षा इत्येतत्सर्वमत्र अन्तर्भवति।

***********

## काव्यस्यात्मा ध्वनिः तद्भेदाश्च

✍ कु. ओम् प्रकाशपण्डा

शिक्षाशास्त्री द्वितीयवर्षम्

काव्यस्यात्मतत्वमधिकृत्य काव्यालङ्कारशास्त्रे षट् सम्प्रदायाः प्रादुरभूवन्। काव्यस्यात्मा इति जिज्ञासामवलम्ब्य वहवः विद्वांसः स्वं स्वं मतं प्रास्तुवन्। तत्र भरताचार्येण रसः, वामनाचार्येण रीतिः, क्षेमेन्द्राचार्येण औचित्यम्, कुन्तकाचार्येण वक्रोक्तिः, भामहाचार्येण अलङ्कारः, आनन्दवर्धनाचार्येण ध्वनिरिति प्रतिपादितम्। काव्यस्यात्मा ध्वनिरिति स्वीक्रियते चेत्, कोऽयं ध्वनिरिति प्रश्नः समुदेति ! तन्निवृत्तये अस्य निर्वचनमुच्यते – ध्वन्यते इति कर्मव्युत्पत्या व्यङ्ग्योर्थः ध्वनिः इति। ध्वनिः शब्देन व्यञ्जकशब्दार्थयोः, वस्त्वलङ्काररसरूपव्यङ्ग्यार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यप्रधानकाव्यस्य च ग्रहणं कर्तव्यम्।

ध्वनिस्वरूपं प्रकाशयन् ध्वन्यालोककारः वर्णयति- **"काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः"**। बुधैः काव्यतत्वविद्भिः काव्यस्यात्मा ध्वनिरिति कथितः। तर्हि ध्वनेः स्वरूपं किमिति जिज्ञासा उदेति। ततः प्राक् उच्यते ध्वनेर्भूमिका यस्यां ध्वनि प्रतिष्ठापितोऽस्ति-

**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥**

अत्र वाच्यः इत्यनेन वस्त्वलङ्कारौ गृह्येते। एतौ यदा व्यञ्जनावृत्या काव्ये अभिव्यक्तौ भवतस्तदा ध्वनिः व्यपदेश्यौ सन्तौ काव्यस्यात्मानौ सहृदयश्लाघ्यौ च भवतः। मया चिन्त्यते अनेन अभिप्रायेणैव ग्रन्थकारः सहृदयश्लाघ्यस्य अर्थस्य भेदद्वयं कृतवान्। वाच्यपदेन वस्त्वलङ्काररूपध्वनिः गृह्यते। **रस्यते इति रसः** इत्यनया व्युत्पत्या आस्वाद एव रसः। रसस्य कदाचिदपि अभिधानं न भवति। अपि तु विभावानुभावव्यभिचारिभिः सम्मिलितः स्थायिभाव एव रसः इति प्रतीयते। परन्तु तन्न प्रतीयते। रसादिशब्दानामप्रयोगे विभावादीनां प्रयोगे च प्रतीयते। अतः रसः प्रतीयमानोऽस्ति।

किं तर्हि प्रतीयमानोऽर्थः इति जिज्ञासायामुच्यते-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**

 ISSN: 2320-740X

**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥**

यथा ह्यङ्गनासु विविधालङ्कारेभ्यः अतिरिक्तमेव लावण्यं पृथक्तया प्रतीयते। तद्वदेव- काव्ये प्रतीयमानार्थोऽपि प्रतिभाति। यच्च सहृदय आह्लादकारी। सा एव कविता सहृदयहारिणी भवति- यस्यां विहिता कामिनीकुचकलशवद् अन्तर्निहिता रसादिव्यङ्ग्यपदार्थाः रसिकजनानां कृते अलौकिकाह्लादकारी प्रतीयन्ते। अत्र सहृदयः कः इति जिज्ञासायामुच्यते- सहृदय पदार्थ एव विचार्यते। सहृदयशब्दः अत्र पारिभाषिकः। येषां सामाजिकानां चित्तं काव्यस्य मुहुर्मुहुः अनुशीलनाभ्यासवशाद् स्वच्छं दर्पणमिव निर्मलं भवति। तत्र वर्णनीयवस्तुना सहैव तन्मयीभवनयोग्यता च जायते ते एव सहृदय पदवाच्या। तथाचोक्तम्-

**योऽर्थः सहृदयसंवादी तस्य भावो रसोद्भवः।**
**शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना ॥**

एवं सति सहृदय प्रशंसनीय अर्थः काव्यात्मा । अस्यार्थस्य प्राधान्ये ध्वनिरित्युच्यते। किं तर्हि ध्वनेः लक्षणम् इति जिज्ञासायामुच्यते-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः सः ध्वनिरिति सूरिभिः कथितः ॥**

अर्थात् यत्र वाच्यार्थः स्वयं स्वाभिधेयार्थं गौणं कृत्वा व्यङ्ग्यार्थं प्रकाशयति सः काव्यविशेषः ध्वनिः। सः एव व्यङ्ग्यार्थः प्रतीयमानार्थः इत्यभिधीयते । तथैव मम्मटः स्वीये काव्यप्रकाशे वक्ति- **"इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः।"** यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्राधान्यं भवति तदुत्तमं काव्यम्। इदमेव ध्वनिकाव्यमिति कथ्यते। तत्र मम्मटः उदाहरति-

**"निःशेषच्युतचन्दनं....................पुनस्तस्याधमस्यान्तिकम् ॥"**

श्लोकेऽस्मिन् तदान्तिकमेव रन्तुं गतासि इति व्यङ्ग्यः स्नातुमितोगतासि इति वाच्यादपेक्षया अतिशायिनी भवति। अतः व्यङ्ग्यार्थः एव काव्यस्य चमत्कारात्मा । सः एव ध्वनिः इत्यभिधीयते । अस्यार्थः उच्यते-

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥**

आदिकवेः वाल्मीकेः निहतसहचरीविरहकातरक्रौञ्चक्रन्दनजनितः शोक एव श्लोकत्वेन परिणतः। सैव काव्यचमत्कारात्मा ध्वनिः।

पश्चात् च ध्वनिभेदनिरूपणावसरे व्यङ्ग्यार्थमुखेन तद्भेदं ध्वन्यालोकस्य तृतीयोद्योते विस्तरेण निरूपयति ग्रन्थकारः। परन्तु निबन्धस्य विस्तरभयात् मया संक्षेपेण तालिकोदाहरणसहितं निरूप्यते-

# ध्वनिः

(अविवक्षितवाच्यस्य पदवाक्यप्रकाशता।
तदन्यस्यानुरणनरूपव्यङ्ग्यस्य च ध्वनेः।।)

- अविवक्षितवाच्यध्वनिः (लक्षणामूलध्वनिः)
  - अर्थान्तरसंक्रमितवाच्यः
    - पदगत(रामेण .......प्रियेनोचितम्।)
    - वाक्यगत(सत्तैता समिधः श्रियः।)
  - अत्यन्ततिरस्कृतवाच्यः
    - पदगत(विषमयितः.......कालः।।)
    - वाक्यगत(या निशा सर्वभूतानां........मुनेः।।)
- विवक्षितान्यपरवाच्यध्वनिः (अभिधामूलध्वनिः)
  - संलक्ष्यक्रमव्यङ्ग्यः
    - शब्दशक्त्युद्भवः
      - पदगत(पातुं....जडः कृतोऽहम्।।)
      - वाक्यगत(वृत्तेऽस्मिन्....त्वं शेषः।।)
    - अर्थशक्त्युद्भवः
      - कविप्रौढोक्तिः
        - पदगत(असमर्पितमपि....मधुमासलच्छिमुहम्।)
        - वाक्यगत(सज्जयति....शरान्।।)
      - स्वतःसम्भवी
        - पदगत(वाणिजक!....यावल्लुलितालकमुखी गृहे परिष्वजते स्नुषा।।)
        - वाक्यगत(शिखिपिच्छकर्णपुरा....सपत्नीनाम्।।)
  - असंलक्ष्यक्रमव्यङ्ग्यः**

**[असंलक्ष्यक्रमव्यङ्ग्यस्तु रसादिरूपः एक एव गण्यते। यद्यपि रसादिरित्यादिपदेन-भाव-रसाभास-भावाभास-भावोदय-भावशान्ति-भावसन्धि-भावसबलता इत्यष्टानां ग्रहणम्। तत्पुनः वर्ण-पद-वाक्य-प्रबन्ध-संघटनासु च दीप्यते।]

**********


ISSN: 2320-740X

# श्रीमद्भगवद्गीतायाम् अभिक्रमिताधिगमस्य विवेचनम्

✍ कु. शिवम् कुमार शुक्लः

शिक्षाशास्त्रविभागः

शिक्षणाधिगमप्रक्रियायाः विकासार्थम् अभिक्रमिताधिगमः आविष्कृतः । अभिक्रमिताधिगमस्य जन्मदाता प्रो. बी. एफ्. स्किनर् महोदयः इति शिक्षाशास्त्रिणः अभिप्रयन्ति। वस्तुतः श्रीमद्भगवद्गीतायां अर्जुनाय मोहत्यागार्थं श्रीकृष्णेन प्रदत्तस्य उपदेशस्य प्रक्रिया एव अभिक्रमिताधिगमः।

"अभिक्रमितः" इति शब्दस्य अर्थः क्रमबद्धः अथवा योजनाबद्धः। "अधिगमः" इत्यस्य अर्थः अध्ययनम् । अभिक्रमिताधिगमः छात्राणां पुरतः पाठ्यवस्तूनि कतिपयेषु लघु-लघु-विषयेषु विभज्य सोपानरूपेण उपस्थापयति। छात्रः स्वयं ज्ञानार्जनं कुर्वन् ज्ञातात् अज्ञातं प्रति अग्रे सरति। अधिगन्ता अग्रे गमनात् प्राक् पूर्वोक्तं विषयं सम्यक् अवगच्छति । अत्र अधिगन्ता सर्वदा स्वीयदोषान् ज्ञातुं शक्नोति। अभिक्रमिताधिगमे विद्यार्थी प्रथमसोपाने ज्ञानशून्यः भवति। क्रमशः ज्ञानार्जनं कुर्वन् अन्तिमे सोपाने पूर्णज्ञाता भवति।




रूपधारारूपेण अभिक्रमिताधिगमस्य एकं चित्रम्

रेखीयाभिक्रमिताधिगमः अभिक्रमिताधिगमस्य एकः प्रकारः। अयं कश्चन सामग्रीक्रमः, यत्र छात्रः रेखीयक्रमेण निश्चितसोपानेन उत्तीर्णतां सम्प्राप्य अग्रे सरति । अभिक्रमेऽस्मिन् यानि पदानि निर्मीयन्ते तानि एकस्यां सरलरेखायां भवन्ति। अत्र शिक्षार्थिनां पुरतः शिक्षणसामग्र्याः एकः लघ्वंशः रूपाधारत्वेन सोपानरूपेण वा प्रस्तूयते। शिक्षार्थिनाम् उत्तरप्राप्तेरनन्तरं तेभ्यः साधूत्तरं प्रदर्श्यते तेन छात्राः पुनर्बलनं प्राप्नुवन्ति । एवम् एकस्य रूपाधारस्य अनन्तरं प्रश्नः, प्रश्नस्य अनन्तरं पुनर्बलनं,

पुनर्बलनस्य अनन्तरं पुनः द्वितीयरूपाधारे प्रवेशः – इत्येवं रीत्या शिक्षार्थी आरम्भव्यवहारात् अन्तिमव्यवहारं प्राप्नोति।

श्रीमद्भगवद्गीता रेखीयाभिक्रमिताधिगमस्य सजीवोदाहरणमस्ति। तत्र सोपानत्वेन एकैकः अध्यायः अस्ति। अर्थात् अष्टादशसोपानानि सन्ति। शिक्षार्थी अस्ति अर्जुनः। पुनर्बलनं ददाति स्वयं श्रीकृष्णः। आदौ अर्जुनविषादयोगे अर्जुनः युद्धं कर्तुम् अनिच्छुकः आसीत्। तदा श्रीकृष्णः अर्जुनं जागरयितुं स्थितप्रज्ञस्य ज्ञानम् अददात्। तत्र श्रीकृष्णः अवदत्- मनसि स्थितकामान् विहाय लक्ष्ये अवधानं दातव्यम्। लक्ष्यं स्थिरं भवेत्। अतः बुद्धिः अपि स्थिरा स्यात्। विचलितया बुद्ध्या मानवः लक्ष्यभ्रष्टः भवति।

[1]क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

पुनः अर्जुनस्य मनसि प्रश्नः जायते –

[2]ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव॥

एतस्य उत्तररूपेण श्रीकृष्णः वदति –

[3]लोकेऽस्मिन्द्विधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्।

युद्धक्षेत्रे युद्धविमुखम् अर्जुनं युद्धे अभिप्रेरयितुं मोहमुक्त्यर्थं श्रीकृष्णः उवाच- आदौ इन्द्रियाणां वशीकरणं कर्तव्यम्। कामनायाः वासस्थानं मनः, बुद्धिः, इन्द्रियाणि च । रजोगुणात् कामनायाः उत्पत्तिर्भवति। कामनया ज्ञानं नश्यति, राग-मोह-सुख-दुःखादयश्च उपजायन्ते। अतः कामनायाः त्यागं कृत्वा लक्ष्ये अवधानं दद्युः। अर्जुनं युद्धाभिमुखं कर्तुं श्रीकृष्णेनोक्तम् – यः पुरुषः शास्त्रविधिं त्यक्त्वा स्वेच्छया जीवनं यापयति सः न तु सिद्धिं प्राप्नोति न तु परमगतिमाप्नोति। अतः कर्तव्याकर्तव्यविषये शास्त्रमेव प्रमाणम्। युद्धमेव क्षत्रियाणां क्षात्रधर्मः। शास्त्रे सर्वाभ्यः जातिभ्यः स्वकर्तव्यस्योल्लेखः अस्ति। स्वकर्तव्यात् मनुष्यः बिभेति अथवा त्यक्त्वा पलायते चेत् नरके तस्य स्थानं भवति। अतः स्वकर्तव्यस्य पालनं कर्तव्यम्। परमात्मना प्राणिनाम् उत्पत्तिः, प्राणिभिः व्याप्तः अयं संसारः। निरन्तरम् एकीभावेन परमात्मनः स्मरणं कर्तव्यम्। निरन्तरं परमात्मनः स्मरणेन बुद्धिः

---

[1] भ. गीता, २- अध्याय, श्लोक सं - ६३

[2] भ. गीता, ३- अध्याय, श्लोक सं -१

[3] भ. गीता, ३- अध्याय, श्लोक सं - २


ISSN: 2320-740X

स्थिरा भवति, विषयेषु अनासक्तिः भवति तथा च अज्ञानता दूरीभवति। वस्तुतः यः पुरुषः अहम् इति भावस्य त्यागं कृत्वा सर्वत्र परमात्मानम् एव पश्यति, सः एव वास्तविकरूपेण मोहमुक्तः भवति। अतः सर्वाणि कार्याणि भगवति समर्प्य स्वलक्ष्ये स्वकर्तव्ये च अवधानं दातव्यम्। अर्थात् युद्धं करणीयम्। विजयी भवति चेत् राज्यसुखं प्राप्नुयात्, नो चेत् मोक्षं प्राप्नुयात्।

आह च भगवान्-

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा।
निराशी निर्ममो भूत्वा युद्ध्यस्व विगतज्वरः॥

एवम् अन्ते अर्जुनस्य मोहः संशयाश्च दूरीभूताः। इत्थम् आदौ युद्धविमुखः अर्जुनः अन्तिमे युद्धं कर्तुं उद्युक्तः। अर्थात् आत्मज्ञानं सम्प्राप्य तस्य व्यवहारस्य परिवर्तनं जातम्। अभिक्रमिताधिगमस्य लक्षणमपि एवमस्ति यत् लघु-लघु-सोपानैः सम्यक् ज्ञानं सम्पाद्य लक्ष्यप्राप्त्यर्थम् अग्रे गमनम्।

**रूपाधाराः**

| 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 |
|---|---|---|---|---|---|---|---|---|---|
| अर्जुनविषादयोगः (युद्धे अनिच्छुकः अर्जुनः ) | सांख्ययोगः (ज्ञानम्+उद्दीपनम्+अनुक्रि-या) | कर्मयोगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | ज्ञानकर्मसन्न्यास-योगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | कर्मसन्न्यासयोगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | आत्मसंयमयोगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | ज्ञानविज्ञान-योगः (ज्ञानम्+उद्दीपनम्+अनु-क्रिया) | अक्षरब्रह्म-योगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | राजविद्याराज-गुह्ययोगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | विभूतियोगः (ज्ञानम्+उद्दीप-नम्+अनुक्रिया) |

अधिगममार्गः

पूर्वव्यवहारः

(युद्धे अनिच्छुकम् अर्जुनम् अभिप्रेरयितुं भगवता श्रीकृष्णेन आश्रिताः विविधाः प्रयासाः)

| 11 | 12 | 13 | 14 | 15 | 16 | 17 | 18 |
|---|---|---|---|---|---|---|---|
| विश्वरूपदर्शनयोगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | भक्तियोगः (ज्ञानम्+उद्दीपनम्+अनुक्रिया) | क्षेत्रक्षेत्रज्ञविभाग-योगः(ज्ञानम्+उद्दीप-नम्+अनुक्रिया) | गुणत्रयविभागयोगः (ज्ञानम्+उद्दीप-नम्+अनुक्रिया) | पुरुषोत्तमयोगः (ज्ञानम्+उद्दीप-नम्+अनुक्रिया) | दैवासुरसम्पद्विभाग-योगः(ज्ञानम्+उद्दीप-नम्+अनुक्रिया) | श्रद्धात्रयविभागयोगः (ज्ञानम्+उद्दीप-नम्+अनुक्रिया) | मोक्षसन्न्यासयोगः (युद्धं कर्तुं सज्ञातः अर्जुनः) |

अधिगममार्गः

अन्तिमव्यवहारः

भगवद्गीतायाम् अभिक्रमिताधिगमस्य रूपरेखा

**********

# जैनदर्शने कर्मविवेचनम्

✍ कु. शुभम् हातगिणे
शिक्षाशास्त्रिद्वितीयवर्षम्

मनुष्यः जीवने बहुविधकार्याणि साधयति। तत्र प्रत्येकमपि कार्यं सः सोद्देश्यं सम्पादयति। प्रतिपदं किमुचितं किमनुचितम् इत्यत्रापि तस्यावधानं भवत्येव। परन्तु सर्वाणि अपि कार्याणि सफलानि भवन्ति इति नास्ति, कानिचन विफलानि अपि भवन्ति। तत्र सामान्यतया विचारयामश्चेत् प्रयत्न एव बलवान्। परन्तु सूक्ष्मेक्षिकया अवलोकनेन नैके विचाराः उद्भवन्ति, यथा कार्यकारणसम्बन्धः, कर्त्ता, निमित्तं, कालः इत्यादयः।

विषयेऽस्मिन् बहवो हि जनाः बहून् विचारान् सिध्दान्तान् प्रतिपादितवन्तः। तेषु सिध्दान्तेषु मतान्तराणि दृश्यन्ते, तेषां मूलं तु दर्शनमेव। "दृशिर् प्रेक्षणे" धातोः ल्युट् प्रत्यययोगे दर्शनपदमिदं सिध्यति। अस्माकं भारतीयदर्शनेषु तु सन्ति विविधदर्शनानि। विविधविषयेषु विविधमतानि निरुपितवत्सु तेषु अन्यतममिदं जैनदर्शनम्।

जिनमतप्रवर्तकत्वेन चतुर्विंशतिस्तीर्थङ्कराः वर्तन्ते। तीर्थङ्करस्य जिनः इत्यपरं नाम। विजेता जिगीषुर्वा इत्यर्थः जिनशब्दस्य, एते तीर्थङ्कराः मोहरागद्वेषादीन् जित्वा मोक्षं प्राप्नुवन्ति अत एव जिनः इत्यपरं नाम भवति। जिनस्य दर्शनं जैनदर्शनमिति, अर्हद्दर्शनमित्यपि नामान्तरमस्य जैनदर्शनस्य। अस्मिन् दर्शने विद्यमानेषु चतुर्षु अनुयोगेषु करणानुयोगे कर्मविवेचनं विद्यते। प्रत्येकमपि जीवः स्वयोग्यतानुगुणं नैकविधकार्येषु रतः भवति। कस्य जीवस्य जन्म कुत्र भवति? किं करोति? किं प्राप्नोति? कदा मरणं प्राप्नोति? जीवस्य संसारमोक्षयोः प्राप्तिः इत्येतेषु सर्वेष्वपि कार्येषु कारणं भवति कर्म। तत्र कर्मस्वरूपं,तद्भेदाः, तत्कार्याणि, प्रकृति-स्थिति-अनुभाग-प्रदेशबन्धाः एतेषां विस्तृतविवरणं प्राप्यते। प्रत्येकस्मिन् कार्ये वयं भाग्यं, दैवम् इति वदामः तदेव कर्मेति कथ्यते।

करणानुयोगे नैके ग्रन्थाः विद्यन्ते। तेषु ग्रन्थेषु तैः तैः आचार्यैः स्वशैल्या व्याख्यानं विहितमस्ति। जीवस्य मनोवचनकायरूपप्रवृत्यनुगुणं कर्मबन्धनं भवति। जीवः कः इति पृष्टे सति **"उपयोगो लक्षणम्"** इति तत्त्वार्थसूत्रे आचार्येण उमास्वामिना प्रोक्तम्। उपयोगः नाम चैतन्यमिति।

तर्हि कर्म नाम पुद्गलद्रव्यनिष्पन्नः पौद्गलिकपरमाणूनां समूहः इति। **"आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः"** इति अष्टौ कर्माणि। एतेषु कर्मसु आदिमानि चत्वारि कर्माणि घातिकर्मेति तथा अन्तिमानि चत्वारि कर्माणि अघातिकर्मेति उच्यन्ते। तेषां विवरणमेवं वर्तते-


ISSN: 2320-740X

१) **ज्ञानावरणम्** – यत् कर्म जीवस्य ज्ञानगुणम् आवृणोति तत्कर्म ज्ञानावरणमिति।

२) **दर्शनावरणम्** – जीवस्य दर्शनगुणम् आवृणुतः कर्मणः नाम दर्शनावरणमिति।

३) **वेदनीयम्**- येन कर्मणा जीवः सुखदुःखयोः अनुभवं प्राप्नोति तत्कर्म वेदनीयमिति।

४) **मोहनीयम्**- यत्कर्म जीवस्य मोहरागद्वेषादीनां भावानाम् उत्पत्तौ निमित्तं भवति तत्कर्म मोहनीयमिति उच्यते।

५) **आयुः**- येन कर्मणा जीवेन मनुष्यायुः देवायुः नरकायुः तिर्यञ्चायुश्च प्राप्यते तत्कर्म आयुः इति नाम्ना कथ्यते।

६) **नाम**- यत्कर्म जीवस्य शरीरादीनाम् आकारावगानयोः निर्धारणं करोति तन्नामेति।

७) **गोत्रम्**- येन कर्मणा जीवः उच्चनीचगोत्रं प्राप्नोति तत् गोत्रकर्मेति।

८) यत् कर्म जीवस्य दानलाभोपभोगवीर्यादिकार्येषु बाधां जनयति तत्कर्म अन्तरायः इति।

एतैः कर्मभिः जीवः यावत्पर्यन्तं बद्धः भवति तावत्पर्यन्तं संसारे एव तिष्ठति । एतैः कर्मभिः मुक्तो भवितुं रत्नत्रयप्राप्तिरेव उपायः वर्तते। सम्यग्दर्शन-ज्ञान-चारित्रमिति रत्नत्रयम् । यदा जीवः आत्मनि सम्पूर्णरीत्या विश्वसिति तदा सः सम्यग्दर्शनं प्राप्नोति । आत्मनः ज्ञानमेव सम्यग्ज्ञानम् आत्मनि स्थिरता एव सम्यक्-चारित्रमिति।

इत्थं कर्मणां संक्षिप्तविवरणं प्रोक्तम् । अस्य विषयस्य सम्यग्ज्ञानं प्राप्य वयमपि कर्मरहिताः भवेम तथा शीघ्रातिशीघ्रं मोक्षपदं प्राप्नुमः इत्यनया भावनया विरमामि।

***********

## गर्वभञ्जनम्

✍ कु. सुजाता नायक्
शिक्षाशास्त्रिद्वितीयवर्षम्

“विलियं जेमस्” कश्चन आङ्ग्लपर्यटकः । सः विभिन्नदेशेषु अटित्वा तस्य तस्य देशस्य वैशिष्ट्यं तथा धर्मस्थलानां, तीर्थस्थलानां च दर्शनं करोति। एकदा सः भारतं प्रति आगतवान् आसीत् । तदवसरे सः सुप्रसिद्धपुरीजगन्नाथादिमन्दिरस्य दर्शनार्थं पुरीम् अगच्छत् । तदा तेन दृष्टं यत् तत्र आगताः भक्ताः भगवति विभिन्ननैवेद्यानि अर्पयन्ति, यथा फलवस्त्रादीनि । तदा तेन चिन्तितं यत् मयापि किमपि अत्र अर्पणीयम् इति। परन्तु किं दातव्यम् ? एते तु निर्धनाः यत्किञ्चित् ददति। मया

किमपि विशिष्टं दातव्यम् । इति मत्वा सः तत्रत्यः मुख्यपूजकम् अपृच्छत् यत्, भगवते मया किं दातव्यम् इति । तदा पूजकस्य मनसि अपि किमपि एतस्मिन् विषये न अस्फुरत् । अतः सः श्वः वदिष्यामि इति उक्तवान् ।

तस्मिन् रात्रौ सः पूजकः कञ्चन स्वप्नम् अपश्यत् यत्, भगवान् जगन्नथः तस्मात् आङ्ग्लपर्यटकात् एकं ताम्बूलम् इच्छति इति । तस्मिन् ताम्बूले हस्तिनः मणिना निर्मितं सुधाचूर्णं लेपनीयम् इति ।

प्रातः सः पूजकः झटिति स्वीयस्वप्नविषये आङ्ग्लपर्यटकम् उक्तवान् । तदा पर्यटकः सम्भ्रान्तः जातः । हस्तिनः मणिः कुतः आनेतव्यः इति । यद्यपि हस्तिनं क्रेतुं मम सामर्थ्यम् अस्ति परन्तु सर्वासु हस्तिषु मणिः न लभ्यते । शतेषु सहस्रेषु वा एकः मणिः लभेत् । परन्तु मया कति वा हस्तीनि क्रेतुं शक्यन्ते । भगवान् मत्तः एकं लघुताम्बूलमेव इच्छति परन्तु अहं तदपि दातुम् अयोग्यः असमर्थश्च अस्मि इति बोधनं जातम् । बहु धनमस्ति इत्यतः बहु विशिष्टं किमपि दास्यामि इति चिन्तितोऽहम् एकं ताम्बूलमपि दातुं मम सामर्थ्यं नास्ति इति सः ज्ञातवान् । मम सविधे विद्यमानस्य धनस्य विषये मम यः गर्वः आसीत् तस्य कथं भगवता भञ्जनं कृतम् इति तेन अवगतम् । सर्वम् अवगते सति तस्य नेत्राभ्याम् अश्रूणि न्यपतन् ।

तदा तत्रत्यः पूजकः अपि उक्तवान् यत्, भगवति यदि किमपि अर्पणीयं तर्हि तत् भक्त्या एव अर्पणीयं न तु अहङ्कारात् । भक्त्या यत् किमपि अर्पयति चेत् भगवान् तत्सर्वं सहर्षं स्वीकरोति । भगवता एव उक्तमस्ति –

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।**
**तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥**

तत् सर्वं श्रुत्वा पर्यटकः शुद्धमनसा भक्त्या च भगवते साधारणम् एकं पानम् अर्पयित्वा आत्मानं धन्यम् अमन्यत ।

**********

## शिक्षामुपकुर्वन्ति शिक्षणविधयः

✍ **कु. सुशील-लोहनी**
शिक्षाशात्री द्वितीयवर्षम्

अध्यापनं नाम काचित् कला । भारते वैदिककालादारभ्य अध्यापनाय केचन शिक्षणविधयः

वर्तन्ते, तेषु केचन प्राचीनाः नवीनाश्च सन्ति । दैनिकजीवने पाकादिक्रियाः प्रशस्ताः, तासु पाकादिक्रियासु समीचीनाः विधयः पद्धत्यः वा नाश्रिताश्चेत् कुशलक्रियाः सम्पन्नाः न भवेयुः। शिक्षाबोधनेऽपि छात्राणां मानसिकविकासार्थं समीचीनाः विधयः आश्रयणीयाः । विधिः नाम इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यमिति तार्किकादयः । आङ्ग्लभाषायां (METHOD) इति शब्देन विधिरिति अर्थः स्वीक्रियते । शिक्षाक्षेत्रे शिक्षणस्य प्रकाराः अथवा पद्धत्यः एव शिक्षणविधयः (TEACHING METHODS) भवन्ति । येन प्रकारेण शिक्षकः छात्रेभ्यः ज्ञानं प्रददाति, सः प्रकारः एव शिक्षणविधिरिति अभिधीयते । "शिक्षणविधिः" इति शब्दस्य प्रयोगः अतिव्यापकार्थे भवति । अस्यैकस्मिन् पक्षे तु नैकाः प्रणाल्यः योजनाः वा समुपलभ्यन्ते। अपरस्मिन् पक्षे शिक्षणस्य बह्व्यः प्रक्रियाः अपि विद्यन्ते । कदाचित् जनाः युक्तीः स्वीकृत्य ता अपि विधिरूपेणैव स्वीकुर्वन्ति परन्तु एतत् अयुक्तम् । युक्तयः कस्यापि विधेः अङ्गरूपेण भवितुं शक्यन्ते, न तु पूर्णतया विधिरेव । एका एव युक्तिः नैकेषु विधिषु प्रयोक्तुं शक्यते ।

**शिक्षणस्य विविधविधयः-**

निगमनात्मकम् आगमनात्मकञ्च पाठ्यविषयं प्रस्तोतुं प्रकारद्वयं भवितुं शक्यते । तत्र एकस्मिन् प्रकारे छात्रेभ्यः सामान्यं किमपि सिद्धान्तमुक्त्वा तस्य निरीक्षणाय पुष्ट्यर्थं वा अनेकानि उदाहरणानि दीयन्ते। अपरस्मिन् प्रकारे आदौ नैकानि उदाहरणानि छात्रेभ्यः दीयन्ते तदा छात्रैः कश्चन सामान्यः नियमः निर्मीयते। अत्र प्रथमः प्रकारः निगमनात्मकविधिः तथा द्वितीयः अपरः आगमनात्मकविधिरिति उच्यते ।

संश्लेषणात्मकविधिः विश्लेषणात्मकविधिः च अनया दृष्ट्या शिक्षणविधीनां भिन्नः कश्चन विधिरिति वक्तुं शक्यम् । यदि पाठ्यक्रमोपस्थापनस्य शैली एवं भवति यत्र आदौ अङ्गानां ज्ञानं दत्वा तत्पश्चात् पुनः पूर्णवस्तुविषयस्य वा ज्ञानं दीयते चेत् एषा शैली संश्लेषणात्मकविधिरिति उच्यते। यथा- प्राथमिकस्तरे हिन्दीभाषायाः पाठनसन्दर्भे आदौ वर्णमालायाः ज्ञानं दीयते अनन्तरं शब्दानां तत्पश्चात् शब्दानां वाक्यप्रयोगस्य च ज्ञानं दीयते । परन्तु यदि अस्य विपरीतक्रमः आश्रीयते अर्थात् सर्वादौ वाक्यप्रयोगः पश्चात् शब्दज्ञानं तथा अन्तिमे वर्णानां ज्ञानं दीयते चेत् एषः विश्लेषणात्मकविधिः भवति । अस्मिन् विधौ पूर्णात् अङ्गानां प्रति गम्यते।

प्रत्यक्षविधिः अथवा वस्तुप्रदर्शनविधिः अप्यस्ति । "मूर्तात् अमूर्तं प्रति" अस्ति शिक्षणस्य प्रसिद्धमिदं सूत्रम् । बाह्यवस्तूनाम् अथवा दृश्यमानस्य प्रपञ्चस्य ज्ञानम् अस्माभिः ज्ञानेन्द्रियाणां माध्यमेनैव प्राप्यते, तदपि प्रामुख्येन नेत्रयोः माध्यमेन। कस्यापि वस्तुनः दर्शनेनैव तस्य सामान्यपरिचयः अयत्नेन (यत्नं विना) अतिसारल्येन च अस्माभिः प्राप्यते । अतः मूर्तवस्तु एव ज्ञानप्रदानाय सर्वोत्तमं

साधनं वर्तते। अत एव प्रारम्भिकस्तरीयबालकेभ्यः अनेन विधिना पाठ्यते।

प्रसिद्धः दृष्टान्तविधिरपि बहुत्र उपयुज्यते । यथा वस्तुविधौ मूर्तवस्तूनां माध्यमेन अमूर्तविषयवस्तुनः ज्ञानं दीयते तथैव अस्मिन् विधौ विषयसम्बन्धितकथा-हास्यकणिका-उदाहरणादि माध्यमेन विषयवस्तुनः स्पष्टीकरणं क्रियते।

पाठ्यांशे काठिन्यनिवारणार्थं व्याख्यानविधेः उपयोगः प्रसिद्धः। परन्तु अस्मिन् विधौ अधिकांशतः छात्राः निष्क्रियश्रोतारः भूत्वा उपविशन्ति, तेन प्रभावशाल्या रीत्या पाठनं न भवति अतः निम्नस्तरेषु केषुचिदेव स्थलेषु अस्य प्रयोगः क्रियते । हरबर्ट स्पेंसर् महाशयोऽपि एवं ब्रवीति यत् बालकेभ्यः अल्पमेव वक्तव्यं, ते स्वतः स्वकीयानुभवेनैव अधिकाधिकतया ज्ञानं प्राप्नुयुः। परन्तु उच्चस्तरीयकक्ष्यासु व्याख्यानविधिरेव लाभदायकः इति मन्यते।

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**
**आक्षेपश्च समाधानं व्याख्यानं षड्विधं स्मृतम्॥**

छात्रेभ्यः प्रश्नोत्तरविधिद्वाराऽपि पाठनं क्रियते । पाश्चात्यविद्वान् सुकरातः अस्य प्रवर्तकः। अस्मिन् विधौ छात्राः सक्रियाः भवन्ति अतः विधिरयमपि प्रसिद्धिमवाप्नोत्।

साम्प्रतिके काले शिक्षाक्षेत्रे छात्रकेन्द्रितशिक्षायाः महत्वं मत्वा अधिकं बलं दीयते न तु पाठ्यवस्तुनः । छात्राः सक्रियाः भूत्वा अनुभवानां माध्यमेन अधिगमं प्राप्नुयुः । एतादृशाः प्रयासाः सर्वदा क्रियमाणाः वर्तन्ते। तत्र एतादृशाः विधयः प्रामुख्यं वहन्ति। सक्रियविधिषु बहवो हि विधयः अन्तर्भवन्ति। यथा- शोधविधिः(ह्यूरिस्टिक्), योजनाविधिः(प्रोजेक्ट्), डाल्टन् प्रणाली, बेसिकशिक्षाविधिः इत्यादयः। संस्कृतशिक्षणाय अपि प्रसिद्धाः काश्चन विधयः सन्ति। यथा-परम्परागतविधिः, भण्डारकरविधिः, पाठ्यपुस्तकविधिः, प्रत्यक्षविधिः, वार्तालापविधिः, समाहारविधिः, मूल्याङ्कनविधिः, आगमननिगमनविधीः, दण्डान्वयखण्डान्वयविधीः, अन्वय-व्यतिरेकविधिरित्यादयः।

**********

## श्रीमद्भगवद्गीतायां बालकानां व्यक्तित्वविकासः कथं सम्भवति?

✍ कु. मोहित जोशी
शिक्षाशास्त्री द्वितीयवर्षम्

“श्रीमद्भगवद्गीता” कथं बालकानां व्यक्तित्वविकासे उपकरोतीति,अस्य लेखनस्य मुख्योद्देश्यम्।


ISSN: 2320-740X

बालस्य व्यक्तित्वविकासे तस्य शारीरिकमानसिकाध्यात्मिकसद्गुणानाम् , बुद्धेः , रुचेश्च अभिवर्धनमावशयकम् । भगवद्गीता पठनेन तस्य अवगमनेन च कथं लाभाः भवन्तीति आलोचना क्रियते ! यथा –

शारीरिकविकासः – शारीरिकविकासे वंशानुक्रमस्य प्रभावः दरीदृश्यते । व्यक्तित्वविकासे "थाईरयड्-पिटुइटरि-आड्रिनाल" इत्यादिना ग्रन्थीनां भूमिका महत्त्वपूर्णा वर्तते । यथा- थाईरयड ग्रन्थेः न्यूनसक्रियत्वात् व्यक्तिः वामना दुर्बला च भवति , तथैव अतिसक्रियत्वात् शरीरे कम्पनं भवति । यथोचितसक्रियत्वात् स्वास्थ्यमुन्नतं भवति, बुद्धेः विकासश्च जायते । एड्रिनालग्रन्थिना जातः स्रावः व्यक्तये शक्तिं प्रददाति । पुनः पिटुइटरिग्रन्थेः अधिकक्षरणेन व्यक्तिः उन्नता भवति न्यूनक्षरणेन वामना भवति, एवञ्च बालवत् आचरति । शारीरिकविकासायैतासां ग्रन्थीनां समुचितसक्रियतावश्यकी । एतासां सक्रियताभ्यः पौष्टिकाहारः , समुचितनिद्रा च अपेक्ष्यते । भगवद्गीतायामस्मिन् विषये निर्देशोऽस्ति । तत्र समुचिताहारः नाम सात्विकाहारः । उक्तञ्च भगवता श्रीकृष्णेन –

**"युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।**
**युक्तस्वप्नावबोधस्य योगी भवति दुःखहा ॥" (श्रीमद्भगवद्गीता – ६/१७)**

मानसिकविकासः – इदानीन्तनकाले बालकाः यानि इच्छन्ति तानि यदि न प्राप्नुवन्ति तर्हि तेषां मनसि खेदः जायते । एतद् कथनं सर्वेषां कृते प्रयुज्यते । वारं-वारम् ईप्सितवस्तुनि अप्राप्ते सति मनसि खेदः उत्पद्यते । व्यक्तिः तदा नकारात्मकं चिन्तनं करोति । क्रोधः उपजायते । तेन बुद्धिर्भ्रष्टा भवति । बुद्धिभ्रंशेन व्यक्तिः नश्यति । तदेव उक्तं श्रीमद्भगवद्गीतायाम् –

**" ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥" (श्रीमद्भगवद्गीता – २/६२)**
**" क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥" (श्रीमद्भगवद्गीता – ६/६३)**

आध्यात्मिकविकासः - सम्पूर्णभगवद्गीताध्यात्मिकज्ञानस्य पृष्टभूमिः । अर्जुनः श्रीकृष्णं पृच्छति – "किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तमः" इति । अजुर्नस्य प्रश्नस्य उत्तरं भगवता प्रदत्तम् "अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते" । परममक्षरम् सच्चिदानन्दघनपरमात्मा ब्रह्मेति उच्यते । भगवता उक्तम् – यः पुरुषः मृत्युकाले मां स्मरति, सः साक्षात् परमात्मानं प्राप्नोति । निरन्तरं परमात्मनः चिन्तनेन बुद्धिः स्थिरा भवति, विषयेषु अनासक्तिः भवति, अज्ञानं दूरीभवति । यः पुरुषः "ॐ" इत्यक्षरस्य उच्चारणं कुर्वन् शरीरं त्यजति सः पुरुषः अवश्यमेव परमगतिमाप्नोति । एवमेव मानवः मृत्युसंसारात् मुक्तः भवति ।

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥" (श्रीमद्भगवद्गीता – १४/५)
"सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥" (श्रीमद्भगवद्गीता – १४/९)

प्रकृतिसम्भवा एते गुणाः अविनाशिजीवात्मानं शरीरे बध्नन्ति। सत्त्वगुणः जीवात्मानं सुखस्य आसक्तेन ज्ञानस्याभिमानेन बध्नाति। राजसिकपुरुषः कामनासक्तो भवति। सः फलस्येच्छां करोति। तस्य सांसारिकविषयेषु आसक्तिः भवति। तामसव्यक्तिः अज्ञानी, अलसः, उदासीनश्च भवति।

बुद्धेः विकासः – बुद्धिः परिवेशात् सङ्गतिवशाच्च प्रभवति। यथा - सामान्यबुद्धियुक्तः जनः यदि अधिकबुद्धियुक्तजनेन सह भवति, तर्हि तस्यापि बुद्धेः विकासः भवति। भारतीयदृष्ट्यानुसारं बुद्धिः गतिशीला भवति। बुद्धेः गत्यनुसारं मनः मोहयुक्तं, कामनायुक्तं, चञ्चलञ्च भवति। बुद्धिः स्थिरा भवति चेत् मनः अपि स्थिरम् , नियन्त्रितञ्च भवति। मनः नियन्त्रितं भवति चेत् तस्य व्यक्तित्वं स्थितप्रज्ञं भवति। भगवान् श्रीकृष्णः वदति बुद्धिमान् पुरुषः ज्ञानी भवति। ज्ञानीजनः जन्ममृत्युरूप-संसारबन्धनात् मुक्तो भवितुमिच्छति। बुद्धिः यदा मोहयुक्ता भवति तदा व्यक्तिः अमृतत्वं प्राप्नोति।

रुचेः अभिवर्धनम् – बालकानां रुचेः अभिवर्धनायापि भगवद्गीता साहाय्यं करोति। विभिन्नेषु कार्येषु बालकानां रुचिर्भवति। कार्येषु बालकानां रुचिः न भवति चेत् , तेभ्यः अभिप्रेरणा दातव्या। यथा – श्रीमद्भगवद्गीतायां युद्धविमुखाय अर्जुनाय, युद्धे तस्य अभिरुचिवर्धनाय श्रीकृष्णः तस्मै अभिप्रेरणां दत्तवान्। क्षत्रियाणां कृते युद्धमेव क्षात्रधर्मः भवति। कर्तव्याकर्तव्यविषये शास्त्रमेव प्रमाणम्। यः पुरुषः स्वेच्छया कार्यं करोति, सः न तु सिद्धिं प्राप्नोति न वा परमगतिम्। अतः स्वकर्तव्याकर्तव्यविषये व्यक्तिः सचेतना भवेत्। स्वकर्तव्ये व्यक्तेः रुचिः न भवति चेत् अभिप्रेरणा दातव्या। यथा- श्रीकृष्णः युद्धविमुखाय अर्जुनाय दत्तवान्।

**********

## वैद्यकीयशिक्षणे तान्त्रिकशिक्षणे च संस्कृतस्य प्रासङ्गिकता

✍ कु. रोहितकुमारः
शास्त्रितृतीयवर्षम्

सम्प्रति भारते संस्कृतस्य स्थितिः कथम् अस्ति इति विचार्यते चेत् नितान्तं शोचनीया


ISSN: 2320-740X

परिस्थितिः । यतः सा देववाणी केवलं गुरुकुलेषु, मठेषु, पारम्परिकसंस्थासु, साम्प्रदायिककेन्द्रेषु, वैरल्येन देवालयेषु कथञ्चित् जीवन्ती वर्तते इति खेदस्य विचारः । एतेन सहैव सैव वाणी विश्वविद्यालयादिशिक्षणसंस्थासु विद्यालयेषु शोधविभागेषु ताडपत्रग्रन्थालयेषु प्राणान् धरन्ती कथञ्चित् जीवतीति विषयः कस्यापि देशभक्तस्य हृदयं द्रवीकरोति एव नेत्रणि अश्रुपूर्णानि करोति एव इति न चित्रम् । नितान्तं दुःखस्य विषयः या भाषा देववाणी, सुरगीः, जनगीरासीत्, या भाषा सर्वासामपि ज्ञानशाखानां स्त्रोतः आसीत्, या भाषा वेदवेदान्तेतिहासपुराणशास्त्रकाव्यकलादीनां जीवितभूता आसीत्, किं बहुना भारतीयजीवनपद्धतेः सर्वावयवसुन्दरी आसीत् यस्यां ज्ञानप्रपञ्चः सुस्थिरः आसीत्, यया ऋषयः स्वीयानि सत्यचिन्तनानि लोकाय समर्पयामासुः, यस्यै सम्पूर्णमपि जीवितं प्रेरयामासुः, यस्याः आत्मज्ञानं प्राप्य मोक्षमवापुः, यस्याः कीर्तिः आचन्द्रार्कं चिरं जीवतीति विश्वसन्तः अग्रिमेषु संस्कृताध्ययनं किमर्थम् ? इत्युक्तौ अस्मासु तस्याः सम्प्रति का वा आवश्यकता अध्ययनस्येति प्रश्नः दुःखमेव जनयति ।

मित्राणि ! भारतस्य सर्वतोमुखविकासः काम्यते चेत् विज्ञानतन्त्रज्ञानवैद्यकादिशास्त्राणां लोकानुसारं कालानुसारञ्च प्रासङ्गिकतां विज्ञाय प्रचारप्रसारः करणीयः तत्रापि अध्ययनाध्यनुष्ठानं, संशोधनं विकासः, नवाचाराः (innovation) इत्यादयो विचाराः नितान्तं प्रामुख्यमावहन्ति । एतस्मिन् विषये तत्र ये छात्राः युवानः संशोधकाः प्राध्यापकाश्च सन्ति तेषां प्रात्रं नितान्तं महत्वमावहति ।

सम्पूर्णे जगति जनाः कारणत्रयं मनसि निदधानाः जीवमानाः भवन्ति । मनोरञ्जनं, आरोग्यं, ज्ञानम् इति । तानि त्रीणि भवन्ति अत्र सर्वत्रापि वैद्यकीयतान्त्रिकजनानां नितान्तं योगदानं भवति । यदि वयं वैद्यकीयतान्त्रिकजनान् प्रति संस्कृतं पाठयामः तर्हि निरायासं वयं तेषां माध्यमेन सम्पूर्णमपि जगद्व्याप्तुं शक्नुमः । अतस्तेषां संस्कृताध्ययनमत्यावश्यकमस्ति ।

सम्प्रति वयं Electronics युगे वा Computer युगे वा केवलं न स्मः । अयञ्च कालः Post mordernage इति कथ्यते । केवलं Information science इत्यस्य Bio Science(I-Technology, B-Technology) इत्यस्य अयं कालः न । अयं तु Knowledge Technology कालः । सम्प्रति सर्वत्रापि Knowledge Technology विचाराः प्रवर्तन्ते, विज्ञानतन्त्रज्ञानमाध्यमेन यदि भवन्तः संस्कृतस्य प्रासङ्गिकताम् अवाप्तुं कामयन्ते तर्हि वैद्यकीयशिक्षणे तान्त्रिकशिक्षणे च संस्कृताध्ययनमध्यापनञ्चानिवार्यम् ।

अस्मिन् काले संस्कृतस्थितिः कालानुसारं नास्ति । वयं संस्कृतजनाः विज्ञानतन्त्रज्ञानादीनां ज्ञानाभावात् Social media, Technology software निर्माणं, App निर्माणं,

Interdisciplinary & Research Knowledge Exposure, Linguistic techniques, Innovative Ideology इत्यादिक्षेत्रेषु नितान्तं दूरे एव स्मः । एवमेव यदि अस्माभिर्जीव्यते जगदस्मान् परित्यज्य अग्रे सरेत् । कालप्रासङ्गिकतां कामयन्ते चेत् कुतो विलम्बः विज्ञानतन्त्रज्ञानक्षेत्रेषु संस्कृताध्ययनाध्यापनाय। अतो वा ते पाठनीयाः एव।

**काचिद्भाषा तदा नाशमवाप्नोति यदा एतान् पञ्चविषयान् उपेक्षते -**

१) संशोधनादिक्षेत्रेषु भाषाचिन्तनस्याभावः यदि स्यात्।

२) प्राथमिकादिविश्वविद्यालयपर्यन्तं यदि भाषायाः अध्ययनाध्यापनं नास्ति।

३) कालानुसारं वर्धमानस्य विज्ञानतन्त्रज्ञानस्य सामञ्जस्यं यदि भाषया न सम्पद्यते।

४) अधिशासने यदि भाषायाः उपयोगः नास्ति।

